CC0. In Public Domain. Digitization by eGangotri

आम्नाय-ग्रन्थालय,
भदैनी, [illegible]
वाराणसी-1

5-1

ક અત્યત

ઊભો છે.

JAGRUT JANAT

• A Collection of L

© વિમલા ઠાકર

પ્રથમ આવૃત્તિ : ૧૯૯

કિંમત : રૂ. ૩/-

પ્રકાશક :

વિમલ સત્સંગ પરિવા
''મૈત્રી'' -૬, સનસે
ગુરુકુળ પાસે, મેમનગ
અમદાવાદ-૩૮૦૦૫

CC0. In Public Domain, Digitization by eGangotri

CC0. In Public Domain, Digitization by eGangotri

३- कर्मकर्तृ प्रक्रिया-३३५

२-भावे प्रयोग-भू-के रूपाख्यान-पृ. ३३१

२- अनु+भू के कर्मणि- रूपाख्यान-पृ. ३३१- ३३२.

स्वा. महादेव अहमदाबाद

ता. ५-१-८६.

४.

१- प्रतीयते त्रिभुवने इति प्राक्- ५४॥ लि. श्री॥ पृ. १६०/ आद्यधातु

२- लुङ् सनोर्घसॢ (२।४।३७)- लुङ्-

हनो वध लिङि (२।४।४२) आशिषि लिङि

लुङि च-(२।४।४३)

लिट् च (३।४।११५) लिट्

लिङाशिषि (३।४।११६) आशीर्लिङ्

स्यतासी लृलुटोः (३।१।३३) लृट्, लृङ्, लुट्

इट्- गुणवृद्धि- निषेध:- १।१।६॥

इट्-निषेध- ७।२।१०॥ एकाच उपदेशे॥

① से "लुङ्" प्रत्यय में केवल आर्धधातुक तो लुङ् को आदेश होने वाले तिबादि सार्वधातुक का/ स्थापक:- लिट् च (३।४।११५) लिङाशिषि (३।४।११६)

१- अँ ह्रस्व-उदात्त-अनुनासिक
२- अ ह्रस्व-उदात्त-अननुनासिक
३- अँ ह्रस्व-अनुदात्त-अनुनासिक
४- अ ह्रस्व-अनुदात्त-अननुनासिक
५- अँ॑ ह्रस्व-स्वरित-अनुनासिक
६- अ॑ ह्रस्व-स्वरित-अननुनासिक
७- आँ दीर्घ-उदात्त-अनुनासिक
८- आ दीर्घ-उदात्त-अननुनासिक
९- आँ दीर्घ-अनुदात्त-अनुनासिक
१०- आ दीर्घ-अनुदात्त-अननुनासिक
११- आँ॑ दीर्घ-स्वरित-अनुनासिक
१२- आ॑ दीर्घ-स्वरित-अननुनासिक
१३- अँ३ प्लुत-उदात्त-अनुनासिक
१४- अ३ प्लुत-उदात्त-अननुनासिक
१५- अँ३ प्लुत-अनुदात्त अनुनासिक
१६- अ३ प्लुत अनुदात्त अननुनासिक
१७ अँ॑३ प्लुत स्वरित-अनुनासिक
१८ अ॑३ प्लुत स्वरित-अननुनासि

लिट् किर्- असंयोगाल्लिट् कित् ॥१।२।
अदित् सार्वधातुक- ङिद्वत्- सार्वधातुक
पित् ॥१।२।४।
कुटा-गाती-रुति-ङि २६४

॥६

CC0. In Public Domain, Digitization by eGangotri

'Master' Manimala Series No. 89 (Vyakaran sec. 10).

THE
LAGHU SIDDHANTA KAUMUDEE

OF
Shri Varadarajacharya.

आम्नाय-ग्रन्थालय,
भारतनिवास, भदैनी
वाराणसी-5

EDITED WITH THE SANSKRIT COMMENTARY
Known as 'Bala Manorama'

By

PT. SHRI SURYA NARAYAN SHUKLA,
NYAYA-VYAKARANACHARYA,
Professor, Govt. Sanskrit College,
BENARES.

PUBLISHED BY
Master Khelarilal & Sons,
Sanskrit Book Depot,
KACHAURI GALI, BENARES CITY.

1937.

Price Rs. Two.

परिवर्धित
मूल्य 2///
काशी

(ALL RIGHTS RESERVED FOR EVER BY THE PUBLISHER).

Publisher—
J. N. YADAVA, PROPRIETOR, MASTER KHELARILAL & SONS,
SANSKRIT BOOK DEPOT, KACHAURIGALI, BENARES.

Printer —
K. B. Pawagi, Hitchintak Press,
Ramghat, Benares City.

आम्नाय-ग्रन्थालय,

'मास्टर' मणिमालाया एकोननवतितमो मणिः (व्याकरणविभागे १०)

श्रीवरदराजाचार्यकृता

लघुसिद्धान्तकौमुदी

काशीस्थराजकीयसंस्कृतपाठशालाध्यापकेन
न्याय-व्याकरणाचार्य—
पं० श्रीसूर्यनारायणशुक्लेन विरचितया परीक्षोपयोगिन्या
'बालमनोरमा'ख्यया टीकया
समलङ्कृता ।

व्याकरणाचार्य पं० ब्रह्मदत्तमिश्रेण
स्वप्रणीतया टिप्पण्या विभूषिता
संशोधिता च ।

सा च
काशीस्थ 'संस्कृतबुकडिपो' इत्यस्याधिपैः
मास्टर खेलाड़ीलाल ऐण्ड सन्स् इत्येतैः
हितचिन्तकाभिधमुद्रणालये
मुद्रापयित्वा प्रकाशिता ।

मूल्यं रूप्यकद्वयम् ।

आम्नाय- ग्रन्थालय,
[illegible] डि. करौंदी
[illegible]सी-5

CC0. In Public Domain, Digitization by eGangotri

आम्नाय-ग्रन्थालय,
रतनिधि, करौंदी
वाराणसी-5

भूमिका

अयि व्याकरणशास्त्रप्रणयिनो विद्वांसः ! सुविदितमेवेदं तत्रभवतां भवतां यत् स्कृतसाहित्यमध्येतुकामानां प्रचरत्यध्ययने द्विविधा प्रणाली । एका अमरकोष-मासचक्र–धातुरूपावली–शब्दरूपावली–काव्यग्रन्थाध्ययनारम्भा, परा च घुकौमुद्यारम्भा । तत्रादिमा परिशीलिता दक्षिणभारतमलंकरिष्णुभिर्दाक्षिणात्यैर्विपश्चिद्भिः । द्वितीया च उत्तरभारतभुवमलंकरिष्णुभिरौत्तराहैर्विपश्चिद्भिः । तत्र प्रणाली-येनाप्यध्येतुकामानां छात्राणामस्त्यनल्पापेक्षा व्याकरणस्य इत्यपि नातिरोहितम् । तोऽमरकोषादिभिः संस्कृतशब्दानां ज्ञानेऽपि इदं साधु न वेति संशयानैरिव स्थीयते ंस्कृतज्ञैः, व्याकरणेन साधुत्वे निश्चिते तु न संशयोन्मेषोऽपीति हृदयेऽनुसंधा-व "काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्" इति कस्यचिद्विपश्चिद्धौरेय-योक्तिर्यथार्थाक्षरा विदुषां मानसं संवदतीव । इत्थं च तत्र श्रीमद्भट्टोजिदीक्षित-विरचिताया वैयाकरणसिद्धान्तकौमुद्या गुरुशरीरतया अनेकवर्षसाध्याध्ययनत्वेन संक्षेपेण शब्दसाधुत्वं ज्ञातुकामानां छात्राणां शास्त्रान्तरे प्रविष्टानां विदुषां च श्रीमद्वरदराजनिर्मिता वैयाकरणलघुसिद्धान्तकौमुद्येवात्यन्तमुपकरोति । तस्याश्च यद्यपि सन्ति बह्व्यो हिन्दीगिरा संस्कृतगिरा चोपनिबद्धाष्टीकाः परन्तु ता न तथा यथार्थ-बोधक्षमा यथेयं बालमनोरमा । अस्यां टीकायां सूत्रार्थसमन्वयपूर्वकं प्रयोगाणां साधुत्वं प्रातिपदिकानां धातूनां च रूपाणि प्रदर्शितानि येनाधुनिकानां छात्राणां सूत्रार्थसमन्वये शब्दरूपविषये च क्लेशो न स्यात् । तावतापि स्थलविशेषे संदिग्ध-सूत्रार्थौ मदन्तेवासिना बस्तीमण्डलान्तर्गत–बखरिया-ग्राम–वास्तव्येन पण्डित-श्रीवंशमणिमिश्रतनूजेन चिरजीविना **व्याकरणाचार्य-श्रीब्रह्मदत्तमिश्रेण** विवृतौ हिन्दीगिरेति महदिदं प्रमोदस्थानम् । बालमनोरमाविरचने महत्साहाय्यमेते-नाप्नुवमिति शुभाशिषा योजयाम्येनमिति ।

विदुषामनुचरः

सूर्यनारायणशुक्लः ।

CC0. In Public Domain, Digitization by eGangotri

लघुकौमुदीस्थ सूत्राणामनुक्रमणिका

१ अइउण् । २ ऋलृक् । ३ एओङ् । ४ ऐऔच् । ५ हयवरट् । ६ लण् । ७ ञमङणनम् । ८ झभञ् । ९ घढधष् । १० जबगडदश् । ११ खफछठथचटतव् । १२ कपय् । १३ शषसर् । १४ हल् । इति माहेश्वराणि सूत्राणि ।

पृष्ठाङ्काः सूत्राणि

[अ]

३५९ अकथितं च १।४।५१
३५३ अकर्तरि च ३।३।१९
३२९ अकर्मकाच्च १।३।४५
२३२ अकृत्सार्वधातु० ७।४।२५
२२ अकः सवर्णे दीर्घः ६।१।१०१
३८१ अक्ष्णोऽदर्शनात् ५।४।७६
२३१ अचस्तास्वत् ७।२।६१
३९१ अचित्तहस्ति० ४।२।४७
११५ अचि र ऋतः ७।२।१००
३०० अचि विभाषा ८।२।२१
१०० अचि श्नुधातु० ६।४।७७
२० अचोऽन्त्यादिटि १।१।६४ टि संज्ञा
९३ अचो ञ्णिति ७।२।११५
३३८ अचो यत् ३।१।९७
३१ अचो रहाभ्यां० ८।४।४६
१६२ अचः ६।४।१३८
२६० अचः परस्मिन् १।१।५७
९० अच्च घेः ७।३।११९
३८० अजाद्यदन्तम् २।२।३३
४१६ अजाद्यतष्टाप् ४।१।४
३२१ अञ्जनगमांसनि ६।४।१६
४१४ अज्ञाते ५।३।७३
३०६ अञ्जेः सिचि ७।२।७१

पृष्ठाङ्काः सूत्राणि

६३ अट्कुप्वाङ्० ८।४।२
८ अणुदित्सवर्णस्य० १।१।६९
२१६ अत आदेः ७।४।७०
३८५ अत इञ् ४।१।९५
४०९ अत इनिठनौ ५।२।११५ इञ् – ठ
२६३ अत उत्० ६।४।११०
२२१ अत उपधायाः ७।२।११६
२२३ अत एकहल्० ६।४।१२०
४१२ अतिशायने० ५।३।५५
१३८ अतो गुणे ६।१।९७
२०० अतो दीर्घो यञि ७।३।१०१
६५ अतो भिस ऐस् ७।१।२
१२० अतोऽम् ७।१।२४
५२ अतो रोरप्लुता० ६।१।११३
२११ अतो येयः ७।२।८०
२२६ अतो लोपः ६।४।४८
२२२ अतो हलादेर्लघोः ७।२।७
२०६ अतो हेः ६।४।१०५
३४३ अतः कृकमि० ८।३।४६
४७ अत्राऽनुनासिकः० ८।३।२
१६६ अत्वसन्तस्य० ६।४।१४
१६४ अदभ्यस्तात् ७।१।४
३ अदर्शनं लोपः १।१।६०

पृष्ठाङ्काः सूत्राणि

१७५ अदस् औ० ७।२।१०७
२६ अदसो मात् १।१।१२
१७५ अदसोऽसेर्दादु० ८।२।८०
२५७ अदिप्रभृतिभ्यः शपः २।४।७२
३६१ अदूरभवश्च ४।२।७०
१४ अदेङ् गुणः १।१।२
२५८ अदः सर्वेषाम् ७।३।१००
१२२ अद्ड्डतरादिभ्यः० ७।१।२५
३६७ अधिकृत्य ४।३।८७
९२ अनङ् सौ ७।१।९३
१० अनचि च ८।४।४७
२०२ अनद्यतने लुट् ।३।३।१५
२०९ अनद्यतने लङ् ३।२।१११
४१२ अनद्यतने र्हिल्० ५।३।२१
३६६ अनश्च ५।४।१०८
१३८ अनाप्यकः ७।२।११२
१६१ अनिदितां हल० ६।४।२४
२५९ अनुदात्तोपदेश० ६।४।३७
१९६ अनुदात्तङित:० १।३।१२
२९३ अनुदात्तस्य चर्दु० ६।१।५९
३२६ अनुनासिकस्य० ६।४।१५
४७ अनुनासिकात्० ८।३।४
३३० अनुपराभ्यां कृञः १।३।७९
३६६ अनुशतिका० ७।३।२०
४१ अनुस्वारस्य० ८।४।५८
३८५ अनृष्यान० ४।१।१०४
३७६ अनेकमन्य० २।२।२४
२४ अनेकाल्शित्० १।१।५५
३८३ अन् ६।४।१६७
४१० अन् ५।३।५

पृष्ठाङ्काः सूत्राणि

७७ अन्तरं बहिर्यो० १।१।३६
३७८ अन्तरबहिर्भ्यांच० ५।४।११७
२२ अन्तादिवच्च ६।१।८५
३५८ अन्यथैवंकथ० ३।४।२७
३४४ अन्येभ्योपि० ३।२।७५
३८४ अपत्यं पौत्र० ४।१।१६२
३२९ अपह्नवे ज्ञः १ ३।४४
३६१ अपादाने पञ्चमी २।३।२८
९२ अपृक्त एकाल्० १।२।४१
१८१ अपो भि ७।४।४८
१०२ अप्तृन्तृच्स्वसृ० ६।४।११
३७१ अप्पूरणी० ५।४।११६
३५५ अ प्रत्ययात् ३।३।१०२
३३६ अभिज्ञावचने० ३।२।११२
३९७ अभिनिष्क्रामति० ४।२।८६
३३७ अभिप्रत्यतिभ्यः० १।३।८०
२६४ अभ्यासस्या० ६।४।७८
२५९ अभ्यासाच्च ७।३।५५
२०२ अभ्यासे चर्च ८।४।५४
६३ अमि पूर्वः ६।१।१०७
९८ अम्वार्थनद्यो० ७।३।१०७
१३४ अम्सम्बुद्धौ ७।१।९९
२४७ अयामन्ताल्वा० ६।४।५५
३४४ अरुर्द्विषदजन्त० ६।३।६७
२७५ अर्तिपिपर्त्योश्च ७।४।७७
३५१ अर्तिलूधूसू० ३।२।१८४
३१८ अर्तिह्रीव्ली० ७।३।३६
५८ अर्थवदधातु० १।२।४५
३७५ अर्धर्चाः पुंसि २।४।३१
३६९ अर्धं नपुंसकम् २।२।२

CC0. In Public Domain. Digitization by eGangotri

...यालय, भारतनिधि, करौंदी वाराणसी-5

पृष्ठाङ्काः सूत्राणि
१४६ अवर्णस्त्रसा० ६।४।२२७
४०१ अर्श आदिभ्योऽच् ५।२।१२७
१२ अलोऽन्त्यस्य १।१।५२
९२ अलोऽन्त्यात्० १।१।६५
३५६ अलंखल्वोः ३।४।१८
३८० अल्पाचतरम् २।२।३४
१२५ अल्लोपोऽनः ६।४।१३४
२४ अवङ् स्फोटा० ६।१।१२३
३९८ अवयवे च० ४।४।१३५
३५६ अवे तृस्त्रोर्घञ् ३।३।१२०
४१५ अव्यक्तानुकरण० ५।४।५७
४१४ अव्ययसर्व० ५।३।७१
३६३ अव्ययं विभक्ति० २।१।१६
३९४ अव्ययात्त्यप् ४।२।१०४
१९४ अव्ययादाप्सुपः २।४।८२
१६४ अव्ययीभावश्च १।१।४१
३६४ अव्ययीभावश्च २।४।१८
३६५ अव्ययीभावेचा० ६।३।८१
३६६ अव्ययीभावे० ५।४।१०७
३६३ अव्ययीभावः २।१।५६
३८२ अश्वपत्यादिभ्यश्च ४।१।८४
१५८ अष्टन आ विभक्तौ ७।२।८४
१४८ अष्टाभ्य औश् ७।१।२१
२५९ असिद्धवदत्राभात् ६।४।२२
२१९ असंयोगाल्लिट् कित् १।२।५
२१७ अस्तिसिचोऽपृक्ते ७।३।९६
२६४ अस्तेर्भूः २।४।५२
१२५ अस्थिदधि० ७।१।७५
१६८ अस्मद्युत्तमः १।४।१०७
४०९ अस्मायामेधा० ५।२।१२१

पृष्ठाङ्काः सूत्राणि
४१५ अस्य च्वौ ७।४।३२
२७२ अस्यतिवक्ति० ३।१।५२
१८४ अहन् ८।२।६८
४१० अहंशुभमोर्युस् ५।२।१४०
३७४ अहः सर्वैक० ५।४।८७
[आ]
८६ आकडारादेका० १।४।१
३४९ आक्वेस्तच्छील० ३।२।१३४
११० आङि चापः ७।२।१०५
८१ आङो ना स्त्रियाम् ७।३।१२०
४०४ आ च त्वात् ५।१।१२०
२७७ आ च हौ ६।४।११७
१८७ आच्छीनद्यो० ७।१।८०
९८ आटश्च ६।१।९०
२१७ आडजादीनाम् ६।४।७२
२०७ आडुत्तमस्य० ३।४।९२
९८ आण्नद्याः ७।३।११२
२३४ आत औ णलः ७।१।३४
३४२ आतश्चोपसर्गे ३।१।१३६
३४३ आतोऽनुपसर्गे कः ३।२।३
२४२ आतो ङितः ७।२।८१
८६ आतो धातोः ६।४।१४०
३३४ आतो युक्० ७।३।३३
३५६ आतो युच् ३।३।१२८
२३४ आतो लोप इटि च ६।४।६४
२३५ आतः ३।४।११०
२६५ आत्मनेपदेष्वन्य० ७।१।५
२६६ आत्मनेपदेष्व० ३।१।५४
३४५ आत्ममाने खश्च ३।२।८३
४०२ आत्मन्विश्व० ५।१।९

पृष्ठाङ्काः सूत्राणि
४०२ आत्माध्वानौ खे ६।४।१६९
३ आदिरन्त्येन० १।१।७१
२२४ आदि र्ञिटुडवः १।३।५
२३६ आदेच उप० ६।१।४५
६९ आदेशप्रत्यययोः ८।३।५९
३८ आदेः परस्य १।१।५४
१५ आद्गुणः ६।१।८७ -28
१३८ आद्यन्तवदेक० १।१।२१
४३ आद्यन्तौ टकितौ १।१।४६
३६१ आधारोऽधिकरणम् १।४।४५
२०७ आनि लोट् ८।४।१६
३४९ आने मुक् ७।२।८२
३७४ आन्महतः० ६।३।४६
३५८ आभीक्ष्ण्ये णमुल्० ३।४।२२
७२ आमि सर्वनाम्नः० ।७।१।५२
२४४ आमेतः ३।४।९०
२२६ आमः २।४।८४
२४३ आम्प्रत्ययवत्० १।३।६३
३८४ आयनेयीनीयियः० ७।१।२
२२६ आयादय० ३।१।३१
२६० आर्धधातुके २।४।३५
२०३ आर्धधातुकं शेषः ३।४।११४
२०२ आर्धधातुकस्येड्० ७।२।३५
२०५ आशिषि लिङ् ३।३।१७३
१६८ आसर्वनाम्नः ६।३।९१
२७१ आहस्थः ८।२।३५
[इ]
१२४ इकोऽचि विभक्तौ ७।१।७३
३० इकोऽसवर्णे० ६।१।१२७
३२२ इको झल् १।२।९
पृष्ठाङ्काः सूत्राणि
९ इको यणचि ६।१।७७
४०५ इगन्ताच्च० ५।१।१३१
३४१ इगुपधज्ञा० ३।१।१३५
१३३ इग्यणः सम्प्रसा० १।१।४५
३५५ इच्छा ३।३।११
२४२ इजादेश्चगुरु० ३।१।३६
२१८ इट ईटि ८।२।२८
२४५ इटोऽत् ३।४।१०६
२५८ इडत्यर्तिव्यय० ७।२।६६
२६६ इणो गा लुङि २।४।४५
२६५ इणो यण् ६।४।८१
२४३ इणः षीध्वंलुङ्० ८।३।७८
३७९ इणः षः ८।३।३९
४११ इतराभ्योपि० ५।३।१४
२०९ इतश्च ३।४।१००
१४६ इतोऽत्सर्वनाम० ७।१।८६
४२४ इतो मनुष्यजातेः ४।१।६५
४१० इदम इश् ५।३।३
४१२ इदमस्थमुः ५।३।२४
१३८ इदमो मः ७।२।१०८
४११ इदमो र्हिल् ५।३।१६
४११ इदमो हः ५।३।११
२२४ इदितो नुम् ७।१।५८
११४ इदुद्भ्याम् ७।३।११७
१३७ इदोऽय्पुंसि ७।२।१११
४०६ इदंकिमोरीश्की ६।३।९०
३९० इनण्यनपत्ये ६।४।१६४
४२० इन्द्रवरुणभवशर्वरुद्र० ४।१।४९
२५ इन्द्रे च ६।१।१२४
१४२ इन्हन्पूषार्यम्णां शौ ६।४।१२

CC0. In Public Domain, Digitization by eGangotri

पृष्ठाङ्काः सूत्राणि

२८२ इरितो वा ३।१।५७
४१४ इवे प्रतिकृतौ ५।३।९६
२४० इषुगमियमां छः ७।३।७७
४०८ इष्टादिभ्यश्च ५।२।८८
४१३ इष्ठस्य यिट् च ६।४।१५४
३९१ इसुसुक्तान्तात्कः ७।३।५१

[ई]

३१७ ई च गणः ७।४।९७
२५ ईदूदेद्द्विवचनं प्रगृह्यम् १।१।११
३३९ ईद्यति ६।४।६५
४१४ ईषदसमाप्तौ ५।३।६७ देश्य देशीय
३५६ ईषद्दुःसुषु० ३।३।१२६
२७७ ई हल्यघोः ६।४।११२

[उ]

४०१ उगवादिभ्यो यत् ५।१।२
४१६ उगितश्च ४।१।६
१४४ उगिदचां सर्व० ७।१।७०
५ उच्चैरुदात्तः १।२।२९
४०० उञ्छति ४।४।३२
३५२ उणादयो बहुलम् ३।३.१।
२४० उतश्च प्रत्ययात्० ६।४।१०६
२६० उतो वृद्धि र्लुकि हलि ७।३।८९
३८३ उत्सादिभ्योऽञ् ४।१।८६
१६३ उद ईत् ६।४।१३९
३२९ उदश्चरः सकर्मकात् १।३।५३
३५७ उदितो वा ७।२।५६
२७६ उदोष्ठ्यपूर्वस्य ७।१।१०२
३७ उदःस्थास्तम्भोःपूर्वस्य ८।४।६१
३७८ उद्भिभ्यां काकुदस्य ५।४।१४८
१५ उपदेशेऽजनुनासिक इत् १।३।२

२३१ उपदेशेऽत्वतः ७।२।६२
३७३ उपपदमतिङ् २।२।१९
३७१ उपमानानि० २।१।५५
३२६ उपमानादाचारे ३।१।१०
२६४ उपसर्गात्प्रा० ८।३।८७
२० उपसर्गादृति० ६।१।९१
१९ उपसर्गाः क्रियायोगे १।४।५९
३८१ उपसर्गादध्वनः ५।४।८५
२२२ उपसर्गादसमासेऽपि० ८।४।१४
२४९ उपसर्गस्यायतौ ८।२।१९
३४६ उपसर्गे च० ३।२।९९
२५४ उपसर्गे घोः० ३।३।९२
३६३ उपसर्जनंपूर्वम् २।२।३०
३३० उपाच्च १।३।८४
३१० उपात्प्रतियत्न० ६।१।१३९
४०७ उभादुदात्तो नित्यम् ५।२।४४
१६७ उभे अभ्यस्तम् ६।१।५
१५ उरण् रपरः १।१।५१
२२७ उरत् ७।४।६६
३७९ उरः प्रभृतिभ्यः कप् ५।४।१५१
२५३ उश्च १।२।१२
२६२ उषविदजागृभ्योऽन्य० ३।१।३८
२३६ उस्यपदान्तात् ६।१।९६

[ऊ]

४ ऊकालोऽज्झस्वदीर्घ० १।२।२७
४२४ ऊङुतः ४।१।६६
३५५ ऊतियूति० ३।३।९७
४२४ ऊरूत्तरपदा० ४।१।६९
२७२ ऊर्णोतेर्विभाषा ७।३।९०
३७१ ऊर्यादिच्विडाचश्च १।४।६१

पृष्ठाङ्काः सूत्राणि
२७३ ऊर्णोतेर्विभाषा ७।२।६

[ऋ]
३८१ ऋक्पूरब्धूः पथा० ५।४।७४
२७६ ऋच्छत्यॄताम् १।४।११
१०३ ऋत उत् ६।१।१११
२९० ऋतश्चसंयोगादेः ७.२।४३
२३७ ऋतश्चसंयोगादेर्गुणः ७।४।१०
१०२ ऋतो ङिसर्वनामस्था० ७।४।१०
२३१ ऋतो भारद्वाजस्य ७।२।६३
३१ ऋत्यकः ६ १।१२८
१४९ ऋत्विग्दधृक् ३।२।५९
१०२ ऋदुशनस्पुरुदंशो० ७।१।९४
२३८ ऋद्धनोःस्ये ७।२।७०
११९ ऋन्नेभ्यो ङीप् ४।१।५
३८५ ऋष्यन्धकवृष्णिकुरु० ४।१।११४
३३९ ऋहलोर्ण्यत् ३।१।१२४
३०० ऋत इद्धातोः ७।१।१००
३५३ ऋदोरप् ३।३।५७

[ए]
१५७ एकवचनस्य च ७।१।३२
६१ एकवचनं सम्बुद्धिः २।३।४९
३७२ एकविभक्ति० १।२।४४
२२८ एकाच उपदेशे० ७।२।१०
१३१ एकाचो बशोभष्० ८।२।३७
१४३ एकाजुत्तरपदे णः ८।४।१२
३८४ एको गोत्रे ४।१।९३
२३ एङःपदान्तादति ६।१।१०९
२० एङि पररूपम् ६।१।९४
६२ एङ्ह्रस्वात्सम्बुद्धेः ६।१।६९

पृष्ठाङ्काः सूत्राणि
१२८ एच इग्घ्रस्वादेशे १।१ ४८
१३ एचोऽयवायावः ६।१।७८
३४४ एजेः खश् ३।२।२८
१७६ एत ईद्बहुवचने ८।२।८१
२४५ एत ऐ ३।४।९३
५६ एतत्तदोः० ६।१।१३२
४१२ एतदः ५।३।५
३३९ एतिस्तुशास० ३।१।१०९
४११ एतेतौ रथोः ५।३।४
२५६ एतेर्लिङि ७।४.२४
१७ एत्येधत्यूठ्सु ६।१।८९
३५३ एरच् ३।३।५६
१०० एरनेकाचो० ६।४।८२
२०५ एरुः ३।४।८६
२३५ एर्लिङि ६।४।६७

[ओ]
२८४ ओतःश्यनि ७।३।७१
२९ ओत् १।१।१५
३४८ ओदितश्च ८।२।४५
२१ ओमाङोश्च ६।१।९५
३८४ ओर्गुणः ६।४।१४६
६७ ओसि च ७।३।१०४
३१८ ओःपुयण्ज्यपरे ७।४।८०
१०४ ओःसुपि ६।४।८३

[औ]
१०९ औङ आपः ७।१।१८
१०८ औतोऽम्शसोः ६।१।९३
९५ औत् ७।३।११८

[क]
३२८ कण्ड्वादिभ्यो यक् ३।१।२७

पृष्ठाङ्काः	सूत्राणि
३८६	कन्यायाः क० ४।१।११६
४०५	कपिञ्ज्ञात्यो० ४।१।१२७
२४५	कमेर्णिङ् ३।१।३०
३८७	कम्बोजाल्लुक् ४।१।१७५
३४६	करणे यजः ३।२।८५
३२८	कर्तरि कर्म० १।३।१४
३३८	कर्तरि कृत् ३।४।६७
१९९	कर्तरि शप् ३।१।६८
३५९	कर्तुरीप्सिततम० १।४।४९
३६०	कर्तृकरणयोः २।३।१८
३६७	कर्तृकरणे० २।१।३२
३६७	कर्मणा यमभि० १।४।३२
३५९	कर्मणि द्वितीया २।३।२ ३५८
३४२	कर्मण्यण् ३।२।१
३३५	कर्मवत् कर्मणा० ३।१।८७
३२७	कष्टाय क्रमणे ३।१।१४
३७६	कस्कादिषु च ३।८।४८
५०	कानाम्रेडिते ८।३।१२
३२६	काम्यच्च ३।१।९
३५३	कालसमयवेलासु० ३।३।२६७
३९५	कालाट्ठञ् ४।३।१
३८३	किति च ७।२।११८
२१२	किदाशिषि ३।४।१०४
४६२	किमश्च ५।३।२५
४०६	किमिदम्भ्यां वो घः ५।२।४०
४१३	किमेत्तिङव्य० ५।४।११
४११	किमोऽत् ५।३।१२
१३६	किमः कः ७।२।१०३ १३६
३००	किरतौ लवने ६।१।१४०
४१४	किंयत्तदोर्निर्धारणे ५।३।९२
४१०	किंसर्वनाम० ५।३।२
३७१	कुगतिप्रादयः २।२।१८
४१०	कुतिहोः ७।२।१०४
४१४	कुत्सिते ५।७।७४
४९	कुप्वोः ᳲक ᳳपौ च ८।३।३७
३९२	कुमुदनडवेतसे० ४।२।८७
३८७	कुरुनादिभ्यो ण्यः ४।१।१७२
२२१	कुहोश्चुः ७।४।६२
३४३	कृञो हेतु० ३।२।२०
२२६	कृञ्चानुप्रयु० ३।१।४०
५८	कृत्तद्धितसमास० १।२।४६
३३८	कृत्यल्युटो० ३।३।११३
३३८	कृत्याः ३।१।९५
१४६	कृदतिङ् ३।१।९३
१९३	कृन्मेजन्तः १।१।३९
४१५	कृभ्वस्तियोगे० ५।४।५०
२३१	कृसृभृवृस्तु० ७।२।१३
४०९	केशाद्वो० ५।२।१०९
३९६	कोशाड्ढञ् ४।३।४२
२१३	क्ङिति च १।१।५
३४६	क्तक्तवतू निष्ठा १।१।२६
३५४	क्त्रेर्मम्नित्यम् ४।४।२०
१९३	क्त्वातोसुन्कसुनः १।१।४०
३२५	क्यचि च ७।४।३३
३२६	क्यस्य विभाषा ६।४।५०
३९१	क्रमादिभ्यो वुन् ४।२।६१
२३३	क्रमः परस्मै० ७।३।७६
४२१	क्रीतात्करणपूर्वात् ४।१।५०
३११	क्र्यादिभ्यः श्ना ३।१।८१
३४८	क्वसुश्च ३।२।१०७

पृष्ठाङ्काः सूत्राणि
४११ क्वाति ७।२।१०५
१४९ क्विन्प्रत्ययस्य कुः ८।२।६२
३४५ क्विप् च ३।२।७६
३६६ क्षत्राद् घः ४।१।१३८
३४८ क्षायो मः ८।२।५३
३२७ क्षुभ्नादिषु च ८।४।३९
२६९ क्सस्याऽचि ७।३।७२
[ख]
४७ खरवसानयोः० ८।३।१५
३८ खरि च ८।४।५५
३४५ खित्यनव्ययस्य ६।३।६
९४ ख्यत्यात्परस्य ६।१।११२
[ग]
१०१ गतिश्च १।४।६०
३२६ गन्धनावक्षेपण० १।३।३२
२४१ गमहनजन० ६।४।९८
२४१ गमेरिट् परस्मै० ७।२।५८
३६४ गर्गादिभ्यो यञ् ४।१।१०५
३६४ गहादिभ्यश्च ४।२।१३८
२६७ गाङ्कुटादि० १।२।१
२६७ गाङ् लिटि २।४।४९
२१४ गातिस्थाघु० २।४।७७
४०५ गुणवचन० ५।१।१२४
२७२ गुणोऽपृक्ते ७।३।९१
२३८ गुणोऽर्तिसंयोगा० ७।४।२९
३२२ गुणो यङ्लुकोः ७।४।८२
२२५ गुपूधूपविच्छि० ३।१।२८
३५५ गुरोश्च हलः ३।३।१०३
३४२ गेहे कः ३।१।१४४
१०७ गोतो णित् ७।१।९०

पृष्ठाङ्काः सूत्राणि
३८४ गोत्राद्यून्यस्त्रि० ४।१।९४
३९९ गोपयसोर्यत् ४।३।१६०
३७० गोरतद्धित० ५।४।९२
३९९ गोश्च पुरीषे ४।३।१४५
३७२ गोस्त्रियोरुप० १।२।४८
२८४ ग्रहिज्यावयि० ६।१।१६
३१५ ग्रहोऽलिटि० ७।२।३७
३९० ग्रामजनबन्धु० ४।२।४३
३९३ ग्रामाद्यखञौ ४।२।९८
[घ]
३५३ घञि च भाव० ६।४।२७
२६८ घुमास्थागापा० ६।४।६६
८९ घेर्ङिति ७।३।१११
२६४ घ्वसोरेद्धावभ्यास० ६।४।११९
[ङ]
४६ ङमो ह्रस्वादचि० ८।३।३२
९० ङसिङसोश्च ६।१।११०
७१ ङसिङ्योः ७।१।१५
२४ ङिच्च १।१।५३
११३ ङितिह्रस्वश्च १।४।६
१५४ ङेप्रथमयोरम् ७।१।२८
९८ ङेराम्नद्याम्नीभ्यः ७।३।११६
६५ ङेर्यः ७।१।१३
४४ ङ्णोः कुक्० ८।३।२८
५९ ङ्याप्प्रातिपदि० ४।१।१
[च]
२४८ चङि ६।१।११
३४० चजोः कु घि० ७।३।५२
१३४ चतुरनडुहोराम० ७।१।५८
३६७ चतुर्थी तदर्था० २।१।३६

CC0. In Public Domain. Digitization by eGangotri

निधि, करोंदी

पृष्ठाङ्काः सूत्राणि

३६१ चतुर्थी सम्प्र० २।३।१३
४०० चरति ४।४।८
३४३ चरेष्टः ३।२।१६
२७ चादयोऽसत्त्वे १।४।५७
३८० चार्थे द्वन्द्वः २।२।२९
२८७ चिणो लुक् ६।४।१०४
२८७ चिण् ते पदः ३।१।६०
३३१ चिण् भावकर्म० ३।१।६६
६० चुटू १।३।७
१५१ चोः कुः ८।२।३०
१६२ चौ ६।३।१३८
३५१ च्छ्वोः शूडनुनासिके ६।४।१९
२१४ च्लि लुङि ३।१।४३
२१४ च्लेः सिच् ३।१।४४
४१५ च्वौ च ७।४।२६

[छ]

३५६ छादेर्घेऽद्व्युपसर्गस्य ६।४।९६
५१ छे च ६।१।७३

[ज]

१६८ जक्षित्यादयः षट् ६।१।६
३८७ जनपदशब्दात्० ४।१।१६८
३९२ जनपदे लुप् ४।२।८१
३०८ जनसनखनां० ६।४।४२
२८७ जनिवध्योश्च ७।३।३५
८३ जराया जरस० ७।२।१०१
३५० जल्पभिक्ष० ३।२।१५५
१२१ जश्शसोः शिः ७।१।२०
८७ जसि च ७।३।१०९
७१ जसः शी ७।१।१७

पृष्ठाङ्काः सूत्राणि

२७७ जहातेश्च ६।४।११६
३५७ जहातेश्च क्त्वि ७।४।४३
४२३ जातेरस्त्री० ४।१।६३
३९६ जिह्वामूलांगु० ४।३।६२
३८४ जीवति तु० ४।१।१६३
२७४ जुसि च ७।३।८३
२७३ जुहोत्यादिभ्यः० २।४।७५
३१२ जॄस्तम्भुम्रुचु० ३।१।५८
२८७ ज्ञाजनोर्जा ७।३।७९
४१३ ज्य च ५।३।६१
४१३ ज्यादादीयसः ६।४।१६०
३५५ ज्वरत्वर० ६।४।२०

[झ]

२८ झयोहोऽन्यतरस्याम् ८।४।६२
३६६ झयः ५।४।१११
३९२ झयः ८।२।१०
३८ झरो झरि सवर्णे ८।४।६५
१२ झलां जश् झशि ८।४।५३
३६ झलां जशोऽन्ते ८।२।३९
२३० झलो झलि ८।२।२६
२५७ झषस्तथोर्धोऽधः ८।२।४०
२४५ झस्य रन् ३।४।१०५
२१२ झेर्जुस् ३।४।१०८
१९९ झोऽन्तः ७।१।३

[ट]

६५ टाङसिङसा० ७।१।१२
४१६ टिड्ढाणञ्० ४।१।१५
२४२ टित आत्मने० ३।४।७९
१२ टेः ६।४।१४३
४०५ टेः ६।४।१५५

पृष्ठाङ्काः सूत्राणि

३५४ ट्वितोऽथुच् ३।३।८९

[ठ]

३९७ ठगायस्थानेभ्यः ४।३।७५

३८७ ठस्येकः ७।३।५०

[ड]

९६ डति च १।१।२५

४४ ड्ःसि धुट् ८।३।२९

३५४ ड्वितः क्त्रिः ३।३।८८

[ढ]

२५७ ढो ढे लोपः ८।३।१३

५५ ढ्रलोपे पूर्वस्य० ६।३।१११

[ण]

२२१ णलुत्तमो वा ७।१।९१

३१६ णिचश्च १।३।७४

२८१ णिजां त्रयाणाम्० ७।४।४५

२४७ णिश्रिद्रुस्रुभ्यः० ३।१।४८

२४८ णेरनिटि ६।४।५१

२२२ णो नः ६।१।६५

२४८ णौ चङ्युप० ७।४।१

३५५ ण्यासश्रन्थो युच् ३।३।१०७

३४० ण्वुल्तृचौ ३।१।१३३

[त]

१९६ तङानावात्मने० ३।४।१०७

३९७ तत आगतः ४।३।७४

३४६ तत्पुरुषे कृति० ६।३।१४

३७३ तत्पुरुषस्याङ्गुलेः० ५।४।८६

३६७ तत्पुरुषः २।१।२२

३७० तत्पुरुषःसमाना० १।२।४२ ३७०

४१४ तत्प्रकृतवचने ५।४।२१

३१८ तत्प्रयोजको हेतुः १।४।५५

पृष्ठाङ्काः सूत्राणि

३९६ तत्र जातः ४।३।२५

४०४ तत्र तस्येव ५।१।११६

३९६ तत्र भवः ४।३।५३

४०१ तत्र साधुः ४।४।९८

३८८ तत्रोद्धृतम० ४।२।१४

३७३ तत्रोपपदम्० ३।१।९२

३९१ तदधीते तद्वेद ४।२।५९

४०३ तदर्हति ५।१।६३

३९१ तदस्मिन्नस्तीति० ४।२।६७

४०६ तदस्य संजातं० ५।२।३६

४०८ तदस्यास्त्यस्मिं० ५।२।९४

१५३ तदोः सः साव० ७।२।१०६

३९७ तद्गच्छति ४।३।८५

३८८ तद्धिताः ४।१।७६

३६९ तद्धितार्थोत्तर० २।१।५१

३७० तद्धितेष्वचा० ७।२।११७

३८७ तद्राजस्य० २।४।६२

४०० तद्वहति रथ० ४।४।७६

२६३ तनादिकृञ्भ्य उः ३।१।७९

३०८ तनादिभ्यः० २।४।७९

३३४ तनोतेर्यकि ६।४।४४

१४ तपरस्तत्कालस्य १।१।६९ ७

३३४ तपोऽनुतापे च ३।१।६५

३३८ तयोरेव कृत्य० ३।४।७०

३९९ तरति ४।४।५

४१३ तरप्तमपौ घः १।१।२२

३९५ तवकममका० ४।३।३

१५८ तवममौ ङसि ७।२।९६

३३८ तव्यत्तव्या० ३।१।९६

४०८ तसौ मत्वर्थे १।४।१९

पृष्ठाङ्काः	सूत्राणि
२०६	तस्थस्थमिपां० ३।४।१०१
३७१	तस्मान्नुडचि ६।३।७४
६३	तस्माच्छसो नः० ६।१।१०३
३७	तस्मादित्युत्तरस्य १।१।६७
२२४	तस्मा नुडचि ७।४।७१
३९४	तस्मिन्नणि च ४।३।२
१०	तस्मिन्निति० १।१।६६
४०२	तस्मैहितम् ५।१।५
३९१	तस्य निवासः ४।२।६९
५०	तस्य परमाम्रे० ८।१।२
४०७	तस्य पूरणे डट् ५।२।४८
४०४	तस्य भावस्त्व० ५।१।११९
३	तस्य लोपः १।३।९
३९८	तस्य विकारः ४।३।१३४
३९०	तस्य समूहः ४।२।३७
३८४	तस्यापत्यम् ४।१।९२
३९८	तस्येदम् ४।३।१२०
४०२	तस्येश्वरः ५।१। ४२
१९७	तान्येकवचन० १।४।१०२
२०४	तासस्त्योः० ७।४।५०
४१२	तिङश्च ५।३।५६
१९७	तिङस्त्रीणि० १।४।१०१
१९८	तिङ्शित्सार्व० ३।४।११३
३५१	तितुत्रतथ० ७।२।९
१९६	तिप्तस्झि० ३।४।७८
३०५	तिप्यनस्तेः ८।२।७३
१६४	तिरसस्तिर्यलोपे ६।३।९४
४०७	ति विंशतेर्डिति ६।४।१४२
३२०	तिष्ठतेरित् ७।४।५
२८७	तीषसह० ७।२।४८
२९२	तुदादिभ्यः शः ३।१।७७
१५७	तुभ्यमह्यौ ङयि ७।२।९५
३५२	तुमुन्ण्वुलौ० ३।३।१०
६	तुल्यास्यप्रय० १।१।९
२०६	तुह्योस्तात० ७।१।३५
१०२	तृज्वत्क्रोष्टुः ७।१।९५
३०४	तृणह इम् ७।३।९२
१२७	तृतीयादिषु भा० ७।१।७४
३६४	तृतीया सप्त० २।४।८४
३६६	तृतीया तत्कृता० २।१।३०
३४९	तृन् ३।२।१३५
[illegible]५१	तॄफलभज० ६।४।१२२
३८७	ते तद्राजाः ४।१।१७४
४०२	तेन क्रीतम् ५।१।३७
४०४	तेन तुल्यम्० ५।१।११५
३९९	तेन दीव्यति० ४।४।२
३९१	तेन निर्वृत्तम् ४।२।६८
४०३	तेन निर्वृत्तम् ५।१।७९
३९८	तेन प्रोक्तम् ४।३।१०१
३८८	तेन रक्तं रागात् ४।२।१
२०७	ते प्राग्धातोः १।४।८०
१५९	तेममावेक ८।१।२२
३७	तोर्लि ८।४।६०
३५	तोः षि ८।४।४३
३४९	तौ सत् ३।२।१२७
१६९	त्यदादिषु० ३।२।६०
९७	त्यदादीनामः ७।२।१०२
३९४	त्यदादीनि च १।१।७४
११४	त्रिचतुरोः० ७।२।९९
९७	त्रेस्त्रयः ६।३।४८

पृष्ठाङ्काः सूत्राणि
३७५ त्रेस्त्रयः ७।१।५३
४७ त्रेः सम्प्रसारणं च ५।२।५५
१५५ त्वमावेकवचने ७।२।९७
१५६ त्वामौ द्वितीया ८।१।२३
१५४ त्वाहौ सौ ७।२।९४

[थ]

२२३ थलि च सेटि ६।४।१२१
२४२ थासः से ३।४।८०
१४६ थोन्थः ७।१।८७

[द]

३९३ दक्षिणापश्चात्० ४।२।९८
४०३ दण्डादिभ्यो यत् ५।१।६६
२८१ दधस्तथोश्च ८।२।३८
३४८ दधातेर्हिः ७।४।४२
४०९ दन्तउन्नत० ५।२।१०६
२४९ दयायासश्च ३।१।३७
१३८ दश्च ७।२।१०९
२६३ दश्च ८।२।७५
३२९ दाणश्चसाचे० १।३।५५
१३१ दादेर्धातोर्घः ८।२।३२
२८० दाधा घ्वदाप् १।१।२०
३५१ दाम्नीशस्० २।२।१८२
३७० दिक्पूर्वपदात्० ४।२।१०७
३६९ दिक्संख्ये संज्ञायाम् २।१।५०
३९६ दिगादिभ्यो यत् ४।३।५४
३८२ दित्यदित्या० ४।१।८५
१३५ दिव उत् ६।१।१३१
१३५ दिव औत् ७।१।८४
२८२ दिवादिभ्यः श्यन् ३।१।६९
२८६ दीङो युडचि० ६।४।६३

पृष्ठाङ्काः सूत्राणि
२८७ दीपजनबुध० ३।१।६१
२६५ दीर्घं इणः किति ७।४।६९
८४ दीर्घाज्जसि च ६।१।१०५
३२३ दीर्घोऽकितः ७।४।८३
२४८ दीर्घो लघोः ७।४।९४
२१९ दीर्घं च १।४।१२
२५ दूराद्धूते च ८।२।८४
३४८ दृढः स्थूल० ७।२।२०
३४६ दृशेः क्वनिप् ३।२।९४
३८८ दृष्टं साम ४।२।७
३४८ दो दद्घोः ७।४।४६
२४९ द्युतिस्वाप्योः० ७।४।६७
२५० द्युद्भ्यो लुङि १।३।९१
३९४ द्युप्रागपा० ४।२।१०१
३८० द्वन्द्वश्च प्राणि० २।४।२
३८१ द्वन्द्वाच्चुदष० ५।४।१०६
३८० द्वन्द्वे घि २।२।३२
३७० द्विगुरेकवचनम् २।४।१
३६७ द्विगुश्च २।१।२३
४१६ द्विगोः ४।१।२१
१४० द्वितीयाटौस्स्वेनः २।४।३४
१५५ द्वितीयायां च ७।२।८७
३६७ द्वितीयाश्रिता० २।१।२४
४०७ द्वित्रिभ्यां तयस्या० ५।२।४३
३७८ द्वित्रिभ्यां ष० ५।४।११५
२२७ द्विर्वचनेऽचि १।१।५९
४१३ द्विवचनविभ० ५।३।५७
४०७ द्वेस्तीयः ५।२।५४
३७४ द्व्यष्टनः संख्या० ६।३।४७
५९ द्व्येकयोर्द्विवचनै० १।४।२२

CC0. In Public Domain, Digitization by eGangotri

पृष्ठाङ्काः सूत्राणि

[ध]

४०० धर्मं चरति ४।४।४१
३२२ धातो रेकाचोहला० ३।१।२२
३३८ धातोः ३।१।९१
३२१ धातोः कर्मणः ३।१।७
१३२ धात्वादेःषःसः ६।१।६४
४०५ धान्यानां भवने० ५।२।१
२४४ धि च ८।२।२५
४०१ धुरो यड्ढकौ ४।४।७७
३६१ ध्रुवमपायेऽपादानम् १।४।२४

[न]

३५७ न क्त्वा सेट् १।२।१८
४२२ न क्रोडादि० ४।१।५६
३८८ नक्षत्रेण युक्तः० ४।२।३
४२२ नखमुखात्संज्ञायाम् ४।१।५८
३२८ न गतिहिंसा० १।३।१५
१४१ न ङिसम्बुद्ध्योः ८।२।८
३७१ नञ् २।२।६
३९२ नडशादाड्ड्वलच् ४।२।८८
११५ न तिसृचतसृ ६।४।४
३६५ नदीभिश्च २।१।२०
३९३ नद्यादिभ्यो ढक् ४।२।९७
३४१ नन्दिग्रहि० ३।१।१३४
२७२ न न्द्राः संयोगा० ६।१।३
३४ न पदान्ताट्टो० ८।४।४२
४२ नपरे नः ८।३।२७
१२१ नपुंसकस्य झलचः ७।१।७२
१२१ नपुंसकाच्च ७।१।१९
३६६ नपुंसकादन्यतर० ५।४।१०९
३५६ नपुंसके भावे० ३।३।११४

पृष्ठाङ्काः सूत्राणि
३८२ न पूजनात् ५।४।६९
३०९ न भकुर्छुराम् ८।२।७९
१०१ न भूसुधियोः ६।४।८५
२१५ न माङ्योगे ६।४।७४
१७६ न मुने ८।२।३
३६१ नमः स्वस्ति० २।३।१६
३३६ न यदि ३।२।१०३
३९१ न य्वाभ्यांपदान्ता० ७।३।३
३१४ न लिङि ७।२।३९
९६ न लुमता० १।१।६३
३७१ नलोपो नञः ६।३।७३
९२ नलोपः प्राति० ८।२।७
१४१ न लोपः सुप्० ८।२।२
६१ न विभक्तौ० १।३।४
२५० न वृद्भ्यश्च० ७।२।५९
२५१ न शसददवादि० ६।४।१२६
१६९ नशेर्वा ८।२।६३
४४ नश्च ८।३।३०
४० नश्चापदान्तस्य० ८।३।२४
४८ नश्छव्यप्रशान् ८।३।७
११९ न षट्स्वस्रादि० ४।१।१०
१४५ न सम्प्रसारणेसम्प्र० ६।१।३७
१४२ न संयोगाद्वमन्तात् ६।४।१३७
३६६ नस्तद्धिते ६।४।१४४
१७८ न हिवृतिवृषि० ६।३।११६
१७८ नहो धः ८।२।३४
१६५ नाञ्चेःपूजायाम् ६।४।३०
६० नादिचि ६।१।१०४
४०७ नान्तादसंख्या० ५।२।४९
२८१ नाभ्यस्तस्याचि० ७।३।८७

पृष्ठाङ्काः सूत्राणि
१६७ नाभ्यस्ताच्छतुः ७।१।७८
६८ नामि ६।४।३
३६४ नाव्ययीभावा० २।४।८३
४०० निकटे वसति ४।४।७३
३५८ नित्यवीप्सयोः ८।१।४
३०९ नित्यं करोतेः ६।४।१०८
३२३ नित्यं कौटिल्ये ३।१।२३
२०८ नित्यं ङितः ३।४।९९
३९९ नित्यं वृद्धशरा० ४।३।१४४
२८ निपात एकाजनाङ् १।१।१४
३५३ निवासचिति० ३।३।४१
३७८ निष्ठा २।२।३६
३१६ निष्ठा ३।२।१०२
३४८ निष्ठायां सेटि ६।४।५२
५ नीचैरनुदात्तः १।२।३०
१७१ नुम्विसर्जनीय० ८।३।५८
१०७ नॄ च ६।४।६
४९ नॄन्पे ८।३।१०
२३० नेटि ७।२।४।
३४४ नेड्वशि कृति ७।२।८
१३९ नेदमदसोरकोः ७।१।११
११८ नेयङुवङ्स्थाना० १।४।४
२१० नेर्गदनदपतपद० ८।४।१७
३२८ नेर्विशः १।३।१७
१४८ नोपधायाः ६।४।७
४०१ नौवयोधर्म० ४।४।९१
३२५ नः क्ये १।४।१५

[प]
४०३ पङ्क्तिविंशति० ५।१।५९
४२४ पङ्गोश्च ४।१।६८

पृष्ठाङ्काः सूत्राणि
३४८ पचो वः ८।२।५२
३६८ पञ्चमी भयेन २।१।३७
१५७ पञ्चम्या अत् ७।१।३१
४१० पञ्चम्यास्तसिल् ५।३।७ तसिल्
३६८ पञ्चम्यास्तोका० ६।३।२
९५ पतिः समास एव १।४।८
४०५ पत्यन्तपुरो० ५।१।१२८
१४६ पथिमथ्यृभु० ७।१।८५
६४ पदान्तस्य ८।४।३७
५१ पदान्ताद्वा ६।१।७६
३७६ परवल्लिङ्गंद्वन्द्व० २।३।२६
५९ परश्च ३।१।२
२०१ परस्मैपदानाम्० ३।४।८२
३८८ परिवृतो रथः ४।२।१०
३२८ परिव्यवेभ्यः १।३।१८
३३० परेर्मृष. १।३।८२
२०० परोक्षे लिट् ३।२।११५
९ परः सन्निकर्षः० १।४।१०९
४१० पर्यभिभ्याञ्च ५।३।७८
२३४ पाघ्राध्मास्था० ७।३।९
३७८ पादस्य लोपो० ५।४।१३८
१६१ पादः पत् ६।४।१३०
३८० पिता मात्रा १।२।७०
३८९ पितृव्यमातुल० ७।३।७८
२१९ पुगन्तलघूपधस्य च ७।३।८६
४७ पुमः खय्यम्परे ८।३।६
३५२ पुवः संज्ञायाम् ३।२।१८५
२४१ पुषादिद्युताद्य० ३।१।५५
४१६ पुंयोगादाख्या० ४।१।४८
२५६ पुंसि संज्ञायाम् ३।३।११८

CC0. In Public Domain. Digitization by eGangotri

भरतनिधि, करौंदी
वाराणसी-5

पृष्ठाङ्काः	सूत्राणि
१७३	पुंसोऽसुङ् ७।१।८९
३७९	पूर्णाद्विभाषा ५।४।१४९
१६	पूर्वत्रासिद्धम् ८।२।१
४२३	पुर्वपदात्संज्ञा० ८।४।३
७५	पूर्वपरावर० १।१।३४
३२९	पूर्ववत्सनः १।३।६२
४०७	पूर्वादिनिः ५।२।८६
७८	पूर्वादिभ्यो नवभ्यो वा ७।१।१६
३६९	पुर्वापराधरोत्तर० २।२।१
२०१	पूर्वो भ्यासः ६।१।४
४०४	पृथ्वादिभ्य इ० ५।१।१२२
३२९	पोरदुपधात् ३।१।९८
४१२	प्रकारवचने थाल् ५।३।२३
४१३	प्रकृत्यैकाच् ६।४।१६३
४१५	प्रज्ञादिभ्यश्च ५।४।३८
९६	प्रत्ययलोपे० १।१।६२
४२०	प्रत्ययस्थात्० ७।४।४४
९६	प्रत्ययस्यलुक्० १।१।६१
३०५	प्रत्योत्तरपद० ७।२।९८
५९	प्रत्ययः ३।१।१
७९	प्रथमचरम० १।१।३३
६०	प्रथमयोः पूर्व० ६।१।१०२
३६३	प्रथमानिर्दिष्टम्० १।२।४३
१५४	प्रथमायाश्च० ७।२।८८
३९७	प्रभवति ४।३।८३
४०६	प्रमाणे द्वय० ५।२।३७
४१३	प्रशस्यस्य श्रः ५।३।६०
४००	प्रहरणम् ४।४।५७
४०१	प्राक् क्रीताच्छः ५।१।१
३६२	प्राक्कडारात्० २।१।३

पृष्ठाङ्काः	सूत्राणि
४१४	प्रागिवात्कः ५।३।७०
४००	प्राग्घिताद्यत् ४।४।७५
४१०	प्राग्दिशो विभक्तिः ५।३।१
३९९	प्राग्वहतेष्ठक् ४।४।१
४०२	प्राग्वतेष्ठञ् ५।१।१८
४१८	प्राचां ष्फतद्धितः ५।१।१७
४०८	प्राणिस्थादा० ५।२।९६
३५८	प्रातिपदिकार्थ० २।३।४६
२८	प्रादयः १।४।५
३३०	प्राद्वहः १।३।८१
३७५	प्राप्तापन्ने च० ३।२।४
३९६	प्रायभवः ४।३।३८
३९६	प्रावृषष्ठप् ४।३।२६
३९५	प्रावृष एण्यः ४।३।१७
३४४	प्रियवशे वदः० ३।२।३८
२५	प्लुतप्रगृह्या० ६।१।१२५
३१३	प्वादीनां ह्रस्वः० ७।३।८०

[ब]

पृष्ठाङ्काः	सूत्राणि
९६	बहुगणवतु० १।१।२३
६६	बहुवचने झ० ७।३।१०३
१५९	बहुवचनस्य० ८।१।२१
३७८	बहुव्रीहौ० ५।४।११३
६०	बहुपु बहुवचनम् १।४।२१
४१३	बहोर्लोपो० ६।४।१५१
४१५	बह्वल्पार्था० ५।४।४२
४१९	बह्वादिभ्यश्च ४।१।४५
३८५	बाह्वादिभ्यश्च ४।१।९६
२७१	ब्रुव ईट् ७।३।९३
२७१	ब्रुवो वचिः २।४।५३
२७१	ब्रुवः पञ्चा० ३।४।८४

पृष्ठाङ्काः सूत्राणि

[भ]

३३५ भञ्जेश्च चिणि ६।४।३३
२०२ भवतेरः ७।४।७३
१४७ भस्य टेर्लोपः ७।१।८८
३३० भावकर्मणोः १।३।१३
३५३ भावे ३।३।१८
३१० भिक्षादिभ्योऽण् ४।२।३८
३४३ भिक्षासेना० ३।२।१७
२७५ भियोऽन्यतरस्याम् ६।४।११५
२७४ भीह्रीभृहुवां० ३।१।३९
३०७ भुजोऽनवने १।३।६६
२०१ भुवो वुक्० ६।४।८८
२० भूवादयो धातवः १।३।१
२१४ भूसुवोस्तिङि० ७।३।८८
२७८ भृञामित् ७।४।७६
३४० भोज्यं भक्ष्ये ७।३।६९
५३ भो भगो अघो० ८।३।१७
१५७ भ्यसोऽभ्यम् ७।१।३०
२९२ भ्रस्जो रोपध० ६।४।४७
३५० भ्राजभास० ३।२।१७७

[म]

१४४ मघवा बहुलम् ६।४।१२८
३९५ मध्यान्मः ४।३।८
३४५ मनः ३।२।८२
३० मय उञो वो वा ८।३।३३
३९७ मयट् च ४।३।८२
३९८ मयड्वैत० ४।३।१४३
२८५ मस्जिनशोर्झलि ७।१।६०
२१३ माङि लुङ् ३।३।१७५
३८६ मातुरुत्संख्या० ४।१।११५
३९२ मादुपधायाश्च० ८।२।९
३२० मितां ह्रस्वः ६।४।९२
१२२ मिदचोऽन्त्यात्० १।१।४७
२८६ मीनातिमिनोति० ६।१।५०
६ मुखनासिका० १।१।८
३३९ मृजेर्विभाषा ३।१।११३
३४० मृजेर्वृद्धिः ७।२।११४
२०७ मेर्निः ३।४।८९
४० मोऽनुस्वारः ८।३।२३
१३७ मो नो धातोः ८।२।६४
४१ मो राजि समः क्वौ ८।३।२५
३०१ म्रियतेर्लुङ्० १।३।६१
३४८ म्वोश्च ८।२।६५

[य]

३२४ यङोऽचि च २।४।७४
३२४ यङो वा ७।३।९४
८५ यचि भम् १।४।१८
३५४ यजयाच० ३।३।९०
३८४ यञञोश्च २।४।६४
४१८ यञश्च ४।१।१६
३८४ यञिञोश्च ४।१।१०१
४०६ यत्तदेतेभ्यः ५।२।३९
१३ यथासंख्यमनु० २।३।१०
२३६ यमरमनमा० ७।२।७३
३६ यरोऽनुना० ८।४।४५
६१ यस्मात्प्रत्यय० १।४।१३
३७३ यस्य हलः ६।४।४९
१२१ यस्येति च ६।४।१४८
११० याडापः ७।३।११३
२११ यासुट् परस्मै० ३।४।१०३

CC0. In Public Domain, Digitization by eGangotri

पृष्ठाङ्काः सूत्राणि
१५० युजेरसमासे ७।१।७१
१५४ युवावौ द्विवचने ७।२।९२
३४० युवोरनाकौ ७।१।१
१५९ युष्मदस्मदोः षष्ठी० ८।१।२०
१५६ युष्मदस्मदोरना० ७।२।८६
१५८ युष्मदस्मद्भ्याम्० ७।१।२७
३९४ युष्मदस्मदोरन्य० ४।३।१
१९८ युष्मद्युपपदे० १।४।१०५
४२५ यूनस्तिः ४।१।७७
१५५ यूयवयौ जसि ७।२।९३
९८ यूस्त्र्याख्यौ नदी० १।४।३
३०९ ये च ६।४।१०९
३०८ ये विभाषा ६।४।४३
३८६ ये चाभाव० ६।४।१६८
१५६ योऽचि ७।२।८९
१७९ यः सौ ७।२।११०

[र]

४०५ र ऋतो० ६।४।१६१
४०० रक्षति ४।४।३३
३४७ रदाभ्यां निष्ठातो० ८।२।४२
२८५ रधादिभ्यश्च ७।२।४५
३५७ रलो व्युप० १।२।२६
१३६ रषाभ्याम्० ८।४।१
३८० राजदन्तादिषु० २।२।३१
३४६ राजनि युधि कृञः ३।२।९५
३८६ राजश्वशुराद्यत् ४।१।१३७
३७४ राजाहः सखिभ्यः० ५।४।९१
३७४ रात्राह्नाहाः २।४।२९
१०३ रात्सस्य ८।२।२४
१०८ रायो हलि ७।२।८५

पृष्ठाङ्काः सूत्राणि
३५० राल्लोपः ६।४।२१
३९३ राष्ट्रावार० ४।२।९३
२५३ रिङ् शयग्० ७।४।२८
२०४ रि च ७।४।५१
३२३ रीगृदुपधस्य च ७।४।९०
३८९ रीङ् ऋतः ७।४।२७
३०२ रुधादिभ्यः श्नम् ३।१।७८
३८६ रेवत्यादिभ्यः ४।१।१४६
५४ रोऽसुपि ८।२।६९
५४ रो रि ८।३।१४
१३६ रोःसुपि ८।३।१६
१७१ र्वोरुपधाया० ८।२।७६

[ल]

२६१ लङः शाकटा० ३।४।१११
३४९ लटः शतृ० ३।२।१२४
३३७ लट् स्मे ३।२।११८
६३ लशक्वतद्धिते १।३।८
२१२ लिङाशिषि ३।४।११६
२४५ लिङः सीयुट् ३।४।१०२
२११ लिङः सलोपो० ७।२।७९
२१५ लिङ्निमित्ते० ३।३।१३९
२६९ लिङ्सिचा० १।२।११
३१४ लिङ्सिचो० ७।२।४२
२४३ लिटस्तझयो० ३।४।८१
२०१ लिटि धातो० ६।१।८
३४८ लिटः कानज्वा ३।२।१०६
२०२ लिट् च ३।४।११५
२५७ लिट्यन्यतरस्याम् २।४।४०
२५५ लिट्यभ्या० ७।१।१७
२९५ लिपि सिचि० ३।१।५३

पृष्ठाङ्काः सूत्राणि
२६९ लुग्वा दुह० ७।३।७३
२१३ लुङ् ३।२।११०
अट २०९ लुङ् लङ् लृङ्० ६।४।७१
२५८ लुङ् सनोर्घस्लृ० २।४।३७
२६० लुङि च २।४।३
२०४ लुटः प्रथमस्य २।४।८५
३९२ लुपि युक्तवद्० १।२।५१
३८८ लुबविशेषे ४।२।४
३४९ लृटः सद्वा ३।३।१४
२०५ लृट् शेषे च ३।३।१३
२०५ लोट् च ३।३।१६२
२०६ लोटो लङ्वत् ३।४।८५
२३९ लोपश्चास्यान्य० ६।४।१०७
२७७ लोपो यि ६।४।११८
२११ लोपो व्योर्वलि ६।१।६६
१५ लोपः शाक० ८।३।१९
४०८ लोमादि० ५।२।१००
१९५ लः कर्मणि च० ३।४।६९
१९६ लः परस्मैपदम् १।४।९९
३५६ ल्युट् च ३।३।११५
३४७ ल्वादिभ्यः ८।२।४४

[व]

२७२ वच उम् ७।४।२०
२५५ वचि स्वपि० ६।१।१५
२२५ वद व्रज हलन्त० ७।२।३
४१९ वयसि प्रथमे ४।१।२०
३९२ वरणादिभ्यश्च ४।२।८२
३९७ वर्गान्ताच्च ४।३।६३
४०५ वर्णदृढादिभ्यः ५।१।१२३
४१९ वर्णादनुदात्तात्तो० ४।१।३९

पृष्ठाङ्काः सूत्राणि
३३७ वर्तमानसामी० ३।३।१३१
१९६ वर्तमाने लट् ३।२।१२३
१०५ वर्षाभ्वश्च ६।४।८४
१३४ वसुस्रंसु० ८।२।७२
१७३ वसोः सम्प्र० ६।४।१३१
४०९ वाचो ग्मिनिः ५।२।१२४
२८३ वा जॄभ्रमु० ६।४।१२४
१३१ वा द्रुहमुह० ८।२।३३
१८७ वा नपुंसकस्य ७।१।७९
१३ वान्तो यि प्रत्यये ६।१।७९
२३६ वान्यस्य संयो० ६।४।६८
४१ वा पदान्तस्य ८।४।५९
४१४ वा बहूनाम्० ५।३।९३
२३३ वा भ्राश० ३।१।७०
३८८ वामदेवाड्ड्य० ४।२।९
११८ वामि १।४।५
११६ वाम्शसोः ६।४।८०
३८९ वाय्वृतुपित्रु० ४।२।३१
६७ वा वसाने ८।४।५६
५२ वा शरि ८।३।३६
३३८ वासरूपो० ३।१।९४
१३३ वाह ऊठ् ६।४।१३२
३०२ विज इट् १।२।२
३४४ विड्वनोरनु० ६।४।४१
२६३ विदांकुर्व० ३।१।४१
३४९ विदेः शतु० ७।१।३६
२६२ विदो लटो वा ३।४।८३
३९७ विद्या योनि० ४।३।७७
२१० विधिनिमन्त्रणा० ३।३।१६१
४१४ विन्मतोर्लुक् ५।३।६५

CC0. In Public Domain, Digitization by eGangotri

पृष्ठाङ्काः	सूत्राणि
३३८	विपराभ्यां जेः १।३।१९
५५	विप्रतिषेधे० १।४।२
६१	विभक्तिश्च १।४।१०४
२८४	विभाषा घ्राधेट्० २।४।७८
१२६	विभाषा ङिश्योः ६।४।१३६
३३५	विभाषा चिण्णमुलोः ७।१।६९
२९०	विभाषा चेः ७।३।५८
१०२	विभाषा तृतीया० १।१।९१
११२	विभाषा दिक्० १।१।२८
२६७	विभाषा लुङ् २।४।५०
४१५	विभाषा साति० ५।४।५२
४१४	विभाषा सुपो० ५।३।६८
२४७	विभाषेटः ८।३।७९
२७२	विभाषोर्णोः १।२।३
५९	विरामो० १।४।११०
३७१	विशेषणं विशे० २।१।५७
१५२	विश्वस्य वसु० ६।३।१२८
४९	विसर्जनीयस्य सः ८।३।३४
३९४	वृद्धाच्छः ४।२।११४
१६	वृद्धिरादैच् १।१।१
१६	वृद्धिरेऽचि ६।१।८८
३९४	वृद्धिर्यस्याचा० १।१।७३
२५०	वृद्भ्यः स्यसनोः १।३।९२
२७६	वृतो वा ७।२।३८
१४९	वेरपृक्तस्य ६।१।६७
४१९	वोतोगुण० ४।१।४४
३३०	व्याङ्परि० १।३।८३
१५१	व्रश्चभ्रस्ज० ८।२।३६
४०५	व्रीहिशाल्योर्ढक् ५।२।२
४०९	व्रीह्यादिभ्यश्च ५।२।११६

पृष्ठाङ्काः	सूत्राणि
	[श]
२९९	शदेश्शितः १।३।६०
१८७	शप्श्यनोर्नित्यम् ७।१।८१
४००	शब्ददर्दुरं करोति ४।४।३४
३२७	शब्दवैरकलहा० ३।१।१७
३९६	शरीरावयवाच्च ४।३।५५
४०२	शरीरावयवाद्यत् ५।१।६
१३६	शरोऽचि ८।४।४९
२९०	शर्पूर्वाः खयः ७।४।६१
२६९	शलइगुप० ३।१।४५
४०	शश्छोऽटि ८।४।६३
१५६	शसो न ७।१।२९
३३	शात् ८।४।४४
४२४	शार्ङ्गरवा० ४।१।७३
३३९	शासइदं० ६।४।३४
२५७	शासि वसि० ८।३।६०
३९२	शिखाया वलच् ४।२।८९
४५	शि तुक् ८।३।३१
४००	शिल्पम् ४।४।५५
३८५	शिवादिभ्योऽण् ४।१।११२
१२१	शि सर्वनाम० १।१।४२
२६६	शीङो रुट् ७।१।६
२६६	शीङः सार्व० ७।४।२१
४००	शीलम् ४।४।६१
३८९	शुक्राद्घन् ४।२।२६
३४८	शुषः कः ८।२।५१
२७६	शॄदॄप्रां ह्रस्वः ७।४।१२
२९४	शे मुचादीनाम् ७।१।५९
२९७	शेषात्कर्त्तरि० १।३।७८
३७९	शेषाद्विभाषा ५।४।१५४

पृष्ठाङ्काः सूत्राणि
३९३ शेषे ४।२।९२
१९८ शेषे प्रथमः १।४।१०८
१५४ शेषे लोपः ७।२।९०
८९ शेषो घ्यसखि १।४।७
३७६ शेषो बहु० २।२।२३
२६३ श्नसोरल्लोपः ६।४।१११
३०५ श्नान्नलोपः ६।४।२३
२७७ श्नाभ्यस्तयोरातः ६।४।११२
२३८ श्रुवः शृ च ३।१।७४
४०७ श्रोत्रियंश्छ० ५।२।८४
२९१ श्र्युकः किति ७।२।११
२७३ श्लौ ६।१।१०
१४५ श्वयुवमघोना० ६।४।१३३

[ष]

४०७ षट्कतिकति० ५।२।५१
१३६ षट्चतुर्भ्यश्च ७।१।५५
९६ षड्भ्यो लुक् ७।१।२२
२५६ षढोः कः सि ८।२।४१
३६९ षष्ठी २।२।८
३६१ षष्ठी शेषे २।३।५०
४१८ षिद्गौरादिभ्यश्च ४।१।४१
३५० षः प्रत्ययस्य १।३।६
३३ ष्टुना ष्टुः ८।४।४१
१४८ ष्णान्ता षट् १।१।२४

[स]

९२ सख्युरसम्बुद्धौ ७।१।९२
४०५ सख्युर्यः ५।१।१२६
३१६ सत्यापपाश० ३।१।२५

पृष्ठाङ्काः सूत्राणि
३७० स नपुंसकम् २।४।१७
२२६ सनाद्यन्ता धा० ३।१।३२
३५० सनाशंस० ३।२।१६८
३२२ सनि ग्रहगुहोश्च ७।२।१२
३२१ सन्यङोः ६।१।९
२४८ सन्यतः ७।४।७९
२४८ सन्वल्लघु० ७।४।९३
४०७ सपूर्वाच्च ५।२।८७
३६९ सप्तमी शौण्डैः २।१।४०
३७६ सप्तमी विशेषणे० २।२।३५
३६१ सप्तम्यधिकरणे च २।३।३६
४११ सप्तम्यास्त्रल् ५।३।१०
३४६ सप्तम्यां जनेर्डः ३।२।९७
४०१ सभाया यः ४।४।१०५
३६२ समर्थः पदविधिः २।१।१
३८२ समर्थानां प्रथमा० ४।१।८२
३२८ समवप्रविभ्यः० १।३।२२
३१० समवाये च ६।१।१३८
३२९ समस्तृतीया० १।३।५४
३५६ समानकर्तृकयो० ३।४।२१
३५७ समासेऽनञ्पूर्वे ७।१।३७
५ समाहारः स्वरि० १।२।३१
१६३ समः समि ६।३।९३
४७ समः सुटि ८।३।५
६० सरूपाणामेक० १।२।६४
२३ सर्वत्र विभा० ६।१।१२२
९२ सर्वनामस्थाने० ६।४।८
७१ सर्वनाम्नः ७।१।१४
१११ सर्वनाम्नः स्याड्० ७।३।११४
४११ सर्वस्य सोऽन्य० ५।३।६

पृष्ठाङ्काः सूत्राणि
६५ सर्वादीनि० १।१।२७
४११ सर्वैकान्य० ५।३।१५
२४४ सवाभ्याम्० ३।४।९१
५२ ससजुषो रुः ८।२।६६
३६२ सह सुपा २।१।४
१६४ सहस्य सध्रिः ६।३।९५
२५७ सहिवहो० ६।३।११२
२५६ सहे च ३।२।९६
१३५ सहेः साडः सः ८।३।५६
४१५ सात्पदाद्योः ८।३।१११
३६७ साधकतमं क० १।४।४२
१६६ सान्तमहतः० ६।४।१०
१५८ साम आकम् ७।१।३३
३९५ सायंचिरम्प्राह्णे० ४।३।२३
२३९ सार्वधातुकमपित् १।२।४
१९९ सार्वधातुका० ७।३।८४
३३० सार्वधातुके यक् ३।१।६७
१३४ सावनडुहः ७।१।८२
३८९ सास्य देवता ४।२।२४
२७६ सिचि च परस्मै० ७।२।४०
२३२ सिचि वृद्धि० ७।२।१
२१८ सिजभ्यस्त० ३।४।१०९
३०५ सिपि धातो रुर्वा ८।२।७४
२४५ सुट् तिथोः ३।४।१०७
८५ सुडनपुंसकस्य १।१।४३
३२५ सुप आत्मनः० ३।१।८
६५ सुपि च ७।३।१०२
३२५ सुपो धातु० २।४।७१ सुब्लुक्
५ सुपः १।४।१०३
९ सुप्तिङन्तम्पदम् १।४।१४

पृष्ठाङ्काः सूत्राणि विभि-
३४५ सुप्यजातौ० ३।२।७८
३७९ सुहृद्दुर्हृदौ मित्रा० ५।४।१५०
२८८ सृजिदृशो० ६।१।५८
२८३ सेऽसिचि ७।२।५७
२०६ सेह्यपिच्च ३।४।८७
५७ सोऽचिलोपे० ६।१।१३४
३९८ सोऽस्य निवासः ४।३।८९
३७९ सोऽपदादौ ८।३।३८
३८९ सोमाट् ट्यण् ४।२।३०
१४३ सौ च ६।४।१३
३७० संख्यापूर्वो० २।१।५२
४०६ संख्याया अव० ५।२।४२
३७८ संख्यासुपूर्वस्य ५।४।१४०
३१० संपरिभ्यां क० ६।१।१३७
१३२ संप्रसारणाच्च ६।१।१०८
१०९ संबुद्धौ च ७।३।१०५
२९ संबुद्धौ शाक० १।१।१६
३५९ संबोधने २।३।४७
३६६ संभूते ४।३।४१
३४७ संयोगादेरातो० ८।२।४३
१२ संयोगान्तस्य लोपः ८।२।२३
२१९ संयोगे गुरु १।४।११
४०७ संसृष्टे ४।४।२२
३९९ संस्कृतम् ४।४।३
३८८ संस्कृतं भक्षाः ४।२।१६
४२४ संहितशफलक्षण० ४।१।७०
३२१ सः स्यार्धधा० ७।४।४९
१५३ स्कोः संयोगा० ८।२।२९
३१२ स्तम्भुस्तुम्भु० ३।१।८२
३१३ स्तन्भेः ८।३।६७

पृष्ठाङ्काः सूत्राणि

२९९ स्तुसुधूञ्भ्यः० ७।२।७२
३६८ स्तोकान्ति० २।१।३९
३२ स्तोः श्चुना श्चुः ८।४।४०
४१६ स्त्रियाम् ४।१।३
११९ स्त्रियां च ७।१।९६
३५४ स्त्रियां क्तिन् ३।३।९४
११६ स्त्रियाः ६।४।७९
३७७ स्त्रियाः पुंव० ६।३।३४
३०३ स्त्रीपुंसाभ्याम्० ६।१।८७
३८६ स्त्रीभ्यो ढक् ४।१।१२०
२८[illegible] स्थाघ्वोरिच्च १।२।१७
६६ स्थानिवदा० १।१।५६
१० स्थानेऽन्तरतमः १।१।५०
१७० स्पृशोऽनुदके० ३।२।५८
२९८ स्फुरतिस्फु० ८।३।७६
२१३ स्मोत्तरे लङ् च ३।३।१७६
२०३ स्यतासी० ३।१।३३
३३१ स्यसिच्सी० ६।४।६२
३१८ स्वतन्त्रः कर्ता १।४।५४
२५४ स्वपो नन् ३।३।९१
७७ स्वमज्ञाति० १।१।३५
१२३ स्वमोर्नपुं० ७।१।२३
२२९ स्वरतिसूति० ७।२।४४
१२९ स्वरादिनिपा० १।१।३७.
१९७ स्वरितञितः० १।३।७२
४२१ स्वाङ्गाच्चोप० ४।१।५४
२८९ स्वादिभ्यः श्नुः ३।१।७३
८५ स्वादिष्वसर्व० १।४।१७
५८ स्वौजसमौट्० ४।१।२

[ह]

२४४ ह एति ७।४।५२
२६० हनो वध० २।४।४२
२५९ हन्तेर्जः ६।४।३६
३७६ हलदन्तात्स० ६।३।९
३२९ हलन्ताच्च १।२।१०
२ हलन्त्यम् १।३।३
३५६ हलश्च ३।३।१२१
४१८ हलस्तद्धितस्य ६।४।१५०
२०१ हलादिः शेषः ७।४।६०
२७६ हलि च ८।२।७७
१३८ हलि लोपः ८।२।११३
५३ हलि सर्वेषाम् ८।३।२२
९ हलोऽनन्तरा० १।१।७ संयोग सं
३८२ हलो यमां यमि० ८।४।६४
३४७ हलः ६।४।२
३१२ हलः श्नः शा० ३।१।८३
६२ हल्ङ्याब्भ्यो० ६।१।६८
५२ हशि च ६।१।११४
३११ हिनुमीना ८।४।१५
३०० हिंसायाम्० ६।१।१४१
२५९ हुझल्भ्यो० ६।४।१०१
२३९ हुश्नुवोः सार्व० ६।४।८७
३९७ हेतु मनुष्ये० ४।३।८१
३३[illegible] हेतु हेतुमतो० ३।३।१५६
३१८ हेतुमति च ३।१।२६
४२ हेमपरे वा० ८।३।२६
४०६ हैयङ्गवीनम्० ५।२।२३
120 होढः ८।२।३१

पृष्ठाङ्काः	सूत्राणि
१४४	हो हन्तेर्ञ्णिन्नेषु ७।३।५४
२२५	ह्म्यन्तक्षण० ७।२।५
६८	ह्रस्वनद्यापो नुट् ७।१।५४
८८	ह्रस्वस्य गुणः ७।३।१०८
३३९	ह्रस्वस्य पिति० ६।१।७१
२५३	ह्रस्वादङ्गात्० ८।२।२०७
~~१२०~~ पृ-१२३	ह्रस्वो नपुंसके० १।२।४७
२१९	ह्रस्वं लघु १।४।१०
२०२	ह्रस्वः ७।४।५९

इति रामगोविन्दशुक्लसंगृहीता सूत्रानुक्रमणिका समाप्ता ॥

अथ लघुकौमुद्यन्तर्गतवार्तिकानामकारादिक्रमेण पाठः

पृष्ठाङ्काः	वार्तिकानि
१८	अक्षादूहिन्यामुपसंख्यानम्
३००	अड्भ्यासव्यवायेऽपि सुट्कात् पूर्व इति वक्तव्यम्
३७२	अत्यादयः क्रान्ताद्यर्थे द्वितीयया
४००	अधर्माच्चेति वक्तव्यम्
३९६	अध्यात्मादेष्ठञिष्यते
१४	अध्वपरिमाणे च
३५	अनाम्नवतिनगरीणामिति वाच्यम्
२०८	अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम् ।
४०९	अन्येभ्योऽपि दृश्यते
१८४	अन्वादेशे नपुंसके एनद्वक्तव्यः,
३९०	अह्नः खः क्रतौ
४१४	अभूततद्भाव इति वक्तव्यम्
३९४	अमेहक्वतसित्रेभ्य एव
४०९	अर्णसो लोपश्च
३६८	अर्थेन नित्यसमासो विशेष्यलिंगता चेति वक्तव्यम्
४२१	अर्यक्षत्रियाभ्यां वा स्वार्थे
३७२	अवादयः क्रुष्टाद्यर्थे तृतीयया
३९३	अवारपाराद्विगृहीतादपि विपरीताच्चेतिवक्तव्यम्
३९५	अव्ययानां भमात्रे टिलोपः ।
४१५	अव्ययस्य च्वावीत्वं नेति वाच्यम्
३९८	अश्मनो विकारे टिलोपो वक्तव्यः
१७४	अस्य सम्बुद्धौ वानङ् नलोपश्च वा वाच्यः
४२१	आचार्यादणत्वं च
४१५	आद्यादिभ्यस्तसेरुपसंख्यानम्
२८१	इर इत्संज्ञा वाच्या
३६३	इवेन समासो विभक्त्यलोपश्च
३८३	ईकक् च
२७२	ऊर्णोतेराम्नेति वाच्यम्
१८	ऋते च तृतीयासमासे
७	ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्
३५४	ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः
१०६	ऋवर्णान्नस्य णत्वं वाच्यम्
१२३	एकतरात्प्रतिषेधो वक्तव्यः
१६०	एकवाक्ये युष्मदस्मदादेशा वक्तव्या
४१२	एतदोऽपि वाच्यः
१६०	एते वान्नावादय आदेशा अन्वादेशे वा वक्तव्याः ।
४१४	ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच् अन्यत्र सुबन्तस्य ।
१२१	औङः श्यां प्रतिषेधो वाच्यः ।
४०९	अङ्गात् कल्याणे ।
२४८	कमेश्च्लेश्चङ् वाच्यः ।
३८७	कम्बोजादिभ्य इति वक्तव्यम्
२२६	कास्यनेकाच आम् वक्तव्यः
२९३	क्ङिति रमागमं बाधित्वा सम्प्र-

CC0. In Public Domain. Digitization by eGangotri

…य, …र्दी वाराणसी-5

पृष्ठाङ्काः	वार्तिकानि
	सारणं पूर्वविप्रतिषेधेन ।
४१९	कृदिकारादक्तिनः
३३८	केलिमर उपसंख्यानम्
३५१	क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च
३५५	क्विन्नपीष्यते
३८७	क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्
३९०	गजसहायाभ्यां चेति वक्तव्यम्
१०१	गतिकारकेतरपूर्वपदस्य यण् नेष्यते
४०८	गुणवचनेभ्यो मतुपो लुगिष्टः
३८३	गोऽजादिप्रसङ्गे यत्
३५४	घञर्थे कविधानम्
१४१	ङाबुत्तरपदे प्रतिषेधो वक्तव्यः
४४	चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यं
५०	छत्वममीति वाच्यम्
३१९	डाचि विवक्षिते द्वे बहुलम्
३८८	तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम्
८०	तीयस्य ङित्सु वा
३९४	त्यब्नेर्ध्रुव इति वक्तव्यम्
२०८	दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः
१०५	दृन्करपुनःपूर्वस्य भुवो यण् वक्तव्यः
३८३	देवाद्यञञौ
३७०	द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्
३७५	द्विगुप्राप्तापन्नालंपूर्वगति समासेषु प्रतिषेधो वाच्यः
९७	द्विपर्यन्तानामेवेष्टिः
३८०	धर्मादिष्वनियमः
४१७	नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्
३७६	नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः
३१	न समासे
४०२	नाभि नभञ्च
४१५	नित्यमाम्रेडिते डाचीतिवक्तव्यम्
१०३	नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन
४२५	नृनरयोर्वृद्धिश्च
१५२	परौ व्रजेः षः पदान्ते
३७२	पर्यादयो ग्लानाद्यर्थे चतुर्थ्या
३८७	पाण्डोर्ड्यण्
४१९	पालकान्तान्न
३८७	पूरोरण् वक्तव्यः
३७	प्रत्यये भाषायां नित्यम्
९८	प्रथमलिंगग्रहणं च
३७२	प्रादयो गताद्यर्थे प्रथमया
३७६	प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः
१८	प्रादूहोढोढ्येषैष्येषु
३८३	बहिषष्टिलोपो यञ्च
३९०	भस्याढे तद्धिते
४२४	मत्स्यस्य ङ्याम्
२९८	मस्जेरन्त्यात्पूर्वो नुम्वाच्यः
४२१	मातुलोपाध्याययोरानुग्वा
३४३	मूलविभुजादिभ्यः कः
१२	यणः प्रतिषेधो वाच्यः
४२	यवलपरे यवला वा

पृष्ठाङ्काः	वार्तिकानि
४२१	यवनाल्लिप्याम्
४२१	यवाद्दोषे
४२३	योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः
३८६	राज्ञो जातावेवेतिवाच्यम्
४०९	लक्ष्म्या अच्च
३८५	लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः
३९४	वा नामधेयस्य वृद्धसंज्ञा वक्तव्या
२८६	वुग्युटावुवङ्यणोःसिद्धौ वक्तव्यौ
२२४	वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन ।
२०	शकन्ध्वादिषु पररूपं वाच्यम्
३७१	शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्
२९८	शे तृम्फादीनां नुम्वाच्यः
४२४	श्वसुरस्योकाराकारलोपश्च
३६६	समाहारे चायमिष्यते
३५४	सम्पदादिभ्यः क्विप्
४७	सम्पुंकानां सो वक्तव्यः
३२६	सर्वप्रातिपदिकेभ्यो क्विव्वा वक्तव्यः
४१४	सर्वप्रातिपदिकेभ्यः स्वार्थे कन्
३७०	सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः
४१९	सर्वतोऽक्तिन्नर्थादित्येके
२१८	सिज्लोप एकादेशे सिद्धो वाच्यः
४२०	सूर्याद् देवतायां चाप् वाच्यः
४२०	सूर्यागस्ययोश्छे च ङ्याञ्च
२८६	स्थाघ्वोरित्वे दीङः प्रतिषेधः
२९४	स्पृशमृषकृषतृपदृपां च्लेः सिज्वा वाच्यः
४२१	हिमारण्ययोर्महत्वे

आ[illegible]ाय—ग्रन्था[illegible],
[illegible], [illegible]
[illegible]-5

अथ लघुकौमुद्यन्तर्गतोऽष्टाध्यायीक्रमानुसारेण गणपाठः

प्रथमोऽध्यायः

ऊर्यादिच्विडाचश्च ।१।४।६१। ऊरी उररी तन्थी ताली आताली वेताली धूली धूसी शकला शंसकला ध्वंसकला भ्रंसकला गुलगुधा (सजूस्) सजुष् फल फली विक्की आक्ली आलोष्टी केवाली केवासी सेवा(ली)सी पर्याली शेवाली वर्षाली अत्यूमशा वश्मसा मस्मसा औषट् श्रौषट् (वौषट्) वषट् स्वाहा स्वधा पा(म्पी)पी प्रादुस् श्रत् आविस् इत्यूर्यादयः ॥१॥

साक्षात्प्रभृतीनि च । १।४।७४॥ साक्षात् मिथ्या चिन्ता भद्रा रोचना आस्था अमा श्रद्धा प्राजर्या प्राजरुहा वीजर्या वीजरुहा संसर्या अर्थे लवणम्। उष्णम् शीतम् उदकम् आर्द्रम् अग्नौ वशे विकसने विहसने प्रतपने प्रादुस् नमस् । आकृतिगणोऽयम् । इति साक्षात्प्रभृतिगणः॥ २ ॥

द्वितीयोऽध्यायः

सप्तमी शौण्डैः २।१।४०॥ शौण्ड धूर्त कितव व्याड प्रवीण संवीत अन्तर अधि पटु पण्डित कुशल चपल निपुण । इति शौण्डादयः ॥१॥

शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम् । शाकपार्थिव कुत(तु)पसौश्रुत अजातौल्वलि । आकृतिगणोयम् । कृतापकृत मुक्तविमुक्त पीतविपीत गतप्रत्यागत यातानुयात क्रयाक्रयिका पुटापुटिका फलाफलिका मानोन्मानिका । इति शाकपार्थिवादिः ॥ २ ॥

राजदन्तादिषु परम् ।२।२।३१॥ राजदन्तः अग्रेवणम् लिप्तवासितम् नग्नमुषितम् सिक्तसंमृष्टम् मृष्टलुञ्चितम् अवक्लिन्नपक्वम् अर्पितोतम (अर्पितोप्तम्) उप्तगाढम् उलूखलमुसलम् तण्डुलकिण्वम् दृषदुपलम् आरड्वायनि (अरग्वायनबन्धकी) चित्ररथवाह्लीकम् अवन्त्यश्मकम् शूद्रार्यम् स्नातकराजानौ विष्वक्सेनार्जुनौ अक्षिभ्रुवम् दारगवम् शब्दार्थौ धर्मार्थौ कामार्थौ अर्थशब्दौ अर्थधर्मौ अर्थकामौ वैकारिमतम् गाजवाजम् (गोजवाजम्) गोपालिधानपूलासम् (गोपालधानी पूलासम्) पूलासकारण्डम् (पूलासककुरण्डम्) स्थूलासम् (स्थूलपूला

सम्) उशीरवीजम् (जिज्ञास्थि) सिञ्जास्थम् (सिङ्जाश्वत्थम्) चित्रास्वाती (चित्रस्वाती) भार्यापती दम्पती जम्पती जायापती पुत्रपती पुत्रपशू केशश्मश्रू शिरोविजु (शिरोवीजम्) शिरोजानु सर्पिर्मधुनी मधुसर्पिषी । आद्यन्तौ अन्तादी गुणवृद्धी वृद्धिगुणौ । इति राजदन्तादिः ।

अर्धर्चाः पुंसि च ।२।४।३१।। अर्धर्च गोमय कषाय कार्षापण कुतप कुसप (कुणप) कपाट शङ्ख गूथ यूथ ध्वज कवन्ध पद्म गृह सरक कंस दिवस यूष अन्धकार दण्ड कमण्डलु मण्ड भूत द्वीप द्यूत चक्र धर्म कर्मन् मोदक शतमान यान् नख नखर चरण पुच्छ दाडिम हिम रजत सक्तु पिधान सार पात्र घृत सैन्धव औषध आढक चषक द्रोण खलीन पात्रीव षष्टिक वारवाण (वारवारण) प्रोथ कपित्थ (शुष्क) शाल शील शुक्ल (शुल्क) शीधु कवच रेणु (ऋण) कपट शीकर मुसल सुवर्ण वर्ण पूर्व चमस क्षीर कर्ष आकाश अष्टापद मङ्गल निधन निर्यास जृम्भ वृत्त पुस्त वुस्त क्ष्वेडित शृङ्ग निगड (खल) मूलक मधु मूल स्थूल शराव नाल वप्र विमान मुख प्रग्रीव शूल वज्र कटक कण्टक (कर्पट) शिखर कल्क (वल्कल) नटमक (नाटमस्तक) वलय कुसुम तृण पङ्क कुण्डल किरीट (कुमुद) अर्बुद अङ्कुश तिमिर (आश्रय) आश्राय भूषण इक्कस (इष्वास) मुकुल वसन्त तटाक (तडाग) पिटक विटङ्क विडङ्ग पिण्याक माष कोश फलक दिन दैवत पिनाक समर स्थाणु अनीक उपवास शाक कर्पास (विशाल) चषाल (चखाल) खण्ड दर विटप (रण वल मक) मृणाल हस्त आर्द्र हल (सूत्र) ताण्डव गाण्डीव मण्डप पटह सौध योध पार्श्व शरीर फल (छल) पुर (पुरा) राष्ट्र अम्बर विम्ब कुट्टिम मण्डल (कुक्कुट) कुडप ककुद खण्डल तोमर तोरण मञ्चक पञ्चक पुङ्ख मध्य (वाल) छाल वल्मीक वर्ष वस्त्र वसु देह उद्यान उद्योग स्नेह स्तेन (स्तन स्वर) संगम निष्क क्षेम शूक क्षत्र पवित्र (यौवन कलह) मालक (पालक) मूषिक (मण्डल वल्कल) कुज (कुञ्ज) विहार लोहित विषाण भवन अरण्य पुलिन दृढ आसन ऐरावत शूर्प तीर्थ लोमन (लोमश) तमाल लोह दण्डक शपथ प्रतिसर दारु धनुष मान वर्चस्क कूर्च तण्डक मठ

CC0. In Public Domain, Digitization by eGangotri

सहस्र ओदन प्रवाल शकट अपराह्ण नीड शकल तण्डुल ॥ इत्यर्धर्चादिः ॥

तृतीयोऽध्यायः

कण्ड्वादिभ्यो यक् ।३।१।२७॥ कण्डूञ् मन्तु हृणीङ् वल्गु असु (मनस्) महीङ् (लाट्) लेट् इरस् इरज् इरञ् (दुवस्) (उवस) उषस् वेट् मेधा कुषुभ (नमस्) मगध तन्तस पम्पस् (पपस) सुख दुःख (भिक्ष चरण चरम अवर) सपर अरर (अरर्) भिषज् भिष्णज् (अपर आर) इषुध वरण चुरण तुरण (भुरण) भरण गद्गद एला केला खेला (वेला शेला) लिट् लोट् (लेखा लेख) रेखा द्रवस् तिरस् अगद् उरस तरण (तरिण) पयस् सम्भूयस सम्वर ॥ आकृतिगणोऽयम् । इति कण्ड्वादिः ॥ १ ।

नन्दि १ ग्रहि २ पचा ३ दिभ्यो ल्युणिन्यचः ३।१।१३४॥

१ नन्दिवाशिमदिदूषिसाधिवर्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम् । नन्दनः वाशनः मदनः दूषणः साधनः वर्धनः शोभनः रोचनः सहितपिदमः संज्ञायाम् । सहनः तपनः दमनः जल्पनः रमणः दर्पणः संक्रन्दनः संकर्षणः संहर्षणः जनार्दनः यवनः मधुसूदनः विभीषणः लवणः चित्तविनाशनः कुलदमनः (शत्रुदमनः) इति नन्द्यादिः ॥२॥

२ ग्राही उत्साही उद्दासी उद्भासी स्थायी मन्त्री संमर्दी रक्षश्रुवपशां नौ । निरक्षी निश्रावी निवापी निशायी । याचृव्याहृव्रजवदवसां प्रतिषिद्धानाम् । अयाची अव्याहारी असंव्याहारी अव्राजी अवादी अवासी । अचामचित्तकर्तृकाणाम् । अकारी अहारी अविनायी (विशायी विषायी) विषयी विशयी देशे विशयी विषयी देशः । अभिभावी भूते । अपराधी उपरोधी परिभवी परिभावी ॥ इति ग्रहादिः ॥ ३ ॥

३ पच वच वप वद चल पत नदट् भषट् (प्लवट्) प्लुवट् चरट् गरट् तरट् चोरट् गाहट् सूरट् देवट् (दोषट्) जर (रज) मर (मद) क्षम (क्षप) सेव मेष कोप (कोष) मेध नर्त व्रण दर्श सर्प (दम्भ दर्प) जार भर श्वपच ॥ पचादिराकृतिगणः ॥ ४ ॥

मूलविभुजादिभ्य उपसंख्यानम् । मूलविभुज नखमुच काकगुह कुमुद महीध्र कुध्र गिरिध्र । आकृतिगणोऽयम् । इति मूलविभुजादिः ।

चतुर्थोऽध्यायः

अजाद्यतष्टाप् ।४।१।४।। अजा एडका कोकिला चटका अश्वा मूषिका बाला होडा पाका वत्सा मन्दा विलाता पूर्वापिहाणा (पूर्वापहाणा) अपरापहाणा । सम्भस्त्राजिनशणपिण्डेभ्यः फलात् । सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात् । शूद्रा चामहत्पूर्वा जातिः । क्रुञ्चा उष्णिहा देवविशा ज्येष्ठा कनिष्ठा । मध्यमा पुंयोगेऽपि । मूलान्नञः । दंष्ट्रा एते अजादयः ।। १ ।।

षिद्गौरादिभ्यश्च ।४।१।४१।। गौर मत्स्य मनुष्य शृङ्ग पिङ्गल हय गवय मुकय ऋष्य (पुट तूण) द्रुणु द्रोण हरिण कोकण (काकण) पटर उणक (आमल) आमलक कुवल बिम्ब बदर (फर्कर) कर्करक (कर्कर) तर्कार शर्कार पुष्कर शिखण्ड सलद शष्कण्ड सनन्द सुषम सुषव अलिन्द गडुल पा(षा)ण्डश आढक आथक आनन्द आश्वत्थ सृपाट आखुक (आपच्चिक) शष्कुल सूर्य (सूर्म) शूर्प सूच यूष (पूष) यूथ सूप मेथ वल्लक घातक सल्लक मालक मालत साल्वक वेतस वृक्ष (वृक्ष) अतस (उभय) भृङ्ग मह (मठ) मेह छेद पेश मेद श्वन् तक्षन् अनडुही अनड्वाही । एषणः करणे । देह देहल काकादन गवादन तेजन रजन लवण औद्गाहमानि (आद्गाहमानि) गौतम (गोतम) (पारक) अयस्थूण (अयः स्थूण) भौरिकि भौलिकि भौलिङ्गि यान मेध आलम्बि आलजि आलब्धि आलक्षि केवाल आपक आरट नट टोट नोट मूलाट शातन (पोतन) पातन पाठन (पानठ) आस्तरण अधिकरण अधिकार अग्रहायणी (आग्रहायणी) प्रत्यवरोहिणी (सेचन) । सुमङ्गलात्संज्ञायाम् । अण्डर सुन्दर मण्डल मन्थर मंगल पट पिण्ड (पण्ड) षण्ड उर्द गुर्द शम सूद औड (आर्द्र ह्रद ह्लद) पाण्ड (भाण्डल) भाण्ड (लोहाण्ड) कदर कन्दर कदल तरुण तलुन कल्माष बृहत् महत (सोम) सौधर्म । रोहिणी नक्षत्रे । रेवती नक्षत्रे । (विकल) निष्कल पुष्कल । कटाच्छ्रोणिवचने । पिप्पल्यादयश्च । पिप्पली हरितकी (हरीतकी) कोशातकी शमी वरी शरी पृथिवी क्रोष्टु मातामह पितामह इति गौरादिः ।। ३ ।।

भरतनिधि, करौंदी
वाराणसी-5

वह्वादिभ्यश्च ४।१।४५।। बहु पद्धति अञ्चति अङ्कति अंहति शकटि (शकति) शक्तिः शस्त्रे। शारि वारि राति राधि (शाधि) अहि कपि यष्टि मुनि। इतः प्राण्यङ्गात्। कृदिकारादक्तिनः। सर्वतोऽक्तिन्नर्थादित्येके। चण्ड अराल कृपण कमल विकट विशाल विशङ्कट भरुज ध्वज। चन्द्रभागान्नद्याम्। (चन्द्रभागा नद्याम्) कल्याण उदार पुराण अहन् क्रोड नख खुर शिखा वाल शफ गुद।। आकृतिगणोऽयम्।। तेन भग गल राग इत्यादि।। इति वह्वादयः।। ४।।

शार्ङ्गरवाद्यञो ङीन्।४।१।७३।। शार्ङ्गरव कापटव गौग्गुलव ब्राह्मण वैद गौतम कामण्डलेय ब्राह्मणकृतेय (आनिचेय) आनिधेय आशोकेय वात्स्यायन मौञ्जायन (कैकश) कैकस काप्य (काव्य) शैव्य एहि पर्येहि आश्मरथ्य औदपान अराल चण्डाल वतण्ड। भोगवद्गौरिमतोः संज्ञायाम् घादिषु [६।३।४३।] नित्यं ह्रस्वार्थम्। नृनरयोर्वृद्धिश्च। शार्ङ्गरवादिः।। ५।।

अश्वपत्यादिभ्यश्च।४।१।८४।। अश्वपति (ज्ञानपति) शतपति धनपति गणपति [स्थानपति यज्ञपति] राष्ट्रपति कुलपति गृहपति (पशुपति) धान्यपति धन्वपति (वन्धुपति धर्मपति) सभापति प्राणपति क्षेत्रपति।। इत्यश्वपत्यादिः।। ६।।

उत्सादिभ्योऽञ्।४।१।८६।। उत्स उदपान विकर विनद महानद महानस महाप्राण तरुण तलुन। वष्कयासे। पृथिवी (धेनु) पङ्क्ति जगती त्रिष्टुप् अनुष्टुप् जनपद भरत उशीनर ग्रीष्म पीलुकुण। उदस्थानदेशे। पृषदंश भल्लकीय रथन्तर मध्यंदिन वृहत् महत् सत्वत् कुरु प(पा)ञ्चाल इन्द्रावसान उष्णिह् ककुभ सुवर्ण देव ग्रीष्मादच्छन्दसि।। इत्युत्सादिः।।७।।

वाह्वादिभ्यश्च।४।१।९६।। बाहु उपवाहु उपवाकु निवाकु शिवाकु वटाकु उपनिन्दु (उपविन्दु) वृषली वृकला चूडा वलाका मूषिका कुशला भगला (छगला) ध्रुवका (धुवका) सुमित्रा दुर्मित्रा पुष्करसद् अनुहरत् देवशर्मन् अग्निशर्मन् (भद्रशर्मन् सुशर्मन्) कुनामन् (सुनामन्) पञ्चन् सप्तन् अष्टन्। अमितौजसः सलोपश्च। मु(सु) धावत् उदञ्चु शिरस् माष शराविन् मरीची क्षेमवृद्धिन् शृङ्खलतोदिन् खरनादिन् नगरमर्दिन्

प्राकारमर्दिन् लोमन् अजीगर्त कृष्ण युधिष्ठिर अर्जुन साम्ब गद प्रद्युम्न राम रक्तम् (उदङ्क)। उदकः संज्ञायाम् । संभूयोम्भसोः सलोपश्च । आकृतिगणोयम् ॥ तेन, सात्वकिः (सात्यकिः) जाङ्घिः ऐन्द्रशर्मिः आजधेनविः । इत्यादि ॥ इति बाह्वादयः ॥ ८ ॥

अनृष्यानन्तर्ये विदादिभ्योऽञ् ॥४।१।१०४॥ विद उर्व कश्यप कुशिक भरद्वाज उपमन्यु किलात कन्दर्प (किंदर्भ) विश्वानर (ऋष्टिषेण) ऋष्टिषेण ऋतभाग हर्यश्व प्रियक आपस्तम्ब कूचवार शरद्वत् शुनक (शुनक्) धेनु गोपवन शिग्रु बिन्दु (भोगक) भाजन (शमिक) अश्वावतान श्यामाक श्यामक् (श्यावलि) श्यापर्ण हरित किन्दास वह्यस्क अर्कजूष (अर्कलूष) वध्योग विष्णुवृद्ध प्रतिबोध रचित (रथीतर) रथन्तर गविष्ठिर निषाद (शबर अलस) मठर (मृडाकु) सृपाकु मृदु पुनर्भू पुत्र दुहितृ ननान्दृ । परस्त्री परशुं च ॥ इति विदादिः ॥ ९ ॥

गर्गादिभ्यो यञ् ।४।१।१०५॥ गर्ग वत्स । वाजासे । संकृति अज व्याघ्रपात् विदभृत् प्राचीनयोग (अगस्ति) पुलस्ति चमस रेभ अग्निवेश शङ्ख शट शक धूम एक अवट मनस धनञ्जय वृक्ष विश्वावसु जरमाण लोहित शंसित बभ्रु वल्गु मण्डु गण्डु शङ्ख लिगु गुदलु मन्तु मङ्क्षु आलिगु जिगीषु मनु तन्तु मनायी सूनु कथक कन्थक ऋक्ष वृक्ष (वृक्ष) (तनु) तरुक्ष तलुक्ष तण्ड वतण्ड कपिकत (कपि कत) कुरुकत अनडुह कण्व शकल गोकक्ष अगस्त्य कण्डिनी यज्ञवल्क पर्णवल्क अभयजात विरोहित वृषगण रहूगण शण्डिल वर्णक (चणक) चुलुक मुद्गल मुसल जमदग्नि पराशर जतूकर्ण (जातूकर्ण) महित मन्त्रित अश्मरथ शर्कराक्ष पूतिमाष स्थूरा अदरक (अररक) एलाक पिङ्गल कृष्ण गोलन्द उलूक तितिक्ष भिषज (भिषज् भिष्णज) भडित भण्डित दल्भ चेकित चिकित्सित देवहू इन्द्रहू एकलु पिप्पलु बृहदग्नि (सुलोहिन्) सुलाभिन् उक्थ कुटीगु ॥ गर्गादिः ॥ १० ॥

शिवादिभ्योऽण् ।४।१।११२॥ शिव प्रोष्ठ प्रौष्ठिक (प्रोष्ठिक) चण्ड जम्भ भूरि दण्ड कुठार ककुभ (ककुभा) अनभिम्लान कोहित मुख (सुख) सन्धि मुनि ककुत्स्थ कहोड कोहड कहूय कहय रोध कपिञ्जल (कुपिञ्जल)

खञ्जन वतण्ड तृणकर्ण क्षीरह्रद जलह्रद परिल पथिक पिष्ट हैहय पार्षिका गोपिका कपिलिका जटिलिका वधिरिका मञ्जीरक (मजिरक) वृष्णिक खञ्जास खञ्जाह (खञ्जार खञ्जाल कर्मार) रेख लेख अलेखन विश्रवण रवण वर्तनाक्ष ग्रीवाक्ष (विटप पिटक) विटाक तृक्षाक नभाक ऊर्णनाभ जरत्कारु (पृथा उत्क्षेप) पुरोहितिका सुरोहितिका सुरोहिका आर्यश्वेत (अर्यश्वेत) सुपिष्टि मसुरकर्ण मयूरकर्ण (खर्जुरकर्ण) कदूरक तक्षन् ऋषिकेण (ऋष्टिषेण) गङ्गा विपास यस्क लह्य द्रुह्य अयस्थूण तृणकर्ण (तृण कर्ण) पर्ण भलन्दन विरूपाक्ष भूमि इला सपत्नी । द्व्यचोनद्याः त्रिवेणी त्रिवणं च । इति शिवादिः । आकृतिगणः ॥ ११ ॥

रेवत्यादिभ्यष्ठक् ।४।१।१४६॥ रेवती अश्वपाली मणिपाली द्वारपाली वृकवञ्चिन् वृकबन्धु वृकग्राह कर्णग्राह (गण्डग्राह) कुक्कुटाक्ष (ककुदाक्ष) चामरग्राह ॥ इति रेवत्यादिः ॥ १२ ॥

कम्बोजाल्लुक् ।४।१।१७५॥ कम्वोज चोल केरल शक यवन इति कम्वोजादिः ॥ १३ ॥

भिक्षादिभ्योऽण् ।४।२।३८॥ भिक्षा गर्भिणी क्षेत्र करीष अङ्गार चर्मिन् धर्मिन् सहस्र युवति पदाति पद्धति अथर्वन् दक्षिणा भरत विषय श्रोत्र ॥ इति भिक्षादिः ॥ १४ ॥

क्रमादिभ्यो वुन् ।४।२।६१॥ क्रम पद शिक्षा मीमांसा सामन् । इति क्रमादिः ॥ १५ ॥

वरणादिभ्यश्च ।४।२।८२॥ वरणा शृङ्गि शाल्मलि शुण्डि शयाण्डि पर्णी ताम्रपर्णी गोद आलिङ्ग्यायन जालपदी (जानपदी) जम्बू पुष्कर चम्पा पम्पा वल्गु उज्जयनी गया मथुरा तक्षशिला उरसा गोमती वलभी । इति वारणादिः ॥ १६ ॥

नद्यादिभ्यो ढक् ।४।२।९७॥ नदी मही वाराणसी श्रावस्ती कौशाम्बी वनकौशाम्बी काशपरी काशफारी (काशफरी) खादिरी पूर्वनगरी पाठा माया शाल्वादार्वा सेतकी । वडवाया वृषे ॥ इति नद्यादिः ॥ १७ ॥

दिगादिभ्यो यत् ।४।३।५४॥ दिश् वर्ग पूग गण पक्ष धाय्य मित्र

मेधा अन्तर पथिन् रहस् अलीक उखा साक्षिन् देश आदि अन्त मुख जघन मेघ यूथ । उदकात्संज्ञायाम् । ज्ञाय (न्याय) वंश वेश काल आकाश ॥ इति दिगादिः ॥ १८ ॥

नित्यं वृद्धशरादिभ्यः ।४।३।१४४॥ शर दर्भ मृद् (मृत्) कुटी तृण सोम बल्वज ॥ इति शरादिः ॥ १९ ॥

पञ्चमोऽध्यायः

उगवादिभ्यो यत् ।५।१।२॥ गो हविस् अक्षर विष वर्हिस् अष्टका स्खदा युग मेधा स्रुच् । नाभि नभं च । शुनः सम्प्रसारणं वा च दीर्घत्वं तत्संनियोगेन चान्तोदात्तत्वम् ॥ ऊधसोऽनङ् च । कूप खद दर खर असुर अध्वन् (अध्वन) क्षर वेद वीज दीस (दीप्त) ॥ इति गवादिः ॥१॥

दण्डादिभ्यः यः ।५।१।६६॥ दण्ड मुसल मधुपर्क कशा अर्घ मेघ मेधा सुवर्ण उदक वध युग गुहा भाग इभ भङ्ग ॥ इति दण्डादिः ॥२॥

पृथ्वादिभ्य इमनिज्वा ।५।१।१२२॥ पृथु मृदु महत् पटु तनु लघु वहु साधु आशु उरु गुरु वहुल खण्ड दण्ड चण्ड अकिंचन वाल होड पाक वत्स मन्द स्वादु ह्रस्व दीर्घ प्रिय वृष ऋजु क्षिप्र क्षुद्र अणु ॥ इति पृथ्वादिः ॥ ३ ॥

वर्णदृढादिभ्यः ष्यञ्च ।५।१।१२३॥ दृढ वृढ परिवृढ भृश कृश वक्र शुक्र चुक्र आम्र कष्ट (कृष्ट) लवण ताम्र शीत उष्ण जड वधिर पण्डित मधुर मूर्ख मूक स्थिर । वेर्यातलावमतिर्मनःशारदानाम् । समो मतिमनसोः । जवन । इति दृढादिः ॥ ४ ॥

गुणवचनब्राह्मणादिभ्यः कर्मणि च ।५।१।१२४॥ ब्राह्मण वाडव माणव । अर्हतो नुम् च । चोर धूर्त आराधय विराधय अपराधय उपराधय एकभाव द्विभाव त्रिभाव अन्यभाव अक्षेत्रज्ञ संवादिन् संवेशिन् संभाषिन् वहुभाषिन् शीर्षघातिन् विघातिन समस्थ विषमस्थ परमस्थ मध्यमस्थ अनीश्वर कुशल चपल निपुण पिशुन कुतूहल क्षेत्रज्ञ निघ्न वालिश अलस दुष्पुरुष कापुरुष राजन् गणपति अधिपति गडुल दायाद विशस्ति विषम विपात निपात । सर्ववेदादिभ्यः स्वार्थे । चतुर्वेदस्योभयपदवृद्धिश्च । शौटीर ॥ आकृतिगणः । इति ब्राह्मणादिः ॥ ५ ॥

CC0. In Public Domain, Digitization by eGangotri

पत्यन्तपुरोहितादिभ्यो यक् ।५।१।१२८।। पुरोहित । राजासे । ग्रामिक पिण्डित सुहित वालमन्द (वाल मन्द) खण्डिक दण्डिक वर्मिक कर्मिक धर्मिक शीलिक सूतिक मूलिक तिलक अञ्जलिक (अन्तलिक) रूपिक ऋषिक पुत्रिक अविक क्षत्रिक पर्षिक पथिक चर्मिक प्रतिक सारथि आस्तिक सूचिक संरक्ष सूचक (संरक्षसूचक) नास्तिक अजानिक शाक्वर नागर चूडिक ।। इति पुरोहितादिः ।। ६ ।।

तदस्य संजातं तारकादिभ्य इतच् ।५।२।३६।। तारका पुष्प कर्णक मञ्जरी ऋजीष क्षण (सूच) सूत्र मूत्र निष्क्रमण पुरीष उच्चार प्रचार विचार कुड्मल कण्टक मुसल मुकुल कुसुम कुतूहल स्तवक (स्तवक) किसलय पल्लव खण्ड वेग निद्रा मुद्रा बुभुक्षा धेनुष्या पिपासा श्रद्धा अभ्र पुलक अंगारक वर्णक द्रोह दोह सुख दुःख उत्कण्ठा भर व्याधि वर्मन् व्रण गौरव शास्त्र तरंग तिलक चन्द्रक अन्धकार गर्व कुमुर (मुकुर) हर्ष उत्कर्ष रण कवलय गर्ध क्षुध सीमन्त ज्वर गर रोग रोमाञ्च पण्डा कज्जल तृष् कोरक कल्लोल स्थफुट फल कञ्चु(ल)क शृङ्गार अंकुर शैवल वकुल श्वभ्र अराल कलङ्क कर्दम कन्दल मूर्च्छा अंगार हस्तक प्रतिविम्व विघ्न तन्त्र प्रत्यय दीक्षा गर्ज । गर्भादप्राणिनि ।। इति तारकादिः ।। आकृतिगणः ।। ७ ।।

इष्टादिभ्यश्च ।५।२।८८।। इष्ट पूर्त उपासादित निगदित परिगदित परिवादित निकथित निषादित निपठित संकलित परिकलित संरक्षित परिरक्षित अर्चित गणित अवकीर्ण आयुक्त गृहीत आम्नात श्रुत अधीत अवधान आसेवित अवधारित अवकल्पित निराकृत उपकृत उपाकृत अनुयुक्त अनुगणित अनुपठित व्याकुलित ।। इतीष्टादिः ।। ८ ।।

व्रीह्यादिभ्यश्च ।५।२।११६।। व्रीहि माया शाला शिखा माला मेखला केका अष्टका पताका चर्मन् कर्मन् वर्मन् दंष्ट्रा संज्ञा वडवा कुमारी नौ वीणा वलाका यवखद नौ कुमारी । शीर्षान्नञः ।। इति व्रीह्यादिः ।।९।।

अर्श आदिभ्योऽच् ।५।२।१२७ ।। अर्शस् उरस तुन्द चतुर पलित (कलित) जटा घटा घाटा अभ्र अर्घ कर्दम अम्ल लवण । स्वाङ्गाद्धीनात् वर्णात् । इत्यर्श आदिः । आकृतिगणः ।। १० ।।

अव्ययीभावे शरत्प्रभृतिभ्यः । ५।४।१०७।। शरद् विपास अनस् मनस् उपानह् अनडुह् दिव हिमवत् हिरुक विद सद दिश् दृश विश् चतुर् त्यद् तद् यद् कियत् । जराया जरसश्च । प्रतिपरिसमनुभ्योऽक्ष्णः । पथिन् ।। इति शरदादिः ।। ११ ।।

पादस्य लोपोऽहस्त्यादिभ्यः ५।४।१३८ । हस्तिन कुदाल अश्व कशिक कुरत कटोल कटोलक गण्डोल गण्डोलक (कण्डोल कण्डोलक) अजकपोत जाल गण्ड महिला दासी गणिका कुसूल ।। इति हस्त्यादिः ।।१२।।

उरःप्रभृतिभ्यः कप् ५।४।१५१ ।। उरस् सर्पिस उपानह् पुमान् अनड्वान् पयः नौ लक्ष्मीः दधि मधु शाली शालिः । अर्थान्नञः । इत्युरः प्रभृतयः ।। १३ ।।

षष्ठोऽध्यायः

शकन्ध्वादिषु पररूपं वाच्यम् ।६।१।६४ शकन्धुः कर्कन्धुः कुलटा । सीमन्तः केशवेशे । हलीषा मनीषा लाङ्गलीषा पतञ्जलिः । सारङ्गः पशुपक्षिणोः । इति शकन्ध्वादिः ।। १ ।।

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणी प्रियादिषु ६।३।३४। प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः सचिवा स्वसा कान्ता क्षान्ता समा चपला दुहिता वामा अबला तनया । इति प्रियादिः ।। २ ।।

तसिलादिष्वाकृत्वसुचः ६।३।३५। तसिल् त्रल् तरप् तमप् चरट् जातीयर् कल्पप् देशीयर रूपप् पाशप् थल थाल् दा र्हिल् तिल् ध्यन् ।। इति तिसलादयः ।। ३ ।।

सप्तमोऽध्यायः

अनुशतिकादीनां च ७।३।२०। अनुशतिक अनुहोड अनुसंवरण (अनुसंचरण) अनुसंवत्सर अङ्गारवेणु असिहत्य अस्यहत्य अस्यहेति वध्योग पुस्करसद् अनुहरत् कुरुकत कुरुपञ्चाल उदकशुद्ध इहलोक परलोक सर्वलोक सर्वपुरुष सर्वभूमि प्रयोग परस्त्री । राजपुरुषात्ष्यञि । सूत्रनड । इत्यनुशतिकादिः । आकृतिगणोऽयम् ।। तेन अभिगम अ (धि) भिभूत अ (भि) धिदेव चतुर्विद्या इत्यादि ।। ४ ।।

अष्टमोऽध्यायः

मादुपधायाश्च मतोर्वोऽयवादिभ्यः ।८।२।९। यव दल्मि ऊर्मि (उर्मि) भूमि कृमि कुञ्चा वशा द्राक्षा ध्राक्षा ध्रजि ध्रजि ध्वजि निजि सिजि सञ्जि हरित् ककुत् मरुत् गरुत् इक्षु द्रुमधु ॥ इति यवादिः । आकृतिगणः ॥ १ ॥

कस्कादिषु च ८।३।४८। कस्कः कौतस्कुतः भ्रातुष्पुत्र शुनस्कर्णः सद्यस्कालः सद्यस्क्रीः साद्यस्कः कांस्कान् सर्पिष्कुण्डिका धनुष्कपालम् वहिष्पलम् (वर्हिष्पलम्) यजुष्पात्रम्–अयस्कान्तः तमस्काण्डः-अयस्काण्डः मेदस्पिण्डः भास्करः अहस्करः । इति कस्कादिराकृतिगणः ॥ २ ॥

क्षुभ्नादिषु च ८।४।३९। क्षुभ्न नृनमन् नन्दिन् नन्दन नगर एतान्युत्तरपदानि संज्ञायां प्रयोजयन्ति । हरिनन्दी हरिनन्दनः । गिरिनगरम् । नृतिर्यङि प्रयोजयन्ति । नरीनृत्यते, नर्तन, गहन, नन्दन निवेश निवास अग्नि अनूप । एतान्युत्तरपदानि प्रयोजयन्ति । परिनर्तनं परिगहनं परिनन्दनं शरनिवेशः शरनिवासः शराग्निः दर्भानूपः । आचार्यादणत्वं च । आकृतिगणोऽयम् । पाठान्तरम् । क्षुभ्ना तृप्नु नृनमन नरनगर नन्दन । यङ्नृती । गिरिनदी गृहगमन निवेश निवास अग्नि अनूप आचार्यभोगीन चतुर्हायन । इरिकादीनि वनोत्तरपदानि संज्ञायाम् । इरिका तिमिर समीर कुवेर हरि कमीर इति क्षुभ्नादिः ॥ ३ ॥

इति लघुसिद्धान्तकौमुदीस्थो गणपाठः समाप्तः ।

॥ इति शिवम् ॥

अथ लघुकौमुद्यन्तर्गतधातुसूची

पृष्ठाङ्काः धातवः

[अ]
२१६ अत
२५७ अद
३०६ अञ्जू
२४९ अय
२२४ अर्च
३१५ अश
२६३ अस्
[इ]
२६७ इङ्
२६४ इण्
३०७ (ञि) इन्धी
२९८ इषु
[उ]
२९७ उछि
२९७ उज्झ
३०५ उन्दी
[ऊ]
२७२ ऊर्णुञ्
[ऋ]
२९७ ऋच्छ
[ए]
२४२ एध
[क]
२२५ कटे
३१७ कथ
२४६ कमु

पृष्ठाङ्काः धातवः

२९८ कुट
३१५ कुप
३०९ (डु) कृञ्
२९५ कृती
३०४ कृती
२९३ कृष
३०० कॄ
३१४ कॄञ्
३१३ क्नूञ्
२३३ क्रमु
३११ (डु) क्रीञ्
३०९ क्षणु
२३० क्षि
३०९ क्षिणु
३०४ क्षुदिर्
२५० क्षुभ
२५० (ञि) क्ष्विदा
[ख]
२९५ खिद
२६२ ख्या
[ग]
३१७ गण
२२० गद
२४० गम्लृ
२२५ गुपू
३०० गॄ
३१५ ग्रह

पृष्ठाङ्काः धातवः

२३६ ग्लै
[घ]
३२० घट
२५० घुट
[च]
२९० चिञ्
२२० चिती
३१६ चुर
[छ]
३०४ छिदिर
३०४ (उ) छृदिर्
२८४ छो
[ज]
२८७ जनी
३०२ जुषि
३२० ज्ञप
३१५ ज्ञा
[ड]
२८६ डीङ्
[ण]
२२२ णद
२५० णभ
२८५ णश्
२८८ णह
२८१ णिजिर
२५४ णीञ्
२९२ णुद्

पृष्ठाङ्काः धातवः

२९८ णू
[त]
३०६ तञ्चू
३०८ तनु
२३२ तप
२९२ तुद
२५० तुभ
३०९ तृणु
३०४ (उ) तृदिर्
२९७ तृप्
२९७ तृम्फ्
३०४ तृह
२५१ त्रपूष्
२८३ त्रसी
[द]
२५१ दल्
२७९ (डु) दाञ्
२६२ दाप्
२८२ दिवु
२७० दिह
२८६ दीङ्
२८७ दीपी
२६८ दुह
२८६ दूङ्
३१३ दृञ्
२८४ दो
२४९ द्युत

पृष्ठाङ्काः	धातवः
२६२	द्रा
३१३	द्रूञ्
	[ध]
२८१	(डु) धाञ्
२६१	धूञ्
३१५	धूञ्
२५४	धृञ्
२५०	ध्वंसु
२५०	ध्वंसु
	[न]
२२८	(टु) नदि
२८३	नृती
	[प]
२५४	(डु) पचप्
३२१	पठ
२८७	पद्
२३८	पा
२६२	पा
२९५	पिशृ
३०७	पिस्लृ
२८७	पीङ्
२९८	पुट
२८५	पुष्
३१३	पूञ्
३०२	पृङ्
२९८	पृड
२७५	पॄ
३०१	प्रच्छ
३११	प्रीञ्
२६२	प्सा
	[ब]
२८७	बुध
२५०	ब्रूञ्
	[भ]
२५५	भज
३०७	भञ्जो
२६२	भा
३०३	भिदिर्
२७५	(ञि) भी
३०७	भुज
२९९	भुजो
१९६	भू
२७९	(डु) भृञ्
२५२	भृञ्
२९२	भ्रस्ज
२५०	भ्रंसु
	[म]
३१०	मनु
२९८	(टु) मस्जो
२७८	माङ्
२८७	माङ्
२५०	(ञि) मिदा
२९४	मिल
२८७	मीङ्
३१२	मीञ्
२९४	मुच्लृ
३१५	मुष
३०१	मृङ्
२९८	मृड
२९९	मृश
२८८	मृष
	[य]
२५५	यज
२६१	या
२६०	यु
३०४	युजिर्
३१३	युञ्
२८८	युध
	[र]
२६२	रा
३०४	रिचिर्
२५०	रुच
२९९	रुजो
३०२	रुधिर
	[ल]
२६२	ला
२९५	लिप
२७०	लिह
२९५	लुप्लृ
२९७	लुभ
३१३	लूञ्
	[व]
३१०	वनु
२५६	वह
२६२	वा
३०४	विचिर्
३०२	(ओ) विजी
३०६	(ओ) विजी
२८७	विद
२६२	विद
३०७	विद
२९५	विद्लृ
२९९	विश
३१६	वृङ्
३१४	वृञ्
२५०	वृतु
२९६	व्यच
२८४	व्यध
२२४	व्रज
२९५	(ओ) व्रश्चू
	[श]
२९९	शद्लृ
३०६	शिष्लृ
२६६	शीङ्
२२०	शुच
२९८	शुन
२५०	शुभ
२८५	शुष्
२८४	शो
२६२	श्रा
२५२	श्रिञ्
३११	श्रीञ्
२३८	श्रु
२५०	श्विता
	[ष]
३०८	षणु
२९९	षद्लृ
२९५	षिच्
३१२	षिञ्
२१८	षिध
२८३	षिवु
२८९	षुञ्
२८२	षूङ्

पृष्ठाङ्काः	धातवः
२८४	षो
३१८	ष्ठा
२६२	ष्णा
२५०	(ञि) ष्विदा
	[स]
२८८	सृज्
३१२	स्कुञ्
२९०	स्तृञ्
३१३	स्तॄञ् स्तॄञ्
२९८	स्फुट
२९८	स्फुर
२९८	स्फुल
२५०	स्रंसु
२५०	स्रम्भु
	[ह]
२५८	हन
२७७	(ओ) हाक्
२७९	(ओ) हाङ्
३०४	हिसि
२७२	हु
२५४	हृञ्
२७५	ह्री
२३७	ह्वृ

इति शम्

⁂

॥ श्रीः ॥

लघुसिद्धान्तकौमुदी

बालमनोरमासहिता

नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम् ।
पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम् ॥ १ ॥

अइउण् १ । ऋलृक् २ । एओङ् ३ । ऐऔच् ४ । हयवरट् ५ । लण् ६ । ञमङणनम् ७ । झभञ् ८ । घढधष् ९ । जबगडदश् १० । खफछठथचटतव् ११ ।

सूर्यनारायणं स्वीयमिष्टदेवमुपास्महे ।
यत्प्रकाशात्प्रकाशन्ते पदार्थास्तमसावृताः ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं मङ्गलमाचरन् शिष्यशिक्षायै निबध्नाति नत्वेति ।

अहम् (वरदराजाचार्य्यः) शुद्धां–शुद्धस्वरूपां, गुण्यां–प्रशस्त गुणयुक्ताम्, सरस्वतीं देवीं नत्वा–प्रणम्य पाणिनीयप्रवेशाय–पाणिनिप्रोक्तव्याकरणशास्त्रे बालानां झटिति बुद्धिप्रवेशार्थं, लघुसिद्धान्तकौमुदीम्–लघुसिद्धान्तकौमुदीनामकं ग्रन्थं, करोमि-रचयामीत्यर्थः ।

अइउणित्यादौ सन्धिस्तु न, स्वराणां चादिषु पाठेन निपातसंज्ञायां प्रगृह्यत्वेन प्रकृतिभावात् वर्णानामसन्दिग्धत्वेन बोधनार्थं संहिताया अविवक्षणाद्वा ।

हयवरडिति सूत्रे हकारग्रहणम् अट् अश् हश् इण् प्रत्याहारेषु हकारग्रहणार्थम् तेन अर्हेणेत्यादिप्रयोगासिद्धिः । हलितिसूत्रे हकारोपदेशस्तु वल् रल् झल् शल् प्रत्याहारेषु हकारग्रहणार्थः तेन रुदिहि स्वपिहि, इत्यादिप्रयोगासिद्धिः ।

[illegible]
भाष्यवचनम् । (पृ. [illegible])

CC0. In Public Domain. Digitization by eGangotri

कपय् १२ । शषसर् १३ । हल् १४ ॥ इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । एषामन्त्या इतः । हकारादिष्वकार उच्चारणार्थः । लण्मध्ये त्वित्संज्ञकः ॥⑦ **हलन्त्यम् १ । ३ । ३** ॥ उपदेशे[1]ऽन्त्यं हलित्स्यात् । उपदेश आद्योच्चारणम् । सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं

इति माहेश्वराणीति । इमानि चतुर्दशसूत्राणि महेश्वरादागतानि शङ्करवरप्रसादात् पाणिनिना लब्धानीति यावत् । तदुक्तं शिक्षायाम्—

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥ इति

तानि च सूत्राणि अणादिसंज्ञार्थानि अण् अक् अच् इत्यादिसंज्ञासिद्धिरेव तेषां प्रयोजनमित्यर्थः । **एषामिति**—एषां चतुर्दशसूत्राणाम् अन्त्याः=अन्ते भवाः णकारादयो वर्णा इतः=इत्संज्ञकाः सन्तीत्यर्थः । **हकारादिष्विति**—हयवरडित्यादिसूत्रे हकारोत्तरमकार उच्चारणार्थ एव, अचं विना व्यञ्जनस्योच्चारणासम्भवात् । सर्वत्राकारस्योच्चारणार्थत्वप्रसक्तावाह—**लण्मध्येत्विति** । लण्सूत्रमध्यस्थाकारस्तु नोच्चारणार्थः अपि तु इत्संज्ञार्थस्तेन रप्रत्याहारसिद्ध्या उरण्रपर इत्यादौ रपर इत्यनेन लपरस्यापि विधानात्तवल्कार इत्यादेः सिद्धिः ।

हलन्त्यमिति—अत्र उपदेशेऽजनुनासिक इत्, इतिसूत्राद् उपदेशे इति इदिति चानुवर्तते । हल् अन्त्यमिति छेदः । अन्ते भवमन्त्यमिति विग्रहः । ततश्च उपदेशेऽन्त्यं हल् इत्स्यादिति सूत्रार्थः । उपशब्द आद्यर्थकः, दिशिरुच्चारणार्थकस्तथा च प्रत्यासत्त्या एतच्छास्त्रप्रवर्तकाचार्याणां पाणिनि-कात्यायन-पतञ्जलीनामाद्योच्चारणमुपदेशः, इति फलितम् ।

सूत्रेष्वदृष्टमिति—यत्पदं सूत्रेषु नास्ति तत्सूत्रान्तरादन्यसूत्रादनुवर्त-

---

[1] उपदेश अर्थात् पाणिनि कात्यायन पतञ्जलिका जो प्रथम उच्चारण उसके काल में विद्यमान जो अन्त्य हल् उसकी इत्संज्ञा हो । उपदेश में अन्त्य हल् की इत्संज्ञा हो यह अर्थ ठीक नहीं क्योंकि अइउण् प्रभृति सूत्रों में उपदेश काल में इत्संज्ञा नहीं बन सकती क्योंकि अइउण् सूत्र के उपदेश काल में हल् पदार्थ का ही ज्ञान नहीं है पूर्वोक्त-अर्थ में तो ठीक है क्योंकि प्रथमोच्चारण काल में अइउण् सूत्र के अन्त्य में विद्यमान जो णकार उसकी इत्संज्ञा हल् प्रत्यहार सिद्धि के अनन्तर हो जायगी ।

सर्वत्र ॥ **अदर्शनं लोपः १।१।६०॥** [1]प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् । **तस्य लोपः १।३।९ ॥** तस्येतो लोपः स्यात् । णादयोऽणाद्यर्थाः । **आदिरन्त्येन सहेता १।१।७१ ॥** अन्त्येनेतो सहित आदिर्मध्यगानां

नीयम् इतितदर्थः, यथास्मिन्ऽसूत्रे उपदेशादिपदम् ।

अदर्शनमिति । अस्य सूत्रस्य दर्शनाभावस्य लोपसंज्ञेत्यर्थकरणे त्रपु इत्यादौ क्विपोऽदर्शनस्य लोपसंज्ञायां प्रत्ययलक्षणेन तुगापत्तिरत आह-प्रसक्तस्येति । प्रसक्तस्य-शास्त्रतोऽर्थतो वा प्रसक्तस्य अदर्शनं-दर्शनाभावो लोपसंज्ञो भवतीति सूत्रार्थः ।

तस्य लोप इति–तच्छब्दस्य पूर्वपरामर्शकत्वात् तस्य-इत्संज्ञकस्य लोपो भवतीति सूत्रार्थः ।

आदिरन्त्येनेति–अन्ते भवोऽन्त्य इति विग्रहः । समुदायं विना अवयवस्यानुपपन्नत्वाद् येन विना यदनुपपन्नं तत्तेनाक्षिप्यत इति न्यायेन अवयववाचकाभ्यामाद्यन्तशब्दाभ्यामवयवी समुदाय आक्षिप्यते । स्वंरूपमिति सूत्रात्स्वपदानुवृत्तिस्तस्य षष्ठयन्ततया विपरिणामोऽन्यथा ‘ संज्ञा संज्ञिनं प्रत्याय्य स्वयं निवर्तत’ इति न्यायादादेर्बोधो न स्यात् । ततश्च अन्त्येन सहोच्चार्य्यमाण आदिर्वर्णो मध्यपातिनां वर्णानां स्वस्य च बोधको भवतीति सूत्रार्थः । स्वशब्देनादेर्ग्रहणं नान्त्यस्य सहयुक्तेऽप्रधाने इति-सूत्रविहितया अन्त्येनेत्यप्रधानतृतीयया निर्देशात् सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वात् ।

---

१ शास्त्र या अर्थ से प्रसक्त जो कोई उसके दर्शनाभाव की लोप संज्ञा हो। राजा प्रभृति में स्वौजसौट् शास्त्र से सु का प्रसङ्ग था प्रासादात्प्रेक्षते में अर्थ के वल से आरुह्य का प्रसङ्ग था परन्तु अदर्शन अर्थात ज्ञान नहीं हो रहा है इससे उन दोनों के दर्शनाभाव का लोप नाम पड़ा।

२ अंत्येत् सहित उच्चार्यमाण जो आदि वर्ण वह मध्यपाती वर्णों का वोधक हो स्व—माने आदिका भी वोधक हो । अन्त्येत् के सहित उच्चार्यमाण आदि कौन अण् उसके मध्यपाति वर्ण इ उ उसका वोधक हुआ स्वमाने आदि अकार का भी वोधक हुआ। वस्तुतः अन्त्येत्सदृश के सहित उच्चार्यमाण जो आदि-

स्वस्य च संज्ञा स्यात् । यथाऽणिति अइउवर्णानां संज्ञा । एवमच्हल्अलित्यादयः ॥ **ऊकालोऽज्झ्रस्वदीर्घप्लुतः १।२।२७॥** उश्च ऊश्च

प्रत्याहारसिद्धिप्रकारश्चेत्थम् तथाहि—अइउण् इत्यादौ हलन्त्यमितिसूत्रेण णकारस्येत्संज्ञायाम् आदिरन्त्येन सहेता, इति सूत्रेण अन्त्येन इता णकारेण सहित आदिरकारः मध्यपातिनाम् इ उ इत्यादिवर्णानां स्वस्य अकारस्य च बोधकः इति अण् इत्युच्चारणेन अ इ उ वर्णानां बोधो भवति अनयैव रीत्या अक् अच् अल् इत्यादिप्रत्याहारसिद्धिर्बोध्या ।

ऊकालोऽज्झ्रस्वदीर्घप्लुत इति—उश्च ऊश्च ऊ३श्च वः, वःका-

सदृश वह स्वघटकानुयोगिकसादृश्यप्रतियोगित्वेन विवक्षितवर्णनिष्ठचरमावयवता निरूपक एवं स्वघटकानुयोगिकसादृश्यप्रतियोगित्वेन विवक्षितवर्णनिष्ठादितानिरूपक जो समुदाय उसके घटक का वोधक हो । अन्त्येत् कौन अइउण् का णकार उसके सदृश कौन उरण् रपरः सूत्र का णकार एवं आदि कौन अइउण् का अकार उसके सदृश कौन उरण् रपरः में अण् का अकार इससे अन्त्येत्सदृश सहित उच्चार्यमाण आदि हुआ अण् उसका घटक कौन णकार तदनुयोगिक सादृश्य का प्रतियोगी वर्ण कौन अइउण् का णकार तन्निष्ठ चरमावयवता का निरूपक तथा अण् घटक कौन अकार तदनुयोगिक सादृश्य का प्रतियोगी वर्ण कौन अइउण् का अकार तन्निष्ठ आदितानिरूपक समुदाय अइउण् उसका घटक अकारादिवर्ण उनका अण् पद वोधक हुआ ।

चन्द्रसदृशं मुखम् यहां पर सादृश्य का प्रतियोगी चन्द्र और सादृश्य का अनुयोगी मुख है उसी तरह अइउण् णकारसदृश अण्णकारः यहां सादृश्य का प्रतियोगी अइउण् का णकार और सादृश्य का अनुयोगी उरण् रपरः का णकार है जिसका सादृश्य वतलाया जाय वह प्रतियोगी जिसमें सादृश्य वतलाया जाय वह अनुयोगी कहा जाता है ।

[1] उकार ऊकार ऊ३कार के उच्चारणाधिकरणीभूतकाल के सदृश उच्चारणाधिकरणीभूतकाल है जिस अच् का उसे क्रम से ह्रस्व दीर्घ प्लुत संज्ञा हो । अर्थात् उकार के उच्चारणाधिकरणीभूत काल के सदृश उच्चारणाधिकरणीभूतकाल जिस अच् का उसको ह्रस्व कहते हैं एवं ऊकार के उच्चारणाधिकरणीभूतकाल के सदृश उच्चारणाधिकरणीभूतकाल जिस अच् का उसको दीर्घ कहते हैं एवं ऊ ३ कार के उच्चारणाधिकरणीभूतकाल के सदृश उच्चारणाधिकरणीभूतकाल जिस अ च् का उसे प्लुत कहते हैं ।

ऊ३श्च वः । वां काल इव कालो यस्य सोऽच् क्रमाद् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् । स प्रत्येकमुदात्तादिभेदेन त्रिधा । **उच्चैरुदात्तः[1] १।२।२९॥** ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात् । **नीचैरनुदात्तः[2] १।२।३०॥** ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽजनुदात्तसंज्ञः स्यात् । **समाहारः[3] स्वरितः १।२।३१॥** उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात् । स नवविधोऽपि प्रत्येक-

लो यस्येतिविग्रहः । वां काल इव कालो यस्येति मूलोक्तं तु फलितार्थकथनमेव, समानाधिकरणवहुव्रीहिसम्भवे व्यधिकरणवहुव्रीहेरसाधुत्वात् । ह्रस्वश्च दीर्घश्च प्लुतश्चेति समाहारद्वन्द्वः । इतरेतरयोगद्वन्द्वे तु सौत्रमेकवचनं वाच्यम्, तच्च न युक्तम्, शास्त्रीयैकवचनस्य सौत्रत्वकल्पनापेक्षया लोकसिद्धलिङ्गस्य सौत्रत्वकल्पनस्यैव न्याय्यत्वात् । ऊपदस्य स्वोच्चारणकालसदृशे लक्षणा । ततश्च उकारोच्चारणकालसदृशः कालो यस्याचः स ह्रस्व संज्ञको भवति । ऊकारोच्चारणकालसदृशः कालो यस्याचः स दीर्घसंज्ञको भवति, ऊ३कारोच्चारणकालसदृशः कालो यस्याचः स प्लुतसंज्ञको भवतीति निष्कृष्टोऽर्थः । कुक्कुटशब्दादौ ह्रस्वदीर्घप्लुतानामुकाराणां स्पष्टं प्रतीत्या तस्यैव सूत्रे निर्देशो न त्वाकारादेरिति तत्त्वम् ।

ऊकालोऽज्झ्रस्वदीर्घप्लुत इत्यनेन अचः ह्रस्वदीर्घप्लुतसंज्ञाविधानात् त्रयो भेदाः । प्रत्येकमपि उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारः स्वरित, इति सूत्रैः क्रमश उदात्त, अनुदात्त, स्वरित, संज्ञया नव

---

[1] ताल्वादि जो भागविशिष्ट स्थान उनमें ऊर्ध्वभागावच्छेदेन वायु के अभिघात से उत्पन्न (अभिव्यक्त) जो अच् सो उदात्त संज्ञक हो ।

[2] ताल्वादि जो भागविशिष्ट स्थान उनमें अधोभागावच्छेदेन वायु के अभिघात (संयोग) से निष्पन्न जो अच् उसे अनुदात्त कहते हैं ।

[3] उदात्तत्व और अनुदात्तत्व वर्णधर्म समाहृत (इकट्ठे) हो जिस अच् में उसे स्वरित कहते हैं ।

मनुनासिकत्वाननुनासिकत्वाभ्यां द्विधा ॥ **मुखनासिकावचनोऽनुनासिकः १।१।८॥** मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् । तदित्थम्—अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः । ऌवर्णस्य द्वादश तस्य दीर्घाभावात् । एचामपि द्वादश तेषां ह्रस्वाभावात् ॥ **[1]तुल्यास्यप्रयत्नं सवर्णम् १।१।९॥** ताल्वादि-

नाज्झलौ ॥१।१।१०॥ दण्डहस्तः ॥

भेदाः । मुखनासिकावचनोऽनुनासिक इति-मुखेन सहिता मुखसहिता मुखसहिता चासौ नासिकेति मध्यमपदलोपी समासः, उच्यतेऽसौ वचनः, मुखनासिकया वचन इति विग्रहस्ततश्चास्य सूत्रस्य-मूलोक्तोऽर्थो लभ्यते । तथाचानेन अनुनासिकसंज्ञया अनुनासिकाननुनासिकभेदेन नवविधस्याप्यचः अष्टादश भेदा भवन्ति । एवं सति सर्वेषामचामष्टादशत्वापत्तावाह—अ इ उ ऋ एषामित्यादि । अ इ उ ऋ वर्णानामष्टादशभेदाः । दीर्घाभावेन ऌवर्णस्य द्वादश भेदाः । ह्रस्वाभावेन एच्प्रत्याहारस्थवर्णानामपि द्वादश भेदाः ।

अष्टादश भेदाश्चेत्थम्—

१ ह्रस्वोदात्तानुनासिकः २ ह्रस्वोदात्ताननुनासिकः ३ ह्रस्वानुदात्तानुनासिकः ४ ह्रस्वानुदात्ताननुनासिकः ५ ह्रस्वस्वरितानुनासिकः ६ ह्रस्वस्वरिताननुनासिकः ७ दीर्घोदात्तानुनासिकः । ८ दीर्घोदात्ताननुनासिकः । ९ दीर्घानुदात्तानुनासिकः । १० दीर्घानुदात्ताननुनासिकः ११ दीर्घस्वरितानुनासिक; १२ दीर्घस्वरिताननुनासिकः १३ प्लुतोदात्तानुनासिकः १४ प्लुतोदात्ताननुनासिकः १५ प्लुतानुदात्तानुनासिकः १६ प्लुतानुदात्ताननुनासिकः १७ प्लुतस्वरितानुनासिकः १८ प्लुतस्वरिताननुनासिकः ।

तुल्यास्येति—तुलया संमितं तुल्यम् आस्ये भवमास्यम् आस्यं च

---

[1] जिस वर्णका ताल्वादि स्थान और आभ्यन्तर प्रयत्न जिसवर्ण के ताल्वादि स्थान और आभ्यन्तरप्रयत्न के साथ तुल्य हो वे दोनों परस्पर में सवर्ण संज्ञक होते हैं। जैसे क और ख दोनों का कण्ठ स्थान और स्पृष्ट प्रयत्न है इससे दोनों सवर्णसंज्ञक हुये।

स्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् । (ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यम्) अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटुरषाणां मूर्धा । ऌतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ । ञमङणनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकाऽनुस्वारस्य । यत्नो द्विधा । आभ्यन्तरो बाह्यश्च । आद्यः पञ्चधा-स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् । तत्र स्पृष्टं प्रयतनं स्पर्शानाम् । ईषत्स्पृष्टमन्तःस्थानाम् । ईषद्विवृतमूष्मणाम् । विवृतं स्वराणाम् । ह्रस्वस्यावर्णस्य प्रयोगे संवृतम् । प्रक्रियादशायां तु विवृतमेव । बाह्यप्रयत्नस्त्वेकादशधा—विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति । खरो विवाराः श्वासा अघोषाश्च ।

प्रयत्नश्चास्यप्रयत्नौ तुल्यावास्य प्रयत्नौ यस्य तत् तुल्यास्यप्रयत्नमिति विग्रहः ततश्च-यस्य वर्णस्य ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद् द्वयं यद्वर्णीयताल्वादिस्थानाभ्यन्तरप्रयत्नाभ्यां तुल्यं तयोः परस्परं सवर्णसंज्ञा भवति इति सूत्रार्थः ।

कस्य वर्णस्य किं स्थानमित्याकाङ्क्षायामाह अकुहेति । अ क ख ग घ ङ ह् विसर्गाणां कण्ठः स्थानम् । इ च छ ज झ ञ य शानां वर्णानां तालु स्थानम् । ऋ ट ठ ड ढ ण र षाणां मूर्धा स्थानम् । ऌ त थ द ध न ल सानां दन्ताः (दन्तसंयुक्तदेशाः) स्थानम् । उ प फ ब भ मानां ᳶप ᳶफयोश्च ओष्ठौ स्थानम् । ञ म ङ ण नानां नासिका स्थानम् तत्तद्वर्गीयकण्ठादि च । ए ऐ एतयोः कण्ठतालु स्थानम् । ओ औ एतयोः कण्ठोष्ठं स्थानम् । व इत्यस्य दन्तोष्ठं स्थानम् । ᳵक इत्यत्र ककारात् ᳵख इत्यत्र खकारात्प्रागर्धविसर्गसदृशस्य जिह्वामूलं स्थानम् । अनुस्वारस्य नासिका स्थानम् ।

प्रयत्नो द्विधा भवति आभ्यन्तरबाह्यभेदात् । स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदेन आभ्यन्तरप्रयत्नः पञ्चधा भवति । कस्य

हशः संवारा नादा घोषाश्च । वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः । कादयो मावसानाः स्पर्शाः । यणोऽन्तःस्थाः । शल ऊष्माणः । अचः स्वराः । ≍ क ≍ ख इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयः । ≍ प ≍ फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः । अं अः इत्यचः परावनुस्वारविसर्गौ ॥

अणुदित्सवर्णस्य चाप्रत्ययः १।१।६९॥ प्रतीयते विधीयत इति प्रत्ययः । अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात् । अत्रैवाण् परेण णकारेण । कु चु टु तु पु एते उदितः । तदेवम् अ इत्यष्टादशानां संज्ञा । तथेकारोकारौ । ऋकारस्त्रिंशतः । एवं ऌकारोऽपि । एचो द्वादशानाम् । अनुनासिकाननुनासिकभेदेन यवला द्विधा । तेनाननुनासिकास्ते द्वयोर्द्वयो-

---

वर्णस्य कः प्रयत्न इत्याकाङ्क्षायामाह तत्रेति । स्पर्शसंज्ञकानां ककारमारभ्य मपर्यन्तानां वर्णानां स्पृष्टप्रयत्नः । अन्तःस्थसंज्ञकानां 'य र ल व' एषां वर्णानाम् ईषत्स्पृष्टप्रयत्नः । ऊष्मसंज्ञकानां श ष स हानां वर्णानाम् ईषद्विवृतप्रयत्नः । स्वरसंज्ञकानाम् (अच्प्रत्याहारस्थानां) वर्णानां विवृतप्रयत्नः । ह्रस्वस्यावर्णस्य प्रयोगे संवृतप्रयत्नः । प्रक्रियादशायां तु तस्य विवृतप्रयत्न एव ।

विवार संवार श्वास नाद घोषाघोषाल्पप्राण महाप्राणोदात्तानुदात्त स्वरित भेदात् बाह्यप्रयत्न एकादशधा भवति । खर् प्रत्याहारस्थानां वर्णानां विवाराः श्वासाः अघोषाः प्रयत्नाः भवन्ति । हश्प्रत्याहारस्थानां वर्णानां संवारा नादाः घोषाः प्रयत्नाः भवन्ति । क ग ङ च ज ञ ट ड ण त द न प ब म य व र ल एषां वर्णानाम् अल्पप्राणप्रयत्नः । ख घ छ झ ठ ढ थ ध फ भ श ष स ह एषां महाप्राणप्रयत्नः ।

अणुदित्सवर्णस्येति—अविधीयमानोऽण् सवर्णस्य बोधको भवति कु चु टु तु पु एते उदितः तेऽपि सवर्णस्य बोधकाभवन्ति । प्रत्ययादेशागमास्तु न सवर्णबोधकाः तेषां विधीयमानत्वात् । अणुदित्सूत्रे एव परेण णकारेण अणप्रत्याहारग्रहणं भवति नान्यत्र । तदुक्तम्—

स्संज्ञा ॥ **परः संनिकर्षः संहिता १।४।१०९॥** वर्णानामतिशयितः संनिधिः संहितासंज्ञः स्यात् ॥ **हलोऽनन्तराः संयोगः १।१।७॥** अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः ॥ **सुप्तिङन्तं पदम् १।४।१४॥** सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ॥

इति संज्ञाप्रकरणम्।

इको यणचि ६।१।७७॥ इकः स्थाने यण् स्यादचि संहितायां

परः सन्निकर्ष इति—वर्णानामत्यन्तसामीप्यं संहितासञ्ज्ञं भवति।

हलोऽन्तरा इति—अच्प्रत्याहारस्थवर्णैर्व्यवधानशून्या हल्वर्णाः संयोगसंज्ञका भवन्ति।

सुप्तिङन्तमिति—अनेन सूत्रेण सुवन्तस्य रामः इत्यादेः तिङन्तस्य भवति इत्यादेः पदसंज्ञा भवति।

इति संज्ञाप्रकरणम्।

सुधी+उपास्यः इत्यवस्थायाम् इको यणचीति सूत्रं प्रवर्तते। तत्र इक् इति षष्ठ्या अनिर्धारितसम्बन्धविशेषत्वाद् अनिर्धारितसम्बन्धविशेषा षष्ठी स्थानेयोगा बोध्येत्यर्थकस्य षष्ठी स्थानेयोगेति परिभाषासूत्रस्योपस्थित्या स्थाने-इत्यस्य लाभः। संहितायामित्याधिक्रियते तत्रच विषयसप्तमी ततश्च तस्यायमर्थः—इक्प्रत्याहारान्तःपातिनाम् (इ उ ऋ ऌ) वर्णनां स्थाने अच्प्रत्याहारान्तःपातिनि वर्णे परे सति यण्प्रत्याहारान्तः पातिनो (य र ल व) वर्णाः स्युः संहितायां विषये इति। अत्र सकारोत्तरवर्ती उकार इक्, धकारोत्तरवर्ती ईकार इक्, उपास्य इत्यस्य उकार इक् एवं धकारोत्तरवर्ती ईकारोऽच्, उपास्य इत्यस्य उकारोऽच्, पकारोत्तरवर्त्ती आकारोऽच्, इति त्रय इकः त्रयश्चाचः सन्ति। तत्र कस्मिन्नचि परे कस्येकः स्थाने यण् स्या

विषये ॥ सुधी उपास्य इति स्थिते ॥ **तस्मिन्निति निर्दिष्टे [१]पूर्वस्य १।१।६६॥** सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम् ॥ **स्थानेन्तरतमः १।१।५०॥** प्रसंगे सति सदृशतम आदेशः स्यात् । सुध्य् उपास्य इति जाते ॥ **अनचि च ८।४।४७॥**

दित्याशङ्कायाम् अनियमे नियमकारिणीत्वरूपं तस्मिन्निति निर्दिष्टे पूर्वस्य, इति परिभाषाशास्त्रं प्रवृत्तम् । तस्यार्थस्तु सप्तमीनिर्देशेन विधीयमानं यत्कार्यं तद् वर्णान्तरव्यवधानशून्यो यः पूर्वस्तस्य स्थाने स्यादिति । अत्र अचीतिसप्तम्यन्तपदनिर्देशेन विधीयमानं यण्रूपं कार्यं वर्णान्तरव्यवधानशून्यः पूर्वः सुधी इत्यत्र धकारोत्तरवर्ती ईकारस्तस्य स्थाने स्यात् । वस्तुतस्तु इकोयणचीत्यस्य अजुपश्लिष्टस्य इको यण् संहितायामित्यर्थात् इकारोकारयोः कस्य यण् इति शङ्कायां तस्मिन्नित्यस्य प्रवृत्तिरिति बोध्यम् । तत्र य व र ल रूपयण्चतुष्टयमध्ये को यण् ईकारस्य स्थाने स्यादिति शङ्कायां स्थानेऽन्तरतमः, इति सूत्रप्रवृत्तिः । अनेकादेशानां प्राप्तौ सत्यामत्यन्तसदृश आदेशः स्यादिति हि तस्यार्थः । सादृश्यञ्चात्र एकस्थानजन्यत्वेन । तथा च य र ल व एषाम्प्राप्तौ तालुस्थानजन्यस्य धकारोत्तरवर्तिन ईकारस्य स्थाने तालुस्थानजन्यो यकार एव यण् । एवं च सु ध् य् उपास्य इति जाते (अनचि च) इति सूत्रं प्रवृत्तम् अत्र (यरोऽनुनासिकेऽनुनसिको वा) इत्यतो यरः इति वा, इति (अचो रहाभ्यां द्वे) इत्यतः अचः इति द्वे इति चानुवर्तते । अचः इत्यस्य पञ्चम्यन्तत्वेन (तस्मादित्युत्तरस्य) इति परिभाषया परस्येत्यस्य लाभः । ततश्च अच्प्रत्याहारान्तःपातिनो वर्णात्परस्य यर्प्रत्याहारान्तः पातिनो वर्णस्य द्वित्वं वा भवति अचि परे तु न द्वित्वम् इति तत्सूत्रार्थः । अत्र हि सकारोत्तरवर्त्युकाररूपा-

---

[१] सप्तम्यन्त जो पद तन्निर्देशेन क्रियमाण जो कार्य सो सप्तमीप्रकृति बोध्य जो कोई उससे अव्यहित पूर्वके हो । सप्तमी कौन अचि में इ तदन्तपद कौन अचि उसके निर्देश (उच्चारण) से क्रियमाण कार्य कौन यण् वह सप्तमी प्रकृति कौन अच् उसका बोध्य कौन उपास्यः का उकार तिस उकार से अव्यवहित पूर्व जो सुधीधकारोत्तरवर्ती ईकार उसके हुआ ।

अचः परस्य यरो द्वे वा-स्तो न त्वचि । इति धकारस्य द्वित्वेन

च्प्रत्याहारान्तःपातिवर्णा त्परस्य यर्प्रत्याहारान्तःपातिनो धकारस्य द्वित्वे सु ध् ध् य् उपास्य इति जाते (झलां जश् झशि) इति सूत्रं प्रवृत्तम् । झल्प्रत्याहारान्तःपातिनां वर्णानां स्थाने झश्प्रत्याहारान्तःपातिनि वर्णे परे सति जश्प्रत्याहारान्तः पातिनो वर्णाः स्युरिति हि सूत्रार्थः । अत्र झल्प्रत्याहारान्तःपाती वर्णः पूर्वधकारः तस्मात्परो झश्प्रत्याहारान्तःपाती वर्णः परधकार स्तस्मिन् परे सति पूर्वधकारस्य स्थाने जश्प्रत्याहारान्तःपाती वर्णः स्यात् । ज् ब् ग् ड् द् रूपाणां जश्प्रत्याहारान्तः पातिनां पञ्चानाम्मध्ये कतमेन भाव्यमिति शङ्कायां स्थानेऽन्तरतम इति परिभाषया स्थानकृतान्तर्य्याश्रयणेन दन्तस्थानजन्यस्य पूर्वधकारस्य स्थाने दन्तस्थानजन्ये दकारे जशि सुद्ध्य्उपास्य इति जाते संयोगान्तस्य लोपं इति सूत्रप्रवृत्तिः । संयोगान्तं यत् पदं तस्य लोपः स्यादिति हि सूत्रार्थः । अत्र संयोगान्तं पदम् सु द् ध् य् इति तस्य लोपे प्राप्ते अलोऽन्त्यस्येति सूत्रप्रवृत्तिः । षष्ठीनिर्दिष्ट आदेशः अन्त्यस्य अलः स्थाने भवतीति सूत्रार्थः। अत्र संयोगान्तस्येति षष्ठ्या निर्दिष्टो लोपादेश अन्त्यस्यालो यकारस्य स्यादिति य्लोपे प्राप्ते यणः प्रतिषेधो वाच्य इति वार्त्तिकप्रवृत्तिः । यण्प्रत्याहारान्तःपातिवर्णानां लोपो न भवतीति वार्त्तिकार्थः। तथा च यलोपनिषेधे अज्झीनं परेण संयोज्यमित्यभियुक्तोक्त्या द् ध् य् एषाम् उपास्य इत्यस्योकारेण योगे सुद्ध्युपास्य इति सिद्धम् । अनचि चेति द्वित्वाभावपक्षे सुध्युपास्य इति भवति ।

मद्ध्वरिः—इति मधु— अरिः—इत्यत्र इको यणचीतिसूत्रेण अरिरित्यस्याकाररूपे ऽचि परे धकारोत्तरवर्त्तिन उकारस्य स्थाने यण्प्रत्याहारान्तःपातिषु चतुर्षु वर्णेषु प्राप्तेषु स्थानेऽन्तरतम इति परिभाषया ओष्ठस्थानजन्यस्य उकारस्य स्थाने ओष्ठस्थानजन्ये वकारे यणि म ध् व् अरिरिति जाते अनचिचेति सूत्रेण मकारोत्तरवर्त्यकाररूपाचः परस्य धकाररूपस्य यरो वैकल्पिके द्वित्वे स्थानेऽन्तरतम इति परिभाषया दन्तस्थानजन्यपूर्वधकाररूपस्य झलः स्थाने परधकाररूपे झशि परे

सुध्ध्य् उपास्य इति जाते ॥ **झलां जश् झशि ८।४।५३॥** स्पष्टम् । इति पूर्वधकारस्य दकारः॥ **संयोगान्तस्य लोपः ८।२।२३॥** संयोगान्तं यत्पदं तस्य लोपः स्यात् ॥ **अलोऽन्त्यस्य[1] १।१।५२॥** षष्ठीनिर्दिष्टोऽन्त्यस्याल आदेशः स्यात् । इति यलोपे प्राप्ते (यणः प्रतिषेधो वाच्यः) । सुद्ध्युपास्यः । मद्ध्वरिः । धात्त्रंशः । लाकृतिः ॥

झलां जश् झशीति सूत्रेण दन्तस्थानजन्ये दकारे जशि मद्ध्व् अरिरिति जाते संयोगान्तस्य लोप इति सूत्रेण मद्ध्व्रूपस्य संयोगान्तपदस्य लोपे प्राप्ते अलोऽन्त्यस्येति सूत्रसहकारेण वकारस्य लोपे प्राप्ते यणः प्रतिषेधो वाच्य इतिवार्त्तिकेन व्लोपनिषेधे द्ध्व् इत्यस्य अरिरित्यस्याकारेण संयोगे मद्ध्वरिरिति सिद्ध्यति । अनचि चेति सूत्रेण वैकल्पिकद्वित्वाभावपक्षे मध्वरिरिति ।

धात्त्रंशइति—धातृ—अंशः, इत्यवस्थायां स्थानेऽन्तरतम इति परिभाषावलात् मूर्धस्थानजन्यस्य तकारोत्तरवार्त्तिन ऋकाररूपस्य इकः स्थाने अंश इत्यस्याकाररूपे ऽचि परे मूर्धस्थानजन्यरेफे यणि धात्र् अंश इति जाते अनचिचेत्यनेन धकारोत्तरवर्त्याकाररूपाचः परस्य तकाररूपस्य यरो द्वित्वे धात्त्र् अंश इति जाते संयोगान्तस्य लोप इति सूत्रेण धात्त्र् रूपस्य संयोगान्तपदस्य लोपे प्राप्ते अलोऽन्त्यस्येति सूत्रसहकारेण रलोपे प्राप्ते यणः प्रतिषेधो वाच्य इति वार्तिकेन तन्निषेधे त्त्र् इत्यस्याकारेण योगे धात्त्रंश इति सिद्धम् । अनचि चेति द्वित्वाभावपक्षे धात्रंश इति ।

लाकृतिरिति—लृ—आकृतिरित्यत्र स्थानेऽन्तरतम इतिपरिभाषाबलात् दन्तमात्रस्थानजन्यस्य लृकाररूपस्येकः स्थाने आकृतिरित्यस्याकाररूपेऽचि परे दन्तमात्रस्थानजन्यलकारे यणि लाकृतिरिति सिद्धम् ।

---

१ षष्ठ्यन्त जो पद तन्निर्देशेन क्रियमाण जो कार्य सो षष्ठीप्रकृति बोध्य जो कोई उसके अन्त्य के हो। जैसे षष्ठी कौन संयोगान्तस्य में स्य तदन्तपद कौन संयोगान्तस्य तन्निर्देशेन क्रियमाण कार्य कौन लोप वह षष्ठी प्रकृति कौन संयोगान्त उससे बोध्य कौन सुद्ध्य् उसका अन्त्य कौन य् तिसका लोप पाया।

एचोऽयवायावः ६।१।७८॥ एचः क्रमादय् अव् अय् आव् एते स्युरचि ॥ **यथासंख्यमनुदेशः समानाम्** १।३।१०॥ समसम्बन्धी विधिर्यथासंख्यं स्यात् । हरये । विष्णवे । नायकः । पावकः ॥ **वान्तो यि प्रत्यये** ६।१।७९॥ यकारादौ प्रत्यये परे ओदौतोरव्

१६।६।२८-

हरये—इति हरे ए इत्यवस्थायाम् एचोऽयवायाव इति सूत्रप्रवृत्तिः । एच्प्रत्याहारान्तःपातिवर्णस्थाने अय् अव् आय् आव् एते आदेशाः स्युरच्प्रत्याहारान्तःपातिनि वर्णे परे सति इति तत्सूत्रार्थः । अत्र एकाररूपेऽचि परे रेफोत्तरवर्त्तिन एकाररूपस्य एचः स्थाने अय् अव् आय् आव् आदेशाः सर्वे प्राप्ताः तत्र कतमेन भाव्यमिति शङ्कायाम् यथासंख्यमनुदेशः समानामिति सूत्रप्रवृत्तिः । तुल्यसंख्याको विधि र्यथाक्रमं भवतीति सूत्रार्थः । तथा च एचोऽयवायाव इतिसूत्रेण एकारस्य स्थाने अय् ओकारस्य स्थाने अव् ऐकारस्य स्थाने आय् औकारस्य स्थाने आव् भवति । अत्र हि रेफोत्तरवर्त्तिन एकारस्य स्थाने अय् आदेशे कृते हर् अय् ए इति जाते रेफस्य अकारेण यकारस्य एकारेण योगे हरये इति सिध्यति ।

विष्णवे इति । विष्णो–ए इत्यवस्थायां यथासंख्यसूत्रसहकारेण एचोऽयवायाव इतिसूत्रेण णकारोत्तरवर्त्तिन ओकारस्य स्थाने एकारेऽचि परे अवादेशे वकारस्य एकारेण योगे विष्णवे इति साधु ।

नायक इति—नै-अक इत्यत्र यथासंख्यसूत्रबलेन एचोऽयवायाव इति सूत्रेण नकारोत्तरवर्त्तिन ऐकारस्य स्थाने अकारेऽचि परे आय् आदेशे परेण योगे कृते नायक इत्येतत्सिद्ध्यति ।

पावक इति—पौ–अक इत्यवस्थायां यथासंख्यसूत्रबलेन एचोऽयवायाव इति सूत्रेण पकारोत्तरवर्तिन औकारस्य स्थाने अकारेऽचि परे आव् आदेशे कृते पकारस्याकारेण वकारस्य अकारेण संयोगे पावक इति सिद्धम् ।

आव् एतौ स्तः। गव्यम्। नाव्यम्। (अध्वपरिमाणे च)। गव्यूतिः॥ **अदेङ् गुणः १।१।२॥** अत् एङ् च गुणसंज्ञः स्यात्॥ **तपरस्तत्कालस्य १।१।७०॥** तः परो यस्मात्स च तात्परश्चोच्चार्य-

---

पृ. ३८२
२-९-९

गव्यमिति—गोर्विकारो गव्यमिति विग्रहः। गोपयसोर्यदिति सूत्रेण गोशब्दात् यत् प्रत्ययः। गो—यम् इत्यत्र वान्तो यि प्रत्यये— ६।१।७९॥ इति सूत्रप्रवृत्तिः। अत्र सूत्रे ओदौतोरिति वक्तव्यम्, इति वार्तिकात् ओदौतोरित्यस्य लाभः। यस्मिन्विधिस्तदादावल्ग्रहणे, इति परिभाषया यकारादावित्यस्य लाभः। तेन यकार आदिर्यस्मिन्प्रत्यये तस्मिन् प्रत्यये परे ओकारौकारयोः स्थाने क्रमेण अव् आव् एतावादेशौ स्त इति सूत्रार्थः। अत्र हि यत्प्रत्ययेपरे गकारोत्तरवर्तिन ओकारस्य स्थाने अव् आदेशे कृते गव्यमिति सिद्धम्।

नाव्यमिति—नावा तार्यमिति विग्रहे नौवयोधर्मेत्यादिना सूत्रेण नौ शब्दात् यत् प्रत्ययः। नौ—यम् इत्यवस्थायाम् वान्तो यि प्रत्यय इति-सूत्रेण यत्प्रत्यये परे नकारोत्तरवर्तिन औकारस्य स्थाने आव् आदेशे कृते नाव्यमिति सिद्धम्।

गव्यूतिरिति—गो—यूतिरित्यत्र मार्गपरिमाणेऽर्थे ओकारस्य स्थानेऽवादेश इत्यर्थकेन अध्वपरिमाणे च, इति वार्तिकेन गकारोत्तरवर्तिन ओकारस्य स्थाने अव् आदेशे कृते गव्यूतिरिति सिद्धम्। गव्यूतिरिति क्रोशद्वयस्य संज्ञा, 'गव्यूतिः स्त्री क्रोशयुगम्' इति कोशात्।

अदेङ् गुण इति—अ ए ओ एते वर्णाः गुणसंज्ञका भवन्तीति सूत्रार्थः।

तपरस्तत्कालस्येति। तपर इत्यत्र व्याख्यानात् तात्पर इतितत्पुरुषः तः परोयस्मादितिबहुव्रीहिश्चेति समासद्वयम्। तथा च यस्माद् वर्णात्परस्तकारः स तकारात्परश्चोच्चार्यमाणो वर्णः समकालस्यैव सवर्णस्य बाधको भवतीति सूत्रार्थः। तेन अदेङ्गुण इति सूत्रेण ह्रस्वाकारस्यैव गुणसंज्ञा न तु दीर्घाकारस्य।

CC-0. In Public Domain. Digitization by eGangotri

[illegible]

माणसमकालस्यैव संज्ञा स्यात् ५॥ **आद्गुणः** ६।१।८७॥ अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात् । उपेन्द्रः । गङ्गोदकम् ॥ **उपदेशेऽजनुनासिक इत्** १ । ३ । २ ॥ उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात् । प्रतिज्ञाऽनुनासिक्याः पाणिनीयाः । लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा ॥ **उरण् रपरः** १।१।५१॥ ऋ इति त्रिंशतः संज्ञेत्युक्तम् । तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते । कृष्णर्द्धिः । तवल्कारः ॥ **लोपः शाकल्यस्य** ८।३।१९॥ अवर्णपूर्वयोः

उपेन्द्र इति—उप—इन्द्र इत्यत्र आद्गुण इति सूत्रप्रवृत्तिः। अत्र इकोयणचीत्यत अचीत्यनुवर्तते एकः पूर्वपरयोरिति सूत्रञ्चाधिक्रियते तथा च अवर्णादचि परे पूर्वपरयोः स्थाने गुण एकादेशः स्यादिति—सूत्रार्थः। पकारोत्तरवर्त्तिन अकाराद् इकारेऽचि परे गुणत्रयाणां मध्ये केनात्र भाव्यमिति शङ्कायाम् स्थानेऽन्तरतम इति परिभाषया कण्ठतालुस्थानजन्ययोः अकारेकारयोरुभयोः स्थाने कण्ठतालुस्थानजन्य एकारे गुणे कृते उपेन्द्र इति सिद्धम्।

गङ्गोदकमिति—गङ्गा—उदकमित्यवस्थायां स्थानेऽन्तरतम इति परिभाषाबलेन कण्ठोष्ठस्थानजन्ययोः आकारोकारयोरुभयोः स्थाने आद्गुण इति सूत्रेण गकारोत्तरवर्तिन आकाराद् उकारेऽचिपरे कण्ठोष्ठस्थानजन्ये ओकारे गुणे गङ्गोदकमिति सिद्धम्।

कृष्णर्द्धिरिति—कृष्ण—ऋद्धिरित्यत्र आद्गुण इतिसूत्रप्रवृत्तिः। अत्र हि णकारोत्तरवर्तिन अकाराद् ऋद्धिरित्यस्य ऋकारे ऽचि परे गुणत्रयमध्ये केनात्र भाव्यमिति शङ्कायां स्थानेऽन्तरतम इति परिभाषया कण्ठमूर्धस्थानजन्ययोः—अकारऋकारोभयोः स्थाने उरण्रपर इति सूत्रसहकारेण अरि गुणे कृष्णर्द्धिरिति सिद्धम्।

तवल्कार इति—तव—लृकार इत्यत्र कण्ठमूर्धस्थानजन्याकारलृकारयोरुभयोः स्थाने आद्गुण इति सूत्रेण उरण्रपर इतिसहकारेण,

पदान्तयोर्यवयोर्लोपो वाऽशि परे । **पूर्वत्रासिद्धम् ८।२।१॥** सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम् । हर इह, हरयिह । विष्ण इह, विष्णविह ॥ **वृद्धिरादैच् १।१।१॥** आदैच्च वृद्धिसंज्ञः स्यात् ॥ **वृद्धिरेचि ६।१।८८॥** आदेचि परे वृद्धिरेकादेशः स्यात् । गुणापवादः । कृष्णैकत्वम् । गङ्गौघः । देवैश्वर्यम् ।

ऋकारऌकारयोः सावर्ण्येन रप्रत्याहाराश्रयणेन च लकारस्थानिकाकारे लपरे अलि गुणे तवल्कार इति सिद्धम् ।

हर इहेति—हरे—इहेत्यवस्थायाम् एचोऽयवायाव इत्यनेन अय् आदेशे हर् अय् इह इति जाते लोपः शाकल्यस्येति सूत्रं प्रवृत्तम् । अत्र भोभगो—इतिसूत्राद् अपूर्वस्येति, अशीति च, व्योर्लघु, इतिसूत्राद् व्योरिति चानुवर्तते । पदस्येत्यधिक्रियते । तदन्तविधिः । तेन अवर्णपूर्वयोः पदान्तयो र्यवयो र्लोपो वाऽशि परे इत्यर्थलाभः । अत्र इकारेऽशिपरे ऽवर्णपूर्वस्य यकारस्य लोपे हर इहेति जाते आद्गुण इति गुणे प्राप्ते पूर्वत्रासिद्धमिति सूत्रेण आद्गुण इत्येतद्दृष्ट्या लोपः शाकल्यस्येत्यस्यासिद्धत्वाद्गुणाभावे हरइहेति सिद्धम् यलोपाभावपक्षे हरयिहेति रूपम् ।

विष्णइह—विष्णो—इहेत्यवस्थायाम् एचोऽयवायाव इति सूत्रेण ओकारस्य अवादेशे विष्ण् अव् इह इति जाते लोपः शाकल्यस्येति व्लोपे आद्गुण इतिगुणे प्राप्ते पूर्वत्रासिद्धमित्यनेन लोपः शाकल्यस्येत्यस्यासिद्धत्वाद् गुणाभावे विष्ण इहेति वलोपाभावे विष्णविहेति सिद्धम् ।

वृद्धिरादैच्—आ ऐ औ एते वर्णाः वृद्धिसंज्ञका भवन्तीति सूत्रार्थः ।

कृष्णैकत्वमिति—कृष्ण—एकत्वमित्यवस्थायामाद्गुण इति सूत्रं बाधित्वा वृद्धिरेचीति सूत्रं प्रवृत्तम् । अत्र आद्गुण इत्यत आदित्यनुवर्तते । एकः पूर्वपरयोरिति चाधिक्रियते । तथा च अवर्णादेचि परे पूर्वपरयोर्वृद्धिरेकादेशः स्यादिति तत्सूत्रार्थः । णकारोत्तरवर्तिनः

कृष्णौत्कण्ठ्यम् ॥ **एत्येधत्यूठ्सु ६।१।८९॥** अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात् । उपैति । उपैधते । प्रष्ठौहः ।

अकारात् एकत्वमित्यस्य एकारेऽचिपरं पूर्वपरयोः स्थाने वृद्धित्रयमध्ये केनात्र भाव्यमिति शङ्कायां स्थानेऽन्तरतम इतिपरिभाषया कण्ठतालुस्थानजन्याकारैकारयोः स्थाने कण्ठतालुस्थानजन्ये ऐकारे वृद्धौ कृष्णैकत्वमिति सिद्धम् ।

गङ्गौघ इति । गङ्गा–ओघ इत्यत्र स्थानेऽन्तरतम इति परिभाषया कण्ठोष्ठस्थानजन्यत्वसादृश्यात् वृद्धिरेचीति सूत्रेण गकारोत्तरवर्त्तिन आकारात् ओघ इत्यस्य ओकारेऽचि परे पूर्वपरयोः स्थाने औकारे वृद्धौ गङ्गौघ इति सिध्यति ।

देवैश्वर्यम् इति । देव–ऐश्वर्यमित्यवस्थायाम् स्थानेऽन्तरतम इति परिभाषया कण्ठतालुस्थानजन्यत्वसादृश्येन वृद्धिरेचीतिसूत्रेण वकारोत्तरवर्तिनः अकाराद् ऐश्वर्यमित्यस्य ऐकारेऽचि परे पूर्वपरयोरुभयोः स्थाने ऐकारे वृद्धौ देवैश्वर्यमिति साधु ।

कृष्णौत्कण्ठ्यमिति । कृष्ण–औत्कण्ठ्यमित्यवस्थायां स्थानेऽन्तरतम इति परिभाषया कण्ठोष्ठस्थानजन्यत्वसादृश्येन वृद्धिरेचीति सूत्रेण णकारोत्तरवर्तिनः अकाराद् औत्कण्ठ्यमित्यस्यौकारेऽचि परे पूर्वपरयोः स्थाने औकारे वृद्धौ कृष्णौत्कण्ठ्यमिति साधु ।

उपैतीति । उप–एतीत्यत्र वृद्धिरेचीति प्राप्तां वृद्धिं बाधित्वा एङि पररूपमिति प्राप्तं पररूपमपवादत्वाद्बाधित्वा एत्येधत्यूठ्स्विति सूत्रप्रवृत्तिः । अत्र आद्गुण इत्यत आदित्यनुवर्तते वृद्धिरेचीत्यत एचीति चानुवर्तते तच्च एत्येधत्योरेव विशेषणम् न तूठः, तस्यैजादित्वासम्भवात् । एकः पूर्वपरयोरिति चाधिक्रियते । तथा च अवर्णादेजाद्योरेत्येधत्योरूठि च परे पूर्वपरयोर्वृद्धिरेकादेशः स्यादिति सूत्रार्थः ।

अत्र पकारोत्तरवर्तिनः अकाराद् एजादिः इण् धातुः एतीत्यत्र एकारः

एजाद्योः किम् । उपेतः । मा भवान्प्रेदिधत् । (अक्षादूहिन्यामुपसंख्यानम्) अक्षौहिणी सेना । (प्रादूहोढोढ्येषैष्येषु) प्रौहः । प्रौढः । प्रौढिः । प्रैषः । प्रैष्यः । (ऋते च तृतीयासमासे) सुखेन

तस्मिन् परे पूर्वपरयोः स्थाने कण्ठतालुस्थानजन्यत्वसादृश्यात् ऐकारे वृद्धौ कृतायामुपैतीति सिद्धम् ।

उपैधत इति । उप-एधते इत्यवस्थायाम् एत्येधत्यूठ्स्विति सूत्रेण अकारैकारयोः स्थाने कण्ठतालुस्थानजन्यत्वसादृश्येन ऐकारे वृद्धौ तत्सिद्धिः ।

प्रष्ठौह इति । प्रष्ठ-ऊह इत्यत्र एत्येधत्यूठ्स्विति सूत्रेण अकारोकारयोः स्थाने कण्ठौष्ठस्थानजन्यत्वसादृश्येन औकारे वृद्धौ तत्सिद्धिः ।

एजाद्योः किमिति । एत्येधत्यूठ्स्वितिसूत्रे वृद्धिरेचीत्यत एचीत्यस्य सम्बन्धाभावे उपेतः माभवान् प्रेदिधादित्यादौ वृद्ध्या उपैतः—माभवान्प्रैदिधदित्याद्यनिष्टप्रयोगापत्तिः स्यादित्यतस्तत्सम्बन्ध आवश्यकः कृते तु तस्मिन् एजादेः इण्धातोः एध् धातोश्चाभावान्न वृद्धिः । तत्सिद्धिप्रकारश्च उप इत इत्यत्र, मा भवान् प्र-इदिधदित्यत्र च आद्गुण इति सूत्रेण एकारे गुणे कृते बोध्यः ।

अक्षौहिणीति । अक्ष-ऊहिनी इत्यवस्थायाम् आद्गुण इति गुणे प्राप्ते अक्षादूहिन्यामुपसंख्यानमितिवार्तिकप्रवृत्तिः । अक्षशब्दावयवावर्णाद् ऊहिनीशब्दावयवे ऽचि परे पूर्वपरयोर्वृद्धिरेकादेशः स्यादिति तदर्थः । तथा चात्र वृद्धौ पूर्वपदात्सञ्ज्ञायामग इति णत्वे अक्षौहिणीति सिध्यति ।

प्रौह इति । प्र-ऊह इत्यत्र आद्गुण इति गुणे प्राप्ते प्रादूहोढोढ्येषैष्येष्विति वार्तिकप्रवृत्तिः । प्रशब्दावयवावर्णाद् ऊहादिशब्दावयवे ऽचि परे पूर्वपरयोर्वृद्धिरेकादेशः स्यादिति तदर्थः । ततश्चात्र वृद्धौ प्रौह इति सिद्धम् ।

ऋतः सुखार्तः । तृतीयेतिकिम् । परमर्तः (प्रवत्सतरकम्बलवसनार्णदशानामृणे) । प्रार्णम् । वत्सतरार्णम् इत्यादि ॥ **उपसर्गाः क्रियायोगे १।३।५९ ॥** प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः । प्र परा

एवम् प्र–उढः, प्र– ऊढिः, प्र– एषः, प्र– एष्यः, इत्यत्र प्रादूहोढोढ्येषैष्येष्विति वृद्धौ प्रौढः, प्रौढिः, प्रैषः, प्रैष्यः इत्यादि सिद्ध्यति ।

सुखार्त इति । सुखेन ऋत इति विग्रहे तृतीयासमासे, सुख–ऋत इत्यवस्थायाम् आद्गुण इति गुणे प्राप्ते तं बाधित्वा, ऋते च तृतीयासमासे इति वार्तिकप्रवृत्तिः । तृतीयासमासघटकपूर्वपदावयवात् अवर्णाद् ऋतशब्दावयवेऽचि परे पूर्वपरयोर्वृद्धिरेकादेशः स्यादिति तदर्थः । तथा च अकारऋकारयोः स्थाने आकारवृद्धौ उरण्रपर इतिसूत्रेण रपरत्वे सुखार्त इति सिद्धम् ।

परमर्त इति । ऋते च तृतीयासमासे इति वार्तिके तृतीयाग्रहणाभावे परमश्चासौ ऋतश्चेति विग्रहे कर्मधारयसमासे परमर्त इत्यत्रापि वृद्ध्या परमार्त इत्यनिष्टप्रयोगापत्तिरतस्तदावश्यकम् कृते तु तस्मिन् न वृद्धिः । परम–ऋत इत्यत्र आद्गुण इति गुणे उरण्रपर इति रपरत्वे परमर्त इति सिद्धम् ।

प्रार्णमिति । प्र-ऋणमित्यत्र आद्गुण इति गुणे प्राप्ते प्रवत्सतरकम्बलवसनार्णदशानामृणे, इति वार्तिकप्रवृत्तिः । प्र वत्सतर कम्बल वसन ऋण दश शब्दावयवावर्णाद् ऋणशब्दावयवे ऽचि परे पूर्वपरयोर्वृद्धिरेकादेशः स्यादिति तदर्थः । अत्र प्रशब्दावयवावर्णाद् ऋणशब्दावयवे ऋकारे ऽचि परे पूर्वपरयोराकारवृद्धौ उरण्रपर इति रपरत्वे प्रार्णमिति सिद्धम् । एवं वत्सतर-ऋणम्, कम्बल–ऋणम्, वसन–ऋणम्, ऋण–ऋणम्, दश ऋणम्, इत्यत्र प्रवत्सतरकम्बलवसनार्णदशानामृणे इति वृद्धौ उरण्रपर इति रपरत्वे वत्सतरार्णम्, कम्बलार्णम्, वसनार्णम्, ऋणार्णम्, दशार्णम्, इत्यादि सिद्ध्यति ।

प्रार्च्छतीति । प्र– ऋच्छतीत्यत्र उपसर्गाः क्रियायोगे इति सूत्रेण प्र इत्यस्योपसर्गसंज्ञायाम् उपसर्गादृति धाताविति सूत्रप्रवृत्तिः । उपसर्गा-

अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप-एते प्रादयः ॥ **भूवादयो धातवः १।३।१॥** क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ॥ **उपसर्गादृति धातौ ६।१।१९ ॥** अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात् । प्रार्च्छति ॥ **एङि पररूपम् ६।१।९४ ॥** आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात् । प्रेजते । उपोषति ॥ **अचोन्त्यादि टि १।१।६४ ॥** अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् । (शकन्ध्वादिषु[1] पररूपं वाच्यम्) तच्च टेः । शकन्धुः । कर्कन्धुः । मनीषा[2] ।

वयवावर्णाद् ऋकारादिधात्ववयवेऽचि परे पूर्वपरयोर्वृद्धिरेकादेशः स्यादिति तदर्थः अत्र प्रशब्दावयवावर्णाद् ऋच्छीत्यस्यावयवेऽचि परे पूर्वपरयोराकारवृद्धौ उरण्रपर इति रपरत्वे प्रार्च्छतीति सिद्ध्यति ।

प्रेजतेइति । प्र—एजते इत्यवस्थायां वृद्धिरेचीति वृद्धौ प्राप्तायाम् एङिपररूपमिति सूत्रं प्रवृत्तम्, अत्र आद्गुण इत्यत आदिति उपसर्गादृतिधातावित्यत उपसर्गादिति धाताविति चानुवर्तते । तथा च अवर्णान्तादुपसर्गादेङादौ धातौ परे पूर्वपरयोः पररूपमेकादेशः स्यादिति सूत्रार्थः । ततश्च अकारस्य एजत इत्यस्य एकारस्य उभयोः स्थाने पररूपेण एकारे प्रेजते इति सिद्धम् ।

उपोषतीति । उप—ओषतीत्यत्र वृद्धिरेचीति वृद्धौ प्राप्तायाम् एङि पररूपमिति सूत्रेण पररूपे उपोषतीति सिद्धम् ।

शकन्धुरिति । शक—अन्धुरित्यत्र अचोऽन्त्यादि टि इति सूत्रं प्रवृत्तम् । अच इति निर्धारणे षष्ठी अन्त्यादीति लुप्तविभक्तिकम्पदम् ।

---

[1] शकन्ध्वादिगणपठित जो शब्द उसके सिद्धि के अनुगुण पररूप कहना अर्थात् शकन्ध्वादिगणपठितशब्दघटकपूर्वपद का जो टि तथा उत्तरपदाद्यवयव जो अच् दोनों के स्थान में पररूप एकादेश हो ।

[2] मनीषा—अचों के मध्य में अन्त्य अच् कौन मनस् नकार उत्तरवर्ती अकार वह आदि में है किसके अस् के उसको टि संज्ञा हुई । नकार में अकार यह कहना

आकृतिगणोऽयम् । मार्त्तण्डः ॥ **ओमाङोश्च ६।१।९५** ॥ ओमि आङि चात् परे पररूपमेकादेशः स्यात् । शिवायोन्नमः । शिव एहि ॥

तेन अचाम्मध्ये योऽन्त्यः स आदिर्यस्य स समुदायः टिसंज्ञको भवतीति सूत्रार्थः । अत्र अचां मध्ये ऽन्त्यः ककारोत्तरवर्त्त्यकारः स व्यपदेशिवद्भावेन स्वस्यैवाद्यवयव इति तस्य टिसंज्ञायाम्, शकन्ध्वादिषु पररूपं वाच्यम्, इति वार्तिकप्रवृत्तिः । शकन्ध्वादिगणपठितो यः शब्दस्तद्घटकं यत् पूर्वपदं तदवयवस्य टेः उत्तरपदाद्यवयवस्याचश्च द्वयोः पररूपं भवतीति तदर्थः । अत्र शकन्ध्वादिगणपठितः शब्दः शकन्धुरिति तद्घटकं पूर्वपदं शक इति तदवयवस्य ककारोत्तरवर्त्तिनः अकारस्य टेः अन्धुरित्येतद्घटकाकारे परे द्वयोः पररूपे शकन्धुरिति सिद्धम् ।

कर्कन्धुरिति । कर्क–अन्धुरित्यत्र अचोऽन्त्यादिटीत्यनेन ककारोत्तरवार्त्तिनः अकारस्य टिसंज्ञायाम् तस्य अन्धुरित्येतद्घटकस्याकारस्य च शकन्ध्वादिषु पररूपं वाच्यमिति वार्तिकेन पररूपे कर्कन्धुरिति सिद्धम् ।

मनीषेति । मनस्– ईषेत्यत्र अचोऽन्त्यादिटीत्यनेन सूत्रेण अचां मध्ये ऽन्त्यः नकारोत्तरवर्त्यकारः स अस् इतिसमुदायस्यादिरिति अस् इत्यस्य टिसंज्ञायाम् शकन्ध्वादिषुपररूपंवाच्यमिति वार्तिकेन शकन्ध्वादिगणपठितः शब्दः मनीषा इति तद्घटकं पूर्वपदं मनस् इति तदवयवस्य अस्इत्यस्य टेः ईषा इत्येद्घटकस्येकारस्य च पररूपे मनीषेति सिद्धम् ।

शकन्ध्वादिराकृतिगणस्तेन मार्त–अण्ड इत्यत्र तकारोत्तरस्याकारस्य टि संज्ञायाम् शकन्ध्वादिषु पररूपं वाच्यमिति पररूपे मार्तण्डः सिध्यति ।

शिवायोंनम इति । शिवाय– ओंनमः इत्यवस्थायां वृद्धिरेचीति सूत्रेण वृद्धौ प्राप्तायाम् ओमाङोश्चेति सूत्रं प्रवर्तते । अत्र आद्गुण

अशुद्ध है क्योंकि वर्णात्कारः से कारप्रत्यय व्यञ्जनमात्र बोधन करने के लिये होता है तो व्यञ्जन में अकार कहां है । एवं अकार आदि में है किसके सकार के यह कहना भी अशुद्ध है क्योंकि तब तो स् को टिसंज्ञा होगी तो उसी को पररूप होगा अस्को न होगा ।

अन्तादिवच्च ६।१।८५ योऽयमेकादेशः स पूर्वस्यान्तवत्परस्यादिवत् । शिवेहि ॥ **अकः सवर्णे दीर्घः ६।१।१०१** ॥ अकः सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यात् । दैत्यारिः । श्रीशः । विष्णूदयः । होतॄकारः ॥

इत्यत आदिति एङिपररूपमित्यतः पररूपमिति चानुवर्तते । अवर्णाद् ओमि आङि च परे पररूपमेकादेशः स्यादिति सूत्रार्थः । अत्र यकारोत्तरवर्तिनः अकारादोमि परे पूर्वपरयोः स्थाने पररूपे ओकारे शिवायोंनम इति साधु ।

शिवेहीति। शिव–आ–इहि इत्यत्र आद्गुण इति गुणे अकः सवर्णे दीर्घ इति दीर्घे च प्राप्ते धातूपसर्गयोः कार्यस्यान्तरङ्गत्वेन असिद्धम्बहिरङ्गमन्तरङ्गे इति परिभाषया दीर्घस्यासिद्धत्वेन गुणे कृते शिव एहीति जाते अन्तादिवच्चेति सूत्रं प्रवर्तते । एकादेशस्य पूर्वस्थानिघटितसमुदाये परस्थानिघटितसमुदाये वा यो धर्मः स एकादेशविशिष्टेऽतिदिश्यते इति सूत्रार्थः । अत्र एकादेशो गुणः तस्य पूर्वस्थानी आकारस्तद्घटितः समुदायः व्यपदेशिवद्भावेन आकार एव तस्मिन्धर्म आङ्त्वं तस्य एकादेशे एकारेऽतिदेशे ओमाङोश्चेत्यनेन वकारोत्तरवर्तिनः अकाराद् एकाररूपे आङि परे पूर्वपरयोः स्थाने पररूपे एकारे शिवेहीति सिद्धम् ।

दैत्यारिरिति। दैत्य– अरिरित्यवस्थायाम् अकः सवर्णे दीर्घ इति सूत्रप्रवृत्तिः । अत्र इकोयणचीत्यत अचीत्यनुवर्तते एकः पूर्वपरयोरित्यधिक्रियते तथा च अक्प्रत्याहारान्तःपातिवर्णात्सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यादिति तदर्थः । यकारोत्तरवर्तिनः अकारात्सवर्णेऽरिरित्यस्याकारेऽचि परे पूर्वपरयो दीर्घ आकारे दैत्यारिरिति सिद्धम् ।

---

१ अन्त्यवर्ण रहते एकादेशपूर्वस्थानिघटितसमुदाय में जो धर्म वह एकादेशविशिष्ट में आता है । आदिवर्ण रहते एकादेशपरस्थानिघटितसमुदाय में जो धर्म वह एकादेश विशिष्ट में आता है ।

२ अन्त्यवर्ण कौन आ उसके रहते एकादेश पूर्वस्थानी जो आ तद्घटितसमुदाय व्यदेशिवद्भावेन आ उसमें धर्म कौन आङ्त्व सो एकादेश विशिष्ट ए में आगया ।

एङः पदान्तादति ६।१।१०९ ॥ पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् । हरेऽव । विष्णोऽव ॥ **सर्वत्र विभाषा गोः** ६।१।१२२ ॥ लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः पदान्ते । गोअग्रम्, गोऽग्रम् ।

श्रीश इति । श्री–ईश इत्यत्र अकः सवर्णे दीर्घ इत्यनेन रेफोत्तरेकाराद् ईश इत्यस्येकारेऽचि परे पूर्वपरयोर्दीर्घ ईकारे श्रीश इति साधु ।

विष्णूदय इति । विष्णु–उदय इत्यत्र अकः सवर्णे दीर्घ इत्यनेन णकारोत्तरवर्तिन उकाराद् उदय इत्यस्य उकारेऽचि परे पूर्वपरयोर्दीर्घे ऊकारे विष्णूदय इति सिद्धम् ।

होतॄकार इति । होतृ– ऋकार इत्यत्र अकः सवर्णे दीर्घ इत्यनेन तकारोत्तरवर्तिन ऋकाराद् ऋकारेऽचि पूर्वपरयोर्दीर्घे ऋकारे होत्तॄकार इति साधु ।

हरेऽवेति । हरे–अवेत्यत्र एचोऽयवायाव इति सूत्रेण अयादेशे प्राप्ते एङः पदान्तादतीति सूत्रं प्रवृत्तम् । पदान्ताद् एङ्प्रत्याहारान्तःपातिवर्णाद् ह्रस्वाकारे परे पूर्वपरयोः स्थाने पूर्वरूपमेकादेशः स्यादिति तदर्थः । अत्र रेफोत्तरवर्तिन एकाराद् अवेत्यस्याकारे परे पूर्वपरयोः स्थाने पूर्वरूपे हरेऽवेति साधु ।

विष्णोऽवेति । विष्णो–अवेत्यत्र एचोऽयवायाव इत्यनेनावादेशे प्राप्ते एङः पदान्तादतीति सूत्रेण णकारोत्तरवर्त्त्योकारस्य अवेत्येतद्घटकाकारस्य च स्थाने पूर्वरूपे विष्णोऽवेति सिद्धम् ।

गो अग्रमिति । गो–अग्रमित्यवस्थायाम् एचोऽयवायाव इति सूत्रेण अवादेशे प्राप्ते तं वाधित्वा एङः पदान्तादतीति पूर्वरूपे प्राप्ते सर्वत्र विभाषा गोरिति सूत्रप्रवृत्तिः । अत्र एङः पदान्तादतीति सूत्रमनुवर्तते । गोरित्यनेन सामानाधिकरण्यानुरोधाद् एङित्यस्य षष्ठ्यन्तत्वेन विपरिणामः । पदान्तादित्यस्य सप्तम्यन्तत्वेन विपरिणामः । प्रकृत्याऽन्तःपादमव्यपरे, इतिसूत्रात्प्रकृत्या–इत्यनुवर्तते । तथा च लोके वेदे

एङन्तस्य किम् । चित्रग्वग्रम् । पदान्ते किम् । गोः ॥ **अनेकाल्शित्सर्वस्य १।१।५५** ॥ इति प्राप्ते ॥ **ङिच्च १।१।५३**॥ ङिदनेकाल्प्यन्त्यस्यैव स्यात् ॥ **अवङ् स्फोटायनस्य ६।१।१२३** ॥ पदान्ते एङन्तस्य गोरवङ् वाऽचि । गवाग्रम्, गोऽग्रम् । पदान्ते किम् । गवि ॥

चैङन्तस्य गोशब्दस्य ह्रस्वाकारे परे वैकल्पिकः प्रकृतिभावः स्यात्पदान्ते इति सूत्रार्थः । तेनात्र प्रकृतिभावान्न पूर्वरूपम् इति गो अग्रमिति सिद्धं यथास्थितमेव । पक्षे तु पूर्वरूपे गोऽग्रमिति सिद्धम् ।

चित्रग्वग्रमिति । सर्वत्रविभाषागोरितिसूत्रे एङः पदान्तादतीति सूत्राद् एङ इत्यस्य सम्बन्धाभावे चित्रग्वग्रमित्यत्रापि प्रकृतिभावेन चित्रगु अग्रमित्यानिष्टं प्रसज्येत अतस्तदावश्यकम् । कृते तु तस्मिन् न प्रकृतिभावः । चित्रगु–अग्रमित्यवस्थायाम् इकोयणचीति सूत्रेण गकारोत्तरवर्तिन उकारस्य अग्रमित्यस्य अकारे परे वकारे यणि कृते चित्रग्वग्रमिति सिद्ध्यति ।

गोरिति । सर्वत्रविभाषागोरिति सूत्रे पदान्तसम्बन्धाभावे गोः–इत्यत्रापि प्रकृतिभावेन गोअः–इत्यनिष्टप्रयोगापत्तिः स्यादतस्तत्सम्बन्ध आवश्यकः कृते तु तस्मिन् अत्र पदान्तत्त्वाभावेन न प्रकृतिभावः । गो अस् इत्यवस्थायाम् ङसिङसोश्चेति सूत्रेण पूर्वरूपे रुत्वे खरवसानयोर्विसर्जनीय इति विसर्गे गोरिति सिद्धम् ।

गवाग्रमिति । गो–अग्रमित्यत्र प्रकृतिभावाभावपक्षे अवङ् स्फोटायनस्येति–सूत्रं प्रवृत्तम् । अत्र इकोयणचीत्यत अचीति एङः पदान्तादतीत्यत एङ इति पदान्तादिति सर्वत्र विभाषा गोरित्यतः विभाषेति गोरिति चानुवर्तते । तथा च पदान्ते एङन्तस्य गोशब्दस्य अवङ् आदेशो वा स्यादचि परे स्फोटायनस्याचायस्य मते इति सूत्रार्थः । अनेन सूत्रेण अलोऽन्त्यस्येति परिभाषाबलाद् गकारोत्तरवर्तिन ओकारस्य अवङादेशे प्राप्ते तं प्रबाध्य अनेकाल्शित्सर्वस्येति सूत्रं प्रवर्तते ।

इन्द्रे च ६।१।१२४॥ गोरवङ् स्यादिन्द्रे। गवेन्द्रः॥ **दूराद्धूते च ८।२।८४॥** दूरात्सम्बोधने वाक्यस्य टेः प्लुतो वा॥ **प्लुतप्रगृह्या अचि नित्यम् ६।१।१२५॥** एतेऽचि नित्यं प्रकृत्या स्युः। आगच्छ कृष्ण ३ अत्र गौश्चरति॥ **ईदूदेद्द्विवचनं प्रगृह्यम् १।१।११॥** ईदूदेदन्तं द्विवचनं

अनेकाल् (अनेकाक्षरकः) शित् (शकारेत्संज्ञकः) च आदेशः सर्वस्य स्थाने भवतीति सूत्रार्थः। तथा च अनेकाल्त्वेन गो इत्यस्य स्थानेऽवङि प्राप्ते ङिच्चेति सूत्रं प्रवृत्तम्। अनेकालपि ङकारेत्संज्ञक आदेशोऽन्त्यस्यैव स्थाने भवतीति सूत्रार्थः। तथाचानेकाल्त्वेऽप्यवङो ङकारेत्संज्ञकत्वेन अन्त्यस्य गकारोत्तरवर्तिन ओकारस्य स्थानेऽवङि ङकारस्येत्संज्ञायां लोपे च कृते—गवअग्रमिति जाते अकः सवर्णे दीर्घ इति सूत्रेण दीर्घे गवाग्रमिति सिद्धम्। अवङोऽभावपक्षे प्रकृतिभावे गोअग्रमिति प्रकृतिभावाभावपक्षे पूर्वरूपे गोऽग्रमिति।

गवेन्द्रइति। गो—इन्द्र इत्यवस्थायाम्—एचोऽयवायाव इति सूत्रेण अव् आदेशे प्राप्ते तं प्रबाध्य इन्द्रेचेति सूत्रं प्रवर्तते। गोशब्दस्य स्थानेऽवङादेशः स्याद् इन्द्रशब्दे परे इति सूत्रार्थः। तथा चात्र ङिच्चेति परिभाषा सूत्रसहकारेण ङकारेत्संज्ञकत्वाद् गकारोत्तरवर्तिन ओकारस्य स्थानेऽवङि ङकारस्येत्संज्ञायां लोपे च गव इन्द्र इति जाते आद्गुण इत्यनेन कण्ठतालुस्थानजन्ययोर्वकारोत्तरवर्त्यकारेकारयोः स्थाने कण्ठतालुस्थानजन्य एकारे गुणे कृते गवेन्द्र इति सिद्ध्यति।

आगच्छ कृष्ण अत्र गौश्चरतीति। आगच्छकृष्ण—अत्र गौश्चरतीत्यवस्थायाम् अचोऽन्त्यादिटीति सूत्रेण णकारोत्तरवर्तिनः अकारस्य टिसंज्ञायां दूराद्धूतेच इति सूत्रप्रवृत्तिः। अत्र वाक्यस्यटेः प्लुत उदात्त इत्यतो वाक्यस्य टेः प्लुत इत्यनुवर्तते। दूरात्सम्बोधनविषयकं यद्वाक्यं तद्घटकः एवं हूयमानार्थवाचकपदघटको यः टिः तदवयवो योऽच् स प्लुतो भवतीति सूत्रार्थः। तथा च णकारोत्तरवर्तिनः अकारस्य प्लुते प्लुतप्रगृह्या अचि नित्यमिति सूत्रं प्रवृत्तम्। अत्र प्रकृत्येत्यनुवर्तते। तेन प्लुताः

प्रगृह्यं स्यात् । हरी एतौ । विष्णू इमौ । गङ्गे अमू ॥ **अदसो मात्**

प्रगृह्यसंज्ञकाश्चाचि परे नित्यं प्रकृत्या स्युरिति सूत्रार्थः । तथा चात्र अकारेऽचि परे प्लुतस्य णकारोत्तरवर्तिन अ ३ कारस्य प्रकृतिभावे आगच्छ कृष्ण ३ अत्र गौश्चरतीति यथास्थितमेव सिद्धम् ।

हरी एताविति । हरी—एतावित्यवस्थायाम् इकोयणचीति यणि प्राप्ते ईदूदेद्द्विवचनं प्रगृह्यमिति सूत्रं प्रवर्तते । अत्र ईदूदेदंशे येन विधिस्तदन्तस्येति सूत्रेण तदन्तविधिः । तथा च ईकारान्तम् ऊकारान्तम् एकारान्तं च यद् द्विवचनं तत्प्रगृह्यसंज्ञकम्भवतीति सूत्रार्थः । अत्र हि [2]परादिवद्भावेन द्विवचनत्वस्य व्यपदेशिवद्भावेन च ईकारान्तत्वस्याश्रयणेन ईकारान्तं द्विवचनं रेफोत्तरवर्ती ईकारस्तस्य प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यमिति सूत्रेण प्रकृतिभावे हरी एताविति सिद्धम् ।

विष्णू इमाविति । विष्णू—इमावित्यत्र णकारोत्तरवर्तिन ऊकारस्य परादिवद्भावेन द्विवचनत्वस्य व्यपदेशिवद्भावेन ऊकारान्तत्वस्य च सत्त्वेन ईदूदेद्द्विवचनं प्रगृह्यमिति सूत्रेण प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यमिति सूत्रेण प्रकृतिभावे विष्णू इमाविति सिद्धम् ।

गङ्गे अमू इति । गङ्गे—अमू इत्यवस्थायाम् गकारोत्तरवर्तिनि एकारे परादिवद्भावेन द्विवचनत्वस्य, व्यपदेशिवद्भावेन एकारान्तत्वस्य च सत्त्वेन ईदूदेद्द्विचनं प्रगृह्यमिति सूत्रेण प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यमिति सूत्रेण प्रकृतिभावे गङ्गे अमू इति साधु ।

---

[1] हरी एतौ । ईदन्त द्विवचन कौन हरी रकार उत्तरवर्ती ईकार । ईकार में ईदन्तत्व व्यपदेशिवद्भावेन द्विवचनत्वपरादिवद्भावेन यहां ईदन्त द्विवचन कौन हरी यह कहना भूल है क्योंकि हरी द्विवचन संज्ञक नहीं है ।

[2] आदिवर्ण कौन औ उसके रहते एकादेशपरस्थानी औ तद्घटितसमुदाय व्यपदेशिवद्भावेन औ उसमें कौन धर्म था द्विवचनत्व सो ई में आगया ।

-पाता - अथ निपाता [illegible] निपातन्त्वा

नरुक्त - ।१।४।। पृ. १५।। "उच्च और अवचेषु अनेक प्रकार

अर्थों में गिरते हैं।" श्री भगवद्दत्तजी ।। यस्मान्निपतन्ति

तस्मात् प्रोक्ता निपाताः स्मृ ।। भरतना. शा. ।।१४।।५६।। पृ. २२३।।

१।१।१२॥ अस्मात्परावीदूतौ प्रगृह्यौ स्तः । अमी[1] ईशाः । रामकृष्णावमू आसाते । मात्किम् । अमुकेऽत्र ॥ **चादयोऽसत्त्वे १।४।५७ ॥**

अमी ईशा इति–अमी–ईशा इत्यत्र एतईद्बहुवचने इति सूत्रेण कृतस्य मीभावस्य एचोयवायाव इत्येतं प्रत्यसिद्धत्वादयादेशे प्राप्ते अदसोमादिति सूत्रं प्रवृत्तम् । अदस इति सम्बन्धसामान्ये षष्ठी । अत्र सूत्रे ईदूदिति प्रगृह्यमिति चानुवर्तते । मादितिपञ्चम्या परत्वलाभः । तथा च, अदस्शब्दसम्बन्धिनो मकारात्परावीदूतौ प्रगृह्यसंज्ञौ स्त इति सूत्रार्थः । अस्मिन् सूत्रे एदिति तु नानुवर्तते, अदश्शब्दघटकमकारात्परस्य एकारस्यासम्भवात् । द्विवचनमित्यस्यापि नानुवृत्तिः, अदश्शब्दसम्बन्धिनो मकारात्परस्य ईकारस्य अमी इति बहुवचनत्वात् ऊकारस्य च द्विवचनान्तेष्वेव सत्त्वेन व्यावर्त्त्याभावात् । अमी–ईशा इत्यत्र मकारोत्तरवर्तिन ईकारस्य प्रगृह्यसंज्ञायाम् प्लुतप्रगृह्या अचि नित्यमिति सूत्रेण प्रकृतिभावादयादेशाभावे अमी ईशा इति सिद्धम् ॥

रामकृष्णावमू-आसाते इति । रामकृष्णावमू-आसात इत्यत्र मूभावस्यासिद्धत्वादावादेशे एचोयवायाव इत्यनेन प्राप्ते अदसोमादितिसूत्रेण मकारोत्तरवर्त्तिन ऊकारस्य प्रगृह्यसंज्ञायाम् प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावेन आवादेशा भावे रामकृष्णावमू–आसाते इति सिद्धम् ।

मात्किम्-अमुकेऽत्रेति–अव्ययसर्वनाम्नामकच् प्राक्टेरितिसूत्रेणाकच्प्रत्यये अदकश्शब्दाज्जसि त्यदाद्यत्वे पररूपे जसः श्यादेशे गुणे सुत्वे अमुके इतिरूपम् । अदसोमादिति सूत्रे माद्ग्रहणाभावे ईदूदे-

---

[1] अमी ईशाः । यहां एत ईद्बहुवचने सूत्र एचोऽयवायावः की दृष्टि में पूर्वत्रासिद्धं सूत्र के बल से असिद्ध है इससे अमी को अदे जानकर अयादेश प्राप्त था प्रगृह्य संज्ञा होने से नहीं हुआ । रामकृष्णावमू आसाते में मू के असिद्ध होने से अदौ देख पड़ता है इससे यहां आवादेश प्राप्त था प्रगृह्य होने से प्रकृतिभाव हो गया । अमी ईशाः में अकः सवर्णे दीर्घः अमू आसते में इकोयणचि नहीं प्राप्त है क्योंकि उसकी दृष्टि में मी तथा मू असिद्ध है इससे ईकार एवम् ऊकार नहीं है ।

② निपातानामर्थवशान्निपातनात् · दनर्थकानामितरे च सार्थकाः

[illegible] इति संरम्भो वाङ्मयः; मिताक्षरे चाप्यमिताक्षरे च यो।। ऋ. प्राति. ।।१२।२६।। पृ. २४५।। "निपातयति

[illegible] । जित [illegible] ।[illegible]

अद्रव्यार्थाश्चादयो निपाताः स्युः ॥ **प्रादयः १।४।५८॥** एतेऽपि तथा ॥ **निपात एकाजनाङ् १।१।१४॥** एकोऽज् निपात आङ्वर्जः प्रगृह्यः स्यात् । इ इन्द्रः । उ उमेशः । 'वाक्यस्मरणयोरङित्' । आ एवं नु

दित्यत एदित्यस्याप्यनुवृत्त्या अदश्शब्दात्परस्य एकारस्यापि प्रगृह्यसंज्ञाविधानाद् अमुके अत्र इत्यवस्थायां ककारोत्तरवर्तिन एकारस्य प्रगृह्यसंज्ञायां प्रकृतिभावेन अमुके अत्रेत्यनिष्टं प्रसज्येत अतो माद्ग्रहणमावश्यकम् । कृते तु माद्ग्रहणे तत्सामर्थ्यान्न एदित्यस्यानुवृत्तिरिति न तत्र प्रगृह्यत्वेन प्रकृतिभावः । अपि तु एङः पदान्तादतीति पररूपमिति तत्सिद्धम् ।

इ इन्द्र इति । इ–इन्द्र–इत्यत्र चादयोऽसत्त्वे, इतिसूत्रेण पूर्वस्य इकारस्य निपातसंज्ञायां निपातएकाजनाङिति सूत्रप्रवृत्तिः । अत्र एकश्चासावच्चेति कर्मधारयसमासः न तु एकोऽच् यस्मिन्निति बहुव्रीहिसमासः तथासति प्रेदं व्याहरति मृग इत्यादौ प्रइत्यस्य वी इत्यस्य च प्रगृह्यसंज्ञायां प्रकृतिभावापत्तेः तथा च एकोऽज्निपात आङ्भिन्नः प्रगृह्यसंज्ञकः स्यादिति सूत्रार्थः । अत्र इकारस्य एकाज्रूपनिपातत्वेन प्रगृह्यसंज्ञायाम् प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावे तत्सिद्धिः ।

उ उमेश इति । उ–उमेश–इत्यत्र पूर्वस्य उकारस्य चादयोऽसत्त्वे इतिनिपातसंज्ञायां निपात एकाजनाङिति प्रगृह्यसंज्ञायां प्लुतप्रगृह्या इति प्रकृतिभावे उ–उमेश इति साधु ।

आ एवं नु मन्यसे, आ एवं किल तदिति । आ–एवं नु मन्यसे इत्यत्र, आ–एवं किल तदित्यत्र च निपातएकाजनाङिति सूत्रं प्रवृत्तम् । अत्र सूत्रे ऽनाङित्युक्त्या ङिद्भिन्न आकारः प्रगृह्यसंज्ञको भवति । वाक्यस्मरणयोरर्थयोराङ् अङिद् भवति–अन्यत्र तु ङिद् भवति । तदुक्तम्भगवता भाष्यकारेण–

ईषदर्थे क्रियायोगे, मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित् ॥

य-ग्रन्थालय, ...निधि, करौंदी वाराणसी-5

मन्यसे । आ एवं किल तत् । अन्यत्र ङित् । आ ईषदुष्णम् ओष्णम् ॥

ओत् १।१।१५॥ ओदन्तो निपातः प्रगृह्यः स्यात् । अहो ईशाः ॥

संबुद्धौ शाकल्यस्येतावनार्षे ।१।१।१६। संबुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिक इतौ परे । विष्णो इति, विष्ण इति, विष्णविति ॥

अत्रोक्तस्थलद्वये वाक्यस्मरणयोरर्थयोः सद्भावेन आङोऽङित्वात्प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यमिति सूत्रेण प्रकृतिभावे आ एवं नु मन्यसे इति, आ एवं किल तदिति च सिद्धम् ।

ओष्णमिति। आ-उष्णमित्यत्र ईषदर्थकस्याङो ङित्त्वेन निपात एकाजनाङिति सूत्रेण प्रगृह्यत्वाभावे आद्गुण इति सूत्रेण कण्ठोष्ठस्थानजन्यत्वेन सादृश्याद् आकारोकारयोः स्थाने ओकारे गुणे ओष्णमिति सिद्धम् ।

अहो इशो इति। अहो- ईशा इत्यत्र एचोऽयवायाव, इति सूत्रेण अवादेशे प्राप्ते ओत् इति सूत्रं प्रवृत्तम् । अत्र निपात एकाजनाङिति सूत्रात् निपात इति पदमनुवर्तते तस्य विशेष्यत्वेन ओदंशे तदन्तविधिः । ईदूदेद्द्विवचनं प्रगृह्यमित्यतः प्रागृह्यमित्यनुवर्तते । तथा च ओकारान्तो निपातः प्रगृह्यसंज्ञकः स्यादिति सूत्रार्थः । अहो इत्यस्य ओदन्तनिपातत्वेन प्रगृह्यसज्ञायां प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावे अहो ईशा इति सिद्धम् ॥

विष्णो इतीत्यादि। विष्णो-इति इत्यवस्थायाम् एचोऽयवायाव इति सूत्रेण अवादेशे प्राप्ते, सम्बुद्धौ शाकल्यस्येतावनार्षे, इतिसूत्रं प्रवर्तते अस्मिन् सूत्रे सम्बुद्धाविति निमित्तसप्तमी । तस्या ओदित्यनुवृत्तेनान्वयः । प्रगृह्यमित्यनुवर्तते तस्य पुंल्लिङ्गतया विपरिणामः । अनार्षे-इत्यस्य अवैदिके-इत्यर्थः । तथा च सम्बुद्धिनिमित्तक ओकारः प्रगृह्यसंज्ञको भवति अवैदिक इति शब्दे परे शाकल्याचार्य्यस्य मते इति सूत्रार्थः । अत्रावैदिक इति शब्दे परे णकारोत्तरवर्तिन ओकारस्य वैकल्पिकप्रगृह्यसंज्ञायाम् प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावे विष्णो-इतीति सिध्यति । प्रगृह्यसंज्ञाया अभावपक्षे-एचोऽयवायाव, इत्यनेन णकारो-

मय उञो वो वा ८।३।३३॥ मयः परस्य उञो वो वा अचि । किम्वुक्तम्, किमु उक्तम् ॥ **इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६।१।१२७॥** पदान्ता इको ह्रस्वा वास्युरसवर्णेऽचि । ह्रस्वविधिसामर्थ्यान्न स्वरसंधिः । चक्रि अत्र, चक्र्यत्र । पदान्ता इति किम् । गौर्यौ—

त्तरस्य ओकारस्य अवादेशे लोपः शाकल्यस्येत्यनेन वलोपे पूर्वत्रासिद्धमिति, सूत्रेण लोपः शाकल्यस्येत्यस्यासिद्धत्वाद् आद्गुण, इति गुणाभावे विष्ण इतीति । वलोपाभावपक्षे विष्णवितीति प्रयोगत्रयं सिद्ध्यति ।

केचित्तु शाकल्यमते प्रकृतिभावात् तन्मतेऽवादेशाप्रवृत्त्या लोपः शाकल्यस्येति न वलोप इति रूपद्वयमेवेति वदन्ति ॥

किम्वुक्तमिति—किमु—उक्तमित्यवस्थायाम् (अकः सवर्णे दीर्घः) इति दीर्घे प्राप्ते तं बाधित्वा (निपात एकाजनाङ्) इति, सूत्रेण मकारोत्तरवर्तिन उकारस्य प्रगृह्यसंज्ञया प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावे प्राप्ते मय उञो वो वेति सूत्रं प्रवृत्तम् । अत्र सूत्रे मय इति पञ्चम्यन्तं पदम् उञ इति षष्ठ्यन्तं पदम् । ङमो ह्रस्वादचि ङमुण्नित्यमित्यत अचीत्यनुवर्तते तथा च मय्प्रत्याहारान्तःपातिवर्णात्परस्य उञ उकारस्य वकारो वा स्यादचि परे इतिसूत्रार्थः । अत्र मय्प्रत्याहारान्तःपातिनो मकारात्परस्य उञ उकारस्य उकारेऽचि परे वकारे किम्वुक्तमिति सिद्धम् । वकाराभावपक्षे निपात एकाजनाङित्यनेन मकारात्परस्योकारस्य प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावेन दीर्घाद्यभावे किमु उक्तमिति यथास्थितमेव ।

चक्रि अत्रेति—चक्री—अत्रेत्यवस्थायाम् इको यणचीति सूत्रेण रेफोत्तरस्य ईकारस्य स्थाने अकारे ऽचि परे यकारे यणि प्राप्ते इकोऽसवर्णे शाकल्यस्य ह्रस्वश्चेति सूत्रप्रवृत्तिः । अत्र एङः पदान्तादतीत्यतः पदान्तादित्यनुवर्तते तस्य षष्ठ्यन्तत्वेन विपरिणामः । प्लुतप्रगृह्या अचि नित्यमित्यत अचीत्यनुवर्तते चकारात् प्रकृत्या ऽन्तः पाद मव्यपरे, इत्यतः प्रकृत्या इत्यनुकृष्यते । तथा च

अचो रहाभ्यां द्वे ८।४।४६॥ अचः पराभ्यां रेफहकाराभ्यां परस्य यरस्य यरो द्वे वा स्तः । गौर्य्यौ । (न समासे) वाप्यश्वः ॥ **ऋत्यकः**

पदान्तस्य इक्प्रत्याहारान्तःपातिनो वर्णस्य ह्रस्वसमुच्चितप्रकृतिभावो वा स्यादसवर्णेऽचि परे इतिसूत्रार्थः । अत्र रेफोत्तरवर्तिन ईकारस्य अकारे ऽसवर्णे ऽचि परे ह्रस्वसमुच्चितप्रकृतिभावेन यणोऽभावे चक्रि अत्रेति साधु ह्रस्वसमुच्चितप्रकृतिभावाभावपक्षे यणि चक्र्यत्रेति सिद्धम् ।

पदान्ता इति किम् गौर्य्यौ इति । गौरी-औ इत्यत्र इकोयणचीति सूत्रेण रेफोत्तरस्य ईकारस्य यकारे यणि अचो रहाभ्यां द्वे, इतिसूत्रं प्रवर्तते । अत्र यरो ऽनुनासिके ऽनुनासिको वेत्यतः यर इति वेति चानुवर्तते । तथा च अचः परौ यौ रेफहकारौ ताभ्यां परस्य यर्प्रत्याहारान्तःपातिनो वर्णस्य वा द्वित्वम्भवतीति सूत्रार्थः । अत्र गकारोत्तरवर्त्तिन औकाररूपाचः परो रेफः तस्मात्परो यर्प्रत्याहारान्तःपाती वर्णो यकारस्तस्य वैकल्पिके द्वित्वे-गौर्य्यौ-गौर्यौ-इतिप्रयोगद्वयं सिद्धम् ।

इको ऽसवर्णे शाकल्यस्य ह्रस्वश्चेति सूत्रे एङः पदान्तादतीत्यतः पदान्तादित्यस्य सम्बन्धाभावे गौरी-औ इत्यत्र वैकल्पिकह्रस्वसमुच्चितप्रकृतिभावे गौरि औ-इति पक्षे यणि वैकल्पिकद्वित्वे च कृते गौर्य्यौ, गौर्यौ-इति प्रयोगत्रयापत्तिः स्यात्सा चानिष्टेति तत्सम्बन्ध आवश्यकः कृते तु तस्मिन् रेफोत्तरस्य ईकारस्य पदान्तत्वाभावेन न ह्रस्वसमुच्चितप्रकृतिभाव इति सर्व सूपपन्नम् ।

वाप्यश्व इति । वाप्यामश्व इति विग्रहे सप्तमीसमासे वापी-अश्व इति स्थिते इको ऽसवर्णे शाकल्यस्य ह्रस्वश्चेति सूत्रे पकारोत्तरवर्तिन ईकारस्य ह्रस्वसमुच्चितप्रकृतिभावे प्राप्ते (न समासे) इतिवार्तिकं प्रवर्तते । पदान्तस्येको ऽसवर्णे ऽचि परे ह्रस्वसमुच्चितप्रकृतिभावो न स्यात्समासे-इति हि वार्त्तिकार्थः । तथा चात्र पकारोत्तरस्य ईकारस्य ह्रस्वसमुच्चितप्रकृतिभावाभावेन (इको यणचीति) सूत्रेण यकारे यणि वाप्यश्व इति सिद्धम् ।

६।१।१२८॥ ऋति परे पदान्ता अकः प्राग्वद्वा । ब्रह्म ऋषिः, ब्रह्मर्षिः । पदान्ताः किम् । आर्च्छत् ॥

इत्यच्सन्धिः ।

अथ हल्सन्धिप्रकरणम् ।

स्तोः श्चुना श्चुः ॥ ८।४।४०॥ सकारतवर्गयोः शकारचवर्गा-

ब्रह्म ऋषिरिति । ब्रह्मा, ऋषिरित्यवस्थायाम् आद्गुण, इति गुणे प्राप्ते (ऋत्यक) इति सूत्रं प्रवृत्तम् । अत्र एङः पदान्तादतीत्यतः पदान्तादित्यनुवर्तते तस्य षष्ठ्यन्तत्वेन विपरिणामः । इकोऽसवर्णे इत्यतः शाकल्यस्य ह्रस्वश्चेत्यनुवर्तते । तथा च पदान्तस्य अको ह्रस्वे ऋकारे परे ह्रस्वसमुचितप्रकृतिभावो वा स्यादिति हि सूत्रार्थः । अत्र मकारोत्तरवर्तिन आकारस्य ऋकारे परे ह्रस्वसमुचितप्रकृतिभावेन गुणाद्यभावे ब्रह्म ऋषिरिति सिद्धम् । प्रकृतिभावाभावपक्षे (आद्गुण) इति गुणे (उरण् रपरः) इति रपरत्वे ब्रह्मर्षिरिति सिद्ध्यति ।

आर्च्छदिति । (ऋत्यक) इति सूत्रे पदान्तसम्बन्धाभावे आ-ऋच्छदित्यवस्थायाम् आकारस्य वैकल्पिकह्रस्वसमुचितप्रकृतिभावेन अ-ऋच्छदिति- आर्च्छदिति चानिष्टप्रयोगद्वयापत्तिः स्यादतस्तत्सम्बन्ध आवश्यकः । कृते तु तस्मिन् आकारस्य पदान्तत्वाभावेन ह्रस्वसमुचितप्रकृतिभावाभावे (आटश्च) इति वृद्धौ रपरत्वे च कृते आर्च्छदिति सिध्यति ।

इत्यच्सन्धिप्रकरणम् ।

* * *

रामस्–शेते इत्यत्र (स्तोः श्चुना श्चुः) इति सूत्रं प्रवर्तते । स् च तुश्चेति समाहारद्वन्द्वः, पुंस्त्वं सौत्रम् । इतरेतरयोगद्वन्द्वो वा, अत्र पक्षे सौत्रमेकवचनम् । योगे इत्यस्याध्याहारः । तथा च सकारतवर्गयोः स्थाने शकारचवर्गाभ्यां योगे शकारचवर्गौ भवत इति

भ्यां योगे शकारचवर्गौ स्तः । रामश्शेते । रामश्चिनोति । सच्चित् । शार्ङ्गिञ्जय ॥ **शात् ८।४।४४॥** शात्परस्य तवर्गस्य चुत्वं न स्यात् । विश्नः । प्रश्नः ॥ **ष्टुना ष्टुः ८।४।४१॥** स्तोः ष्टुना योगे ष्टुः स्यात् ।

सूत्रार्थः । यथासंख्यसूत्रप्रवृत्त्या सकारस्य शकारः, तवर्गस्य चवर्गः । तत्रापि त थ द ध न एषां क्रमेण च छ ज झ ञ एते भवन्ति । शकारचवर्गाभ्यां योगांशे तु न यथासंख्यम् तथासति–सकारस्य शकारयोगे शकारः तवर्गस्य चवर्गयोगे चवर्ग इत्यर्थकरणेन रामश्चिनोतीत्याद्यसिद्ध्यापत्तेः (शात्) इति सूत्रवैयर्थ्यापत्तेश्च ।

रामस्–शेते इत्यत्र हि शकारेण योगात् सकारस्य शकारे रामश्शेते इति साधु ।

रामश्चिनोतीति–रामस्–चिनोतीत्यत्र (स्तोः श्चुना श्चुः) इति सूत्रेण चवर्गयोगात् सकारस्य शकारे रामश्चिनोतीति सिद्धम् ।

सच्चिदिति–सत्–चिदिति स्थिते स्तोः श्चुना श्चुरित्यस्य परत्रिपादीस्थत्वेनासिद्धत्वात् (झलां जशोऽन्ते) इत्यनेन जश्त्वेन तकारस्य दकारे दकारस्य चवर्गयोगात् (स्तोः श्चुना श्चुः) इति सूत्रेण श्चुत्वे जकारे जकारस्य खरि चेति चर्त्वेन चकारे कृते सच्चिदिति सिद्धम् ।

शार्ङ्गिञ्जयेति । शार्ङ्गिन्–जय इत्यवस्थायां (स्तोः श्चुना श्चुः) इति सूत्रेण जकाररूपचवर्गयोगात् नकारस्य श्चुत्वेन ञकारे शार्ङ्गिञ्जयेति सिद्धम् ।

विश्न इति । विश् न इत्यत्र (स्तोः श्चुना श्चुः) इति सूत्रेण शकारयोगात् नकारस्य श्चुत्वेन ञकारे प्राप्ते (शात्) इति सूत्रं प्रवर्तते । अत्र न पदान्ताट्टोरनामित्यतो न इत्यनुवर्तते । स्तोः श्चुना श्चुरित्यतः तोरिति चुरिति चानुवर्तते । ततश्च शकारात्परस्य तवर्गस्य स्थाने चवर्गो न भवतीति तत्सूत्रार्थः । तेनात्र नकारस्य चुत्वनिषेधे ञकारो न इति विश्न इति सिद्धम् ।

प्रश्न इति । प्रश्–न इत्यत्र शकारयोगात् नकारस्य, (स्तोः श्चुना श्चुः) इति सूत्रेण श्चुत्वेन ञकारे प्राप्ते (शात्) इति सूत्रेण तन्निषेधे प्रश्न इति सिद्धम् ।

३

रामष्षष्ठः । रामष्टीकते । पेष्टा । तट्टीका । चक्रिण्ढौकसे ॥

न पदान्ताट्टोरनाम् ८।४।४२ ॥ पदान्ताट्टवर्गात्परस्याऽनामः स्तोः ष्टुर्न स्यात् । षट् सन्तः । षट् ते । पदान्तात्किम् । ईट्टे । टोः

रामष्षष्ठ इति । रामस्–षष्ठ इत्यवस्थायां (ष्टुना ष्टुः) इति सूत्रं प्रवर्तते । ष् च टुश्चेति द्वन्द्वः । स्तोरित्यनुवर्त्तते । तथा च सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ भवत इति सूत्रार्थः । अत्रापि स्थान्यादेशानां यथासंख्यं भवति तेन सकारस्य षकारः तवर्गस्य टवर्गः । तत्रापि त थ द ध न एषां क्रमेण ट ठ ड ढ ण एते भवन्ति । षकारटवर्गयोगांशे तु न यथासंख्यम् रामष्टीकते इत्याद्यसिद्ध्यापत्तेः । अत्र षकारयोगात् सकारस्य ष्टुत्वेन षकारे रामष्षष्ठ इति सिद्धम् ।

रामष्टीकते इति । रामस्–टीकत इत्यवस्थायां (ष्टुना ष्टुः) इत्यनेन टवर्गयोगात् सकारस्य षकारे रामष्टीकते इति साधु ।

पेष्टेति । पेष्–ता इत्यवस्थायां (ष्टुना ष्टुः) इतिसूत्रेण षकारयोगात् तकारस्य ष्टुत्वेन टकारे पेष्टेति सिद्धम् ।

तट्टीकेति । तद्–टीकेति स्थिते (ष्टुना ष्टुः) इति सूत्रेण टवर्गयोगात् दकारस्य ष्टुत्वेन डकारे तस्य खरि चेति चर्त्वेन टकारे तट्टीकेति सिद्धम् ।

चक्रिण्ढौकसे इति । चक्रिन्–ढौकसे–इत्यत्र (ष्टुना ष्टुः) इतिसूत्रेण टवर्गयोगात् नकारस्य ष्टुत्वेन णकारे चक्रिण्ढौकसे इति सिद्धम् ।

षट्-सन्त इति । षट्–सन्त इत्यवस्थायां (ष्टुना ष्टुः) इतिसूत्रेण टवर्गयोगात्सकारस्य ष्टुत्वेन षकारे प्राप्ते (न पदान्ताट्टोरनाम्) इति सूत्रं प्रवर्तते । अत्र स्तोरिति ष्टुरिति चानुवर्तते । तथा च पदान्ताट्टवर्गात्परस्य सकारस्य नामवयवभिन्नस्य तवर्गस्य च ष्टुत्वं न स्यादिति सूत्रार्थः । अत्र टकारात्परस्य सकारस्य ष्टुत्वनिषेधेन षत्वाभावे षट् सन्त इति सिद्धम् ।

षट्-ते इति । षट्–ते इत्यत्र (ष्टुना ष्टुः) इति सूत्रेण टवर्गयो-

क्रिम् । सर्पिष्टमम् । (अनाम्नवतिनगरीणामिति वाच्यम्) षण्णाम् । पणण्वतिः । षण्णगर्य्यः ॥ **तोः षि ८।४।४३॥** तवर्गस्य षकारे परे न ष्टुत्वम् । सन्षष्ठः ॥

गात् तकारस्य ष्टुत्वेन टकारे प्राप्ते (न पदान्ताट्टोरनाम्) इतिसूत्रेण ष्टुत्वनिषेधे षट् ते इति सिद्धम् ।

ईट्टे-इति । ईड् ते इत्यत्र ष्टुना ष्टुरिति सूत्रेण टवर्गयोगात् तकारस्य ष्टुत्वेन टकारे खरि चेति चर्त्वेन डकारस्य टकारे ईट्टे-इति सिद्ध्यति । (न पदान्ताट्टोरनाम्) इति सूत्रे पदान्तादित्यस्याभावे ईट्टे-इत्यत्र टकारात्परस्य तकारस्य ष्टुत्वानिषेधेन ईट् ते-इत्यनिष्टप्रयोगापत्तिः स्यादतस्तदावश्यकम् । सति तु तस्मिन् टकारस्य पदान्तत्वाभावेन तस्मात्परस्य तकारस्य ष्टुत्वनिषेधो न भवतीति सर्वं सूपपन्नम् ।

सर्पिष्टममिति । सर्पिष्-तममिति स्थिते (ष्टुना ष्टुः) इति सूत्रेण षकारयोगात्तकारस्य ष्टुत्वेन टकारे सर्पिष्टममिति सिद्ध्यति । (न पदान्ताट्टोरनाम्) इति सूत्रे टोर्ग्रहणाभावे सर्पिष् तममित्यवस्थायां षकारात्परस्य तकारस्य ष्टुत्वनिषेधः स्यादतस्तदावश्यकम् । कृते तु टोर्ग्रहणे पदान्तटवर्गस्याभावेन षकारात्परस्य तकारस्य ष्टुत्वम्भवत्येवेति दिक् ।

षण्णामिति । षष्-नामिति स्थिते (झलां जशोऽन्ते) इति षकारस्य जश्त्वेन डकारे-(ष्टुना ष्टुः) इति सूत्रेण षकारयोगाद् नकारस्य ष्टुत्वे णकारे (प्रत्यये भाषायां नित्यम्) इति वार्तिकं प्रवर्तते । यरः पदान्तस्यानुनासिके प्रत्यये परे नित्यमनुनासिकः स्यादिति हि वार्तिकार्थः । अत्र अनुनासिके णाम्प्रत्यये परे पदान्तस्य यरो डकारस्य मूर्धस्थानजन्यत्वसादृश्यादनुनासिके णकारे षण्णामिति सिद्धम् । न पदान्तादिति ष्टुत्वनिषेधस्तु न अनामिति पर्युदासादिति दिक् ।

षण्णवतिरिति । षड्-नवतिरितिदशायां (ष्टुना ष्टुः) इति सूत्रेण प्राप्तस्य ष्टुत्वस्य (न पदान्ताट्टोरनामिति) निषेधे प्राप्ते (अनाम्नवतिनगरीणामिति वाच्यम्) इति वार्तिकप्रवृत्तिः । पदान्ताट्टवर्गात्परस्य नाम् नवति नगरी एतदवयवभिन्नस्य तवर्गस्य ष्टुत्वं न भवतीति वार्तिकार्थः । नाम् नवति नगरी एतदवयवस्य तवर्गस्य तु ष्टुत्वं भवत्येवेति

झलां जशोन्ते ८।२।३९॥ पदान्ते झलां जशः स्युः । वागीशः ॥ **यरोनुनासिकेऽनुनासिको वा ८।४।४५ ॥** यरः पदान्तस्या-

---

फलितम् । तथा च अत्र डकारयोगात् नकारस्य ष्टुत्वे णकारे (यरोऽनुनासिके ऽनुनासिको वा) इति डकारस्यानुनासिके णकारे कृते षण्णवतिरिति सिद्धम् ।

षण्णगर्य्यं इति । षड्–नगर्य्यं इत्यत्र (अनाम्नवतिनगरीणामिति वाच्यम्) इति वार्तिकबलाद् (न पदान्ताट्टोरनाम्) इति ष्टुत्वनिषेधाप्रवृत्त्या (ष्टुना ष्टुः) इति सूत्रेण डकारयोगाद् नकारस्य ष्टुत्वे णकारे (यरोऽनुनासिके ऽनुनासिको वा) इति डकारस्यानुनासिके णकारे षण्णगर्यं इति सिद्धम् ।

सन् षष्ठ इति । सन्–षष्ठ इतिदशायां (ष्टुना ष्टुः) इति सूत्रेण षकारयोगाद् नकारस्य ष्टुत्वे णकारे प्राप्ते (तोः षि) इति सूत्रं प्रवृत्तम् अत्र ष्टुना ष्टुरित्यतः ष्टुरिति न पदान्ताट्टोरनामित्यतो नेति चानुवर्तते । तथा च तवर्गस्य षकारे परे ष्टुत्वं न भवतीति सूत्रार्थः । अत्र षष्ठ इत्यस्य षकारे परे नकारस्य ष्टुत्वनिषेधे सन् षष्ठ इति साधु ।

वागीश इति । वाक्–ईश इत्यत्र (झलां जशोऽन्ते) इति सूत्रप्रवृत्तिः । अत्र पदस्येत्यधिक्रियते । पदान्ते झल्प्रत्याहारान्तःपातिवर्णानां स्थाने जश्प्रत्याहारान्तःपातिनो वर्णाः स्युरिति तत्सूत्रार्थः । अत्र झल्प्रत्याहारान्तःपातिनः ककारस्य स्थाने कण्ठस्थानजन्यत्वसादृश्येन गकारे जशि कृते वागीश इति सिद्ध्यति ।

एतन्मुरारिरिति । एतद्–मुरारिरित्यवस्थायां (यरोऽनुनासिके ऽनुनासिको वा) इति सूत्रं प्रवृत्तम् । अत्र (न पदान्ताट्टोरनाम्) इत्यतः पदान्तादित्यनुवर्तते तस्य षष्ठ्यन्ततया विपरिणामः । तथा च यर्प्रत्याहारान्तःपातिनः पदान्तस्य वर्णस्य स्थाने अनुनासिके परेऽनुनासिको वा स्यादिति सूत्रार्थः । अत्र मकारे ऽनुनासिके परे यर्प्रत्याहारान्तःपातिनो दकारस्य स्थाने दन्तस्थानजन्यत्वसादृश्यादनुनासिके नकारे एतन्मुरारिरिति सिद्ध्यति । अनुनासिकाभावपक्षे एतद् मुरारिरित्येवेति दिक् ।

नुनासिके परेऽनुनासिको वा स्यात् । एतन्मुरारिः, एतद् मुरारिः । (प्रत्यये भाषायां नित्यम्) तन्मात्रम् । चिन्मयम् ॥ **तोर्लि ८।४।६०॥** तवर्गस्य लकारे परे परसवर्णः । तल्लयः । विद्वाँल्लिँखति । नस्यानुनासिको लः ॥ **उदः स्थास्तम्भोः पूर्वस्य ८।४।६१ ॥** उदः परयोः स्थास्तम्भोः पूर्वसवर्णः ॥ **तस्मादित्युत्तरस्य १।१।६७॥** पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम् ॥

तन्मात्रमिति । तत् प्रमाणं यस्येति विग्रहे तद्शब्दात् (प्रमाणे द्वयसज्दघ्नञ्मात्रचः) इतिसूत्रेण मात्रच्प्रत्यये-तद्-मात्रमित्यवस्थायां (यरो ऽनुनासिके ऽनुनासिको वा) इतिसूत्रेण मकारे ऽनुनासिके परे दकारस्य यरो दन्तस्थानजन्यत्वसादृश्याद् वैकल्पिके ऽनुनासिके नकारे प्राप्ते (प्रत्यये भाषायां नित्यम्) इति वार्तिकेन मात्रचि परे दकारस्य नित्यमनुनासिके नकारे तन्मात्रमिति सिद्धम् ।

चिन्मयमिति । चिदेवेति विग्रहे (नित्यं वृद्धशरादिभ्यः) इत्यत्र नित्यमिति योगविभागात् स्वार्थे मयट्प्रत्यये कृते चिद्-मयमित्यत्र (यरोऽनुनासिकेऽनुनासिको वा) इति मकारे परे दकारस्य स्थाने दन्तस्थानजन्यत्वसादृश्यादनुनासिके वैकल्पिके नकारे प्राप्ते (प्रत्यये भाषायां नित्यम्) इति वार्तिकेन मयटि परे दकारस्य नित्यमनुनासिके नकारे चिन्मयमिति सिद्धम् ।

तल्लय इति । तद्-लय इत्यवस्थायां (तोर्लि) इति सूत्रं प्रवर्त्तते । अत्र अनुस्वारस्य ययि परसवर्ण, इति सूत्रात्परसवर्ण इत्यनुवर्तते । तथा च तवर्गस्य स्थाने लकारे परे परसवर्णः स्यादिति सूत्रार्थः । अत्र लय इत्यस्य लकारे परे दकारस्य स्थाने परसवर्णे लकारे तल्लय इति सिद्धम् ।

विद्वाँल्लिखतीति । विद्वान्-लिखतीत्यत्र (तोर्लि) इति सूत्रेण लिखतीत्यस्य लकारे परे अनुनासिकस्य नकारस्य स्थाने अनुनासिके लकारे परसवर्णे कृते विद्वाँल्लिखतीति सिद्धम् ।

आदेः परस्य १।१।५४ ॥ परस्य यद्विहितं तत्तस्यादेर्बोध्यम् । इति सस्य थः ॥ **झरो झरि सवर्णे ८।४।६४** ॥ हलः परस्य झरो वा लोपः सवर्णे झरि ॥ **खरि च ८।४।५५** ॥ खरि झलां चरः स्युः । इत्युदो दस्य तः । उत्थानम् । उत्तम्भनम् । **झयो होऽन्य-**

उत्थानमिति । उद्—स्थानम् इत्यवस्थायाम्, (उदः स्थास्तम्भोःपूर्वस्य) इतिसूत्रं प्रवृत्तम् । अत्र (क्वचिदेकदेशोऽप्यनुवर्तेत) इति परिभाषया ऽनुस्वारस्य ययि परसवर्ण इति सूत्रात्समस्तमपि सवर्णपदमनुवर्तते। तथा च उदः स्थास्तम्भोः पूर्वसवर्णः स्यादिति सूत्रार्थः। उद इति दिग्योगलक्षणा पञ्चमी तत्र पूर्वयोरित्यध्याहारेण उदः पूर्वयोः स्थास्तम्भोः पूर्वसवर्ण आहोस्विद् परयोरित्यस्याध्याहारेण उदः परयोः स्थास्तम्भोः पूर्वसवर्ण इत्याशङ्कायां (तस्मादित्युत्तरस्य) इति परिभाषासूत्रं प्रवर्त्तते । अत्र तस्मिन्निति निर्दिष्टे पूर्वस्येति सूत्राद् निर्दिष्टे इत्यनुवर्तते । तथा च पञ्चम्यन्तनिर्देशेन क्रियमाणं कार्यमन्यवर्णव्यवधानशून्यस्य परस्य स्थाने भवतीति सूत्रार्थः । अत्र उद इति निर्देशेन क्रियमाणं कार्यं पूर्वसवर्णरूपं तच्चान्यवर्णव्यवधानशून्यस्य परस्य स्था इत्यस्य प्राप्नोति । ततश्च (अलोऽन्त्यस्य) इति परिभाषया थकारोत्तरवर्तिन आकारस्य पूर्वसवर्णे प्राप्ते, (आदेः परस्य) इति, परिभाषा प्रवर्तते । परस्य स्थाने यत्कार्यं विहितं तत्परस्यादेर्भवतीति सूत्रार्थः । अत्र स्था इत्यस्य विहितं यत्पूर्वसवर्णरूपं कार्यं तत्स्था इत्यस्यादेः सकारस्य स्यात् । अत्र सकारस्य पूर्वं दकारः तत्सवर्णास्तु त थ द ध न एते पञ्चापि वर्णास्तेषाम्मध्ये कः स्यादितिशङ्कायाम् (स्थानेऽन्तरतमः) इतिपरिभाषयां ऽघोषमहाप्राणप्रयत्नवतः सकारस्य स्थाने ऽघोषमहाप्राणप्रयत्नवति थकारे पूर्वसवर्णे कृते उद थ् थानमिति जाते (झरो झरि सवर्णे) इति सूत्रं प्रवृत्तम् । अत्र हि (हलो यमां यमि लोपः) इत्यतो हल इति लोप इति चानुवर्तते । (झयो हो ऽन्यतरस्याम्) इत्यतो ऽन्यतरस्यामिति चानुवर्तते । ततश्च हल्प्रत्याहारान्तःपातिवर्णात्परस्य झर्प्रत्याहारान्तःपातिनो वर्णस्य लोपो वा स्यात्सवर्णे झर्प्रत्याहारान्तःपातिनि वर्णे परे सति इति सूत्रार्थः । अत्र थानमित्यस्य थकारे झरि

तरस्याम् ८।४।६२ ॥ झयः परस्य हस्य वा पूर्वसवर्णः । नादस्य घोषस्य संवारस्य महाप्राणस्य तादृशो वर्गचतुर्थः । वाग्घरिः, वाग्हरिः ।

परे दकाराद् हलः परस्य थकारस्य झरो वैकल्पिके लोपे, (खरि च) इति सूत्रं प्रवृत्तम् । अत्र झलां जश् झशीत्यतो झलामिति अभ्यासे चर्चेत्यतश्चुरिति चानुवर्तते । ततश्च झल्प्रत्याहारान्तःपातिवर्णस्य स्थाने चर्प्रत्याहारान्तः पातिवर्णः स्यात् खर्प्रत्याहारान्तःपातिवर्णे परे सति इति सूत्रार्थः । अत्र थकारे खरि परे दकारस्य झलस्तकारे चरि कृते उत्थानमिति सिद्ध्यति । थलोपाभावपक्षे उत्थ्थानमिति सिद्ध्यति अत्र खरिचेति थकारस्य चर्त्वन्तु न शङ्क्यम् चर्त्वं प्रति थत्वस्यासिद्धत्वादिति दिक् ।

उत्तम्भनमिति । उद्–स्तम्भनमितिदशायाम् (तस्मादित्युत्तरस्य) इति परिभाषाबलाद् (उदः स्थास्तम्भोः पूर्वस्य) इति सूत्रेण उदः परस्य स्तम्भ इत्यस्य पूर्वसवर्णे (अलोऽन्त्यस्य) इति सूत्रेणान्त्यस्य प्राप्ते (आदेः परस्य) इतिपरिभाषया ऽघोषमहाप्राणप्रयत्नवतः सकारस्यान्तरतम्यादघोषमहाप्राणप्रयत्नवति थकारे पूर्वसवर्णे (झरो झरि सवर्णे) इत्यनेन दकाराद्धलः परस्य थकारस्य झरः थकारे सवर्णे झरि परे वैकल्पिके लोपे खरिचेत्यनेन थकारे खरि परे दकारस्य झलश्चर्त्वे तकारे कृते उत्तम्भनमिति सिद्धम् । थलोपाभावपक्षे तु उत्थ्तम्भनमिति भवति । थस्य चर्त्वन्तु न चर्त्वं प्रति थत्वस्यासिद्धत्वादिति दिक् ।

वाग्घरिरिति । वाक्–हरिरितिदशायां (झलां जशोऽन्ते) इति सूत्रेण ककारस्य जश्त्वेन गकारे कृते (झयो हो ऽन्यतरस्यामिति) सूत्रं प्रवर्तते । अत्र झय् इति पञ्चम्यन्तं पदम् ह इति षष्ठ्यन्तम् । उदः स्थास्तम्भोः पूर्वस्येत्यतः पूर्वस्येति अनुस्वारस्य ययीत्यतः सवर्ण इति चानुवर्तते । ततश्च झय्प्रत्याहारस्थवर्णात्परस्य हकारस्य पूर्वसवर्णो वा भवतीति सूत्रार्थः । अत्र हकारात्पूर्वो गकारः झय्प्रत्याहारस्थो वर्णस्तत्सवर्णाः क ख ग घ ङ एते पञ्चापि वर्णाः प्राप्तास्तेषाम्मध्ये कः स्यादिति शङ्कायां नादघोषसंवारमहाप्राणप्रयत्नसादृश्याद् हकारस्य

शश्छोऽटि ८।४।६३ ॥ झयः परस्य शस्य छो वाऽटि । तद् शिव इत्यत्र दस्य श्चुत्वेन जकारे कृते खरि चेति जकारस्य चकारः । तच्छिवः, तच्शिवः । (छत्वममीति वाच्यम्) । तच्छ्लोकेन ॥ **मोऽनुस्वारः ८।३।२३ ॥** मान्तस्य पदस्यानुस्वारो हलि । हरिं वन्दे ॥ **नश्चा-**

पूर्वसवर्णे घकारे वाग्घरिरिति सिद्ध्यति पूर्वसवर्णाभावपक्षे तु वाग्हरिरित्येवेति दिक् ।

तच्छिव इति । तद्–शिव इत्यवस्थायां (स्तोः श्चुना श्चुः) इत्यनेन शकारयोगात् दकारस्य श्चुत्वेन जकारे तस्य खरिचेति चर्त्वेन चकारे कृते (~~शश्छोऽटि~~) इतिसूत्रप्रवृत्तिः । अत्र झय इति पदान्तादिति चानुवर्तते । ततश्च पदान्ताज्झय्प्रत्याहारान्तःपातिवर्णात्परस्य शकारस्य स्थाने अट्प्रत्याहारान्तःपातिनि वर्णे परे छकारो वा भवतीति सूत्रार्थः । अत्र शकारोत्तरवर्त्तिनि इकारेऽटि परे चकाररूपाज्झयः परस्य शकारस्य स्थाने वैकल्पिके छकारे कृते तच्छिव इति सिद्धम् छत्वाभावपक्षे तु तच्शिव इत्येवेति दिक् ।

तच्छ्लोकेनेति । तद्–श्लोकेन इति दशायां (स्तोःश्चुना श्चुः) इति सूत्रेण शकारयोगाद् दकारस्य श्चुत्वेन जकारे कृते खरि चेत्यनेन शकारे खरि परे जकारस्य झलः चर्त्वेन चकारे कृते अट्परत्वाभावेन (शश्छोऽटि) इति शकारस्य छत्वाप्रवृत्त्या (छत्वममीति वाच्यम्) इति वार्तिकप्रवृत्तिः । पदान्ताज्झयः परस्य शकारस्य छकारः स्याद् अमि परे इति हि वार्तिकस्यार्थः । ततश्च लकारेऽमि परे चकाराज्झयः परस्य शकारस्य स्थाने छकारे कृते तच्छ्लोकेनेति सिद्धम् ।

हरिं वन्दे इति । हरिम्–वन्दे इत्यत्र (मोऽनुस्वारः) इति सूत्रं प्रवर्तते । अत्र हलि सर्वेषामित्यतो हलीत्यनुवर्तते । पदस्येत्यधिक्रियते । म इति षष्ठ्यन्तं पदस्येत्यस्य विशेषणम् ततश्च मकारांशे येन विधिस्तदन्तस्येत्यनेन तदन्तविधिः । तथा च मान्तस्य पदस्यानुस्वारः स्याद्धलि परे इति सूत्रार्थः । अत्र वकारे हलि परे हरिमिति मान्तपदस्यानुस्वार-

पदान्तस्य झलि ८।३।२४ ॥ नस्य मस्य चापदान्तस्य झल्यनुस्वारः । यशांसि । आक्रंस्यते । झलि किम् । मन्यते ॥ **अनुस्वारस्य ययि परसवर्णः ८।४।५८॥** स्पष्टम् । शान्तः ॥ **वा पदान्तस्य ८।४।५९॥** त्वङ्करोषि, त्वं करोषि ॥ **मो राजि समः क्वौ**

प्राप्तावलोऽन्त्यस्येतिपरिभाषयाऽन्त्यस्य मकारस्यानुस्वारे कृते हरिंवन्दे इति सिद्धम् ।

यशांसि इति । यशान्–सि इत्यवस्थायां (न श्चापदान्तस्य झलि) इति सूत्रं प्रवर्तते । अत्र (मो ऽनुस्वारः) इत्यतोऽनुस्वार इत्यस्य चकराद् म इत्यस्य चानुवृत्तिः । तथा च नकारस्य मकारस्य चापदान्तस्य झलि परे ऽनुस्वारः स्यादिति सूत्रार्थः । अत्र सकारे झलि परे ऽपदान्तस्य नकारस्यानुस्वारे कृते यशांसीति सिद्धम् ।

आक्रंस्यत इति । आक्रम्–स्यत इति दशायां (नश्चापदान्तस्य झलि) इति सूत्रेण सकारे झलि परेऽ पदान्तस्य मकारस्यानुस्वारे आक्रंस्यते इति सिद्धम् ।

मन्यत इति । (नश्चापदान्तस्य झलि) इति सूत्रे झलिग्रहणाभावे मन्यत इत्यत्रापि नकारस्यापदान्तत्वेनानुस्वारः स्यात् ततश्च मंयत इत्यनिष्टप्रयोगः स्यादतो झलिग्रहणमावश्यकम् । कृते तु झलि ग्रहणे यकारस्य झल्प्रत्याहारान्तर्गतत्वाभावेन मन्यत इत्यत्र नानुस्वार इति सर्वं सूपपन्नम् ।

शान्त इति । शाम्–त इत्यत्र (नश्चापदान्तस्य झलि) इति सूत्रेण तकारे झलि परेऽपदान्तमकारस्यानुस्वारे कृते (अनुस्वारस्य ययि परसवर्णः) इति सूत्रं प्रवृत्तम् । अनुस्वारस्य स्थाने परसवर्णः स्याद् यय्प्रत्याहरान्तःपातिनि वर्णे परे सतीति सूत्रार्थः । अत्र तकारे ययि परे ऽनुस्वारस्य स्थाने नासिकास्थानजन्यत्वसादृश्यात् तकारसवर्णे नकारे कृते शान्त इति सिद्ध्यति ।

त्वङ्करोषीति । त्वम्–करोषि इत्यत्र (मोऽनुस्वारः) इति सूत्रेण ककारे हलि परे पदान्तमकारस्यानुस्वारे (अनुस्वारस्य ययि परसवर्णः)

८।४।२५॥ क्विबन्ते राजतौ परे समो मस्य म एव स्यात् ॥ सम्राट् ॥ **हे मपरे वा ८।३।२६॥** मपरे हकारे परे मस्य मो वा । किम् ह्मलयति, किं ह्मलयति ॥ (यवलपरे यवला वा) कियँ ह्यः, किं ह्यः । किवँ ह्वलयति, किं ह्वलयति । किलँ ह्लादयति, किं ह्लादयति ॥ **नपरे**

इति सूत्रम्प्रबाध्य (वा पदान्तस्य) इति सूत्रप्रवृत्तिः । अत्रानुस्वारस्य ययि परसवर्ण इति सूत्रमनुवर्तते । ततश्च पदान्तस्यानुस्वारस्य यय्प्रत्याहारान्तःपातिनि वर्णे परे सति परसवर्णो वा स्यादिति सूत्रार्थः । तथा चात्र ककारे ययि परे ऽनुस्वारस्य स्थाने नासिकास्थानजन्यत्वसादृश्यात् ककारसवर्णे वैकल्पिके ङकारे त्वङ्करोषीति, परसवर्णाभावपक्षे त्वं करोषीति च साधु ।

सम्राडिति । सम्—राडित्यत्र (मोऽनुस्वारः) इत्यनुस्वारे प्राप्ते (मो राजि समः क्वौ) इति सूत्रं प्रवर्तते । क्विपः प्रत्ययत्वेन प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणमिति परिभाषया तदन्तविधिः । ततश्च क्विप्प्रत्ययान्तराज्शब्दे परे समो मकारस्य स्थाने मकार एव स्याद् नानुस्वार इति सूत्रार्थः । तथाचात्र क्विन्तराज्शब्दस्य परत्त्वसत्वात्समो मकारस्य मकारे सम्राडिति सिद्धम् ।

किम् ह्मलयतीति । किम्—ह्मलयतीति दशायां (मोऽनुस्वारः) इति सूत्रेणानुस्वारे प्राप्ते (हे मपरे वा) इति सूत्रं प्रवृत्तम् । अत्र (मोऽनुस्वारः) इत्यतो म इति षष्ठ्यन्तं पदम् मो राजि समः क्वावित्यतो म इति प्रथमान्तं पदश्चानुवर्तते । ततश्च मकारः परो यस्मात् तस्मिन् हकारे परे मकारस्य मकारो वा स्यादिति सूत्रार्थः । अत्र ह्मलयतीत्यस्य हकारस्य मकारपरकत्वेन तस्मिन् परे किमो मकारस्य वैकल्पिके मकारे किम् ह्मलयतीति सिद्ध्यति । मकाराभावपक्षे (मोऽनुस्वारः) इत्यनेन हकारे हलि परे पदान्तस्य किमो मकारस्यानुस्वारे किं ह्मलयतीति सिध्यति ।

नः ८।३।२७॥ नपरे हकारे मस्य नो वा ॥ किन् ह्नुते, किं ह्नुते ॥
आद्यन्तौ टकितौ १।१।४६॥ टित्कितौ यस्योक्तौ तस्य क्रमादाद्य-

किय्ँ ह्य इति । किम्–ह्य इति दशायां (मोऽनुस्वारः) इति सूत्रेणानुस्वारे प्राप्ते (यवलपरे यवला वा) इति वार्तिकप्रवृत्तिः । अत्र मोऽनुस्वार इत्यतो म इत्यस्य हे मपरे वेत्यतो हे इत्यस्य च सम्बन्धः । ततश्च यवलपरे हकारे परे मकारस्य स्थाने यवला वा भवन्तीति वार्तिकार्थः । यथासंख्यसूत्रप्रवृत्त्या यकारः परो यस्मात्तस्मिन् हकारे परे मकारस्य स्थाने यकारो भवति, वकारः परो यस्मात्तस्मिन् हकारे परे मकारस्य स्थाने वकारो भवति, लकारः परो यस्मात्तस्मिन् हकारे परे मकारस्य स्थाने लकारो भवति इति वार्त्तिकार्थः फलितः । अत्र हि यपरके हकारे परे नासिकास्थानजन्यत्वसादृश्यात्सानुनासिकस्य मकारस्य स्थाने वैकल्पिके सानुनासिके यकारे किय्ँ ह्य इति यकाराभावपक्षे (मोऽनुस्वारः) इतिसूत्रेण हकारे हलि परे मकारस्यानुस्वारे किं ह्य इति च सिद्धम् ।

किव्ँ ह्वलयतीति । किम्–ह्वलयतीत्यवस्थायां (मोऽनुस्वारः) इत्यनुस्वारे प्राप्ते तम्प्रबाध्य यवलपरे यवला वेति वार्तिकेन वपरके हकारे सानुनासिकमकारस्य सानुनासिके वैकल्पिके वकारे किव्ँ ह्वलयतीति, वकाराभावपक्षे मोऽनुस्वार इतिसूत्रेण हकारे हलि परे मकारस्यानुस्वारे किं ह्वलयतीति च सिद्ध्यति ।

किल्ँ ह्लादयतीति । किम्-ह्लादयतीत्यत्र मोऽनुस्वार इत्यनुस्वारम्प्रबाध्य यवलपरे यवला वेति वार्तिकेन लपरके हकारे परे मकारस्य सानुनासिके लकारे किल्ँ ह्लादयतीति, लकाराभावपक्षे मोऽनुस्वार इत्यनेन हकारे हलि परे मकारस्यानुस्वारे कृते किं ह्लादयतीति च सिद्धम् ।

किन् ह्नुते-इति । किम्–ह्नुत इत्यवस्थायां मोऽनुस्वार इत्यनुस्वारे प्राप्ते (न परे नः) इति सूत्रप्रवृत्तिः । अत्र मोऽनुस्वार इत्यतोऽनुस्वारस्य हे मपरे वेत्यतो हे इत्यस्य चानुवृत्तिः । ततश्च नकारः परो यस्मात्तस्मिन् हकारे परे मकारस्य स्थाने नकारो वा भवतीति सूत्रार्थः । अत्र नपरे

न्तावयवौ स्तः । **ङ्णोःकुक्टुक् शरि ८।३।२८॥** ङकारणकारयोः कुक्टुकावागमौ वा स्तः शरि । (चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्) । प्राङ् ख्षष्ठः, प्राङ्क्षष्ठः, प्राङ् षष्ठः । सुगण् षष्ठः, सुगण् ट्षष्ठः, सुगण् षष्ठः ॥ **डः सि धुट् ८।३।२९॥** डात्परस्य सस्य धुड् वा । षट्त्सन्तः, षट् सन्तः ॥ **नश्च ८।१।३०॥**

हकारे परे मकारस्य वैकल्पिके नकारे किन् ह्नुते इति, नकाराभावपक्षे (मोऽनुस्वारः) इत्यनुस्वारे किं ह्नुते–इति च सिद्धम् ।

प्राङ् ख्षष्ठ इति । प्राङ् षष्ठ इत्यत्र (ङ्णोः कुक् टुक् शरि) इति सूत्रप्रवृत्तिः । अत्र हे मपरे वेत्यतो वेत्यनुवर्तते । ततश्च शर्प्रत्याहारान्तःपातिनि वर्णे परे सति ङकारणकारयोः कुक्टुकावागमौ वा स्त इति सूत्रार्थः । यथासंख्यसूत्रप्रवृत्त्या ङकारस्य कुगागमः, णकारस्य टुगागम इति फलितम् । अत्र हि षष्ठ इत्यस्य षकारे शरि परे प्राङो ङकारस्यान्तावयवे कुकि अनुबन्धलोपे (चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्) इति वार्त्तिकप्रवृत्तिः । चय्प्रत्याहारान्तःपातिनः वर्णस्य स्थाने तत्तद्वर्गीयद्वितीयो वर्णो भवति शरि परे पौष्करसादेराचार्य्यस्य मते इति वार्तिकार्थः । अत्र हि ककारस्य चयः षकारे शरि परे कवर्गीयद्वितीयवर्णे खकारे प्राङ्ख्षष्ठ इति, द्वितीयवर्णाभावपक्षे क्ष्संयोगे दे प्राङ्क्षष्ठ इति च सिद्धम् । कुगागमाभावपक्षे प्राङ्षष्ठ इति भवति ॥

सुगण् ठ्षष्ठ इति । सुगण् षष्ठ इत्यवस्थायां (ङ्णोः कुक्टुक् शरि) इति सूत्रेण षष्ठ इत्यस्य षकारे शरि परे सुगणो णकारस्यान्तावयवे टुकि अनुबन्धलोपे कृते सुगण् ट् षष्ठ इत्यवस्थायां (चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्) इति वार्तिकेन षकारे शरि परे टकारस्य चयस्तद्वर्गीयद्वितीयाक्षरे ठकारे सुगण्ठ्षष्ठ इति, द्वितीयाक्षराभावपक्षे सुगण्ट्षष्ठ इति, टुगागमाभावपक्षे सुगण् षष्ठ इति च सिद्धम् ।

षट् त्सन्त इति । षड्–सन्त इत्यवस्थायां (डः सि धुट्) इतिसूत्रं प्रवर्त्तते । अत्र हे मपरे वेत्यतो वेत्यनुवर्तते । ड इत्यत्र पंचम्याः

न्नात्परस्य सस्य धुड्वा । सन्त्सः, सन्सः ॥ **शि तुक्** ८।३।३१॥

सीत्यत्र सप्तम्याश्च निर्देशात् (तस्मादित्युत्तरस्येति) परिभाषासूत्रस्य (तस्मिन्निति निर्दिष्टे पूर्वस्य) इति परिभाषासूत्रस्य चोपस्थित्या डकाराव्यवहितपरस्य सस्य सकाराव्यवहितपूर्वस्य डस्य वा धुडितिशंसय· प्राप्तौ परत्वाद् (उभयनिर्देशे पञ्चमीनिर्देशो वलीयान्) इति परिभाषाप तस्मादित्युत्तरस्येत्यस्यैवोपस्थित्या ड इति पञ्चमी सीति सप्तम्याः षष्ठीं कल्पयति। ततश्च डकाराव्यवहितपरस्य सकारस्य धुडागमो वा भवतीति सूत्रार्थः। तथा च षडो डकारात्परस्य सन्त इत्यत्र सकारस्य धुटः प्राप्तौ परः पूर्वो वा धुडिति शङ्कायाम् (आद्यन्तौ टकितौ)इति सूत्रप्रवृत्तिः। आदिश्चान्तश्च आद्यन्ताविति द्वन्द्वः।टश्च कश्च टकाविति द्वन्द्वोत्तरं टकावितौ यस्येति वहुव्रीहिः। उक्ताविति शेषः। आद्यन्तशब्दावयववाचिनौ। ततश्च यस्य टित्कितावुक्तौ तस्याद्यन्तावयवौ स्त इति सूत्रार्थः। यथासंख्यसूत्रप्रवृत्त्या टित्आद्यवयवो भवति कित्अन्तावयवो भवतीति च फलितम्। अत्र हि टित्त्वात्सकारस्याद्यवयवे धुटि अनुवन्धलोपे कृते खरि चेति सूत्रेण सन्त इत्यस्य सकारे खरि परे दन्तस्थानजन्यत्वसादृश्याद् धकारस्य चर्त्वेन तकारे ततः तकारे खरि परे मूर्धस्थानजन्यडकारस्य स्थाने मूर्धस्थानजन्यटकारे चरि षट्त्सन्त इति धुडभावपक्षे तु खरिचेत्यनेन सकारे खरि परे डकारस्य चर्त्वेन टकारे षट् सन्त इति च सिद्धम्।

सन्त्स इति। सन्–स इत्यत्र (नश्च)इति सूत्रं प्रवर्तते। अत्र डः सि धुडित्यतः सि धुडित्यनुवर्तते। न इत्यत्र पञ्चम्या तस्मादित्युत्तरस्येति परिभाषया सीत्यत्र सप्तम्याः षष्ठी प्रकल्प्यते। हे मपरे वेत्यतो वेत्यनुवर्तते। नकारांशे तदन्तविधिः। ततश्च नकारान्तात्परस्य सकारस्य धुडागमो वा भवतीति सूत्रार्थः। तथा चात्र नकारान्तात्सनः परस्य सकारस्याद्यवयवे धुडागमे ऽनुवन्धलोपे (खरि च)इति सूत्रेण सकारे खरि परे धकारस्य चर्त्वेन तकारे सन्त्स इति, धुटो ऽभावपक्षे सन्सः इति च सिद्धम्।

पदान्तस्य नस्य शे परे तुग्वा । सञ्छम्भुः, सञ्च्छम्भुः, सञ्च्शम्भुः, सञ्शम्भुः ॥

ङमो ह्रस्वादचि ङमुण् नित्यम् ८।३।३२॥ ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो नित्यं ङमुट् । प्रत्यङ्ङात्मा । सुगण्णीशः ।

सञ्छम्भुरित्यादि । सन्–शम्भुरित्यत्र (शि तुगिति) सूत्रं प्रवर्तते । अत्र नश्चेत्यतो न इति हे मपरे वेत्यतो वेति चानुवर्तते । पदस्येत्यधिक्रियते तदंशे तदन्तविधिः । तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषया शीत्यत्र सप्तमी न इत्यत्र पञ्चम्याः षष्ठीं कल्पयति । ततश्च पदान्तस्य नकारस्य शकारे परे तुगागमो वा भवतीति सूत्रार्थः । अत्र हि शम्भुरित्यस्य शकारे परे पदान्तस्य सनो नकारस्यान्तावयवे तुगागमेऽनुबन्धलोपे स्तोः श्चुना श्चुरिति सूत्रेण शकारयोगात् तकारस्य चुत्वेन चकारे ततश्चकारयोगाद् नकारस्य चुत्वेन ञकारे (शश्छोऽटि) इति सूत्रेण चकाराज्झयः परस्य शकारस्य अकारे ऽटि परे छकारे (झरो झरि सवर्णे) इति सूत्रेण ञकाराद्धलः परस्य चकारस्य झरश्छकारे सवर्णे झरि परे वैकल्पिके लोपे सञ्छम्भुरिति चलोपाभावपक्षे सञ्छम्भुरिति छत्वाभावपक्षे सञ्चशम्भुरिति तुकोऽभावपक्षे च नकारस्य शकारयोगात् चुत्वेन ञकारे सञ्शम्भुरिति रूपचतुष्टयं सिद्धम् ।

प्रत्यङ्ङात्मेति । प्रत्यङ्–आत्मेति दशायां (ङमो ह्रस्वादचि ङमुण्नित्यम्) इति सूत्रं प्रवृत्तम् । अत्र ङम् इति प्रत्याहारः । पदस्येत्यधिक्रियते । तस्य ङम इति पञ्चम्यन्तानुरोधात् पञ्चम्यन्ततया विपरिणामः । तस्मादित्युत्तरस्येति परिभाषया ङम इत्यत्र पञ्चमी अचीत्यत्र सप्तम्याः षष्ठीं कल्पयति । ततश्च ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो नित्यं ङमुडागमः स्यादिति सूत्रार्थः । यथासंख्यप्रवृत्त्या ङकारात्परस्याचो ङुट् णकारात्परस्याचो णुट् नकारात्परस्याचो नुडिति फलितम् । अत्र यकारोत्तरवर्ती अकारो ह्रस्वस्तस्मा-

सन्नच्युतः ॥ **समः सुटि ८।३।५॥** ॥ संमो रुः सुटि ॥ **अत्रानुनासिकः पूर्वस्य तु वा ८।३।२॥** अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा ॥ **अनुनासिकात्परोऽनुस्वारः ८।३।४॥** अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः ॥ **खरवसानयोर्विसर्जनीयः ८।३।१५॥** खरि अवसाने च पदान्तस्य रस्य विसर्गः । (सम्पुंकानां सो वक्तव्यः) ।सँस्स्कर्ता, संस्स्कर्ता॥ **पुमः खय्यम्परे ८।३।६॥** अम्परे

त्परो ङकारो ङम् तदन्तं पदं प्रत्यङ् इति तस्मात्परस्य आकारस्य अच आद्यवयवे ङुडागमे ऽनुबन्धलोपे प्रत्यङ्ङात्मेति सिद्धम् ।

सुगण्णीश इति । सुगण् ईश—इत्यत्र ङमो ह्रस्वादचि ङमुण्नित्यमिति सूत्रेण ह्रस्वो गकारोत्तरवर्ती अकारस्तस्मात्परो ङम् णकारस्तदन्तं पदं सुगण् इति तस्मात्परस्य ईश इत्यस्य ईकारस्य अच आद्यवयवे णुडागमे ऽनुवन्धलोपे णकारयोरकारेण योगे सुगण्णीश इति सिद्धम् ।

सन्नच्युत इति । सन्—अच्युत इत्यवस्थायां (ङमो ह्रस्वादचि ङमुण्नित्यम्) इति सूत्रेण ह्रस्वः सकारोत्तरवर्ती अकारस्तस्मात्परो ङम् नकार स्तदन्तं पदं सन् इति तस्मात्परस्य अच्युत इत्यस्याकारस्य अच आद्यवयवे नुडागमे ऽनुबन्धलोपे नकारयो रकारेण योगे सन्नच्युत इति सिद्धम् ॥

सँस्स्कर्तेति । सम्—स्कर्ता इत्यवस्थायां (समः सुटि) इति सूत्रं प्रवर्तते । अत्र मतुवसो रु सम्बुद्धौ छन्दसीत्यतो रु इत्यनुवर्तते । ततश्च समो रुः स्यात्सुटि परे, इति सूत्रार्थः । अत्र अलोऽन्त्यस्येति परिभाषया समो मकारस्य रुत्वे ऽनुबन्धलोपे च कृते (अत्रानुनासिकः पूर्वस्य तु वा) इति सूत्रप्रवृत्तिः । अस्य सूत्रस्य मतुवसो रु सम्बुद्धौ छन्दसीत्यस्यानन्तरं पठितत्वेन अत्रेत्यस्य रुप्रकरणे इत्यर्थलाभः । पूर्वत्वं च उपस्थितत्वाद् रु इत्यपेक्षया बोध्यम् । ततश्च अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यादिति सूत्रार्थः । तथा चात्र रोः पूर्वस्य

खयि पुमो रुः । पुँस्कोकिलः, पुंस्कोकिलः ॥ **नश्छव्यप्रशान् ८।३।७॥**

मकारोत्तरवर्तिनः अकारस्य अनुनासिकत्वे (खरवसानयोर्विसर्जनीयः) इति सूत्रप्रवृत्तिः । अत्र रोरीत्यतो र इति षष्ठ्यन्तं पदमनुवर्तते । पदस्येत्यधिक्रियते, येन विधिस्तदन्तस्येति तदन्तविधिः । ततश्च पदान्तस्य रेफस्य विसर्जनीयः स्यात् खरि अवसाने च परे, इति सूत्रार्थः । तथा चात्र सकारे खरि परे रेफस्य विसर्गे (विसर्जनीयस्य सः) इति सूत्रेण विसर्गस्य सकारे प्राप्ते तं बाधित्वा (वा शरि) इति सूत्रेण वैकल्पिके विसर्गे प्राप्ते (सम्पुंकानां सो वक्तव्यः) इति वार्तिकप्रवृत्तिः । सम् पुम् कान् एतत्त्रितयसम्बन्धिनो विसर्गस्य स्थाने सकारो भवतीति वार्तिकार्थः । तथा चात्र सम् सम्बधिनो विसर्गस्य सत्त्वात्तस्य सकारे सँस्स्कर्तेति सिध्यति । अनुनासिकत्वाभावपक्षे स र् स्कर्तेत्यवस्थायाम् (अनुनासिकात्परोऽनुस्वार) इतिसूत्रप्रवृत्तिः । अत्रानुनासिकादिति ल्यब्लोपे पञ्चमी, अत्रानुनासिकः पूर्वस्य तु वेत्यतः पूर्वस्यत्यनुवर्तते तस्य परपदान्वयानुरोधात्पञ्चम्यन्ततया विपरिणामः । अत्रापि पूर्वत्वं रोरपेक्षया बोध्यम् । ततश्च अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः स्यादिति सूत्रार्थः । तथा चात्र रोः पूर्वो मकारोत्तरवर्ती अकार स्तस्मात्परे ऽनुस्वारागमे पूर्ववत् खरवसानयो र्विसर्जनीय इति रेफस्य विसर्गे सम्पुंकानामिति विसर्गस्य सकारे संस्कर्तेति च सिद्धम् ।

पुँस्कोकिल इति । पुम्–कोकिल इत्यवस्थायाम् (पुमः खय्यम्परे) इति सूत्रं प्रवर्तते । अत्र मतुवसो रु सम्बुद्धौ छन्दसीत्यतो रुपदमनुवर्तते । ततश्च अम्प्रत्याहारान्तःपाती वर्णः परो यस्मात्तस्मिन् खय्प्रत्याहारान्तःपातिनि वर्णे परे पुमो रुः स्यादितिसूत्रार्थः । तथाचात्र अलोऽन्त्येस्येति सूत्रप्रवृत्त्या ओकाररूपाम्परे कोकिल इत्यस्य ककारे खयि परे पुमो मकारस्य रुत्वे ऽनुबन्धलोपे अत्रानुनासिकः पूर्वस्य तु वेति सूत्रेण पकारोत्तरवर्तिनि उकारस्यानुनासिकत्वे खरवसानयोर्विसर्जनीय, इति ककारे खरि परे रेफस्य विसर्गे सम्पुंकानां सो वक्तव्य इति वार्तिकेन पुम्सम्बन्धिनो विसर्गस्य स्थाने सकारे पुँस्कोकिल इति सिद्धम् अनुनासि-

अम्परे छवि नान्तस्य पदस्य रुः स्यान्न तु प्रशान्शब्दस्य । **विसर्जनीयस्य सः** ८।३।३४ खरि परे विसर्जनीयस्य सः स्यात् । चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व । अप्रशान् किम् । प्रशान्तनोति । पदस्येति किम् । हन्ति ॥ **नॄन् पे** ८।३।१० नॄनित्यस्य रुर्वा पे ॥ **कुप्वोः ≍क ≍पौ च**

काभावपक्षेऽनुनासिकात्परोऽनुस्वार इति सूत्रेण उकारात्परेऽनुस्वारागमे रस्य विसर्गे सकारे च कृते पुंस्कोकिल इति सिद्ध्यति ।

चक्रिँस्त्रायस्वेति । चक्रिन्–त्रायस्वेत्यत्र (नश्छव्यप्रशान्) इति सूत्रप्रवृत्तिः । अत्र मतुवसो रु सम्बुद्धौ छन्दसीत्यतो रु इत्यनुवर्तते (पुमः खय्यम्परे) इत्यतोऽम्परे, इत्यनुवर्तते पदस्येत्यधिक्रियते येन विधिस्तदन्तस्येति नकारांशे तदन्तविधिः । ततश्च अम्प्रत्याहारान्तर्गतवर्णः परो यस्मात्तस्मिन् परे छव्प्रत्याहान्तर्गतवर्णे परे सति नकारान्तस्य पदस्य रुः स्यान्न तु प्रशान्शब्दस्येति सूत्रार्थः । तथा चात्र रेफरूपाम्परके तकारे छवि परे ऽलोऽन्त्यस्येत्यस्य प्रवृत्त्या चक्रिन् इत्यस्य नकारस्य रुत्वे ऽनुबन्धलोपे (अत्रानुनासिकः पूर्वस्य तु वा) इति रेफोत्तरवर्तिन इकारस्यानुनासिकत्वे (खरवसानयोर्विसर्जनीयः) इति तकारे खरि परे रेफस्य विसर्गे (विसर्जनीयस्य सः) इति सूत्रप्रवृत्तिः । खरवसानयोर्विसर्जनीय इत्यतः खरीत्यनुवर्त्तते । ततश्च खरि परे विसर्गस्य स्थाने सकारः स्यादिति सूत्रार्थः । तथा चात्र विसर्गस्य सकारे चक्रिँस्त्रायस्वेति अनुनासिकाभावपक्षे ऽनुस्वारे चक्रिंस्त्रायस्वेति च साधु ।

अप्रशान् किम् । **प्रशान्तनोतीति** । नश्छव्यप्रशानिति सूत्रे ऽप्रशान् ग्रहणाभावे प्रशान् तनोतीत्यत्र अकाररूपाम्परे तकारे छवि परे नकारस्य रुत्वं स्यात्ततश्च अनुनासिकविसर्गसत्वेषु कृतेषु प्रशाँस्तनोतीत्यनिष्टप्रयोगापत्तिरतोऽप्रशान्ग्रहणमावश्यकम् कृते तु तस्मिन् प्रशान्शब्दस्यैवात्र सत्त्वेन प्रशान्शब्दभिन्नत्वाभावात् रुत्वं न भवतीति शम् ।

हन्तीति । नश्छव्यप्रशानितिसूत्रे पदस्येत्यस्याधिकाराभावे हन्तीत्यत्र, इकाररूपाम्परे तकारे छवि परे नकारस्य रुत्वं स्यात्ततश्च

८।३।३७॥ कवर्गे पवर्गे च विसर्गस्य ᳵक ᳶपौ स्तः। चाद्विसर्गः । नॄँ ᳶपाहि, नॄँःपाहि । नॄं ᳶपाहि । नॄंः पाहि । नॄन्पाहि ॥ **तस्य परमाम्रेडितम् ८।१।२ ॥** द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यात् ॥ **कानाम्रेडिते ८।३।१२ ॥** कान्नकारस्य रुः स्यादाम्रेडिते । काँस्कान्. कांस्कान् ॥

अनुनासिकविसर्गसत्वेषु कृतेषु हँस्तीत्यनिष्टं प्रसज्येत अतः पदस्येत्यस्याधिकार आवश्यकः कृते तु तस्मिन् हन् इत्यस्य नान्तपदत्वाभावेन रुत्वं न भवतीति हन्तीति यथाश्रुतमेव साध्विति शम् ।

नॄँᳶपाहीति । नॄन्–पाहीत्यत्र (नॄन् पे) इति सूत्रं प्रवृत्तम् । अत्र नॄन् इति द्वितीयान्तानुकरणं लुप्तषष्ठीकं पदम् । अत्र मतुवसो रु सम्बुद्धौ छन्दसीत्यतो रु इत्यनुवर्तते उभयथर्क्षु इत्यत उभयथेत्यनुवर्तते । ततश्च नॄनित्यस्य रुः स्याद्वा पकारे परे इति सूत्रार्थः । तथा च पाहीत्यस्य पकारे परे ऽलोऽन्त्यस्येतिसूत्रप्रवृत्त्या नकारस्य रुत्वे (खरवसानयोर्विसर्जनीयः) इतिसूत्रेण पकारे खरि परे रेफस्य विसर्गे (विसर्जनीयस्य सः) इति विसर्गस्य सकारे प्राप्ते तम्प्रबाध्य (कुप्वोःᳵकᳶपौ च) इति, सूत्रं प्रवृत्तम् । अत्र विसर्जनीयस्य सः, इत्यतो विसर्जनीयस्येत्यनुवर्तते । ततश्च कवर्गे पवर्गे च परे विसर्गस्यᳵक ᳶप इत्येतावादेशौ स्तः, चकारात्पक्षे विसर्गः, इति सूत्रार्थः । तथा चात्र पकारे परे विसर्गस्य ᳶपादेशे नॄँᳶपाहीति, अनुनासिकाभावपक्षे (अनुनासिकात्परो ऽनुस्वारः) इत्यनुस्वारागमे नॄँᳶपाहीति, ᳶपादेशाभावपक्षे रुत्वानुनासिकविसर्गेषु कृतेषु नॄँः पाहीति, अनुस्वारपक्षे नॄंः पाहीति, रुत्वाभावपक्षे नॄन्पाहीति रूपपञ्चकं सिद्ध्यति ।

काँस्कानिति । कान् कान् इति स्थिते (तस्य परमाम्रेडितम्) इति सूत्रं प्रवृत्तम् । सर्वस्य द्वे इति सूत्रानन्तरमस्य पाठात्तस्येत्यनेन द्विरुक्तस्य परामर्शः । ततश्च द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यादिति सूत्रार्थः । तथा चात्र द्वितीयकान्शब्दस्य आम्रेडितसंज्ञायाम् (कानाम्रेडिते) इति सूत्रप्रवृत्तिः । अत्र कानिति द्वितीयान्तानुकरणम् लुप्तषष्ठीकं पदम् । मतुवसो रु सम्बुद्धौ छन्दसीत्यतो रु इत्यनुवर्तते अलोऽन्त्यस्येति

छे च ६।१।७२ ॥ ह्रस्वस्य छे परे तुक् । शिवच्छाया ॥

पदान्ताद्वा ६।१।७६ ॥ दीर्घात्पदान्ताच्छे परे तुग् वा । लक्ष्मीच्छाया. लक्ष्मीछाया ॥

इति हल्संधिः ।

परिभाषा चात्र प्रवर्तते । ततश्च कानो नकारस्य रुत्वे (अत्रानुनासिकः पूर्वस्य तु वा) इति सूत्रेण ककारोत्तरवर्तिनोऽ कारस्यानुनासिकत्वे (खरवसानयोर्विसर्जनीयः) इति ककारे खरि परे रेफस्य विसर्गे (सम्पुंकानां सो वक्तव्यः) इतिवार्तिकेन कान्सम्बन्धिनो विसर्गस्य सकारे काँस्कानिति अनुनासिकाभावपक्षे (अनुनासिकात्परो ऽनुस्वारः) इति ककारोत्तरवर्तिन आकारात् परेऽनुस्वारागमे विसर्गे सत्वे च कांस्कानिति च सिद्धम् ।

शिवच्छायेति । शिव छाया इत्यवस्थायां (छे च) इतिसूत्रं प्रवृत्तम् । अत्र ह्रस्वस्य पिति कृति तुगित्यतो ह्रस्वस्येति तुगिति चानुवर्तते, संहितायामित्याधिक्रियते । ततश्च ह्रस्वस्य तुगागमः स्याच्छकारे परे, इति सूत्रार्थः । तथा चात्र छायेत्यस्य छकारे परे वकारोत्तरवर्तिनः अकारस्य ह्रस्वस्यान्तावयवे तुगागमेऽनुबन्धलोपे (झलां जशोऽन्ते) इति जश्त्वेन दकारे (स्तोः श्चुनाश्चुः) इतिसूत्रेण छकारयोगाद् दकारस्य चुत्वेन जकारे (खरिच) इति चर्त्वेन चकारे शिवच्छायेति सिद्धम् ।

लक्ष्मीच्छायेति । लक्ष्मी छाया इत्यत्र (पदान्ताद्वा) इति सूत्रं प्रवृत्तम् । अत्र दीर्घादिति सूत्रमनुवर्तते छे इति तुगिति चानुवर्तते । ततश्च दीर्घात्पदन्ताच्छे परे तुग्वा स्यादिति सूत्रार्थः । तथाचात्र छकारे परे मकारोत्तरवर्तिन ईकारस्यान्तावयवे तुगागमे ऽनुबन्धलोपे (झलांजशोऽन्ते) इति जश्त्वेन दकारे छकारयोगात् दकारस्य श्चुत्वेन जकारे (खरिच) इति चर्त्वेन चकारे लक्ष्मीच्छायेति, तुगभावे लक्ष्मीछायेति च सिद्धम् ।

इति हल्सन्धिप्रकरणम् ।

* * *

विसर्जनीयस्य सः ८।३।३४ ॥ खरि परे विसर्जनीयस्य सः स्यात् । विष्णुस्त्राता ॥ **वा शरि ८।३।३६ ॥** शरि विसर्गस्य विसर्गो वा । हरिः शेते । हरिश्शेते ॥ **ससजुषो रुः ८।२।६६ ॥** पदान्तस्य सस्य सजुषश्च रुः स्यात् ॥ **अतो रोरप्लुतादप्लुते ६।१।११३ ॥** अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति । शिवोऽर्च्यः ॥ **हशि च**

विष्णुस्त्रातेति । विष्णुः-त्रातेत्यत्र (विसर्जनीयस्य सः) इति सूत्रेण त्रातेत्यस्य तकारे खरि परे उकारोत्तरवर्तिनो विसर्गस्य स्थाने सकारे कृते विष्णुस्त्रातेति सिद्धम् ।

हरिः शेते इति । हरिः-शेते-इतिदशायां (विसर्जनीयस्य सः) इति सूत्रेण शकारे खरि परे विसर्गस्य स्थाने सकारे प्राप्ते (वा शरि) इति सूत्रं प्रवर्तते । अत्र विसर्जनीयस्य स इतिसूत्राद् विसर्जनीयस्येति शर्परे विसर्जनीय, इत्यतो विसर्जनीय इति चानुवर्तते । ततश्च शरि परे विसर्गस्य स्थाने विसर्ग एव वा स्यादिति सूत्रार्थः । तथा चात्र शेते इत्यस्य शकारे शरि परें इकारोत्तरवर्तिनो विसर्गस्य स्थाने विसर्गे हरिः शेते-इति, विसर्गाभावपक्षे विसर्जनीयस्य स इतिसूत्रेण विसर्गस्य स्थाने सकारे कृते (स्तोः श्चुना श्चुः) इतिसूत्रेण शकारयोगात् सकारस्य श्चुत्वेन शकारे हरिश्शेते इति च सिद्धम् ।

शिवोऽर्च्य इति । शिवस्-अर्च्य इतिदशायां ससजुषोरुरिति सूत्रं प्रवृत्तम् । अत्र सश्च सजूश्च ससजुषौ तयोरितिविग्रहः । पदस्येत्यधिक्रियते, तस्य सकारेण सजुष्शव्देन च विशेषणाद् येन विधिस्तदन्तस्येति तदन्तविधिः । तत्फलितमाह-पदान्तस्य सकारस्य सजुष्शव्दस्य च रुः स्यादिति सूत्रार्थः । अलोऽन्त्यपरिभाषया सजुष्शव्दे षकारस्यैव रुर्भवति । तथा चात्र पदान्तस्य शिवस् इत्यत्र सकारस्य रुत्वेऽनुवन्धलोपे शिव र् अर्च्य इति स्थिते, (अतो रोरप्लुतादप्लुते) इति सूत्रप्रवृत्तिः । अत्र ऋतउदित्यत उदित्यनुवर्तते, (एङः पदान्तादति) इति सूत्राद् अतीति चानुवर्तते, तस्य पञ्चम्यन्ततया विपरिणामः । ततश्च अप्लुताद्ध्रस्वाकारात्परस्य रोः स्थाने उकारः स्यादप्लुते ह्रस्वाकारे परे, इतिसूत्रार्थः । तथा-

६।१।११४ ॥ अप्लुतादतः परस्य रोरुः स्याद्धशि ॥ शिवो वन्द्यः ॥ **भोभगोअघोअपूर्वस्य योऽशि ८।३।१७** ॥ एतत्पूर्वस्य रोर्यादेशोऽशि । देवा इह । देवायिह । भोस् भगोस् अघोस् इति सान्ता निपाताः । तेषां रोर्यत्वे कृते ॥ **हलि सर्वेषाम् ८।३।२२**॥ भोभगोअघो-

---

चात्र वकारोत्तरवर्तिनः अकारात्परस्य रोः स्थाने ऽर्च्यइत्यस्याकारे परे उकारे शिव उ अर्च्य इति जाते, आद्गुणः इत्यनेन अकारस्य उकारस्य चोभयोः स्थाने ओकारे गुणे कृते (एङः पदान्तादति) इत्यनेन पूर्वरूपे शिवोऽर्च्य इति सिद्धम् ।

शिवो वन्द्य इति । शिवस्–वन्द्य इतिदशायां (ससजुषो रुः) इति सकारस्य रुत्वेऽनुवन्धलोपे (हशि च) ति सूत्रं प्रवर्तते । अत्र ऋत उदित्यत उदित्यनुवर्तते, अतो रोरप्लुतादिति चानुवर्तते । ततश्च अप्लुतादकारात्परस्य रोः स्थानेः उकारः स्याद्धशि परे, इति सूत्रार्थः । तथा चात्र वकारोत्तरवर्तिनः अकारात्परस्य रोः स्थाने वन्द्य इत्यस्य वकारे हशि परे उकारे कृते (आद्गुण) इतिगुणे शिवोवन्द्य इति सिद्धम् ।

देवा इहेति । देवास्–इहेत्यत्र (ससजुषो रुः) इति रुत्वेऽनुवन्धलोपे, (भोभगोअघोअपूर्वस्य योऽशि) इति सूत्रं प्रवर्तते । अत्र रोः सुपीत्यतो रोरित्यनुवर्तते । भो भगो अघो अ इत्येषां द्वन्द्वसमासः, तत एते पूर्वाः यस्मादिति बहुव्रीहिसमासः, पूर्वशव्दस्य प्रत्येकं सम्बन्धः । ततश्च भोपूर्वकस्य भगोपूर्वकस्य अघोपूर्वकस्य अपूर्वकस्य च रोः स्थाने यकारः स्यादशि परे, इति सूत्रार्थः । तथा चात्र इह इत्यस्य इकारेऽशि परे वकारोत्तरवर्त्याकारपूर्वकस्य रोः स्थाने यकारादेशे (लोपः शाकल्यस्य) इति सूत्रेण यकारस्य लोपे देवा इहेति–यलोपाभावपक्षे देवायिहेति च सिद्धम् ।

(0) भा सू

अपूर्वस्य यस्य लोपः स्याद्धलि सर्वेषां मतेन । भो देवाः । भगो नमस्ते । अघो याहि । देवा नम्याः ॥ **रोऽसुपि ८।२।६२॥** अह्नो रेफादेशो न तु सुपि । अहरहः । अहर्गणः ॥ **रो रि ८।३।१४॥** रेफस्य रेफे परे लोपः ॥

भो देवा इति । भोस्–देवा इत्यत्र भोस् इति सकारान्तो निपातस्तत्सकारस्य ⑦ (ससजुषो रुः) इति रुत्वे (भोभगोअघोअपूर्वस्य योऽशि) इति सूत्रेण देवा इत्यस्य दकारेऽशि परे भोपूर्वकस्य रोः स्थाने यकारादेशे भोय् देवा इति जाते (हलि सर्वेषाम्) इति सूत्रं प्रवर्तते । अत्र भोभगोअघोअपूर्वस्येत्यनुवर्तते, व्योर्लघुप्रयत्नतरः शाकटायनस्येति सूत्राद् यकारस्यानुवृत्तिः । लोपः शाकल्यस्येत्यतो लोपइत्यनुवर्तते । ततश्च भोपूर्वकस्य भगोपूर्वकस्य अघोपूर्वकस्य अपूर्वकस्य च यकारस्य लोपः स्याद् हलि परे सर्वेषां मतेनेति सूत्रार्थः । तथा चात्र देवाइत्यस्य दकारे हलि परे भोपूर्वकस्य यकारस्य लोपे भो देवा इति सिद्धम् ।

भगो नमस्ते, इति । भगोस्–नमस्ते, इत्यत्र भगोस् इति सकारान्तो निपातस्तत्सकारस्य (ससजुषो रुः) इति रुत्वे (भोभगोअघोअपूर्वस्य योऽशि) इति नकारेऽशि परे भगोपूर्वकस्य रोः स्थाने यकारे कृते (हलि सर्वेषाम्) इत्यनेन नकारे हलि परे भगोपूर्वकस्य यकारस्य लोपे कृते भगोनमस्ते इति सिद्ध्यति ।

अघो याहीति । अघोस्–याहीत्यत्र अघोस् इतिसकारान्तो निपातस्तत्सकारस्य (ससजुषोरुः) इति रुत्वे (भोभगोअघोपूर्वस्य योऽशि) इति याहीत्यस्य यकारेऽशि परे अघोपूर्वकस्य रोः स्थाने यकारे कृते हलिसर्वेषामित्यनेन यकारे हलि परे अघोपूर्वकस्य यकारस्य लोप अघोयाहीति सिद्ध्यति ।

अहरहः, इति । अहन्–अहन् इत्यत्र (रोऽसुपि) इति सूत्रं प्रवृत्तम् । अत्र लुप्तषष्ठ्यन्तम् अहन् इति सूत्रमनुवर्तते, असुपीति प्रसज्यप्रतिषेधः । ततश्च अहन् शब्दस्य रेफादेशः स्यात्सुपि परे नेति सूत्रार्थः । तथाचात्र अलोऽन्त्यपरिभाषया नकारस्य स्थाने रेफे अहरहः, इति सिद्धम् ।

अहर्गण इति । अहन्–गण इत्यत्र (रोऽसुपि) इति नकारस्य रेफादेशे

ढ्रलोपे पूर्वस्य दीर्घोऽणः ६।३।११८॥ ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः । पुना रमते । हरी रम्यः । शम्भू राजते । अणः किम् । तृढः । वृढः । मनस् रथ इत्यत्र रुत्वे कृते हाशि चेत्युत्वे रोरीति लोपे च प्राप्ते ॥ **विप्रतिषेधे परं कार्यम् १।४।२॥** तुल्यबलविरोधे सति परं

अहर्गण इति सिद्धम् ।

पुनारमते इति । पुनर्-रमते, इतिस्थिते (रो रि) इति सूत्रप्रवृत्तिः। अत्र ढोढेलोप इत्यतो लोप इत्यनुवर्तते । ततश्च रेफस्य रेफे परे लोपः स्यादितिसूत्रार्थः । तथा चात्र रमत इत्यस्य रेफे परे पुनर् इत्यत्र रेफस्य लोपे (ढ्रलोपे पूर्वस्य दीर्घोऽणः) इतिसूत्रं प्रवृत्तम् । ढ च र च ढ्रौ, तौ लोपयतीति ढ्रलोपस्तस्मिन् ढ्रलोपे इतिविग्रहः, एतेन ढ्रलोपनिमित्तं रेफलोपनिमित्तं च विवक्ष्यते, तच्च ढकाररेफात्मकमेव, ढोढेलोपः रोरीति तयोरेव ढकाररेफलोपनिमित्तत्वात् । ततश्च ढकारलोपनिमित्ते ढकारे रेफलोपनिमित्ते रेफे च परे पूर्वस्य अण् प्रत्याहारान्तः पातिनो वर्णस्य दीर्घः स्यादिति सूत्रार्थः । तथाचात्र रेफलोपनिमित्ते रमते इत्यस्य रेफे परे पूर्वस्य नकारोत्तरवर्तिनः अकारस्याणो दीर्घे पुनारमते, इत्येतत्सिद्धम् ।

हरीरम्य इति । हरिस्-रम्य इत्यत्र(ससजुषोरुः)इति रुत्वे (रोरि) इति सूत्रेण रम्यइत्यस्य रेफे परेरेफस्य लोपे (ढ्रलोपे पूर्वस्य दीर्घोऽणः) इति रेफलोफनिमित्ते रम्य इत्यस्य रेफे परे पूर्वस्य रेफोत्तरवर्तिन इकारस्य दीर्घे हरीरम्य इति साधु ।

शम्भूराजते, इति । शम्भुस्-राजते इत्यत्र (ससजुषोरुः)इति रुत्वे ऽनुबन्धलोपे (रोरि)इति सूत्रेण राजत इत्यस्य रेफे परे रेफस्य लोपे(ढ्रलोपे पूर्वस्य दीर्घोऽणः) इति रेफलोपनिमित्ते राजत इत्यस्य रेफे परे पूर्वस्य भकारोत्तरवर्तिन उकारस्याणो दीर्घे शम्भू राजते इति साधु ।

तृढः-वृढ इति । ढलोपे पूर्वस्य दीर्घोऽण इतिसूत्रेऽण् ग्रहणाभावे तृह् वृह् धातुभ्यां क्तप्रत्यये कृते होढ इति ढत्वे (झषस्तथोर्धोऽधः) इति तकारस्य धकारे ष्टुत्वे ढोढेलोप इति ढकारलोपे तृढ इति वृढ इति च जाते ढकारलोपनिमित्ते ढकारे परे पूर्वस्य ऋकारस्य दीर्घे तृढ इति

कार्यं स्यात् । इति लोपे प्राप्ते । पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव । मनोरथः ॥ **एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ६।१।१३२॥** अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि न तु नञ्समासे । एष विष्णुः । स शम्भुः । अकोः किम् । एषको रुद्रः ।

वृढ इत्यनिष्टं प्रसज्येत, अतोऽत्राण्ग्रहणमावश्यम् । कृते तु तस्मिन् तत्सामर्थ्यात्पूर्वणकारेणैवाण्प्रत्याहारग्रहणादत्रोक्तप्रयोगयोर्दीर्घो न भवतीति दिक् ।

मनोरथ इति । मनस्–रथ इत्यत्र (ससजुषोरुः) इति रुत्वे कृते हशिचेत्युत्वे (रोरि) इति लोपे च प्राप्ते (विप्रतिषेधे परं कार्यम्) इति सूत्र । प्रवृत्तिः कुत्रचिच्चरितार्थयोर्द्वयोः सूत्रयोरेकस्मिन्प्रयोगे युगपत्प्राप्तिस्तुल्यवलविरोधस्तस्मिन् सति परं कार्यं स्यादिति सूत्रार्थः । शिवोवन्द्य इति प्रयोगे हशिचेति चरितार्थम्, पुनारमत इत्यादौ रोरीति चरितार्थम्, मन र् रथ इतिदशायां द्वयोरपि प्राप्तिरिति तुल्यवलविरोधः । तथा चात्र परत्वाद् रोरीति लोपे प्राप्ते पूर्वत्रासिद्धमितिसूत्रेण रोरीत्यस्यासिद्धत्वाद् हशि चेत्युत्वे कृते (आद् गुणः) इति गुणे मनोरथ इति सिद्धम् ।

एष विष्णुरिति–एषस् विष्णुरिति दशायां ससजुषोरिति रुत्वे प्राप्ते तं वधित्वा (एतत्तदोः सुलोपोऽकोरनञ्समासे हलि) इति सूत्रं प्रवृत्तम् । अत्र सु इति लुप्तषष्ठीकं पदम् एतत्तदोरित्यनेनान्वेति । अविद्यमानः ककारः ययो स्तौ अकौ तयोः अकोरिति वहुव्रीहिसमासः । अनञ्समास इति प्रसज्यप्रतिषेधः पर्युदासस्वीकारे तु तस्य सादृश्यग्राहकत्वाद् नञ्समाससदृशे समासे एतत्सूत्रप्रवृत्त्या एषविष्णुरित्यादीनामसिद्धिः स्यात् । ततश्च अविद्यमानककारयोरेतद्तद्शव्दयोर्यः सुस्तस्य लोपः स्यात् हलि परे नञ्समासे तु सोर्लोपो न स्यादिति सूत्रार्थः । तथाचात्र विष्णुरित्यस्य वकारे हलि परे षकारोत्तरवर्तिनः सोर्लोपे एषविष्णुरिति सिद्धम् ।

स शम्भुरिति–सस् शम्भुरित्यवस्थायां (ससजुषोरुः) इति रुत्वं वाधित्वा (एतत्तदोः सुलोपोऽकोरनञ्समासे हलि) इति सूत्रेण शम्भुरित्यस्य शकारे हलि सकारस्य लोपे स शम्भुरिति सिद्ध्यति ।

अनञ्समासे किम् । असः शिवः । हलि किम् । एषोऽत्र ॥ **सोऽचि लोपे चेत्पादपूरणम्** ६।१।१३४॥ स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्य्येत । सेमामविड्ढि प्रभृतिम् ।

एषको रुद्र इति । एतद् शब्दाद् (अव्ययसर्वनाम्नामकच् प्राक् टेः) इतिसूत्रेण अकच् प्रत्यये ऽनुबन्धलोपे कृते सति एषकस् रुद्र इत्यवस्थायां (ससजुषोरुः) इति रुत्वे (हशि च) (इत्युत्वे) (आद्गुणः) इति गुणे एषको रुद्र इति सिद्ध्यति। (एतत्तदोः सुलोपोऽकोरनञ्समासे हलि) इतिसूत्रे अकोर्ग्रहणाभावे एषकस् रुद्र इत्यवस्थायां सुलोपे एषक रुद्र इत्यानिष्टं प्रसज्येत, कृते तु तस्मिन् अत्र प्रयोगे एतद्शब्दस्य सककारकत्वान्न सुलोप इति शम् ।

असः शिव इति । असस् शिव इत्यत्र (ससजुषोरुः) इति रुत्वे (खरवसानयोर्विसर्जनीयः) इति विसर्गे (विसर्जनीयस्य सः) इति विसर्गस्य सकारे (स्तोः श्चुना श्चुः), इति श्चुत्वेन सकारस्य शकारे असश्शिव इति सिद्ध्यति । (एतत्तदोः सुलोपोऽकोरनञ्समासे हलि) इतिसूत्रे ऽनञ्समासग्रहणाभावे असस् शिव इत्यवस्थायां सुलोपेन अस शिव इत्यनिष्टप्रयोग आपद्येत कृते तु तस्मिन् अत्र नञ्समासत्वान्न सुलोप इति दिक् ।

एषोऽत्रेति । एषस् अत्रेत्यवस्थायां (ससजुषोरुः) इति रुत्वे (अतोरोरप्लुतादप्लुते) इति सूत्रेण रोरुत्वे, (आद्गुणः) इतिगुणे (एङः पदान्तादति) इति पूर्वरूपे एषोऽत्रेति सिद्ध्यति (एतत्तदोः सुलोपोऽकोरनञ्समासे हलि) इति सूत्रे हलि ग्रहणाभावे एषस् अत्रेत्यवस्थायां सुलोपे एष अत्र इत्यनिष्टप्रयोग आपद्येत सति तु तस्मिन् अत्र हल्परत्वाभावान्न सुलोप इति शम् ।

सेमामविड्ढिप्रभृतिमिति । सस् इमामविड्ढिप्रभृतिमित्यत्र ससजुषोरुरिति रुत्वं बाधित्वा (सोऽचि लोपे चेत्पादपूरणम्) इति सूत्रं प्रवर्तते । अत्र सूत्रे स इति प्रथमैकवचनान्तं स्वरूपपरम् । ततः षष्ठ्या सौत्रो लुक् सस् शब्दस्येति लभ्यते । एतत्तदोरित्यतः सुलोप इत्यनु-

सैष दाशरथी रामः ॥

इति विसर्गसंधिः ॥

अथ षड्लिङ्गेषु अजन्तपुल्लिँङ्गाः ।

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १।२।४५॥ धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात् ॥ **कृत्तद्धितसमासाश्च १।२।४६॥** कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः ॥ **स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसि-**

वर्तते । तनश्च सस् इत्यस्य सोर्लोपः स्यादचि परे लोपे सत्येव पादश्चेत् पूर्येत, इतिसूत्रार्थः तथाचात्र इकारे ऽचि परे सुलोपे, (आद्गुणः) इति गुणे सेमामविड्ढिप्रभृतिमिति सिद्धम् ।

सैष दाशरथी राम इति—सस्—एषदाशरथीराम इत्यत्र ससजुषोरुरिति रुत्वं बाधित्वा (सोऽचि लोपे चे त्पादपूरणम्) इतिसूत्रेण एकारे ऽचि परे सो र्लोपे (वृद्धिरेचि) इति वृद्धौ सैषदाशरथी राम इति सिद्धम् ।

इति विसर्गसन्धिप्रकरणम् ।

* * *

अथ स्वौजसमौडित्यादिना स्वादयः प्रत्ययाः वक्ष्यन्ते । तत्र सूत्रे ङ्याप्प्रातिपदिकादित्यधिक्रियते । किं तत् प्रातिपदिकमित्याकाङ्क्षायामाह अर्थवदधातुरप्रत्ययः प्रातिपदिकमिति । अर्थोऽस्यास्तीत्यर्थवत् । नपुंसकलिङ्गानुसारात् शब्दस्वरूपमिति विशेष्यमध्याहार्यम् । न धातुः अधातुः । न प्रत्यय अप्रत्ययः । उभयत्र प्रसज्यप्रतिषेधः । अप्रत्ययपदमावर्तते । तत्रैकं प्रत्ययभिन्नपरम्, द्वितीयं प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् इतिपरिभाषया तदादिविशेष्यकतदन्तविधिना प्रत्ययान्ततदादिभिन्नपरम् । पदं पदं प्रतिपदं तत्र भवं प्रातिपदिकमिति विग्रहः । ततश्च धातुभिन्नं प्रत्ययाभिन्नं प्रत्ययान्ततदादिभिन्नं च अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यादिति सूत्रार्थः ।

कृत्ताद्धितसमासाश्चेति । कृच्च तद्धितश्च समासश्चेतिद्वन्द्वः ।

भ्यांभ्यस्ङसोसांङ्योस्सुप् ४।१।२॥ सु औ जस् इति प्रथमा । अम् औट् शस् इति द्वितीया । टा भ्याम् भिस् इति तृतीया । ङे भ्याम् भ्यस् इति चतुर्थी । ङसि भ्याम् भ्यस् इति पञ्चमी । ङस् ओस आम् इति षष्ठी । ङि ओस् सुप् इति सप्तमी ॥ **ङ्याप्प्रातिपदिकात् ४।१।१॥ प्रत्ययः ३।१।१॥ परश्च ३।१।२॥** इत्यधिकृत्य । ङ्यन्तादाबन्तात्प्रातिपादिकाच्च परे स्वादयः प्रत्ययाः स्युः ॥ **सुपः १।४।१०१॥** सुपस्त्रीणि त्रीणि वचनान्येकश एकवचनद्विवचनबहुवचनसंज्ञानि स्युः ॥ **द्व्येकयोर्द्विवचनैकवचने १।४।२२॥** द्वित्वैकत्वयोरेते स्तः ॥ **विरामोऽवसानम् १।४।११०॥** वर्णा-

---

अर्थवत्सूत्रात्प्रातिपदिकमित्यनुवर्तते, तस्य बहुवचनान्ततया विपरिणामः। कृतः तद्धितस्य च प्रत्ययत्वात् प्रत्ययग्रहणपरिभाषया तदन्ताविधिः । ततश्च कृदन्तं तद्धितान्तं समासश्च एते प्रातिपदिकसंज्ञकाः स्युरितिसूत्रार्थः ।

ङ्याप्प्रातिपदिकादिति । ङी च, आप् च, प्रातिपदिकं चेतिसमाहारद्वन्द्वः । ङ्यापोः प्रत्ययत्वात् प्रत्ययग्रहणपरिभाषया तदन्तविधिः । प्रत्ययः, परश्च, इतिसूत्रद्वयमधिक्रियते, तस्य वहुवचनान्ततया विपरिणामः । स्वौजसित्यादिना चास्य सम्वन्धः । ततश्च ङ्यन्ताद् आबन्तात् प्रातिपादिकाच्च परे स्वादयः प्रत्ययाः स्युरितिसूत्रार्थः ।

सुप इति । अत्र सूत्रे तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमाः इतिसूत्रात् त्रीणि त्रीणि इतिपदद्वयमनुवर्तते । ततश्च सुप्सम्वन्धीनि त्रीणि त्रीणि वचनानि क्रमश एकवचनद्विवचनवहुवचनसंज्ञानि स्युरितिसूत्रार्थः। प्रथमादिसप्तविभक्तिषु प्रथमप्रत्ययस्य एकवचनसंज्ञा द्वितीयप्रत्ययस्य द्विवचनसंज्ञा तृतीयप्रत्ययस्य वहुवचनसंज्ञेतिफलितम् ।

द्व्येकयोरिति । अत्र द्व्येकशब्दौ द्वित्वैकत्वपरौ ततश्च द्वित्वविवक्षायां द्विवचनमेकत्वविवक्षायामेकवचनमित्यर्थः ।

विरामोऽवसानमिति । विरमणं—क्रियाया अभावो, विराम इति

नामभावोऽवसानसंज्ञः स्यात् । रुत्वविसर्गौ । रामः ॥ **सरूपाणामेकशेष एकविभक्तौ १।२।६४॥** एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते ॥ **प्रथमयोः पूर्वसवर्णः ६।१।१**[illegible]॥ अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात् । इति प्राप्ते ॥ **नादिचि ६।१।१०४॥** आदिचि न पूर्वसवर्णदीर्घः । वृद्धिरेचि । रामौ ॥ **बहुषु बहुवचनम् १।४।२१॥** बहुत्वविवक्षायां बहुवचनं स्यात् ॥ **चुटू १।३।७॥** प्रत्ययाद्यौ चुटू इतौ स्तः ॥ **विभ-**

विग्रहः । क्रियाचात्र शब्दशास्त्रे प्रत्यासत्त्या वर्णानाम् उच्चारणरूपा गृह्यते । ततश्चवर्णानामुच्चारणाभावोऽवसानसंज्ञः स्यादितिसूत्रार्थः । खरवसानयोर्विसर्जनीयंइत्यादौ, अवसानपदग्राह्यस्याभावस्य बुद्धिकृतमेव परत्वं बोध्यम् ।

राम इति । रमन्ते योगिनोऽस्मिन्नितिविग्रहे रम् धातोः हलश्चेत्यधिकरणे घञ् प्रत्यये ऽनुबन्धलोपे वृद्धौ कृदन्तत्वात् (कृत्तद्धितसमासाश्च) इतिसूत्रेण राम इत्यस्य प्रातिपदिकसंज्ञायां प्रथमाया एकत्वविवक्षायां सुप्रत्ययेऽनुबन्धलोपे (ससजुषोरुः) इतिरुत्वे, (खरवसानयोर्विसर्जनीयः) इति विसर्गे राम इति सिद्धम् ।

रामौ इति—रामशब्दस्य (कृत्ताद्धितसमासाश्च)इतिप्रातिपदिकसंज्ञायां द्वित्वविवक्षायां रामरामइतिरूपद्वयोपस्थितौ, (सरूपाणामेकशेष एकविभक्तौ) इतिसूत्रं प्रवर्तते । एकविभक्तौ इत्यस्य सरूपाणामित्यत्रान्वयः । समानं रूपं येषा तानि सरूपाणि तेषां सरूपाणामितिविग्रहः । अत्र निर्धारणे षष्ठी, । वृद्धोयूना तल्लक्षणश्चेदेव विशेषः इतिसूत्राद् एव इत्यस्यापकर्षः । एवकारार्थस्य सारूप्येऽन्वयः । दृष्टमित्यस्याध्याहारः । ततश्च एकविभक्तौ येषां शब्दानां सारूप्यमेव दृष्टं तेषामेकस्य शेष इति सूत्रार्थः फलितः । तथाचात्र एकशेषे कृते प्रथमाया द्विवचने औ विभक्तौ वृद्धिरेचि इतिवृद्धिं वाधित्वा, (प्रथमयोः पूर्वसवर्णः) इतिसूत्रं प्रवृत्तम् । अत्र अकः सवर्णे दीर्घ, इत्यत अक इति दीर्घ इति चानुवर्तते । इकोयणचीतिसूत्राद् अचीत्यनुवर्तते । एकः पूर्वपरयोरित्याधिक्रियते । प्रथमा च प्रथमा च

[illegible] ||

[illegible]

क्तिश्च १।४।११०॥ सुप्तिङौ विभक्तिसंज्ञौ स्तः ॥ **न विभक्तौ तुस्माः १।३।४॥** विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः । इति सस्य नेत्त्वम् । रामाः ॥ **एकवचनं सम्बुद्धिः २।३।४९॥** सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात् ॥ **यस्मात्प्रत्ययविधिस्तदादि**

प्रथमे तयोः प्रथमयोरिति विग्रहः । अत्र एकः प्रथमाशब्दो प्रथमाविभक्तिपरः, द्वितीयः प्रथमाशब्दो द्वितीयाविभक्तिपरः । केवलप्रथमाविभक्तिपरत्वं तु न तथा सति प्रथमाया एकवचनद्विवचनयोरेव ग्रहणे शिवोऽर्च्य इत्यत्र (नादिचि) इति निषेधात् औजसोरेव दीर्घः स्यादिनि तस्माच्छसोनः पुंसीति सूत्रे तच्छब्देन परामर्शासंभवात् । प्रथमयोरित्यवयव षष्ठी । ततश्च अकः प्रथमाद्वितीयाविभक्त्योरवयवेऽचि परे पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घ एकादेशः स्यादितिसूत्रार्थः । तथाचात्र मकारोत्तरवार्त्तिनः अकाराद् अकः प्रथमाविभक्त्यवयवे, औरूपेऽचिपरे पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घ एकादेशे प्राप्ते, (नादिचि) इतिसूत्रं प्रवृत्तम् । प्रथमयोः पूर्वसवर्ण इत्यतः पूर्वसवर्ण इत्यनुवर्तते, अकः सवर्णे दीर्घ इत्यतो दीर्घ इत्यनुवर्तते । ततश्च अवर्णाद् इचि परे पूर्वसवर्णदीर्घो न भवतीतिसूत्रार्थः । तथाचात्र मकारोत्तरवर्तिनः अकाराद् औकारे इचि परे पूर्वसवर्णदीर्घनिषेधे वृद्धिरेचीतिवृद्धौ रामौ, इतिसिद्धम् ।

बहुष्विति । बहुशब्दो बहुत्वपरः, तथा च बहुत्वविवक्षायां बहुवचनं स्यादिति सूत्रार्थः ।

रामाः इति । राम इत्यस्य प्रातिपदिकसंज्ञायाम् प्रथमाया बहुत्वविवक्षयाम्—अनेकरामशब्दोपस्थितौ सरूपाणामित्येकशेषे जस् प्रत्यये 'चुटू' इतिसूत्रं प्रवर्तते । अत्र 'उपदेशेऽजनुनासिकइत्' इत्यत इदित्यनुवर्तते । तस्य द्विवचनान्ततया विपरिणामः । 'आदिर्ञिटुडवः' इत्यत आदिरित्यनुवर्तते तस्यापि द्विवचनान्ततया विपरिणामः । चुटू इत्यन्वयानुरोधात् । षः प्रत्ययस्येत्यतः प्रत्ययस्येत्यनुवर्तते । ततश्च प्रत्ययस्य आदिभूतौ चवर्गटवर्गौ इत्संज्ञकौ भवत इति सूत्रार्थः । तथाचात्र नकारस्यंत्संज्ञायां लोपे (विभक्तिश्च) इतिसूत्रप्रवृत्तिः । अत्र 'सुपः' इतिसूत्रं तिङस्त्रीणित्रीणीत्यतस्तिङ इति चानुवर्तते । सुपः तिङश्च विभक्तिसंज्ञकाः

प्रत्ययेऽङ्गम् १।४।१३॥ यः प्रत्ययो यस्मात् क्रियते तदादि शब्दस्वरूपं तस्मिन्प्रत्यये परेऽङ्गसंज्ञं स्यात् ॥ **एङ्ह्रस्वात्सम्बुद्धेः ६।१।६९॥** एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत् । हे राम । हे रामौ । हे रामाः ॥

स्युरितिसूत्रार्थः । इति विभक्तिसंज्ञायां सकारस्य हलन्त्यमिति इत्संज्ञाप्राप्तौ (न विभक्तौ तुस्माः) इतिसूत्रं प्रवृत्तम् । तु स् म् एषां द्वन्द्वः । 'उपदेशेऽजनुनासिक इत्' इत्यत इदित्यनुवर्तते । तस्य तुस्मा इत्यत्रान्वयानुरोधाद् बहुवचनान्ततया विपरिणामः । ततश्च विभक्तिस्थास्तवर्गसकारमकारा इत्संज्ञका न स्युरितिसूत्रार्थः । तथा चात्र सकारस्येत्संज्ञानिषेधे राम अस् इति स्थिते (अकः सवर्णे दीर्घः) इतिदीर्घं बाधित्वा (अतोगुणे) इतिपररूपे (प्रथमयोः पूर्वसवर्णः) इतिपूर्वसवर्णदीर्घे च परत्वात् पूर्वसवर्णदीर्घे (ससजुषोरुः) इतिरुत्वे (खरवसानयोर्विसर्जनीयः) इतिविसर्गे रामाः, इतिसिद्धम् ।

हे राम इति । रामशब्दस्य कृत्तद्धितेतिप्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सम्बोधने प्रथमाया एकवचने सुप्रत्ययेऽनुबन्धलोपे (एकवचनं सम्बुद्धिः) इतिसूत्रं प्रवृत्तम् । अत्र 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इत्यतः प्रथमापदमनुवर्तते, तस्य षष्ठ्यन्ततया विपरिणामः । 'सम्बोधने च' इत्यतः सम्बोधने इत्यनुवर्तते । ततश्च सम्बोधने प्रथमाविभक्तेरेकवचनं सम्बुद्धिसञ्ज्ञं स्यादितिसूत्रार्थः । तथाचात्र सोः सम्बुद्धिसंज्ञायां (यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्) इतिसूत्रं प्रवर्तते । अत्र यः इति शब्दस्वरूपमिति च अध्याह्रियते । तत् प्रकृतिरूपम् आदिर्यस्य तत्तदादीति विग्रहः । ततश्च यस्मात्–प्रकृतिभूतात् यः प्रत्ययो विधीयते तस्मिन् प्रत्यये परे तदादि शब्दस्वरूपम् अङ्गसंज्ञकम्भवतीतिसूत्रार्थः । अत्र सुप्रत्ययो रामशब्दाद् विधीयते तस्मिन् परे तदादिशब्दस्वरूपं व्यपदेशिवद्भावेन राम इति, तस्य अङ्गसंज्ञायाम् । (एङ्ह्रस्वात्सम्बुद्धेः) इतिसूत्रं प्रवृत्तम् । अत्र 'येन विना यदनुपपन्नं तत्तेनाक्षिप्यते' इतिन्यायात्सम्बुद्ध्या अङ्गस्याक्षेपः । तत्र एङ्ह्रस्वादितिविशेषणम् । (येन विधिस्तदन्तस्य) इत्यनेन अङ्गाविशेष्यकतदन्तविधिः । 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तंहल्' इत्यतः प्रथमान्तं हल्इत्यनुवर्तते ।

अमि पूर्वः ६।१।१०७॥ अकोऽम्यचि पूर्वरूपमेकादेशः । रामम् । रामौ ॥ **लशक्वतद्धिते १।३।८॥** तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः ॥ **तस्माच्छसो नः पुंसि ६।१।१०३ ॥** पूर्वसवर्णदीर्घात्परो यः शसः सस्तस्य नः स्यात्पुंसि ॥ **अट्कुप्वाङ्नुम्व्यवायेऽपि ८।४।२ ॥** अट् कवर्गः पवर्ग आङ् नुम् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः समानपदे । इति प्राप्ते ॥

'लोपोव्योर्वलि; इत्यतो लोप इत्यनुवर्तते । सम्बुद्धेरित्यवयवषष्ठी । ततश्च एङन्तादङ्गाद् ह्रस्वान्तादङ्गाच्च परं यत् सम्बुद्ध्यवयवभूतं हल् तस्य लोप इतिसूत्रार्थः । तथाचात्र राम इत्याकारकह्रस्वान्तादङ्गात् परं सम्बुद्ध्यवयवभूतं हल् स् इति तस्य लोपे हे शब्दस्य प्राक्प्रयोगे हे राम इति सिद्धम् । हे रामौ हे रामा इत्यनयोः सिद्धिप्रकारश्च पूर्ववद् बोध्यः ।

रामम् इति । रामशब्दस्य (कृत्तद्धितसमासाश्च) इतिप्रातिपदिकसंज्ञायां प्रातिपदिकत्वाद् द्वितीयैकवचने अम् प्रत्यये 'न विभक्तौ तुस्माः' इतिमकारेत्संज्ञानिषेधे 'अकः सवर्णेदीर्घे' इतिदीर्घं वाधित्वा 'अतोगुणे' इतिपररूपं प्राप्तम् तद्बाधित्वा 'प्रथमयोः पूर्वसवर्णः' इतिपूर्वसवर्णदीर्घे प्राप्ते 'अमि पूर्वः' इतिसूत्रं प्रवृत्तम् । अत्र 'अकः सवर्णे दीर्घः' इत्यतः अक इति पञ्चम्यन्तम् 'इको यणचि' इतिसूत्राद् अचीतिचानुवर्तते । एकः पूर्वपरयोरित्यधिक्रियते । ततश्च अकः परः अमि विद्यमानो योऽच् तस्मिन् परे पूर्वपरयोः पूर्वरूपमेकादेशः स्यादितिसूत्रार्थः । तथाचात्र मकारोत्तरवर्तिनः अकाराद् अमोऽचिपरे पूर्वपरयोः स्थाने पूर्वरूपे राममिति सिद्ध्यति ।

रामौ इति । रामशब्दस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वाद् द्वितीयाद्विवचने औट्प्रत्ययेऽनुबन्धलोपे 'प्रथमयोः पूर्वसवर्णः' इति प्राप्तदीर्घस्य 'नादिचि' इति निषेधे 'वृद्धिरेचि' इति सूत्रेण मकारोत्तरवर्तिनः अकाराद् औकारे एचि परे पूर्वपरयोः स्थाने औकारे वृद्धौ रामौ इति सिद्धम् ।

पदान्तस्य ८।४।३७ ॥ नस्य णो न । रामान् ॥ टाङसिङसा-

रामान् इति । रामइत्यस्य कृत्तद्धितेति प्रातिपदिकसंज्ञायां प्रातिपदिकत्वाद् द्वितीयाबहुवचने शस्प्रत्यये ‘लशक्वतद्धिते, इतिसूत्रप्रवृत्तिः । ल श कु एषां समाहारद्वन्द्वः । अत्र ‘उपदेशेऽजनुनासिक इत्’ इत्यत इत् इति, आदिर्ञिटुडवः’ इत्यत आदिरिति’ ‘षः प्रत्ययस्य’ इत्यतः प्रत्यस्य इति चानुवर्तते । अतद्धिते इति षष्ठ्यर्थे सप्तमी । ततश्च तद्धितभिन्नप्रत्ययस्य आदिभूताः लकारशकारकवर्गा इत्संज्ञकाः स्युरितिसूत्रार्थः तथाचात्र शसः शकारस्येत्संज्ञायां लोपे रामअस् इतिस्थिते ‘अकः सवर्णे दीर्घ’ इतिबाधित्वा ‘अतो गुणे’ इतिपररूपे प्राप्ते तद्बाधित्वा ‘प्रथमयोः पूर्वसवर्णः’ इतिपूर्वसवणदीर्घे रामास् इति स्थिते ‘तस्माच्छसो नः पुंसि’ इतिसूत्रं प्रवृत्तम् । तच्छब्दस्य पूर्वपरामर्शकत्वेन तस्मादित्यनेन संनिहितत्वात् पूर्वसवर्णदीर्घस्य परामर्शः । तस्मादित्युत्तरस्य इतिपरिभाषया तस्मादितिपञ्चम्या परत्वलाभः । शस इत्यवयवषष्ठी । स चावयवः परत्वेन विशेष्यते । स चावयवः अर्थात् सकार एव, अन्यस्यासम्भवात् । ततश्च पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य स्थाने नकारः स्यात्पुँल्लिङ्गे इतिसूत्रार्थः । तथाचात्र सकारस्य नकारे ‘अट्कुप्वाङ्नुम्व्यवायेऽपि’ इतिसूत्रं प्रवर्तते । अट् कु पु आङ् नुम् एषां द्वन्द्वः । तत एतैर्व्यवाय इतितत्पुरुषः । अत्र ‘रषाभ्यां नो णः समानपदे’ इतिसूत्रमनुवर्तते । अडादिभिः समस्तैर्व्यवधानस्य कुत्राप्यसम्भवः । एकैकव्यवायेऽपीति व्याख्यापि न युक्ता रामेणेत्यादावनेकव्यवायेन णत्वाप्राप्तेः । अतः अडादिभिर्व्यस्तैर्यथासम्भवंमिलितैश्चेतिव्याख्येयम् । ततश्च अट् कवर्गः पवर्ग आङ् नुम् एतैर्व्यस्तैर्यथा संभवं मिलितैश्च व्यवधानेऽपि रेफात्परस्य षकारात्परस्य च नकारस्य स्थाने णकारः स्यात् समानपदे इतिसूत्रार्थः फलितः । तथाचात्र अट्पवर्गयोर्व्यवधानेऽपि रेफात्परस्य नकारस्य स्थाने णकारे प्राप्ते ‘पदान्तस्य’ इतिसूत्रं प्रवृत्तम् । अत्र रषाभ्यां नोण इत्यनुवर्तते । ‘न माभूपूकमिगमिप्यायीवेपाम्, इत्यतो न इत्यनुवर्तते । ततश्च रेफषकाराभ्यां परस्य पदान्तस्य नकारस्य स्थाने णकारो न स्यादितिसूत्रार्थः । तथाचात्र नकारस्य णकारनिषेधे

मिनात्स्याः ।७।१।१२।। अदन्तादङ्गाट्टादीनामिनादयः स्युः । णत्वम् । रामेण । **सुपि च** ७।१।२०२।। यञादौ सुप्यतोऽङ्गस्य दीर्घः । रामाभ्याम् । **अतोभिस ऐस्** ७।१।९।। अदन्तादङ्गाद्भिस ऐस् स्यात् । अनेकाल्शित्सर्वस्य । रामैः ।। **ङेर्यः** ७।१।१३ ।। अदन्तादङ्गात्परस्य ङेर्यादेशः ।।

रामान् इति सिद्धम् ।

रामेण इति । रामशब्दस्य कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् तृतीयैकवचने टाप्रत्यये टकारस्येत्संज्ञालोपयोः राम इत्यस्याङ्गसंज्ञायां 'टाङसिङसामिनात्स्याः' इतिसूत्रं प्रवर्तते। अत्र अङ्गस्य' इतिसूत्रमधिक्रियते, तस्य पञ्चम्यन्तत्वेन विपरिणामः। अतो भिस ऐस्, इत्यतः 'अत' इति पञ्चम्यन्तमनुवर्तते, तच्चाङ्गस्य विशेषणम् । ततस्तदन्तविधिः । पञ्चम्या परत्वलाभः । ततश्च अकारान्तादङ्गात्परेषां टा ङसि ङस् एतेषां स्थाने क्रमाद् इन, आत् , स्य एते आदेशाः स्युरिति सूत्रार्थः । तथाचात्र राम इत्यस्माद् अकारान्तादङ्गात्परस्य टाइत्यस्य इनादेशे आद्गुण इति गुणे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति नकारस्य णकारे रामेण इतिसिद्धम् ।

रामाभ्याम् इति । रामेत्यस्य कृत्तद्धितेतिप्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् तृतीयाद्विवचने भ्याम् प्रत्यये, सुपि च इतिसूत्रं प्रवर्तते । अत्र 'अतो दीर्घो यञि' इतिसूत्रमनुवर्तते । यञि इति सुपि इत्यस्य विशेषणम् । (यस्मिन् विधिस्तदादावल्ग्रहणे) इतिपरिभाषोपस्थितिः । सप्तम्यन्ते अल्ग्रहणे विशेषणीभूते यो विधिरारभ्यते स तदादौ बोध्यः इति तदर्थः । यञि इतिसप्तम्यन्ते विशेषणीभूते सुपिचेतिसूत्रेण आरभ्यमाणो दीर्घविधिर्यञादौ भविष्यति । अङ्गस्येत्याधिक्रियते । तस्य अत इति विशेषणम् । ततश्च अदन्तस्याङ्गस्य दीर्घः स्यात् यञादौ सुपि परे इति सूत्रार्थः । सुप् इति सुइत्यारभ्य सुपः पकारेण प्रत्याहारः । तथाचात्र भ्यामि परे अलोऽन्त्यपरिभाषया मकारोत्तरवर्तिनः अकारस्य दीर्घे रामाभ्यामिति सिद्धम् ।

रामैः इति । रामेत्यस्य कृत्तद्धितसमासाश्चेतिप्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् तृतीयाबहुवचने भिस्प्रत्यये राम भिस् इतिस्थिते न

स्थानिवदादेशोऽनल्विधौ १।१।५६ ॥ आदेशः स्थानिवत्स्यान्न तु स्थान्यलाश्रयविधौ । इति स्थानिवत्त्वात् सुपि चेति दीर्घः । रामाय । रामाभ्याम् ॥ **बहुवचने झल्येत् ७।३।१०३ ॥** झलादौ बहुवचने

विभक्तौ तुस्माः इतिसकारस्य इत्संज्ञानिषेधे, अतो भिस ऐस् इतिसूत्रं प्रवृत्तम् । अत्र अङ्गस्येत्यधिक्रियते । तस्य अत इति पञ्चम्यन्तेनान्वयानुरोधात् पञ्चम्यन्ततया विपरिणामः । विशेषणत्वाद् 'येन विधिस्तदन्तस्य' इति तदन्तविधिः । ततश्च अकारान्तादङ्गात्परस्य भिसः स्थाने ऐस् आदेशः स्यादिति सूत्रार्थः । तथाचात्र अनेकाल्त्वाद् भिस ऐसादेशे बृद्धिरेचीति बृद्धौ ससजुषोरुरिति रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रामैः इति सिद्धम् ।

रामाय इति । रामशब्दस्य कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञायां प्रातिपदिकत्वाच्चतुर्थ्येकवचने ङेप्रत्यये ङस्येत्संज्ञायां लोपे 'ङेर्यः' इतिसूत्रं प्रवृत्तम् । अत्र 'अतो भिस ऐस्' इति सूत्राद् अत इत्यनुवर्तते । अङ्गस्येत्यधिक्रियते, तस्य पञ्चम्यन्ततया विपरिणामः । तदन्तविधिः । ततश्च अकारान्तादङ्गात् परस्य ङे इत्येतस्य यादेशः स्यादिति सूत्रार्थः । तथाचात्र राम इत्यकारान्तादङ्गात् परस्य ङे इत्यस्य यादेशे राम य इति जाते 'स्थानिवदादेशोऽनल्विधौ' इतिसूत्रप्रवृत्तिः । स्थानिना तुल्यं स्थानिवत्, स्थानिवृत्तिधर्मवान् इति फलितम् । अला विधिरल्विधिः, अलः परस्य विधिरल्विधिः, अलो विधिरल्विधिः, अलि विधिरल्विधिः, इति चतुर्विधसमासेन अल्विधिरित्यस्य अलाश्रयविधिरित्यर्थलाभः । ततश्च आदेशः स्थानिवृत्तिधर्मवान् भवति अलाश्रयविधौ तु नेतिसूत्रार्थः । तथाचात्र स्थानी ङे इति तद्वृत्तिर्धर्मः सुप्त्वं तस्य यादेशेऽतिदेशेन 'सुपि च' इतिसूत्रेण यरूपे यञादौ सुपि परे मकारोत्तरवर्तिनः अकारस्य दीर्घे रामाय इतिसिद्धम् ।

रामाभ्याम् इति । राम इत्यस्य प्रातिपदिकत्वाच्चतुर्थीद्विवचने भ्याम् प्रत्यये 'सुपि च' इति सूत्रेण दीर्घे रामाभ्याम् इतिसिद्धम् ।

सुप्यतोऽङ्गस्यैकारः । रामेभ्यः । सुपि किम् । पचध्वम् ॥ **वाऽवसाने ८।४।५६ ॥** अवसाने झलां चरो वा । रामात्, रामाद् । रामाभ्याम् । रामेभ्यः । रामस्य ॥ **ओसि च ७।३।१०४ ॥** ओसि परेऽतोऽङ्ग-

---

रामेभ्यः, इति । राम इत्यस्य कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञायां प्रातिपदिकत्वाच्चतुर्थीबहुवचने भ्यस्प्रत्यये रामभ्यस् इतिस्थिते 'न विभक्तौ तुस्माः' इति सकारेत्संज्ञानिषेधे 'सुपि च' इतिदीर्घे प्राप्ते 'बहुवचने झल्येत्' इतिसूत्रं प्रवृत्तम् । अत्र 'अतो दीर्घो यञि' इत्यत अत इति 'सुपि च' इत्यतः सुपीति चानुवर्तते । झलि इति सुपि इत्यस्य विशेषणम् 'यस्मिन्विधिस्तदादावल्ग्रहणे' इति परिभाषया तदादिविधिः । अङ्गस्येत्याधिक्रियते तदन्तविधिः । ततश्च झलादौ बहुवचने सुपि परे अदन्ताङ्गस्य एकारः स्यादितिसूत्रार्थः । तथाचात्र भ्यसि परे अलोऽन्त्यपरिभाषया मकारोत्तरवर्तिनः अकारस्य एकारे कृते ससजुषोरुरिति रुत्वे 'खरवासनयोर्विसर्जनीयः' इति रेफस्य विसर्गे रामेभ्य इतिसिद्धम् ।

रामात् इति । राम इत्यस्य कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञायां प्रातिपदिकत्वाद् ङसि प्रत्ययेऽनुबन्धलोपे 'टाङसिङसामिनात्स्याः' इतिसूत्रेण अस्इत्यस्य आत् इत्यादेशे 'अकः सवर्णे दीर्घः' इति दीर्घे 'झलां जशोऽन्ते' इति तकारस्य जश्त्वेन दकारे 'वाऽवसाने' इतिसूत्रं प्रवृत्तम्, अत्र 'झलां जश् झशि' इत्यतो झलामिति 'अभ्यासे चर्च' इत्यतः चर् इति चानुवर्तते । ततश्च अवसाने झलां स्थाने चरो वा स्युरिति सूत्रार्थः । तथाचात्र दकारस्य चर्त्वेन तकारे रामात् इति—चर्त्वाभावपक्षे रामाद् इति च सिद्धम् । रामाभ्याम्, रामेभ्यः, अनयोः सिद्धिप्रकारः पूर्ववद्बोध्यः ।

रामस्य इति । राम इत्यस्य कृत्तद्धितेति प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् षष्ठ्येकवचने ङस्प्रत्यये 'लशकतद्धिते' इति ङकारस्येत्संज्ञायां लोपे 'टाङसिङसामिनात्स्याः' इतिसूत्रेण असः स्थाने स्यादेशे रामस्येतिसिद्धम् ।

स्यैकारः । रामयोः ॥ **ह्रस्वनद्यापो नुट् ७।१।५४ ॥** ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात् ॥ **नामि ६।४।३ ॥** नामि परेऽजन्ताङ्गस्य दीर्घःस्यात् । रामाणाम् । रामे । रामयोः । सुपि—एत्वे कृते ॥

रामयोः इति । राम इत्यस्य कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् षष्ठीद्विवचने ओस् प्रत्यये राम ओस् इतिस्थिते 'न विभक्तौ तुस्माः' इतिसकारेत्संज्ञानिषेधे 'ओसि च' इतिसूत्रं प्रवृत्तम् । अत्र 'अतो दीर्घो यञि' इतिसूत्राद् अत इत्यनुवर्तते । अङ्गस्येत्यधिक्रियते । तदन्तविधिः । 'बहुवचने झल्येत्' इत्यत एत् इत्यनुवर्तते । ततश्च अदन्ताङ्गस्य एकारः स्याद् ओसि परे इतिसूत्रार्थः । अलोऽन्त्यपरिभाषया मकारोत्तरस्य अकारस्य स्थाने एकारे रामे ओस् इतिजाते 'एचोऽयवायावः' इति ओकारे परे एकारस्य अय् आदेशे 'ससजुषो रुः' इति सस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इतिरेफस्य विसर्गे रामयोः इति सिद्धम् ।

रामाणाम् इति । राम इत्यस्य कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् षष्ठीबहुवचने आम् प्रत्यये राम आम् इतिस्थिते । 'न विभक्तौ तुस्माः' इतिमकारेत्संज्ञानिषेधे 'ह्रस्वनद्यापो नुट्' इतिसूत्रं प्रवृत्तम् । अत्र ह्रस्वश्च, नदी च, आप् च, इति समाहारद्वन्द्वः । अङ्गस्येत्यधिक्रियते, तस्य पञ्चम्यन्तत्वेन विपरिणामः । ततस्तदन्तविधिः । 'आमि सर्वनाम्नः सुट्' इत्यत आमि इत्यनुवर्तते । तस्मादित्युत्तरस्येतिपरिभाषया 'ह्रस्वनद्याप' इत्यत्र पञ्चम्या आमि इत्यत्र सप्तम्याः षष्ठी प्रकल्प्यते परत्वांशलाभश्च । ततश्च ह्रस्वान्ताद्, नद्यन्ताद्, आबन्ताच्चाङ्गात्परस्य आमो नुडागमः स्यादितिसूत्रार्थः । अत्र राम इति ह्रस्वान्तादङ्गात्परस्य आमो नुडागमेऽनुबन्धलोपे रामनाम् इतिस्थिते 'नामि' इति सूत्रं प्रवृत्तम् । अत्र 'ढ्रलोपे पूर्वस्य दीर्घोणः' इत्यतो दीर्घ इत्यनुवर्तते । दीर्घश्रुत्या 'अचश्च' इतिपरिभाषया अच इत्यस्योपस्थितिः । अङ्गस्येत्यधिक्रियते । तद्विशेष्यकतदन्तविधिः । ततश्च अजन्ताङ्गस्य दीर्घः स्याद् नामि परे इति सूत्रार्थः । तथा चात्र मकारोत्तराकारस्य अलोऽन्त्य-

आदेशप्रत्यययोः ८।३।५९ ॥ इण्कुभ्यां परस्यापदान्तस्यादेशस्य प्रत्ययावयवस्य च यः सस्तस्य मूर्धन्यादेशः । ईषद्विवृतस्य सस्य तादृश एव षः । रामेषु । एवं कृष्णादयोऽप्यदन्ताः ॥ **सर्वादीनि सर्व-**

परिभाषया दीर्घे रामानाम् इतिजाते 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति अट्पवर्गव्यवधानेऽपि रेफात्परस्य नकारस्य स्थाने णकारे रामाणाम् इति सिद्धम् ।

रामे इति । राम इत्यस्य प्रातिपदिकत्वान्ङिप्रत्ययेऽनुबन्धलोपे 'आद्गुणः' इतिगुणे रामे इति सिद्धम् । रामयोरित्यस्य सिद्धिस्तु पूर्ववद्बोध्या ।

रामेषु इति । राम इत्यस्य कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सप्तमीबहुवचने सुप्प्रत्ययेऽनुबन्धलोपे 'बहुवचने झल्येत्' इति एत्वे कृते 'आदेशप्रत्यययोः' इतिसूत्रं प्रवर्तते । अत्र 'अपदान्तस्य मूर्धन्यः' 'इण्कोः' इतिसूत्रद्वयमधिक्रियते । 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तं पदमनुवर्तते । ततश्च इण्कवर्गाभ्यां परस्य अपदान्तस्य आदेशरूपसकारस्य प्रत्ययावयवसकारस्य च स्थाने मूर्धन्यादेशः स्यादितिसूत्रार्थः । तथाचात्र 'स्थानेऽन्तरतमः' इतिपरिभाषया मकारोत्तरवर्तिन एकाराद् इणः परस्य सुप्प्रत्ययावयवस्य विवृताघोषप्रयत्नवतः सकारस्य स्थाने विवृताघोषप्रयत्नवति मूर्धन्यादेशे षकारे कृते रामेषु इतिसिद्धम् ।

रामशब्दस्य रूपाणि—

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	रामः	रामौ	रामाः ।
द्वितीया	रामम्	रामौ	रामान् ।
तृतीया	रामेण	रामाभ्याम्	रामैः ।
चतुर्थी	रामाय	रामाभ्याम्	रामेभ्यः ।
पञ्चमी	रामात्-रामाद्	रामाभ्याम्	रामेभ्यः ।
षष्ठी	रामस्य	रामयोः	रामाणाम् ।

नामानि १।१।२७॥ सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्। स्वमज्ञातिधनाख्यायाम्। अन्तरं बहिर्योगोपसंव्यानयोः। त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद्

सप्तमी	रामे	रामयोः	रामेषु।
संबोधनम्	हे राम	हे रामौ	हे रामाः।

कृष्णशब्दस्य रूपाणि

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	कृष्णः	कृष्णौ	कृष्णाः।
द्वितीया	कृष्णम्	कृष्णौ	कृष्णान्।
तृतीया	कृष्णेन	कृष्णाभ्याम्	कृष्णैः।
चतुर्थी	कृष्णाय	कृष्णाभ्याम्	कृष्णेभ्यः।
पञ्चमी	कृष्णात्-कृष्णाद्	कृष्णाभ्याम्	कृष्णेभ्यः
षष्ठी	कृष्णस्य	कृष्णयोः	कृष्णानाम्।
सप्तमी	कृष्णे	कृष्णयोः	कृष्णेषु।
सम्बोधनम्	हे कृष्ण	हे कृष्णौ	हे कृष्णाः।

सर्वादीनीति। सर्वः सर्वशब्दः, आदिः प्रथमावयवः येषां तानि सर्वादीनि। शब्दस्वरूपाणीति अध्याह्रियते बहुव्रीहिर्द्विधा भवति, तद्गुणसंविज्ञानः, अतद्गुणसंविज्ञानश्चेति। तस्यान्यपदार्थस्य गुणाः विशेषणानि तेषां संविज्ञानं क्रियान्वयितया विज्ञानं यत्र स तद्गुणसंविज्ञान इति विग्रहः। यथा लम्बकर्णमानयेत्यादौ, लम्बकर्णविशिष्ट एवानीयत इति तद्गुणसंविज्ञानः। न तद्गुणसंविज्ञानः अतद्गुणसंविज्ञान इति व्युत्पत्तिः। यथा चित्रगुमानयेत्यादौ। यस्य चित्राः गावः सन्ति स एवानीयते न तु चित्रा गावोऽपि इत्यतद्गुणसंविज्ञानः। अत्र तद्गुणसंविज्ञानबहुव्रीहिस्वीकारेण सर्वशब्दस्यापि संग्रहः। ततश्च सर्वादिगणपठितानि शब्दस्वरूपाणि सर्वनामसंज्ञकानि स्युरिति सूत्रार्थः फलितः सर्वादयश्च पञ्चत्रिंशत्।

भवतु किम् ॥ **जसः शी ७।१।१७** ॥ अदन्तात्सर्वनाम्नो जसः शी स्यात् । अनेकाल्त्वात्सर्वादेशः । सर्वे ॥ **सर्वनाम्नः स्मै ७।१।१४**॥ अदन्तादङ्गात्परस्य सर्वनाम्नो ङेः स्मै । सर्वस्मै ॥ **ङसिङ्योः स्मात्स्मिनौ ७।१।१५** ॥ अदन्तादङ्गात्परस्य सर्वनाम्न एतयोरेतौ स्तः । सर्व-

---

सर्वे इति । सर्वशब्दस्य अर्थवदधातुरप्रत्ययः प्रातिपदिकमितिप्रातिपदिकसंज्ञायां'सर्वादीनि सर्वनामानि' इति सर्वनामसंज्ञायां प्रातिपदिकत्वात् प्रथमावहुवचने जस् प्रत्ययेऽनुवन्धलोपे पूर्वसवर्णदीर्घे प्राप्ते, 'जसः शी' इतिसूत्रं प्रवर्तते । अत्र 'अतो भिस ऐस' इतिसूत्राद् अत इत्यनुवर्तते । 'सर्वनाम्नः स्मै' इत्यतः सर्वनाम्न इत्यनुवर्तते । तदन्तविधिः । ततश्च अदन्तादङ्गात् परस्य सर्वनाम्नो विहितस्य जस्प्रत्ययस्य स्थाने शीआदेशः स्यादितिसूत्रार्थः। अनेकाल्त्वात् श्यादेशस्य 'अनेकाल् शित्सर्वस्य' इति जसः श्यादेशेऽनुवन्धलोपे 'आद्गुण' इति गुणे सर्वे इति सिद्धम् ।

सर्वस्मै इति । सर्वशब्दस्य प्रातिपदिकसंज्ञायां सर्वनामसंज्ञायां च प्रातिपदिकत्वाच्चतुर्थ्येकवचने ङेप्रत्ययेऽनुवन्धलोपे 'ङेर्यः' इति यादेशे प्राप्ते, तं प्रवाध्य 'सर्वनाम्नः' स्मै इतिसूत्रं प्रवृत्तम् । अत्र 'अतो भिस ऐस्'इत्यस्माद् अत इति ङेर्यः इत्यतो ङेरितिचानुवर्तते । तदन्तविधिः ततश्च अदन्तादङ्गात्परस्य सर्वनाम्नो विहितस्य ङेइत्येतस्य स्थाने स्मै इत्यादेशः स्यादितिसूत्रार्थः तथाचात्र सर्वशब्दाद् ङे इत्यस्य स्थाने स्मै आदेशे सर्वस्मै इति सिद्धम् ।

सर्वस्मात् इति । सर्वशब्दस्य प्रातिपदिकसंज्ञायां सर्वनामसंज्ञायां च प्रातिपदिकत्वात्पञ्चम्येकवचने ङसिप्रत्ययेऽनुवन्धलोपे 'टाङसिङसामिनात्स्याः' इतिसूत्रेण आत् आदेशे प्राप्ते 'ङसिङयोः स्मात्स्मिनौ' इति सूत्रं प्रवृत्तम् । अत्र 'अतो भिस ऐस्' इत्यस्माद् अत इति सर्वनाम्नः स्मै इत्यतः सर्वनाम्न इति चानुवर्तते । तदन्तविधिः । ततश्च अदन्तात्सर्वनाम्नः परस्य ङसि इत्यस्य स्थाने स्मात् इति ङिइत्यस्य स्थाने स्मिन् इति चादेशः स्यादिति सूत्रार्थः । तथा चात्र अदन्तात्सर्वनाम्नः सर्वशब्दाद्विहितस्य ङसि इत्यस्य स्थाने स्मात् इत्यादेशे कृते 'झलां जशोऽन्ते' इतिजश्त्वे कृते

स्मात्। **आमि सर्वनाम्नः सुट् ७।१।५२॥** अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः। एत्वषत्वे। सर्वेषाम्। सर्वस्मिन्। शेषं रामवत्।

वाऽवसाने इति वैकल्पिके चर्त्वे सर्वस्मात् इति, चर्त्वाभावपक्षे सर्वस्माद् इति च सिद्धम्।

सर्वेषामिति। सर्व इत्यस्य प्रातिपदिकसंज्ञायां सर्वनामसंज्ञायां च प्रातिपदिकत्वात् षष्ठीबहुवचने आम् प्रत्यये 'न विभक्तौ तुस्माः' इति मकारेत्संज्ञानिषेधे सर्व आम् इतिस्थिते 'ह्रस्वनद्यापो नुट्' इति सूत्रेण आमो नुडागमे प्राप्ते 'आमि सर्वनाम्नः सुट्' इतिसूत्रप्रवृत्तिः। अत्र 'आज्जसेरसुक्' इत्यतं आत् इत्यनुवर्तते अङ्गस्येत्यधिक्रियते, तस्य पञ्चम्यन्ततया विपरिणामः। अङ्गविशेष्यकतदन्तविधिः। तस्मादित्युत्तरस्य इतिपरिभाषया आत् इति पञ्चम्या आमि इत्यत्र सप्तम्याः षष्ठीप्रकल्पनम् परत्वलाभश्च। सर्वनाम्न इति विहितविशेषणम्। ततश्च अवर्णान्तादङ्गात्परस्य सर्वनामसंज्ञकाद्विहितस्यामः सुट् आगमः स्यादिति सूत्रार्थः। तथा चात्र सर्वशब्दाद्विहितस्यामः सुडागमेऽनुबन्धलोपे 'बहुवचने झल्येत्' इत्येत्वे 'आदेशप्रत्यययोः' इतिसूत्रेण वकारोत्तरवर्तिन एकाराद् इणः परस्य 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इतिपरिभाषया आम्ग्रहणेन सामो ग्रहणात् अपदान्तस्य प्रत्ययावयवस्य सामः सकारस्य मूर्धन्यादेशे षकारे कृते सर्वेषाम् इति सिद्धम्।

सर्वस्मिन् इति। सर्व इत्यस्य प्रातिपदिकसंज्ञायां सर्वनामसंज्ञायां च प्रातिपदिकत्वात् सप्तम्येकवचने ङिप्रत्ययेऽनुबन्धलोपे 'आद्गुणः' इतिगुणे प्राप्ते 'ङसिङ्योः स्मात्स्मिनौ' इतिसूत्रेण स्मिन् आदेशे सर्वस्मिन् इतिसिद्धम्। सर्वशब्दस्य शेषरूपाणां सिद्धिप्रकारश्च रामशब्दवद् बोध्यः।

सर्वशब्दस्य रूपाणि।

प्रथमा	सर्वः	सर्वौ	सर्वे।
द्वितीया	सर्वम्	सर्वौ	सर्वान्।

एवं विश्वादयोऽप्यदन्ताः । उभशब्दो नित्यं द्विवचनान्तः । उभौ २ । उभाभ्याम् ३ । उभयोः २ । तस्येह पाठोऽकजर्थः । उभयशब्दस्य द्विवचनं

तृतीया	सर्वेण	सर्वाभ्याम्	सर्वैः ।
चतुर्थी	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः ।
पञ्चमी	सर्वस्मात्-सर्वस्माद्	सर्वाभ्याम्	सर्वेभ्यः ।
षष्ठी	सर्वस्य	सर्वयोः	सर्वेषाम् ।
सप्तमी	सर्वस्मिन्	सर्वयोः	सर्वेषु ।
संबोधनम्	हे सर्व	हे सर्वौ	हे सर्वाः ।

विश्वशब्दस्य रूपाणि ।

प्रथमा	विश्वः	विश्वौ	विश्वे ।
द्वितीया	विश्वम्	विश्वौ	विश्वान् ।
तृतीया	विश्वेन	विश्वाभ्याम्	विश्वैः ।
चतुर्थी	विश्वस्मै	विश्वाभ्याम्	विश्वेभ्यः ।
पञ्चमी	विश्वस्मात्-विश्वस्माद्,	विश्वाभ्याम्	विश्वेभ्यः ।
षष्ठी	विश्वस्य	विश्वयोः	विश्वेषाम् ।
सप्तमी	विश्वस्मिन्	विश्वयोः	विश्वेषु ।
संबोधनम्	हेविश्व	हेविश्वौ	हेविश्वाः ।

अकजर्थ इति । तेन उभकाविति सिध्यति कप्रत्यये तु 'उभादुदात्तो नित्यम्' इत्यत्र विभक्तेन 'नित्यम्' इत्यनेन अयचि उभयकाविति स्यात् ।

उभयशब्दस्य रूपाणि–

प्रथमा	उभयः	उभये ।
द्वितीया	उभयम्	उभयान् ।
तृतीया	उभयेन	उभयैः ।
चतुर्थी	उभयस्मै	उभयेभ्यः ।
पञ्चमी	उभयस्मात्-उभयस्माद्,	उभयेभ्यः ।

नास्ति । डतरडतमौ प्रत्ययौ । प्रत्ययग्रहणे तदन्तग्रहणमिति तदन्ता ग्राह्याः । नेम इत्यर्द्धे । समः सर्वपर्य्यायः । तुल्यपर्य्यायस्तु

षष्ठी	उभयस्य	उभयेषाम् ।
सप्तमी	उभयस्मिन्	उभयेषु ।
संबोधनम्	हे उभय	हे उभये ।

डतरडतमौ प्रत्ययाविति–

'किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्' 'वा बहूनां जातिपरिप्रश्ने डतमच्' इतिसूत्रविहिताविर्त्यर्थः । तथा च 'न केवला प्रकृतिः प्रयोक्तव्या नापि केवलप्रत्ययः' इति न्यायेन केवलं तयोः प्रयोगानर्हत्वेन सर्वनामसंज्ञायां प्रयोजनाभावात् प्रत्ययग्रहणपरिभाषया डतरप्रत्ययान्तस्य डतमप्रत्ययान्तस्य च ग्रहणमिति कतरकतमशब्दादीनामेव सर्वनामसंज्ञा भविष्यतीति ।

कतरशब्दस्य रूपाणि–

कतरः, कतरौ, कतरे । कतरम्, कतरौ, कतरान् । कतरेण, कतराभ्याम्, कतरैः । कतरस्मै, कतराभ्याम्, कतरेभ्यः । कतरस्मात्-कतरस्माद्, कतराभ्याम्, कतरेभ्यः । कतरस्य, कतरयोः, कतरेषाम् । कतरस्मिन्, कतरयोः । कतरेषु । इति ।

कतमशब्दस्य रूपाणि–

कतमः, कतमौ, कतमे । कतमम्, कतमौ, कतमान् । कतमेन, कतमाभ्याम्, कतमैः । कतमस्मै, कतमाभ्याम्, कतमेभ्यः । कतमस्मात्-कतमस्माद्, कतमाभ्याम्, कतमेभ्यः । कतमस्य, कतमयोः कतमेषाम् । कतमस्मिन्, कतमयोः, कतमेषु, इति ।

अन्यशब्दस्य रूपाणि–

अन्यः, अन्यौ, अन्ये । अन्यम्, अन्यौ, अन्यान् । अन्येन, अन्याभ्याम्, अन्यैः । अन्यस्मै, अन्याभ्याम्, अन्येभ्यः । अन्यस्मात्-अन्यस्माद्, अन्याभ्याम् । अन्येभ्यः । अन्यस्य, अन्ययोः, अन्येषाम् । अन्यस्मिन्, अन्ययोः, अन्येषु, इति ।

① नियमपूर्वक स्थिति [illegible] । [illegible] व्यवस्था में सत्यमसंज्ञायाम् । संज्ञायां वर्तमानाः स्युः [illegible] तदा न ।। व्यवस्थायां किं [illegible] । दक्षिणा इमे गाथकाः प्रवीणा इत्यर्थः । X

न, यथासंख्यमनुदेशः समानामिति ज्ञापकात् ॥ **पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् १।१।३४ ॥** एतेषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणसूत्रात्सर्वत्र या प्राप्ता सा

अन्यतरशब्दस्य रूपाणि–

अन्यतरः, अन्यतरौ, अन्यतरे । अन्यतरम्, अन्यतरौ, अन्यतरान् । अन्यतरेण, अन्यतराभ्याम्, अन्यतरैः । अन्यतरस्मै, अन्यतराभ्याम्; अन्यतरेभ्यः । अन्यतरस्मात्-अन्यतरस्माद्, अन्यतराभ्याम्, अन्यतरेभ्यः । अन्यतरस्य, अन्यतरयोः, अन्यतरेषाम् । अन्यतरस्मिन्, अन्यतरयोः; अन्यतरेषु, । इति ।

इतरशब्दस्य रूपाणि–

इतरः, इतरौ, इतरे । इतरम्, इतरौ, इतरान् । इतरेण, इतराभ्याम्, इतरैः । इतरस्मै, इतराभ्याम्, इतरेभ्यः । इतरस्मात्-इतरस्माद्, इतराभ्याम्, इतरेभ्यः । इतरस्य, इतरयोः इतरेषाम् । इतरस्मिन्, इतरयोः, इतरेषु । इति ।

त्वशब्दस्य रूपाणि–

त्वः, त्वौ, त्वे । त्वम्, त्वौ, त्वान् । त्वेन, त्वाभ्याम्, त्वैः । त्वस्मै, त्वभ्याम्, त्वेभ्यः । त्वस्मात्-त्वस्माद्, त्वाभ्याम्, त्वेभ्यः । त्वस्य, त्वयोः, त्वेषाम् । त्वस्मिन्, त्वयोः, त्वेषु, इति ।

नेमशब्दस्य रूपाणि–

नेमः, नेमौ, नेमे–नेमाः । नेमम्, नेमौ, नेमान् । नेमेन, नेमाभ्याम्, नेमैः । नेमस्मै, नेमाभ्याम्, नेमेभ्यः । नेमस्मात्-नेमस्माद्, नेमाभ्याम्, नेमेभ्यः । नेमस्य, नेमयोः, नेमेषाम् । नेमस्मिन्, नेमयोः; नेमेषु । इति ।

सर्वपर्यायसमशब्दस्य रूपाणि–

समः, समौ, समे । समम्, समौ, समान् । समेन, समाभ्याम्, समैः । समस्मै, समाभ्याम्, समेभ्यः । समस्मात्-समस्माद्, समाभ्याम्, समेभ्यः । समस्य, समयोः, समेषाम् । समस्मिन्, समयोः

X· असंज्ञायाम् इति किम् । उत्तराः कुरवः ।। [illegible] उत्तरी भाग [illegible] ।। भा० १।। स्वामिनो [illegible] ।

जसि वा स्यात् । पूर्वे, पूर्वाः । असंज्ञायां किम् । उत्तराः कुरवः । स्वाभिधेयापेक्षावधिनियमो व्यवस्था । व्यवस्थायां किम् । दक्षिणा गाथकाः ।

समेषु, इति । तुल्यपर्यायसमशब्दस्य न सर्वनामसंज्ञा यथासंख्यमनुदेशः समानाम् इति निर्देशादतस्तस्य रामशब्दवदेव रूपाणि ।

पूर्वे इति । पूर्वशब्दस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् प्रथमाबहुवचने जस् प्रत्ययेऽनुबन्धलोपे न विभक्ताविति सकारेत्संज्ञानिषेधे 'सर्वादीनि सर्वनामानि' इति सूत्रेण नित्यसर्वनामसंज्ञायां प्राप्तायां, 'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्' इति सूत्रं प्रवृत्तम् । अत्र, 'सर्वादीनि सर्वनामानि' इत्यतः सर्वनामानि इति, विभाषाजसि, इति सूत्रं चानुवर्तते । ततश्च, पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, एतेषां सप्तशब्दानां, 'सर्वादीनि-सर्वनामानि' इतिसूत्रात् प्रथमादिषु सप्तस्वपि विभक्तिषु प्राप्ता या नित्यसर्वनामसंज्ञा सा जसि-वा स्यात् व्यवस्थायाम् असंज्ञायां च इतिसूत्रार्थः फलितः । अपेक्ष्यत इति अपेक्षः । स्वस्य पूर्वादिशब्दस्य, अभिधेयम् वाच्यम्, स्वाभिधेयम्, तेन अपेक्षः—अपेक्ष्यमाणः अवधेर्नियमः, स्वाभिधेयापेक्षावधिनियमः व्यवस्थाशब्दस्य अर्थः । अवध्यंशे नित्यसाकाङ्क्षं यद्रूपं तद्रूपावच्छिन्नबोधकाः पूर्वादयः शब्दा व्यवस्थायां बोध्याः । तथाचात्र वैकल्पिकसर्वनामसंज्ञायाम्, 'जसः शी' इति जसः श्यादेशे, 'लशकतद्धिते' इति शकारस्येत्संज्ञायां लोपे च कृते, आद्गुणः, इतिगुणे पूर्वे इति सिद्धम् । सर्वनामसंज्ञाया अभावपक्षे तु पूर्व अस् इत्यवस्थायाम् 'प्रथमयोः पूर्वसवर्णः' इतिपूर्वसवर्णदीर्घे 'ससजुषोरुः' इतिरुत्वे 'खरवसानयोर्विसर्जनीयः' इतिविसर्गे पूर्वाः इति च सिद्धम् ।

उत्तराः कुरवः इति । 'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्' इतिसूत्रे असंज्ञाग्रहणाभावे संज्ञाभूतस्यापि उत्तरशब्दस्य जसि वैकल्पिकसर्वनामसंज्ञायाम् उत्तरे 'उत्तराः' इतिरूपद्वयमापद्येत, तच्च संज्ञायामनिष्टमिति असंज्ञाग्रहणमावश्यकम् ।

दक्षिणाः गाथका इति । पूर्वपरावरदक्षिणोत्तरापराधराणि व्य-

CC0. In Public Domain. Digitization by eGangotri

① स्वे पुत्राः - स्वाः पुत्राः । [illegible] । स्वाः ज्ञातयः । प्रभूताः स्वाः न दीयन्ते ।

कुशला इत्यर्थः ॥ **स्वमज्ञातिधनाख्यायाम् १।१।३५** ॥ ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा । स्वे, स्वाः ① आत्मीयाः आत्मान इति वा । ज्ञातिधनवाचिनस्तु । स्वाः । ज्ञातयोऽर्था वा ॥ **अन्तरं बहिर्योगोपसंव्यानयोः १।१।३६** ॥ बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य प्राप्ता संज्ञा जसि वा । अन्तरे,

---

वस्थायामसंज्ञायाम्' इतिसूत्रे व्यवस्थाग्रहणाभावे कुशलार्थकदक्षिणशब्दस्यापि जसि वैकल्पिकसर्वनामसंज्ञायां दक्षिणे दक्षिणाः इति रूपद्वयमापद्येत, तच्चानिष्टमिति व्यवस्थाग्रहणमावश्यकम् तथा च प्रकृते दक्षिणशब्दोऽवध्यंशे नित्यसाकांक्षदक्षिणत्वावच्छिन्नस्य न बोधक इति न तस्य सर्वनामसंज्ञा ।

स्वे स्वाः इति । स्वशब्दस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् प्रथमाबहुवचने जसि अनुबन्धलोपे 'सर्वादीनि सर्वनामानि' इति नित्यसर्वनामसंज्ञायां प्राप्तायां 'स्वमज्ञातिधनाख्यायाम्' इतिसूत्रं प्रवृत्तम् । अत्र सर्वनामानि इति 'विभाषा जसि' इति चानुवर्तते । ज्ञातिश्च धनं च ज्ञातिधने तयोराख्या ज्ञातिधनाख्या न ज्ञातिधनाख्या अज्ञातिधनाख्या तस्याम् अज्ञातिधनाख्यायाम् इति विग्रहः । स्वशब्दस्य, आत्मा, आत्मीय, ज्ञाति, धन, इतिचत्वारोऽर्थाः । 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियाम् धने' इत्यमरकोशात् । ततश्च ज्ञातिधनभिन्ने आत्मनि आत्मीये चार्थे स्वशब्दस्य प्राप्ता नित्यसर्वनामसंज्ञाजसि वा स्यादिति सूत्रार्थः फलितः । तथा चात्र वैकल्पिकसर्वनामसंज्ञायाम् 'जसः शी' इति जसः श्यादेशे शकारस्य 'लशक्वतद्धिते' इति सूत्रेणेत्संज्ञायाम् लोपे 'आद्गुणः' इतिगुणे स्वे इति, सर्वनामसंज्ञाया अभावपक्षे स्व अस् इत्यवस्थायाम् 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे' 'ससजुषोरुः' इति रुत्वे 'खरवसानयोर्विसर्जनीयः' इतिरेफस्य विसर्गे स्वाः इति च सिद्धम् ।

अन्तरे इति । अन्तरशब्दस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् प्रथमाबहुवचने जसि अनुबन्धलोपे 'सर्वादीनि सर्वनामानि' इति नित्यं-

मध्ये रन्तरा [illegible] — मध्यस्था

अत्र नं सर्वनाम संज्ञा

CC0. In Public Domain, Digitization by eGangotri

अन्तरा वा गृहाः। बाह्या इत्यर्थः। अन्तरे, अन्तरा वा शाटकाः। परिधानीया इत्यर्थः। **पूर्वादिभ्यो नवभ्यो वा ७।१।१६॥** एभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः। पूर्वस्मात्, पूर्वात्।

सर्वनामसंज्ञायां प्राप्तायाम् 'अन्तरं बहिर्योगोपसंव्यानयोः' इतिसूत्रं प्रवर्तते। अत्र सर्वनामानीति, विभाषाजसि इतिचानुवर्तते। बहिः अनावृतप्रदेशः तेन योगः सम्बन्धो यस्य सः बहिर्योगः बहिर्विद्यमानोऽर्थ इति यावत्। उपसम्वीयते परिधीयते इति उपसव्यानम् अन्तरीयम् वस्त्रम्। अत्र सामीप्ये वर्तमानमुपसंव्यानम्

किञ्चित् बाह्य वर्तमान बहिर्योगः।

ततश्च बाह्ये परिधानीये च अर्थे अन्तरशब्दस्य सर्वादीनीति सूत्रात्प्राप्ता नित्यसर्वनामसंज्ञा जसि वा स्यादिति सूत्रार्थः। तथाचात्र वैकल्पिकसर्वनामसंज्ञायां 'जशः शी' इति जसः श्यादेशे 'लशक्वतद्धिते' इति शकारस्येत्संज्ञायां लोपे 'आद्गुण' इतिगुणे अन्तरे इति, सर्वनामसंज्ञाया अभावपक्षे तु अन्तर अस् इत्यवस्थायाम् 'प्रथमयोः पूर्वसवर्णः' पूर्वसवर्णदीर्घे 'ससजुषोरुः' इति सस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इतिरेफस्य विसर्गे अन्तराः इति च सिद्धम्।

पूर्वस्मात् इति। पूर्वशब्दस्य प्रातिपदिकसंज्ञायां सर्वनामसंज्ञायां च प्रातिपदिकत्वात् पञ्चम्येकवचने ङसि प्रत्ययेऽनुबन्धलोपे 'न विभक्तौ तुस्माः' इति सकारेत्संज्ञानिषेधे टाङसिङसामिनात्स्याः, इति सूत्रं बाधित्वा 'ङसिङ्योः स्मात्स्मिनौ' इति स्मात् आदेशे प्राप्ते 'पूर्वादिभ्यो नवभ्यो वा' इति सूत्रं प्रवृत्तम्। अत्र ङसिङ्योः स्मात्स्मिनौ इति सूत्रमनुवर्तते। ततश्च पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अन्तर एभ्यो नवभ्यः शब्देभ्यः परस्य ङसिप्रत्ययस्य स्थाने स्मात् आदेशः, ङिप्रत्ययस्य स्थाने स्मिन् आदेशश्च वा स्यात् इति सूत्रार्थः। तथा चात्र वैकल्पिके स्मात् आदेशे कृते 'झलां जशोऽन्ते इति जश्त्वे 'वावसाने' इति वैकल्पिके चर्त्वे पूर्वस्मात् इति, चर्त्वाभावपक्षे पूर्वस्माद् इति, स्मादादेशाभावपक्षे, पूर्व अस् इत्यवस्थायां 'टाङसिङसामिनात्स्याः' इतिसूत्रेण आत् आदेशे जश्त्वे वैकल्पिके चर्त्वे च कृते पूर्वात्

पूर्वस्मिन्, पूर्वे । एवं परादीनाम् । शेषं सर्ववत् ॥ **प्रथमचरमतयाल्पाऽ-**

इति चर्त्वाभावपक्षे च पूर्वाद् इति च सिद्धम् ।

पूर्वस्मिन् इति । पूर्व इत्यस्य प्रातिपदिकसंज्ञायां सर्वनामसंज्ञायां प्रातिपदिकत्वात् सप्तम्येकवचने ङिप्रत्ययेऽनुबन्धलोपे, 'पूर्वादिभ्यो-नवभ्यो वा' इति सूत्रेण वैकल्पिके स्मिन्नादेशे पूर्वस्मिन्निति, स्मिन्नादेशाभावपक्षे तु 'आद्गुणः' इति गुणे पूर्वे इति च सिद्धम् ।

पूर्वशब्दस्य रूपाणि–

पूर्वः, पूर्वौ, पूर्वे-पूर्वाः । पूर्वम्, पूर्वौ, पूर्वान् । पूर्वेण, पूर्वाभ्याम्, पूर्वैः । पूर्वस्मै, पूर्वाभ्याम्, पूर्वेभ्यः । पूर्वस्मात्-पूर्वस्माद्-पूर्वात्-पूर्वाद्, पूर्वाभ्याम्, पूर्वेभ्यः । पूर्वस्य, पूर्वयोः पूर्वेषाम् । पूर्वस्मिन्-पूर्वे, पूर्वयोः, पूर्वेषु, इति ।

परशब्दस्य रूपाणि–

परः, परौ, परे-पराः । परम्, परौ परान् । परेण, पराभ्याम्, परैः । परस्मै, पराभ्याम्, परेभ्यः । परस्मात्-परस्माद्-परात्–पराद्, पराभ्याम्, परेभ्यः । परस्य, परयोः, परेषाम् । परस्मिन्–परे, परयोः, परेषु, इति ।

अवरशब्दस्य रूपाणि–

अवरः, अवरौ, अवरे-अवराः । । अवरम्, अवरौ, अवरान् अवरेण, अवराभ्याम्, अवरैः । अवरस्मै, अवराभ्याम्, अवरेभ्यः । अवरस्मात्-अवरस्माद्-अवरात्-अवराद्, अवराभ्याम्, अवरेभ्यः । अवरस्य, अवरयोः, अवरेषाम् । अवरस्मिन्–अवरे, अवरयोः, अवरेषु, इति ।

दक्षिणशब्दस्य रूपाणि–

दक्षिणः, दाक्षिणौ, दक्षिणे-दक्षिणाः । दक्षिणम्, दक्षिणौ दाक्षिणान् । दक्षिणेन, दक्षिणाभ्याम्, दाक्षिणैः । दक्षिणस्मै दक्षिणाभ्याम्, दक्षिणेभ्यः । दक्षिणस्मात्-दक्षिणस्माद्-दक्षिणात्-दक्षिणाद्, दक्षिणाभ्याम्, दक्षिणेभ्यः । दक्षिणस्य, दक्षिणयोः, दक्षिणेषाम् । दक्षिणस्मिन्-दक्षिणे, दक्षिणयोः, क्षिणेषु, इति ।

र्द्धकतिपयनेमाश्च १।१।३३ ॥ एते जसि उक्तसंज्ञा वा स्युः । प्रथमे, प्रथमाः ॥ तयः प्रत्ययः । द्वितये, द्वितयाः । शेषं रामवत् ॥ नेमे, नेमाः । शेषं सर्ववत् ॥ (तीयस्य ङित्सु वा) । द्वितीयस्मै,

---

उत्तरशब्दस्य रूपाणि—

उत्तरः, उत्तरौ, उत्तरे-उत्तराः । उत्तरम्, उत्तरौ, उत्तरान् । उत्तरेण, उत्तराभ्याम्, उत्तरैः । उत्तरस्मै, उत्तराभ्याम, उत्तरेभ्यः । उत्तरस्मात्-उत्तरस्माद् उत्तरात्-उत्तराद्, उत्तराभ्याम्,उत्तरेभ्यः । उत्तरस्य,उत्तरयोः उत्तरेषाम् । उत्तरस्मिन्—उत्तरे, उत्तरयोः उत्तरेषु, इति ।

स्वशब्दस्य रूपाणि—

स्वः, स्वौ, स्वे–स्वाः । स्वम्, स्वौ, स्वान् । स्वेन, स्वाभ्याम्, स्वैः । स्वस्मै, स्वाभ्याम्, स्वेभ्यः । स्वस्मात्-स्वस्माद्-स्वात्-स्वाद्, स्वाभ्याम्, स्वेभ्यः । स्वस्य, स्वयोः, स्वेषाम् । स्वस्मिन्-स्वे, स्वयोः, स्वेषु, इति ।

अन्तरशब्दस्य रूपाणि -

अन्तरः, अन्तरौ, अन्तरे-अन्तराः । अन्तरम्, अन्तरौ, अन्तरान्, अन्तरेण, अन्तराभ्याम्, अन्तरैः । अन्तरस्मै, अन्तराभ्याम्, अन्तरेभ्यः, अन्तरस्मात्-अन्तरस्माद्-अन्तरात्-अन्तराद्, अन्तराभ्याम्, अन्तरेभ्यः । अन्तरस्य, अन्तरयोः, अन्तरेषाम् । अन्तरस्मिन्-अन्तरे । अन्तरयोः, अन्तरेषु, इति ।

प्रथमे इति । प्रथम इत्यस्य प्रातिपदिकसंज्ञायाम् प्रातिपदिकत्वात्प्रथमाबहुवचने जस् प्रत्ययेऽनुबन्धलोपे 'प्रथमचरमतयाल्पार्धकतिपयनेमाश्च' इति सूत्रं प्रवृत्तम् । अत्र सर्वनामानि इति 'विभाषा जसि' इति चानुवर्तते । तय इत्यस्य प्रत्ययत्वेन प्रत्ययग्रहणपरिभाषया 'संख्याया अवयवे तयप्', इतिसूत्रविहिततयप्प्रत्ययान्तस्य ग्रहणम् । ततश्च प्रथम, चरम, तयप्रत्ययान्त, अल्प, अर्ध, कतिपय, नेम, एते शब्दाः जसि वा सर्वनामसंज्ञकाः स्युरिति सूत्रार्थः । तथा च प्रथमशब्दस्य वैकल्पिकसर्वनामसंज्ञायाम् 'जसः शी' इतिजसः श्यादेशेऽनुबन्धलोपे

'आद्गुणः' इति गुणे प्रथमे, इति, सर्वनामसंज्ञाया अभावपक्षे प्रथम अस् इत्यवस्थायाम् 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे 'ससजुषो रुः' इति रुत्वे 'खरवसानयोर्विसर्जनीयः' इति विसर्गे प्रथमाः इति च सिद्धम्।

द्वितये इति। द्वितय इत्यस्य प्रातिपदिकसंज्ञायाम् प्रातिपदिकत्वात् जसि अनुबन्धलोपे 'प्रथमचरमतयाल्पार्धकतिपयनेमाश्च' इति वैकल्पिकसर्वनामसंज्ञायाम् 'जसः शी' इति जसः श्यादेशेऽनुबन्धलोपे 'आद्गुणः' इति गुणे द्वितये इति, सर्वनामसंज्ञाया अभावपक्षे तु पूर्वसवर्णदीर्घे रुत्वे विसर्गे च द्वितयाः इति च सिद्धम्।

नेमे इति। नेमे इत्यस्य प्रातिपदिकत्वात् जसि अनुबन्धलोपे 'प्रथमचरमतयाल्पार्धकतिपयनेमाश्च' इति वैकल्पिकसर्वनामसंज्ञायाम् जसः श्यादेशे गुणे नेमे इति, सर्वनामसंज्ञाया अभावपक्षे पूर्वसवर्णदीर्घे रुत्वे विसर्गे च कृते नेमाः इति च सिद्धम्।

प्रथमशब्दस्य रूपाणि—

प्रथमः, प्रथमौ, प्रथमे-प्रथमाः। प्रथमम्, प्रथमौ, प्रथमान्। प्रथमेन, प्रथमाभ्याम्, प्रथमैः। प्रथमाय, प्रथमाभ्याम्, प्रथमेभ्यः। प्रथमात्-प्रथमाद्, प्रथमाभ्याम्, प्रथमेभ्यः। प्रथमस्य, प्रथमयोः, प्रथमानाम्। प्रथमे, प्रथमयोः, प्रथमेषु, इति।

चरमशब्दस्य रूपाणि—

चरमः, चरमौ, चरमे-चरमाः। चरमम्, चरमौ, चरमान्। चरमेण, चरमाभ्याम्, चरमैः। चरमाय, चरमाभ्याम्, चरमेभ्यः। चरमात्-चरमाद्, चरमाभ्याम्, चरमेभ्यः। चरमस्य, चरमयोः, चरमाणाम्। चरमे, चरमयोः, चरमेषु। इति।

द्वितयशब्दस्य रूपाणि—

द्वितयः, द्वितयौ, द्वितये-द्वितयाः। द्वितयम्, द्वितयौ, द्वितयान्। द्वितयेन, द्वितयाभ्याम्, द्वितयैः। द्वितयाय, द्वितयाभ्याम्, द्वितयेभ्यः।

द्वितयात्-द्वितयाद्, द्वितयाभ्याम्, द्वितयेभ्यः। द्वितयस्य, द्वितययोः, द्वितयानाम्, द्वितये, द्वितययोः, द्वितयेषु, इति।

अल्पशब्दस्य रूपाणि–

अल्पः, अल्पौ, अल्पे-अल्पाः। अल्पम्, अल्पौ, अल्पान्। अल्पेन, अल्पाभ्याम्, अल्पैः। अल्पाय, अल्पाभ्याम्, अल्पेभ्यः। अल्पात्-अल्पाद्, अल्पाभ्याम्, अल्पेभ्यः। अल्पस्य, अल्पयोः, अल्पानाम्। अल्पे, अल्पयोः, अल्पेषु, इति।

अर्धशब्दस्य रूपाणि–

अर्धः, अर्धौ, अर्धे-अर्धाः। अर्धम्, अर्धौ, अर्धान्। अर्धेन, अर्धाभ्याम्, अर्धैः। अर्धाय, अर्धाभ्याम्, अर्धेभ्यः। अर्धात्-अर्धाद्, अर्धाभ्याम्, अर्धेभ्यः। अर्धस्य, अर्धयोः, अर्धानाम्। अर्धे, अर्धयोः, अर्धेषु, इति। नेमशब्दरूपं प्रागेवोक्तं सर्वादौ।

द्वितीयस्मै इति। द्वितीयशब्दस्य प्रातिपदिकत्वात् चतुर्थ्येकवचने ङे प्रत्ययेऽनुबन्धलोपे 'तीयस्य ङित्सु वा' इति वार्तिकप्रवृत्तिः। तीय इत्यस्य प्रत्ययत्वात् 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्' इति परिभाषया तदन्तविधिः। ततश्च तीयप्रत्ययान्तस्य ङित्सु प्रत्ययेषु परेषु सर्वनामसंज्ञा वा भवतीति वार्तिकार्थः। तथाचात्र वैकल्पिकसर्वनामसंज्ञायाम् 'सर्वनाम्नः स्मै' इति सूत्रेण स्मै आदेशे द्वितीयस्मै इति, सर्वनामसंज्ञाया अभावपक्षे तु 'ङेर्यः' इति यादेशे कृते स्थानिवद्भावेन यादेशस्य सुप्त्वात् 'सुपि च' इति दीर्घे द्वितीयाय इति च सिद्धम्।

तृतीयशब्दस्य रूपाणि–

तृतीयः, तृतीयौ, तृतीयाः। तृतीयम्, तृतीयौ, तृतीयान्। तृतीयेन, तृतीयाभ्याम्, तृतीयैः। तृतीयस्मै-तृतीयाय, तृतीयाभ्याम्, तृतीयेभ्यः। तृतीयस्मात्-तृतीयस्माद्-तृतीयात्-तृतीयाद्, तृतीयाभ्याम्, तृतीयेभ्यः। तृतीयस्य, तृतीययोः, तृतीयानाम्। तृतीयस्मिन्-तृतीये, तृतीययोः, तृतीयेषु, इति।

द्वितीयायेत्यादि। एवं तृतीयः॥ निर्जरः। **जराया जरसन्यतरस्याम् ७।२।१०१**॥ जराशब्दस्य जरस् वा स्यादजादौ विभक्तौ। पदाङ्गाधिकारे तस्य तदन्तस्य च। निर्दिश्यमानस्यादेशा भवन्ति। एकदेशविकृतमनन्यवदिति जरशब्दस्य जरस्। निर्जरसौ। निर्जरस इत्यादि। पक्षे

निर्जरः, इति। निर्जरशब्दस्य प्रातिपदिकसंज्ञायाम् प्रातिपदिकत्वात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे ‘ससजुषोरुः’ इति रुत्वे ‘खरवसानयोर्विसर्जनीयः’ इति विसर्गे निर्जर इति सिद्धम्।

निर्जरसौ, इति। निर्जरइत्यस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् प्रथमाद्विवचने औ प्रत्यये ‘जराया जरसन्यतरस्याम्’ इतिसूत्रं प्रवृत्तम्। अत्र ‘अष्टन आ विभक्तौ’इत्यतः विभक्तौ इति‘अचि र ऋतः’इत्यतः अचि इति चानुवर्तते। यस्मिन् विधिस्तदादावल्ग्रहणे इतिपरिभाषया तदादिविधिः। ततश्च जराशब्दस्य स्थाने जरस् आदेशो वा स्यात् अजादौ विभक्तौ परे इति सूत्रार्थः। अत्र हि जराशब्दस्याभावात् कथं जरसादेश इतिशङ्कायाम्, ‘पदाङ्गाधिकारे तस्य च तदन्तस्य च, इति परिभाषा प्रवर्तते। पदाधिकारे अङ्गाधिकारे च यत् कार्यं तत् तस्य तदन्तस्य च भवतीति परिभाषार्थः। जराया जरसन्यतरस्यामितिसूत्रस्य अङ्गाधिकारपठितत्वात् जराशब्दस्य जराशब्दान्तस्य च स्थाने जरसादेशो भवति। जरसादेशस्य अनेकल्त्वात् ‘अनेकाल्शित्सर्वस्य’ इति परिभाषया निर्जर इत्यस्य सर्वस्य स्थाने जरसादेशः स्यादिति शङ्कायां ‘निर्दिश्यमानस्यादेशाभवन्ति’ इति परिभाषाप्रवृत्तिः स्यात्। षष्ठीप्रकृतिजन्यप्राथमिकोपस्थितिविषयत्वं निर्दिश्यमानत्वम्। षष्ठीप्रकृतिः जरायाइत्यत्र जरा इति तज्जन्या प्राथमिका–शास्त्रान्तरासहकृता उपस्थितिः जराविषयिका न तु निर्जरविषयिका तस्या पदाङ्गाधिकारे इति शास्त्रसहकारेण ज्ञातत्वात् इति षष्ठीप्रकृतिजन्यप्राथमिकोपस्थितिविषयस्य जराइत्यस्य निर्दिश्यमानत्वम्। तथा च जरा इत्यस्यैव स्थाने जरसादेशः। ननु निर्जरइत्यत्र जराशब्दाभावात् कथं जरसादेश इति शङ्कायाम् ‘एकदेशविकृत-

हलादौ च रामवत् ॥ विश्वपाः । **दीर्घाज्जसि च ६।१।१०५ ॥** दीर्घाज्जसि इचि च परे न पूर्वसवर्णदीर्घः । वृद्धिः । विश्वपौ ।

मनन्यवत्' इति परिभाषा प्रवर्तते । एकदेशविकृतम् अन्यवत् न भवतीति परिभाषार्थः 'छिन्नेऽपि पुच्छे श्वा श्वैव नाश्वो न गर्दभः' इति न्यायात् । तथाचात्र जर इत्यस्य जराशब्देन ग्रहणात् तस्य स्थाने जरसादेशे निर्जरसौ इतिं, जरसादेशाभावपक्षे तु 'निर्जर औ' इत्यवस्थायाम् 'प्रथमयोः पूर्व-सवर्णः, इति पूर्वसवर्णदीर्घे प्राप्ते 'नादिचि' इति निषेधे 'वृद्धिरेचीति' वृद्धौ निर्जरौ इति च सिद्धम् ।

निर्जरशब्दस्य रूपाणि—निर्जरः, निर्जरसौ-निर्जरौ, निर्जरसः-निर्जराः । निर्जरसम्-निर्जरम् । निर्जरसौ-निर्जरौ, निर्जरसः निर्जरान् । निर्जरसा-निर्जरेण, निर्जराभ्याम्, निर्जरैः । निर्जरसे-निर्जराय, निर्जराभ्याम् , निर्जरेभ्यः । निर्जरसः-निर्जरात्-निर्जराद् , निर्जराभ्याम्, निर्जरेभ्यः । निर्जरसः-निर्जरस्य, निर्जरसोः-निर्जरयोः, निर्जरसाम्-निर्जराणाम् । निर्जरसि-निर्जरे, निर्जरसोः-निर्जरयोः, निर्जरेषु, इति ।

विश्वपाः इति । विश्वपाशब्दस्य प्रातिपदिकसंज्ञायाम् प्रातिपदिकत्वात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे 'ससजुषोरुः'इति रुत्वे 'खरवसानयोर्विसर्जनीयः' इति विसर्गे विश्वपाः, इति सिद्धम् ।

विश्वपौ इति । विश्वपाशब्दस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् प्रथमाद्विवचने औ प्रत्यये 'प्रथमयोः पूर्वसवर्णः' इतिपूर्वसवर्णदीर्घे प्राप्ते 'दीर्घाज्जसि च' इति सूत्रं प्रवर्तते । अत्र 'प्रथमयोः पूर्वसवर्णः' इत्यतः पूर्वसवर्ण इति 'नादिचि' इत्यतः न इति इचि इति चानुवर्तते । ततश्च दीर्घात् जसि इचि च परे पूर्वसवर्णदीर्घो न स्यादिति सूत्रार्थः । यद्यपि इह औङि 'नादिचि' इत्यनेनैव निषेधः सिद्धः, जसि तु पूर्वसवर्णदीर्घेऽपि काचित् क्षतिर्नास्ति तथापि गौर्य्यौ, गौर्य्य, इत्याद्यर्थं सूत्रमिहापि न्याय्यत्वादुपन्यस्तम् । तथाचात्र औरूपे इचि परे पूर्वसवर्ण दीर्घनिषेधे 'वृद्धिरेचि, इति वृद्धौ विश्वपौ इति सिद्धम् ।

विश्वपाः । हे विश्वपाः । विश्वपाम् । विश्वपौ ॥ **सुडनपुंसकस्य १।१।४३** ॥ स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य ॥ **स्वादिष्वसर्वनामस्थाने १।४।१७** ॥ कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं पदसंज्ञं स्यात् ॥ **यचि भम् १।४।१८** ॥ यादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं भसंज्ञं

विश्वपाः इति । विश्वपाशव्दस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् प्रथमावहुवचने जस् प्रत्ययेऽनुवन्धलोपे 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे प्राप्ते 'दीर्घाज्जसि च' इति जसि परे पूर्वसवर्णदीर्घनिषेधे 'अकः सवर्णे दीर्घ' इति दीर्घे 'न विभक्तौ तुस्माः' इति सकारेत्संज्ञानिषेधे 'ससजुषो रुः' इति रुत्वे 'खरवसानयोर्विसर्जनीय' इति विसर्गे च कृते विश्वपाः इति सिद्धम् ।

पदसंज्ञाविधायकं 'स्वादिष्वसर्वनामस्थाने' इति सूत्रं वक्ष्यति, तत्र किं सर्वनामस्थानमित्याकाङ्क्षायाम् । **सुडनपुंसकस्येति** । अत्र 'शि सर्वनामस्थानम्, इत्यतः सर्वनामस्थानमित्यनुवर्तते । तस्य वहुवचनान्तत्वेन विपरिणामः । सुडिति सु इत्यारभ्य औटः टकारेण प्रत्याहारः । ततश्च नपुंसकभिन्नप्रातिपदिकस्य संवन्धिनः सु औ जस् अम् औट् एते प्रत्ययाः सर्वनामस्थानसंज्ञका भवन्तीति फलितोऽर्थः ।

स्वादिष्वसर्वनामस्थाने इति । अत्र 'सुप्तिङन्तं पदम्' इत्यतः पदम् इत्यनुवर्तते । स्वादिषु इति सप्तम्या 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषया पूर्वस्येत्यस्य लाभः । व्याख्यानात् कप्प्रत्ययावधिषु इत्यस्य लाभः । तथा च सर्वनामस्थानभिन्नकप्प्रत्ययावधिषु परेषु पूर्वस्य पदसंज्ञा भवतीति सूत्रार्थः ।

यचि भम् इति । य् च अच् च इति समाहारद्वन्द्वः । सौत्रत्वात् 'द्वन्द्वाच्चुदषहान्तात्समाहारे' इतिटजभावः । स्वादिष्वसर्वनामस्थाने इत्यनुवर्तते । तच्च यचि इत्यनेन विशेष्यते । 'यस्मिन् विधिस्तदादावल्ग्रहणे' इतिपरिभाषया तदादिविधिः । पूर्वांशलाभः पूर्वसूत्रवत् ।

स्यात् ॥ **आ कडारादेका संज्ञा १।४।१** ॥ इत ऊर्ध्वं कडाराः कर्मधारय इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया । या पराऽनवकाशा च ॥ **आतो धातोः ६।४।१४०** ॥ आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः । अलोऽन्त्यस्य । विश्वपः । विश्वपा । विश्वपाभ्यामि-

---

ततश्च सर्वनामस्थानभिन्नेषु यकारादिषु अजादिषु च कप्प्रत्ययावधिषु स्वादिषु पूर्वस्य भसंज्ञा भवतीति सूत्रार्थः ।

विश्वपः इति । विश्वपाशब्दस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् द्वितीयाबहुवचने शस् प्रत्ययेऽनुबन्धलोपे 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञा 'यचि भम्' इति भसंज्ञा च प्राप्ता 'आकडारादेका संज्ञा' इति सूत्रप्रवृत्त्या संज्ञयोर्विरोधाभावेऽपि एकैव संज्ञा विधेया । ततश्च अत्र परत्वादनवकाशत्वाच्च 'यचि भम्' इति भसंज्ञायाम् 'आतोधातोः' इतिसूत्रं प्रवृत्तम् । अत्र 'अङ्गस्य' इति 'भस्य' इति चाधिक्रियते । अत इति धातोरित्यस्य विशेषणम्, तदन्तविधिः । 'अल्लोपोऽनः' इत्यतः लोप इत्यनुवर्तते । धातोरिति अङ्गस्येत्यस्य विशेषणम्, तदन्तविधिः । ततश्च आकारान्तो यो धातुस्तदन्तस्य भसंज्ञकस्य अङ्गस्य लोपः स्यादिति सूत्रार्थः । अत्र आकारान्तो धातुः पा इति तदन्तं भसंज्ञकमङ्गं विश्वपा इति तस्य लोपे प्राप्ते 'अलोऽन्त्यस्य' इतिपरिभाषया पकारोत्तरवर्तिनः अकारस्य लोपे 'ससजुषोरुः' इति सस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे विश्वपः, इति सिद्धम् ।

विश्वपा-इति । विश्वपाशब्दस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् तृतीयैकवचने टा प्रत्ययेऽनुबन्धलोपे 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञा 'यचिभम्' इति भसंज्ञा च प्राप्ता परत्वादनवकाशत्वाच्च भसंज्ञायाम् 'अलोऽन्त्यस्य' इति परिभाषया 'आतो धातोः' इतिसूत्रेण पकारोत्तरवर्त्तिन आकारस्य लोपे विश्वपा इति सिद्धम् ।

विश्वपाशब्दस्य रूपाणि—

विश्वपाः, विश्वपौ, विश्वपाः । विश्वपाम्, विश्वपौ, विश्वपः ।

त्यादि । एवं शंखध्मादयः । धातोः किम् । हाहान् । हरिः । हरी । जसि

विश्वपा, विश्वपाभ्याम् , विश्वपाभिः । विश्वपे, विश्वपाभ्याम् , विश्वपाभ्यः । विश्वपः, विश्वपाभ्याम् , विश्वपाभ्यः । विश्वपः, विश्वपोः, विश्वपाम् । विश्वपि, विश्वपोः, विश्वपासु । इति ।

शङ्खध्माशब्दस्य रूपाणि—

शङ्खध्माः, शङ्खध्मौ, शङ्खध्माः । शङ्खध्माम् , शङ्खध्मौ, शङ्खध्मः । शङ्खध्मा, शङ्खध्माभ्याम् , शङ्खध्माभिः । शङ्खध्मे, शङ्खध्माभ्याम् , शङ्खध्माभ्यः । शङ्खध्मः, शङ्खध्माभ्याम् , शङ्खध्माभ्यः । शङ्खध्मः, शङ्खध्मोः, शङ्खध्माम् । शङ्खध्मि, शङ्खध्मोः, शङ्खध्मासु । इति ।

हाहान् इति । हाहाशब्दस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् । द्वितीयावहुवचने शस् प्रत्ययेऽनुबन्धलोपे 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे 'तस्माच्छसो नः पुंसि' इति सकारस्य नकारे हाहान् इति सिध्यति । आतोधातोरितिसूत्रे धातोरित्यस्याभावे आकारान्तस्य भसंज्ञकस्याङ्गस्य लोप इत्यर्थे हाहाशब्दस्याकारान्तत्वात् शसि आकारलोपे हाहः' इत्यानिष्टं प्रसज्येत अतः धातोरित्यावश्यकम् । सति तु तस्मिन् अत्राकारान्तधातोरसत्त्वात् न आकारलोप इति शम् ।

हाहाशब्दस्य रूपाणि ।

हाहाः, हाहौ, हाहाः । हाहाम्, हाहौ, हाहान् । हाहा, हाहाभ्याम्, हाहाभिः । हाहै, हाहाभ्याम्, हाहाभ्यः । हाहाः, हाहाभ्याम्, हाहाभ्यः । हाहाः, हाहौः, हाहाम् । हाहे, हाहौः, हाहासु, इति ।

हरिः इति । हरिशब्दस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् प्रथमैकवचने सु प्रत्ययेऽनुबन्धलोपे 'ससजुषो रुः' इति सस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे हरिः इति सिद्धम् ।

हरी इति । हरि इत्यस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् प्रथमाद्विवचने औ प्रत्यये 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण रेफोत्तर-

च ७।३।१०९ ॥ ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि ॥ हरयः ॥ **ह्रस्वस्य गुणः ७।३।१०८ ॥** सम्बुद्धौ । हे हरे । हरिम् । हरी । हरीन् ॥ **शेषो**

वर्तिन इकारादकः प्रथमासम्बन्धिनि औकारेऽचि परे पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घे ईकारे कृते हरी इति सिद्धम् ।

हरयः इति । हरि इत्यस्य प्रातिपदिकसंज्ञायाम् प्रातिपदिकत्वात् प्रथमाबहुवचने जस् प्रत्यये 'चुटू' इति जकारस्येत्संज्ञायां लोपे 'हलन्त्यम' इति सकारस्येत्संज्ञायां प्राप्तायां 'न विभक्तौ तुस्माः' इति निषेधे हरि अस् इति स्थिते 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे प्राप्ते तं प्रबाध्य 'जसि च' इतिसूत्रं प्रवृत्तम् । अत्र 'ह्रस्वस्य गुणः' इत्यनुवर्तते । अङ्गस्येत्यधिक्रियते । तस्य ह्रस्वस्येति विशेषणम् । तदन्तविधिः । ततश्च ह्रस्वान्तस्याङ्गस्य गुणः स्यात् जसि परे इति सूत्रार्थः । तथाचात्र 'अलोऽन्त्यस्य' इतिपरिभाषया तालुस्थानजन्यस्य रेफोत्तरवर्तिन इकारस्य स्थाने आन्तरतम्यादेकारे गुणे 'एचोऽयवायावः' इतिसूत्रेण एकारस्य अयादेशे ससजुषोरुरिति सस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इतिरेफस्य विसर्गे कृते हरयः इति सिद्धम् ।

हे हरे इति । हरि इत्यस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात्संबोधनप्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे 'एकवचनं संबुद्धिः' इति सम्बुद्धिसंज्ञायां यस्मात्प्रत्यविधिरित्यङ्गसंज्ञायां हे शब्दस्य प्राक्प्रयोगे हे हरि स् इति स्थिते 'ह्रस्वस्य गुणः' इति सूत्रं प्रवर्तते । अत्र 'संबुद्धौ च' इत्यतः सम्बुद्धौ इत्यनुवर्तते । ततश्च ह्रस्वस्य गुणः स्यात् सम्बुद्धौ परे इति सूत्रार्थः । तथाच अत्र गुणे 'एङ्ह्रस्वात्सम्बुद्धेः' इति सम्बुद्धिलोपे हे हरे इति सिद्धम् ।

हरिम् इति । हरि इत्यस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् द्वितीयैकवचने अम् प्रत्यये 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्ण दीर्घे प्राप्ते तं बाधित्वा 'अमिपूर्वः' इति पूर्वरूपे हरिम् इति सिद्धम् ।

हरी इति । हरि शब्दस्य प्रातिपदिकत्वात् द्वितीयाद्विवचने औट्

घ्यसखि १।४।७ ॥ शेष इति स्पष्टार्थम् । अनदीसंज्ञौ ह्रस्वौ याविदुतौ तदन्तं सखिवर्जं घिसंज्ञम् ॥ **आङो नाऽस्त्रियाम् ७।३।१२० ॥** घेः परस्याङो ना स्यादस्त्रियाम् । आङिति टासंज्ञा । हरिणा । हरिभ्याम् । हरिभिः ॥ **घेर्ङिति ७।३।१११ ॥** घिसंज्ञस्य ङिति सुपि गुणः ।

प्रत्ययेऽनुबन्धलोपे 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे हरी इति सिद्धम् ।

हरीन् इति । हरि शब्दस्य प्रातिपदिकत्वात् द्वितीयाबहुवचने शस्-प्रत्ययेऽनुबन्धलोपे 'प्रथमयोः पूर्वसवर्ण' इति पूर्वसवर्णदीर्घे 'तस्माच्छसो नः पुंसि' इति सकारस्य नकारे 'अट्कुप्वाङ्नुम्व्यवायेऽपि, इति तस्य णत्वे प्राप्ते 'पदान्तस्य' इति निषेधे हरीन् इति सिद्धम् ।

हरिणा, इति । हरि इत्यस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् तृतीयैकवचने टा प्रत्ययेऽनुबन्धलोपे कृते 'शेषोघ्यसखि' इति सूत्रं प्रवृत्तम् । अत्र 'यू स्त्र्याख्यौ नदी' इत्यतो यू इत्यनुवर्तते । तेन इवर्णोवर्णावितिलभ्यते । 'ङिति ह्रस्वश्च' इत्यतो ह्रस्व इति चानुवर्तते । उक्तात् नदीसंज्ञकाद् अन्यः शेषः । ह्रस्व इत्यस्य शेष इत्यस्य च इवर्णोवर्णाभ्यां प्रत्येकमन्वयः शब्दस्वरूपमित्यध्याहार्यम् । तस्य यू इति विशेषणम् । तदन्तविधिः । असखीति पर्युदासः । ततश्च नदीसंज्ञकभिन्नौ ह्रस्वौ याविवर्णोवर्णौ तदन्तं सखिभिन्नं शब्दस्वरूपं घिसंज्ञं स्यादिति सूत्रार्थः । तथाचात्र नदीसंज्ञकभिन्नत्वेन ह्रस्वेकारान्तत्वेन च हरि इत्यस्य घिसंज्ञायाम् 'आङो नाऽस्त्रियाम्' इति सूत्रं प्रवर्तते । अत्र 'अच्चघेः' इत्यतो घेरित्यनुवर्तते । घेरिति पञ्चम्या परत्वलाभः । ततश्च घिसंज्ञकात्परस्य आङः—टा इत्यस्य स्थाने ना आदेशः स्यादस्त्रियाम्-इति सूत्रार्थः । तथाचात्र घिसंज्ञकाद् हरिशब्दात् परस्य आ इत्यस्य स्थाने नादेशे हरिना इति स्थिते 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति नकारस्य णत्वे हरिणा इति सिद्धम् ।

हरिभिरिति । हरि इत्यस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात्तृतीयाबहुवचने भिस् प्रत्यये सकारस्य हलन्त्यमितीत्संज्ञायाः 'न

हरये । हरिभ्याम् । हरिभ्यः ॥ **ङसिङसोश्च** ६।१।११० ॥ एङो ङसिङसोरति परे पूर्वरूपमेकादेशः । हरेः २ । हर्योः २ । हरीणाम् ॥ अच्च

विभक्तौ तुस्माः' इति निषेधे 'ससजुषोरुः' इति सकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे हरिभिरिति सिद्धम् ।

हरये, इति । हरि इत्यस्य प्रातिपदिकसंज्ञायां घिसंज्ञायां प्रातिपदिकत्वाच्चतुर्थ्येकवचने ङे प्रत्ययेऽनुबन्धलोपे हरि ए इति स्थिते 'घेर्ङिति' इति सूत्रं प्रवर्तते । अत्र 'सुपि च' इत्यतः सुपीति 'ह्रस्वस्य गुणः' इत्यतो गुण इति चानुवर्तते । ततश्च घिसंज्ञकस्य शब्दस्य ङिति सुपि परे गुणः स्यादिति सूत्रार्थः । तथाचात्र 'अलोऽन्त्यस्य' इति परिभाषया एकारे परे हरि इत्यत्र रेफोत्तरवर्तिन इकारस्यान्तरतम्यादेकारे गुणे कृते हरे ए इति स्थिते 'एचोऽयवायावः' इति सूत्रेण एकारस्य स्थाने अयादेशे हरये इति सिद्धम् ।

हरेः इति—हरि इत्यस्य प्रातिपदिकसंज्ञायां घिसंज्ञायां प्रातिपदिकत्वात् पञ्चम्येकवचने ङसि प्रत्यये ऽनुबन्धलोपे 'घेर्ङिति' इति गुणे कृते हरे अस् इति स्थिते 'एचोऽयवायावः' इत्ययादेशे प्राप्ते तं बाधित्वा 'ङसिङसोश्च' इति सूत्रं–प्रवृत्तम् । अत्र 'एङः पदान्तादति' इति सूत्राद् एङ इति, अति इति चानुवर्तते । 'अमि पूर्वः' इत्यतः पूर्व इत्यनुवर्तते । एकः पूर्वपरयोरित्यधिक्रियते । ततश्च एङ्प्रत्याहारान्तःपातिवर्णाद् ङसिङसोरति परे पूर्वपरयोः पूर्वरूपमेकादेशः स्यादिति सूत्रार्थः । तथाचात्र रेफोत्तरवर्त्तिन एकाराद् ङसिप्रत्ययाकारे परे पूर्वपरयोः स्थाने पूर्वरूपे 'ससजुषोरुः' इति सस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे हरेरिति सिद्धम् । एवं षष्ठ्येकवचनेऽपि बोध्यम् ।

हर्योरिति—हरिइत्यस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् षष्ठीद्विवचने ओस् प्रत्यये 'न विभक्तौ तुस्माः' इतिसकारेत्संज्ञानिषेधे 'इको यणचि' इति यणि 'ससजुषोरुः' इति सस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे हर्योरिति सिद्धम् ।

घेः ७।३।११९ ॥ इदुद्भ्यामुत्तरस्य ङेरौत्, घेरच्च । हरौ । हरिषु । एवं

हरीणामिति–हरि इत्यस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् षष्ठीबहुवचने आम् प्रत्यये ‘ ह्रस्वनद्यापो नुट् ’ इति नुडागमेऽनुबन्धलोपे ‘ नामि ’ इति दीर्घे ‘ अट्कुप्वाङ्नुम्व्यवायेऽपि ’ इति रेफोत्तरवर्तिन इकाररूपाटो व्यवधानेऽपि रेफात्परस्य नस्य णत्वे हरीणामिति सिद्धम् ।

हरौ, इति–हरि इत्यस्य प्रातिपदिकसंज्ञायां घिसंज्ञायां प्रातिपदिकत्वात् सप्तम्येकवचने ङिप्रत्ययेऽनुबन्धलोपे हरि इ इतिस्थिते ‘ घेर्ङिति ’ इति गुणे प्राप्ते ‘ अच्च घेः ’ इति सूत्रं प्रवृत्तम् । अत्र ‘ ङेराम्नद्याम्नीभ्यः ’ इत्यतो ङेरित्यनुवर्तते । ‘ इदुद्भ्याम् ’ इति ‘ औत् ’ इति च सूत्रमनुवर्तते । ‘ अलोऽन्त्यस्य ’ इति परिभाषोपस्थितिः । तस्मादित्युतरस्येति परिभाषया इदुद्भ्यामित्यत्र पञ्चम्या उत्तरस्येति लभ्यते । ततश्च-इदुद्भ्यामुत्तरस्य ङिप्रत्ययस्य स्थाने औकारादेशः स्यात् घिसंज्ञकस्यान्तादेशश्चाकारः स्यादिति सूत्रार्थः । तथाचात्र रेफोत्तरस्येकारस्य स्थाने अकारादेशे ङेः स्थाने औकारादेशे च कृते हर औ इति स्थिते ‘ वृद्धिरेचि ’ इति वृद्धौ हराविति सिद्धम् ।

हरिषु, इति–हरि इत्यस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात्सप्तमीबहुवचने सुप्प्रत्ययेऽनुबन्धलोपे ‘ आदेशप्रत्यययोः ’ इति षत्वे हरिषु इति सिद्धम् ।

हरिशब्दस्य रूपाणि—

हरिः हरी हरयः । हरिम् हरी हरीन् । हरिणा हरिभ्याम् हरिभिः । हरये हरिभ्याम् हरिभ्यः । हरेः हरिभ्याम् हरिभ्यः । हरेः हर्योः हरीणाम् । हरौ हर्योः हरिषु । हे हरे हे हरी हे हरयः इति ।

कविशब्दस्य रूपाणि–

कविः, कवी, कवयः । कविम्, कवी, कवीन् । कविना, कविभ्याम्, कविभिः । कवये, कविभ्याम्, कविभ्यः । कवेः,

क्व्यादयः ॥ **अनङ् सौ ७।१।९३** ॥ सख्युरङ्गस्यानङादेशोऽसंबुद्धौ सौ ॥ **अलोऽन्त्यात्पूर्व उपधा १।१।६५** ॥ अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः ॥ **सर्वनामस्थाने चासंबुद्धौ ६।४।८** ॥ नान्तस्योपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने ॥ **अपृक्त एकाल् प्रत्ययः १।२।४१** ॥ एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात् ॥ **हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तंहल् ६।१।६८**॥ हलन्तात्परं, दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते ॥ **नलोपः प्रातिपदिकान्तस्य ८।२।७**॥ प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नस्य लोपः । सखा ॥ **सख्युरसंबुद्धौ ७।१।९२** ॥ सख्युरङ्गात्परं संबु-

कविभ्याम्, कविभ्यः । कवेः, कव्योः, कवीनाम् । कवौ, कव्योः, कविषु । हे कवे, हे कवी, हे कवयः, इति ।

सखा, इति । सखि इत्यस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे सखि स् इति स्थिते यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गमित्यङ्गसंज्ञायां 'अनङ् सौ' इति सूत्रं प्रवृत्तम् । अत्र 'सख्युरसम्बुद्धौ' इति सूत्रमनुवर्तते । अङ्गस्येत्यधिक्रियते । तथा च अङ्गसंज्ञकस्य सखिशब्दस्य अनङ् आदेशः स्यात्सम्बुद्धिभिन्ने सुप्रत्यये परे इति सूत्रार्थः । तथाचात्र 'ङिच्च' इति परिभाषया खकारोत्तरवर्तिन इकारस्य स्थानेऽनङादेशेऽनुबन्धलोपे सखन् स् इति स्थिते 'अलोऽन्त्यात्पूर्व उपधा' इति सूत्रं प्रवर्तते । अल इति पञ्चमी अन्त्यादिति सामानाधिकरण्यात् । साजात्यात्पूर्वोऽप्यलेव गृह्यते । अल्प्रत्याहारः वर्णपर्यायः । ततश्च अन्ते विद्यमानाद् वर्णात्पूर्वो वर्ण उपधासंज्ञः स्यादिति सूत्रार्थः । तथाचात्र अन्ते विद्यमानाद् नकारादलः पूर्वोवर्णः खकारोत्तरवर्ती अकारस्तस्य उपधासंज्ञायाम् 'सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रं प्रवृत्तम् । अङ्गस्येत्यधिक्रियते । 'नोपधायाः' इति 'ढ्लोपे पूर्वस्य दीर्घोऽणः' इत्यतो दीर्घ इति चानुवर्तते । न इति लुप्तषष्ठ्यन्तमङ्गस्येत्यस्य विशेषणम् । तदन्तविधिः ।

द्विवर्जं सर्वनामस्थानं णिद्वत्स्यात् ॥ **अचो ञ्णिति ७।२।११५ ॥**
अजन्ताङ्गस्य वृद्धिर्ञिति णिति च परे । सखायौ । सखायः । हे सखे ।

अङ्गस्येत्यवयवषष्ठी । ततश्च नकारान्तस्याङ्गस्य अवयवभूतोपधाया दीर्घः स्यात्सम्बुद्धिभिन्ने सर्वनामस्थाने परे, इति सूत्रार्थः । तथा चात्र सौ सम्बुद्धिभिन्ने सर्वनामस्थाने परे नकारान्तमङ्गं सखन् इति तदवयवभूतोपधा खकारोत्तरवर्ती अकारस्तस्य दीर्घे सखान् स् इति जाते 'अपृक्त एकाल् प्रत्ययः' इति सूत्रं प्रवर्तते । एकश्चासावल् एकालिति कर्मधारयः । एकाल् रूपः प्रत्ययोऽपृक्तसंज्ञो भवतीति सूत्रार्थः । तथा च स् इत्यस्यापृक्तसंज्ञायां 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सूत्रं प्रवृत्तम् । अत्र 'लोपो व्योर्वलि' इत्यतो लोप इत्यनुवर्तते । हल् च ङी च आप् च हल्ङ्यापस्तेभ्य इति विग्रहः । पञ्चम्या परत्वलाभः । दीर्घादिति ङ्यापोरेव विशेषणं न तु हलोऽसम्भवात् । हल्ङ्यब्भ्य इत्यस्य सुतिस्याक्षिप्तप्रकृतिविशेषणतया तदन्तविधिः: सुतिसि इति समाहार द्वन्द्वः उकारे इकारे च लुप्ते परिशिष्टः सकारस्तकारश्च सुतिसि इत्यनेन विवक्ष्यते । तत्र हलित्यस्य अपृक्तमित्यस्य च सामानाधिकरण्येनान्वयः । 'सहचरितासहचरितयोर्मध्ये सहचरितस्यैव ग्रहणम्' इति परिभाषया तिप्साहचर्यात्तिङः सिप एव ग्रहणं न तु सिचः । अत्र ङ्याब्ग्रहणं सोरेव विशेषणं न तु तिस्योः, व्याख्यानात् । व्याख्यानं च विस्तरभयान्नेह लिख्यते । ततश्च—हलन्तात्परं सुतिसीत्येतदपृक्तं हल् लुप्यते, दीर्घौ यौ ङ्यापौ तदन्तात्परं सु इत्येतदपृक्तं हल् लुप्यते, इति निष्कृष्टः सूत्रार्थः । तथा चात्र सखान् इति हलन्तात्परस्य सु इत्येतदपृक्तस्य हलो लोपे 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रं प्रवृत्तम् । अत्र 'पदस्य' इत्यधिक्रियते । नेति प्रातिपदिकेति च लुप्तषष्ठीकं पदम् । अन्तशब्दोऽवयववाची । ततश्च प्रातिपदिकसंज्ञकं यत्पदं तदन्तावयवस्य नकारस्य लोपः स्यादिति मूलोक्तार्थःफलितः । तथाचात्र प्रातिपदिकसंज्ञकं पदं सखन् इति तदन्तावयवस्य नकारस्य लोपे सखेति सिद्धम् ।

सखायम् । सखायौ । सखीन् । सख्या । सख्ये ॥ **ख्यत्यात्परस्य ६।१।११२ ॥** खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य

सखायौ इति—सखि इत्यस्य प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात्प्रथमाद्विचने औप्रत्यये सखि औ इतिस्थिते 'इको यणचि' इति यणि प्राप्ते 'सख्युरसम्बुद्धौ' इति सूत्रं प्रवृत्तम् । अत्र 'इतोऽत्सर्वनामस्थाने' इत्यतः सर्वनामस्थाने इति, 'गोतो णित्' इत्यतो णिदिति चानुवर्त्तते । सख्युरितिपञ्चम्या परत्वलाभः । अङ्गस्येत्यधिक्रियते, तस्य पञ्चम्यन्तत्वेन विपरिणामः । णिदितिसामानाधिकरण्यानुरोधेन असम्बुद्धावित्यस्य सर्वनामस्थाने इत्यस्य च प्रथमान्तत्वेन विपरिणामः । ततश्च अङ्गसंज्ञकात्सखिशब्दात्परं सम्बुद्धिभिन्नं सर्वनामस्थानं णिद्वत् = णित्कार्यकृत्स्यादिति सूत्रार्थः । तथाचात्र औ, इत्यस्य णिद्वद्भावे 'अचोञ्णिति' इति सूत्रं प्रवृत्तम् । अत्र 'मृजेर्वृद्धिः' इत्यतो वृद्धिरित्यनुवर्तते । अङ्गस्येत्यधिक्रियते । तस्य अच इति विशेषणम् । तदन्तविधिः । ञ् च ण् च ञ्णौ, ञ्णौ इतौ यस्य तत् ञ्णिदिति विग्रहः । ततश्च अजन्तस्याङ्गस्य वृद्धिः स्याद् ञिति णिति च परे इति सूत्रार्थः । तथाचात्र णिति औ प्रत्यये परेऽलोऽन्त्यस्येतिपरिभाषया खकारोत्तरवर्त्तिन इकारस्य स्थाने आन्तरतम्यादैकारे वृद्धौ 'एचोऽयवायावः' इति सूत्रेण औकारेऽचिपरे ऐकारस्य आयादेशे सखायाविति सिद्धम् ।

सखायः, इति—सखि इत्यस्य प्रातिपदिकत्वात्प्रथमाबहुवचने जस्प्रत्ययेऽनुबन्धलोपे 'सख्युरसम्बुद्धौ' इति णिद्वद्भावे 'अचोञ्णिति' इति वृद्धौ 'एचोऽयवायावः' इत्यायादेशे 'ससजुषो रुः' इति सस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य स्थाने विसर्गे कृते—सखायः, इति सिद्धम् ।

ख्यत्यादिति । खिखी इत्यनयोः तिती इत्यनयोश्च कृतयणादेशयोः ख्यत्य इति निर्देशः । 'एङः पदान्तादति' इत्यतः अतीत्यनुवर्तते । तस्य परस्येति सामानाधिकरण्यात् षष्ठ्यन्तत्वेन विपरिणामः । 'ङसिङसोश्च' इत्यतः ङसिङसोरिति 'ऋत उत्' इत्यतः उदितिचानुवर्तते । ततो मूलोक्तार्थलाभः ।

ङसिङसोरत उः । सख्युः ॥ **औत् ७।३।११८** ॥ इदुद्भ्यां परस्य ङेरौत् । सख्यौ । शेषं हरिवत् ॥ **पतिः समास एव १।४।८** ॥ पतिशब्दः समास एव घिसंज्ञः । पत्ये । पत्युः २ । पत्यौ । शेषं हरिवत् । समासे

सख्युरिति । सखिशब्दस्य प्रातिपदिकत्वात्पञ्चम्येकवचने ङसि प्रत्ययेऽनुबन्धलोपे ‘ इकोयणचि ’ इति यणि ‘ ख्यत्यात्परस्य ’ इत्युत्वे रुत्वे विसर्गे च कृते सख्युरिति सिद्धम् ।

औत् । इदुद्भ्यामिति सूत्रमनुवर्तते ‘ङेराम्नद्याम्नीभ्यः’ इत्यतोङेरितिच ।

सख्यौ । सखिशब्दस्य प्रातिपदिकत्वात्सप्तम्येकवचने ङिप्रत्ययेऽनुबन्धलोपे ‘औत्’ इति ङेरौत्वे यणि सख्याविति सिद्ध्यति ।

सखिशब्दस्य रूपाणि । सखा, सखायौ, सखायः । सखायम्, सखायौ, सखीन् । सख्या, सखिभ्याम्, सखिभिः । सख्ये, सखिभ्याम्, सखिभ्यः । सख्युः, सखिभ्याम्, सखिभ्यः । सख्युः, सख्योः, सखीनाम् । सख्यौ, सख्योः, सखिषु । हे सखे, हे सखायौ, हे सखायः ।

पतिरिति । ‘शेषोध्यसखि’ इत्यतो घीत्यनुवर्तते ।

पत्ये इति । पतिशब्दस्य प्रातिपदिकत्वाच्चतुर्थ्येकवचने ङे प्रत्ययेऽनुबन्धलोपे ‘शेषो घ्यसखि’ इति घिसंज्ञायां प्राप्तायाम् ‘पतिः समास एव’ इत्यस्य नियमार्थत्वात्तदभावेन ‘घेर्ङिति’ इति गुणाभावे यणि पत्ये इति सिद्धम् ।

पत्युरिति । पतिशब्दस्य प्रातिपादकत्वात्पञ्चम्येकवचने ङसिप्रत्ययेऽनुबन्धलोपे यणि ‘ख्यत्यात्परस्य’ इत्युत्वे रुत्वे विसर्गे च कृते पत्युरिति सिद्धम् ।

पत्यौ इति । पतिशब्दस्य प्रातिपदिकत्वात्सप्तम्येकवचने ङिप्रत्ययेऽनुबन्धलोपे ‘आत्’ इत्यौत्वे यणि पत्याविति सिद्धम् ।

पतिशब्दस्य रूपाणि । पतिः, पती, पतयः । पतिम्, पती, पतीन् । पत्या, पतिभ्याम्, पातिभिः । पत्ये, पतिभ्याम्, पतिभ्यः ।

CC0. In Public Domain. Digitization by eGangotri

२लो ॥६।१।९० ॥ औ आतो ङितः ॥

षड्भ्यो लुक ॥७।१।२२॥
१९६

जनपदे लुप् ॥४।२।८१

तु भूपतये । कतिशब्दो नित्यं बहुवचनान्तः ॥ **बहुगणवतुडति संख्या १।१।२२** ॥ एते संख्यासंज्ञाः स्युः । **डति च १।१।२५** ॥ डत्यन्ता संख्या षट्संज्ञा स्यात् । **षड्भ्यो लुक् ७।१।२२**॥ षड्भ्यः परयोर्जश्शसोः लुक् स्यात् ॥ **प्रत्ययस्य लुक्श्लुलुपः १।१।६१**॥ लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात् ॥ **प्रत्ययलोपे प्रत्ययलक्षणम् १।१।६२** ॥ प्रत्यये लुप्ते तदाश्रितं कार्यं स्यात् । इति जसि चेति गुणे प्राप्ते । **न लुमताऽङ्गस्य १।१।६३** ॥ लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात् । कति २ । कतिभिः । कतिभ्यः २ । कतीनाम् । कतिषु । युष्मदस्मत्षट्संज्ञकास्त्रिषु सरूपाः ।

पत्युः, पतिभ्याम्, पतिभ्यः । पत्युः, पत्योः, पतीनाम् । पत्यौ, पत्योः, पतिषु । हे पते, हे पती, हे पतयः । इति ।

समासे तु भूपत्यादिशब्दस्य घिसंज्ञया हरिशब्दवद्रूपाणि । तथाहि-भूपतिः, भूपती, भूपतयः । भूपतिम्, भूपती, भूपतीन् । भूपतिना, भूपतिभ्याम, भूपतिभिः । भूपतये, भूपतिभ्याम्, भूपतिभ्यः । भूपतेः, भूपतिभ्याम्, भूपतिभ्यः । भूपतेः, भूपत्योः, भूपतीनाम् । भूपतौ, भूपत्योः, भूपतिषु । हे भूपते हे भूपती, हे भूपतयः ।

डति च । डतीत्यविभक्तिको निर्देशः । प्रत्ययत्वात्तदन्तग्रहणम् । अत्र पूर्वसूत्रात्संख्येति 'ष्णान्ता षट्' इत्यतः षडिति चानुवर्तते ।

षड्भ्यो लुक् । 'जश्शसोः शिः' इत्यतो जश्शसोरित्यनुवर्तते ।

कति इति । कतिशब्दाज्जसि प्रत्ययेऽनुबन्धलोपे 'बहुगणवतुडति संख्या' इति संख्यासंज्ञायां 'डति च' इति षट्संज्ञायां 'षड्भ्यो लुक्' इति जसो लुकि 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति प्रत्ययलक्षणत्वात् 'जसि च' इति गुणे प्राप्ते 'न लुमताङ्गस्य' इति प्रत्ययलक्षणनिषेधाद्गुणाभावे कतीति सिद्धम् ।

कतीनाम् इति । कतिशब्दादामि 'ह्रस्वनद्यापो नुट्' इति 'षट्चतुर्भ्यश्च' इति वा नुडागमेऽनुबन्धलोपे 'नामि' इति दीर्घे कतीनाम् इति सिद्धम् ।

त्रिशब्दो नित्यं बहुवचनान्तः । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः २ **त्रेस्त्रयः ७।१।५३ ॥** त्रिशब्दस्य त्रयादेशः स्यादामि । त्रयाणाम् । त्रिषु । गौणत्वेपि प्रियत्रयाणाम् ॥ **त्यदादीनामः ७।२।१०२ ॥** एषामकारो विभक्तौ । (द्विपर्य्यन्तानामेवेष्टिः) । द्वौ । द्वौ । द्वाभ्याम् ३ । द्वयोः २। पाति लोकामिति पपीः सूर्यः ॥ **दीर्घाज्जसि च ६।१।१०५ ॥** दीर्घाज्जसि इचि च परे न पूर्वसवर्णदीर्घः । पप्यौ । पप्यः ।

त्रयः इति । त्रिशब्दाज्जसि प्रत्ययेऽनुबन्धलोपे 'जसि च' इति गुणे 'एचोऽयवायावः' इत्ययादेशे रुत्वे विसर्गे च कृते त्रय इति सिद्धम् ।

त्रीन् इति । त्रिशब्दाच्छसि प्रत्ययेऽनुबन्धलोपे 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे 'तस्माच्छसो नः पुंसि' इति नत्वे त्रीनिति साधु ।

त्रेस्त्रयः । अत्र 'आमि सर्वनाम्नः सुट्' इत्यत आमीत्यनुवर्तते ।

त्रयाणाम् इति । त्रिशब्दादामि 'त्रेस्त्रयः' इति त्रेस्त्रयादेशे 'ह्रस्वनद्यापो नुट्' इति नुडागमेऽनुबन्धलोपे 'नामि' इति दीर्घे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति णत्वे त्रयाणामिति सिद्धम् ।

त्यदादीनामः । अत्र 'अष्टन आविभक्तौ' इत्यतो विभक्ताविव्यनुवर्तते ।

द्वौ इति । द्विशब्दाद् औविभक्तौ 'त्यदादीनामः' इत्यत्वे 'वृद्धिरेचि' इति वृद्धौ द्वाविति सिद्धम् ।

द्वाभ्याम् । द्विशब्दाद् भ्यामि विभक्तौ ' त्यदादीनामः ' इत्यत्वे ' सुपि च ' इति दीर्घे द्वाभ्यामिति सिद्धम् ।

द्वयोरिति । द्विशब्दादोसि प्रत्यये ' त्यदादीनामः ' इत्यत्वे ' ओसि च ' इत्येत्वे अयादेशे रुत्वे विसर्गे च कृते द्वयोरिति सिद्धम् ।

पप्यौ इति । पपीशब्दाद् औ विभक्तौ ' प्रथमयोः पूर्वसवर्णः '

हे पपीः । पपीम् । पपीन् । पप्या । पपीभ्याम् ३ । पपीभिः । पप्ये । पपीभ्यः २ । पप्यः । पप्योः । दीर्घत्वान्न नुट् पप्याम् । ङौ तु सवर्णदीर्घः । पपी । पप्योः । पपीषु । एवं वातप्रम्यादयः । बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी ॥ **यू स्त्र्याख्यौ नदी १।४।३** ॥ ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः । (प्रथमलिङ्गग्रहणं च) । पूर्वं स्त्र्याख्यस्योपसर्जनत्वेऽपि नदीत्वं वक्तव्यमित्यर्थः ॥ **अम्बार्थनद्योर्ह्रस्वः ७।३।१०७** ॥ अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात् सम्बुद्धौ । हे बहुश्रेयसि ॥ **आण्नद्याः ७।३।११२** ॥ नद्यन्तात्परेषां ङितामाडागमः ॥ **आटश्च ६।१।९०** ॥ आटोऽचि परे वृद्धिरेकादेशः । बहुश्रेयस्यै । बहुश्रेयस्याः । बहुश्रेयसीनाम् ॥ **ङेराम्नद्याम्नीभ्यः**

इति पूर्वसवर्णदीर्घे प्राप्ते 'दीर्घाज्जसि च' इति तन्निषेधे यणि पप्याविति साधु ।

बहुश्रेयसी इति । बहुश्रेयसीशब्दस्य प्रातिपदिकत्वात्सौ 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सुलोपे बहुश्रेयसीति सिद्धम् ।

अम्बार्थेति । अत्र 'सम्बुद्धौ च' इत्यनुवर्तते ।

हे बहुश्रेयसि इति । बहुश्रेयसीशब्दात्सम्बोधनप्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे अस्य शब्दस्य पुंल्लिङ्गत्वाद् 'यूस्त्र्याख्यौ नदी' इति सूत्रेण नदीसंज्ञाया अप्राप्त्या 'प्रथमलिङ्गग्रहणं च' इति वार्तिकेन नदीसंज्ञायाम् 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वे 'एङ्ह्रस्वात्सम्बुद्धेः' इति सम्बुद्धिलोपे हेशब्दस्य प्राक्प्रयोगे हे बहुश्रेयसि इति साधु।

आण्नद्याः । अत्र अङ्गस्येत्यधिकृतं पञ्चम्यन्तत्वेन विपरिणम्यते । नद्या इति पञ्चम्यन्तं तस्य विशेषणम् । तदन्तविधिः । 'घेर्ङिति' इत्यतो ङितीत्यनुवर्तते तस्य षष्ठ्यन्तत्वेन विपरिणामः ।

आटश्च । अत्र 'इको यणचि' इत्यतोऽचीत्यनुवर्तते । 'वृद्धिरेचि' इत्यतो वृद्धिरिति च । एकः पूर्वपरयोरित्यधिक्रियते ।

बहुश्रेयस्यै इति । बहुश्रेयसीशब्दाच्चतुर्थ्येकवचने ङेप्रत्ययेऽनु-

७।३।११६ ॥ नद्यन्तादाबन्तान्नीशब्दाच्च परस्य ङेराम् । बहुश्रेयस्याम् । शेषं पपीवत् ॥ अङ्यन्तत्वान्न सुलोपः । अतिलक्ष्मीः । शेषं बहुश्रेयसीवत् । प्रधीः ॥

बन्धलोपे नदीसंज्ञायाम् ‘ आण्नद्याः ’ इत्याडागमेऽनुबन्धलोपे ‘ आटश्च ’ इतिवृद्धौ ‘ इको यणचि ’ इति यणि बहुश्रेयस्यै इति साधु ।

बहुश्रेयस्याः इति । बहुश्रेयसीशब्दात्पञ्चम्येकवचने ङसिप्रत्ययेऽनुबन्धलोपे ‘ प्रथमलिङ्गग्रहणं च ’ इति नदीसंज्ञायाम् ‘ आण्नद्याः ’ इत्याडागमेऽनुबन्धलोपे ‘आटश्च’ इति वृद्धौ यणि रुत्वे विसर्गे च कृते बहुश्रेयस्या इति सिद्धम् ।

बहुश्रेयसीनाम् इति । बहुश्रेयसीशब्दात्षष्ठीबहुवचने आमि प्रत्यये नदीसंज्ञायाम् नद्यन्तत्वात्परत्वाद्यणं बाधित्वा ‘ ह्रस्वनद्यापो नुट् ’ इति नुडागमेऽनुबन्धलोपे बहुश्रेयसीनाम् इति सिद्धम् ।

बहुश्रेयस्याम् इति । बहुश्रेयसीशब्दात्सप्तम्येकवचने ङिप्रत्ययेऽनुबन्धलोपे नदीसंज्ञायाम् ‘ ङेराम्नद्याम्नीभ्यः ’ इति ङेरामि कृते ‘ ह्रस्वनद्यापो नुट् ’ इति सूत्रप्राप्तं नुटं बाधित्वा परत्वाद् ’ आण्नद्याः ’ इत्याडागमेऽनुबन्धलोपे ‘ आटश्च ’ इति वृद्धौ यणि बहुश्रेयस्यामिति सिद्ध्यति ।

बहुश्रेयसीशब्दस्य रूपाणि । बहुश्रेयसी, बहुश्रेयस्यौ, बहुश्रेयस्यः। बहुश्रेयसीम्, बहुश्रेयस्यौ, बहुश्रेयसीन् । बहुश्रेयस्या, बहुश्रेयसीभ्याम्, बहुश्रेयसीभिः । बहुश्रेयस्यै, बहुश्रेयसीभ्याम्, बहुश्रेयसीभ्यः । बहुश्रेयस्याः, बहुश्रेयसीभ्याम, बहुश्रेयसीभ्यः । बहुश्रेयस्याः, बहुश्रयस्योः, बहुश्रेयसीनाम् । बहुश्रेयस्याम्, बहुश्रेयस्योः, बहुश्रेयसीषु । हे बहुश्रेयसि, हे बहुश्रेयस्यौ, हे बहुश्रेयस्यः । इति ।

अतिलक्ष्मीः इति । अतिलक्ष्मीशब्दात्सुप्रत्ययेऽनुबन्धलोपे रुत्वे विसर्गे च कृते अतिलक्ष्मीरिति सिद्ध्यति । सुलोपस्तु न लक्ष्मीशब्दस्य ‘ लक्षेर्मुट् ईप्रत्ययश्च ’ इति ईप्रत्ययान्तत्वेन ङ्यन्तत्वाभावेन हल्ङ्यादिसूत्राप्रवृत्तेः ।

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६।४।७७॥ श्नुप्रत्ययान्तस्येवर्णोवर्णान्तस्य धातोर्भ्रू इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे। इति प्राप्ते॥ **एरनेकाचोऽसंयोगपूर्वस्य** ६।४।८२॥ धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यणजादौ प्रत्यये। प्रध्यौ। प्रध्यम्। प्रध्यौ। प्रध्यः। प्रध्यि। शेषं पपीवत्। एवं ग्रामणीः। ङौ तु ग्रामण्याम्। अनेकाचः किम्। नीः। नियौ। नियः। अमि शसि च परत्वादियङ्।

प्रध्यौ इति। प्रधीशब्दस्य प्रातिपदिकत्वात्प्रथमाद्विवचने औप्रत्यये 'इको यणचि' इति यणं बाधित्वा 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इतिसूत्रेण इयङि प्राप्ते तम्प्रबाध्य 'एरनेकाचोऽसंयोगपूर्वस्य' इति यणि प्रध्यौ इति साधु।

प्रधीशब्दस्य रूपाणि। प्रधीः, प्रध्यौ, प्रध्यः। प्रध्यम्, प्रध्यौ, प्रध्यः। प्रध्या, प्रधीभ्याम्, प्रधीभिः। प्रध्ये, प्रधीभ्याम्, प्रधीभ्यः। प्रध्यः, प्रधीभ्याम्, प्रधीभ्यः। प्रध्यः, प्रध्योः, प्रध्याम्। प्रध्यि, प्रध्योः, प्रधीषु। हे प्रधीः, हे प्रध्यौ, हे प्रध्यः। एवं ग्रामणीशब्दस्य रूपाणि भवन्ति। ङौ तु प्रधीशब्दस्य प्रध्यिग्रामणीशब्दस्य तु ग्रामण्यामिति विशेषः।

ग्रामण्याम् इति। ग्रामणीशब्दान्ङिप्रत्ययेऽनुबन्धलोपे 'ङेराम्नद्याम्नीभ्यः' इति ङेरामि 'एरनेकाचोऽसंयोगपूर्वस्य' इति यणि तत्सिद्धम्।

अनेकाचः किमिति। 'एरनेकाचोऽसंयोगपूर्वस्य' इति सूत्रेऽनेकाच इत्यस्याभावे नीशब्दाद् औ प्रत्यये इयङं बाधित्वा यणि कृते न्यौ इत्यनिष्टं प्रसज्येत अतस्तदावश्यकम्। सति तु तस्मिन् नीशब्दस्य अनेकाच्त्वाभावान्न यण् इति दिक्।

नियौ इति। नीशब्दादौ विभक्तौ 'इको यणचि' इति यणं बाधित्वा 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इतीयङि कृतेऽनुबन्धलोपे नियौ इति सिद्ध्यति।

नियम् । ङेराम् । नियाम् । असंयोगपूर्वस्य किम् । सुश्रियौ । यवक्रियौ ॥ **गतिश्च १।४।६० ॥** प्रादयः क्रियायोगे गतिसंज्ञाः स्युः । (गतिकारकेतरपूर्वपदस्य यण् नेष्यते) शुद्धधियौ ॥ **न भूसुधियोः ६।४।८५ ॥** एतयोरचि सुपि यण्न । सुधियौ इत्यादि ॥

नियमिति । नीशब्दाद् द्वितीयैकवचने अमि प्रत्यये 'अमि पूर्वः' इति पूर्वरूपं बाधित्वा परत्वाद् 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इतिसूत्रेण इयङि कृतेऽनुबन्धलोपे नियम् इति सिद्धम् ।

नियः इति । नीशब्दाच्छस्यनुबन्धलोपे 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घं बाधित्वा परत्वाद्, अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इतीयङि कृतेऽनुबन्धलोपे रुत्वे विसर्गे च निय इति सिद्ध्यति ।

नियाम् इति । नीशब्दान्ङिप्रत्ययेऽनुबन्धलोपे 'ङेराम्नद्याम्नीभ्यः' इति ङेरामि 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति इयङि तत्सिद्धम् ।

नीशब्दस्य रूपाणि । नीः, नियौ, नियः । नियम, नियौ, नियः । निया, नीभ्याम्, नीभिः । निये, नीभ्याम्, नीभ्यः । नियः । नीभ्याम्, नीभ्यः । नियः, नियोः, नियाम् । नियाम्, नियोः, नीषु । हे नीः, हे नियौ, हे नियः । इति ।

असंयोगपूर्वस्य किमिति । 'एरनेकाचोऽसंयोगपूर्वस्य' इति सूत्रेऽसंयोगपूर्वस्येत्यस्याभावे सुश्री-यवक्री-शब्दाभ्याम् औप्रत्यये यणि सति सुश्र्यौ यवक्र्यौ इत्यनिष्टरूपापत्तिः स्यादतस्तदावश्यकम् । सति तु तस्मिन् संयोगपूर्वकत्वान्नात्र यण् । इयङि तत्सिद्धिर्बोध्या ।

'गतिश्च' ।अत्र 'प्रादयः' उपसर्गाः क्रियायोगे' इति सूत्रद्वयमनुवर्तते ।

शुद्धधियौ इति । शुद्धधीशब्दादौविभक्तौ 'इको यणचि' इति यणं बाधित्वा इयङि प्राप्ते तं बाधित्वा 'एरनेकाच' इति यणि प्राप्ते 'गतिकारकेतरपूर्वपदस्य यण् नेष्यते' इति वार्तिकेन तन्निषेधे 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति इयङि तत्सिद्धिः ।

'न भूसुधियोः ।'इणो यण्' इत्यतो यणिति 'अचि श्नुधातुभ्रुवाम्' इत्यतोऽचीति 'ओः सुपि' इत्यतः सुपीति चानुवर्तते ।

सुखमिच्छतीति सुखीः । सुतीः । सुख्यौ । सुत्यौ । सुख्युः । सुत्युः । शेषं प्रधीवत् ॥ शम्भुर्हरिवत् ॥ एवं भान्वादयः ॥ **तृज्वत्क्रोष्टुः ७।१।९५** ॥ असम्बुद्धौ सर्वनामस्थाने परे क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः ॥ **ऋतो ङिसर्वनामस्थानयोः ७।३।११०** ॥ ऋदन्ताङ्गस्य गुणो ङौ सर्वनामस्थाने च । इति प्राप्ते ॥ **ऋदुशनस्पुरुदंसोऽनेहसां च ७।१।९४** ॥ ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ । **अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ६।३।११** ॥ अबादीनामुपधाया दीर्घोऽसंबुद्धौ सर्वनामस्थाने । क्रोष्टा । क्रोष्टारौ ।

तृज्वत्क्रोष्टः । अत्र 'इतोऽत्सर्वनामस्थाने' इत्यतः सर्वनामस्थाने इति 'सख्युरसम्बुद्धौ' इत्यतः असम्बुद्धौ इति चानुवर्तते ।

ऋतो ङीति । अत्र 'ह्रस्वस्य गुणः' इत्यतो गुण इत्यनुवर्तते । अङ्गस्येत्यधिक्रियते । ऋत इति तस्य विशेषणम् । तदन्तविधिः ।

ऋदुशनस् इति । अत्र 'अनङ् सौ' इति । 'सख्युरसम्बुद्धौ' इत्यतः असम्बुद्धौ इति चानुवर्तते । अङ्गस्येत्यधिकृतम् ऋदादिभिर्विशेष्यते, तदन्तविधिः ।

अप्तृन्निति । अत्र 'नोपधायाः' इत्यत उपधाया इति, चकार-रहितम् 'सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रं चानुवर्तते ।

क्रोष्टा इति । क्रोष्टुशब्दात्सौ 'तृज्वत्क्रोष्टुः इति तृज्वद्भावे 'ऋतो ङिसर्वनामस्थानयोः' इति गुणे प्राप्ते तं बाधित्वा 'ऋदुशनस्पुरुदंसोऽनेहसां च' इत्यनङि अनुबन्धलोपे 'अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्' इति दीर्घे हल्ङ्यादिना सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे क्रोष्टेति सिद्ध्यति । तृन्तृजन्तत्वादेव दीर्घे सिद्धे नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थम् । नियमाकारश्चेत्थम्—उणादिनिष्पन्नानां तृन्तृजन्तानां चेद्भवति दीर्घस्तर्हि नप्त्रादीनामेव इति । तेन पितृभ्रातृप्रभृतीनां दीर्घो न भवति ।

क्रोष्टारः । क्रोष्टून् ॥ **विभाषा तृतीयादिष्वचि ७।१।९१॥** अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत् । क्रोष्ट्रा । क्रोष्ट्रे ॥ **ऋत उत् ६।१।१११॥** ऋतो ङसिङसोरति उदेकादेशः । रपरः । **रात्सस्य ८।२।२४॥** रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य । रस्य विसर्गः । क्रोष्टुः २ क्रोष्ट्रोः २ । (नुमाचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन)

क्रोष्टारौ इति । क्रोष्टुशब्दाद् औविभक्तौ 'तृज्वत्क्रोष्टुः' इति तृज्वद्भावे 'ऋतो ङिसर्वनामस्थानयोः' इति गुणे रपरे च कृते 'अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपातृप्रशास्तृणाम्' इति दीर्घे तत्सिद्धम् ।

विभाषेति । अत्र तृज्वत्क्रोष्टुरित्यनुवर्तते । अचीति तृतीयादिविभक्तिविशेषणम् । तदादिविधिः ।

क्रोष्ट्रा इति । क्रोष्टुशब्दात्तृतीयैकवचने टाप्रत्ययेऽनुबन्धलोपे 'विभाषा तृतीयादिष्वचि' इति पाक्षिके तृज्वद्भावे यणि क्रोष्ट्रेतिसिद्ध्यति । तृज्वद्भावाभावपक्षे 'आङो नाऽस्त्रियाम्' इति नादेशे क्रोष्टुनेति सिद्धम ।

ऋत उत् । अत्र 'एङः पदान्तादति' इत्यतः अति इति 'ङसिङसोश्च' इत्यतो ङसिङसोरिति चानुवर्तते । अङ्गस्येत्यधिक्रियते । ऋत इति तस्य विशेषणम् तदन्तविधिः ।

रात्सस्य । अत्र 'संयोगान्तस्य लोपः' इत्यनुवर्तते । 'संयोगान्तस्य लोपः' इत्यनेनैव सलोपे सिद्धे नियमार्थमिदं सूत्रम् । रेफात्परस्य संयोगान्तस्य लोपश्चेत्तर्हि सस्यैव नान्यस्य इति नियमाकारः । तेन ऊर्क् इत्यादौ न संयोगान्तलोपः ।

क्रोष्टुः इति । क्रोष्टुशब्दात्पञ्चम्येकवचने ङसि प्रत्ययेऽनुबन्धलोपे 'विभाषा तृतीयादिष्वचि' इति पाक्षिके तृज्वद्भावे 'ऋत उत्' इति उदेकादेशे रपरत्वे 'रात्सस्य' इति सलोपे रेफस्य विसर्गे क्रोष्टुरिति, तृज्वदभावपक्षे 'घेर्ङिति' इति गुणे 'ङसिङसोश्च' इति पूर्वरूपे रुत्वे विसर्गे च क्रोष्टोरिति च साधु ।

क्रोष्टूनाम् । क्रोष्टरि । पक्षे हलादौ च शम्भुवत् ॥ हूहूः । हूह्वौ । हूह्वः । हूहूम् इत्यादि ॥ अतिचमूशब्दे तु नदीकार्य्यं विशेषः । हे आतिचमु । अतिचम्वै । आतिचम्वाः । अतिचमूनाम् ॥ खलपूः । **ओः सुपि ६।४।८३॥**

क्रोष्टूनाम् । क्रोष्टुशब्दादामि 'ह्रस्वनद्यापो नुट्' इति नुटः परत्वाद् 'विभाषा तृतीयादिष्वचि' इति तृज्वद्भावे प्राप्ते 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' इतिवार्त्तिकबलान्नुडागमेऽनुबन्धलोपे 'नामि' इति दीर्घे क्रोष्टूनामिति सिद्धम् ।

क्रोष्टुशब्दस्य रूपाणि । क्रोष्टा, क्रोष्टारौ, क्रोष्टारः । क्रोष्टारम्, क्रोष्टारौ, क्रोष्टून् । क्रोष्ट्रा-क्रोष्टुना, क्रोष्टुभ्याम्, क्रोष्टुभिः । क्रोष्ट्रे-क्रोष्टवे, क्रोष्टुभ्याम्, क्रोष्टुभ्यः । क्रोष्टुः-क्रोष्टोः, क्रोष्टुभ्याम्, क्रोष्टुभ्यः । क्रोष्टुः-क्रोष्टोः, क्रोष्ट्रोः-क्रोष्ट्वोः, क्रोष्टूनाम् । क्रोष्टरि-क्रोष्टौ, क्रोष्ट्रोः-क्रोष्ट्वोः, क्रोष्टुषु । हे क्रोष्टो, हे क्रोष्टारौ, हे क्रोष्टारः इत्यादि ।

हे अतिचमु इति । अतिचमूशब्दात्सम्बोधने सौ 'प्रथमलिङ्गग्रहणं च' इति नदीसंज्ञायां 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वे 'एङ्ह्रस्वात्सम्बुद्धेः' इति सुलोपे हे अतिचमु इति सिद्धम् ।

अतिचम्वै । आतिचमूशब्दान्ङेप्रत्ययेऽनुबन्धलोपे नदीसंज्ञायाम् 'आण्नद्याः' इत्याटि 'आटश्च' इति वृद्धौ यणि च कृते अतिचम्वै इति सिद्धम् । अतिचमूः, अतिचम्वौ, अतिचम्वः । अतिचमूम्, अतिचम्वौ, अतिचमून् । अतिचम्वा, अतिचमूभ्याम्, अतिचमूभिः । अतिचम्वै, अतिचमूभ्याम्, अतिचमूभ्यः । अतिचम्वाः, अतिचमूभ्याम्, अतिचमूभ्यः । अतिचम्वाः, अतिचम्वोः, अतिचमूनाम् । अतिचम्वाम्, अतिचम्वोः, अतिचमूषु । हे अतिचमु, हे अतिचम्वौ, हे अतिचम्वः ।

ओः सुपि । अत्र अचिश्नुधात्वित्यतोऽचीति 'इणोयण्' इत्यतो यणिति चानुवर्तते । एरनेकाचोऽसंयोगपूर्वस्य, इति सूत्रम् एरिति वर्जमनुवर्तते ।

धात्ववयवसंयोगपूर्वो नभवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादचि सुपि । खलप्वौ । खलप्वः । एवं सुल्वादयः । स्वभूः । स्वभुवौ । स्वभुवः ॥ वर्षाभूः । **वर्षाभ्वश्च ६।४।८४॥** अस्य यण् स्यादचि सुपि । वर्षाभ्वावित्यादि ॥ दृन्भूः । (दृन्करपुनः पूर्वस्य भुवो यण् वक्तव्यः) दृन्भ्वौ । एवं करभूः ॥ धाता । हे धातः । धातारौ । धातारः ।

खलप्वौ । खलपूशब्दादौविभक्तौ 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति सूत्रप्राप्तमुवङं बाधित्वा 'ओः सुपि' इति यणि खलप्वाविति साधु । खलपूः, खलप्वौ, खलप्वः । खलप्वम्, खलप्वौ, खलप्वः। खलप्वा, खलपूभ्याम्, खलपूभिः । खलप्वे, खलपूभ्याम्, खलपूभ्यः । खलप्वः, खलपूभ्याम् । खलपूभ्यः । खलप्वः, खलप्वोः, खलप्वाम् । खलप्वि, खलप्वोः, खलपूषु । हे खलपूः, हे खलप्वौ, हे खलप्वः । इति ।

स्वभुवौ । स्वभूशब्दात्प्रथमाद्विवचने औप्रत्यये 'ओः सुपि' इति यणि प्राप्ते 'न भूसुधियोः' इति तन्निषेधे 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' इति उवङि अनुबन्धलोपे स्वभुवौ इति सिद्धम् ।

स्वभूः, स्वभुवौ, स्वभुवः । स्वभुवम्, स्वभुवौ, स्वभुवः । स्वभुवा, स्वभूभ्याम्, स्वभूभिः । स्वभुवे, स्वभूभ्याम्, स्वभूभ्यः । स्वभुवः, स्वभूभ्याम्, स्वभूभ्यः । स्वभुवः, स्वभुवोः, स्वभुवाम् । स्वभुवि, स्वभुवोः, स्वभूषु । हे स्वभूः, हे स्वभुवौ, हे स्वभुवः ।

वर्षाभ्वश्च । अत्र 'ओः सुपि' इति 'अचिश्नुधातु' इत्यतः अचीति 'इणो यण्' इत्यतो यणिति चानुवर्तते ।

वर्षाभ्वौ । वर्षाभूशब्दाद् औप्रत्यये 'ओः सुपि' इतिप्राप्तयणः 'न भूसुधियोः' इति निषेधे 'वर्षाभ्वश्च' इति यणि वर्षाभ्वौ इति साधु ।

दृन्भ्वौ । दृन्भूशब्दाद् औप्रत्यये 'ओः सुपि' इतिप्राप्तयणः 'न भूसुधियोः' इति निषेधे 'दृन्करपुनःपूर्वस्य भुवो यण् वक्तव्यः' इति वार्त्तिकेन यणि दृन्भ्वौ इति सिद्धम् । वर्षाभूदृन्भूशब्दयोः रूपं खलपूशब्दवज्ज्ञेयम् ।

ह्रस्वस्य गुण ॥ [illegible] सिद्धम् ॥
प.२।१४ ॥

CC0. In Public Domain. Digitization by eGangotri

(ऋवर्णान्नस्य णत्वं वाच्यम्) धातॄणाम् । एवं नप्त्रादयः ॥ नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थम् । तेनेह न । पिता । पितरौ । पितरः । पितरम् ।

धाता । धातृशब्दात्सौ 'ऋदुशनस्पुरुदंसोऽनेहसां च' इत्यनङि अनुबन्धलोपे 'अप्तृन्' इत्यादिना दीर्घे, अपृक्तसंज्ञायां 'हल्ङ्याब्भ्यो-दीर्घात्सुतिस्यपृक्तं हल्' इति सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे धाता इति सिद्ध्यति ।

ह्रस्वस्य (७।३।१११) घेर्ङिति अ
सिद्ध ह्रस्वस्य गुणः ॥ ७।३।१०८ ॥ [illegible]

हे धातः । धातृशब्दात्सम्बोधने सुप्रत्ययेऽनुबन्धलोपे 'ऋतो ङिसर्वनामस्थानयोः' इति गुणे अकारे रपरत्वे 'हल्ङ्यादिभ्यो दीर्घा-त्सुतिस्यपृक्तं हल्' इति सुलोपे रुत्वे विसर्गे हेशब्दस्य प्राक्प्रयोगे हे धातः इति सिद्धम् ।

गुण

॥७।३।११०॥

धातारौ । धातृशब्दादौप्रत्यये 'ऋतो ङिसर्वनामस्थानयोः' इति गुणे रपरत्वे 'अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम्' इति दीर्घे धातारौ इति सिद्धम् ।

धातॄणाम् । धातृशब्दादामि 'ह्रस्वनद्यापो नुट्' इति नुडागमेऽनु-बन्धलोपे 'नामि' इतिदीर्घे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति णत्वे धातॄणामिति साधु । धाता, धातारौ, धातारः । धातारम्, धातारौ, धातॄन् । धात्रा, धातृभ्याम् धातृभिः । धात्रे, धातृभ्याम्, धातृभ्यः । धातुः, धातृभ्याम्, धातृभ्यः । धातुः, धात्रोः, धातॄणाम् । धातरि, धात्रोः, धातृषु । हे धातः, हे धातारौ, हेधातारः ।

पिता । पितृशब्दात्सुप्रत्ययेऽनुबन्धलोपे 'ऋदुशनस्पुरुदंसोऽनेहसां च' इति अनङि अनुबन्धलोपे 'सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घे 'हल्ङ्याब्भ्यः' इत्यादिना सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इतिनलोपे पिता इति सिद्धम् ।

पितरौ । पितृशब्दात्प्रथमाद्विवचने औप्रत्यये 'ऋतो ङिसर्वनाम-स्थानयोः इति गुणे अकारे रपरत्वे नप्त्रादिग्रहणस्य व्युत्पत्तिपक्षे नियमार्थत्वाद् 'अप्तृन्' इत्यादिना दीर्घाभावे पितरौ इति सिद्धम् ।

शेषं धातृवत् ॥ एवं जामात्रादयः ॥ ना नरौ ॥ **नृ च ६।४।६॥** अस्य नामि वा दीर्घः । नृणाम् । नॄणाम् ॥ **गोतो णित् ७।१।९०॥** ओकाराद्विहितं सर्वनामस्थानं णिद्वत् । गौः । गावौ । गावः । **औतो**

पिता, पितरौ, पितरः, पितरम् , पितरौ, पितॄन् । पित्रा, पितृभ्याम्, पितृभिः । पित्रे, पितृभ्याम, पितृभ्यः । पितुः, पितृभ्याम्, पितृभ्यः । पितुः, पित्रोः, पितॄणाम् । पितरि, पित्रोः, पितृषु । हे पितः, हे पितरौ, हे पितरः ।

ना । नृशब्दात्सुप्रत्ययेऽनुबन्धलोपे ‘ ऋदुशनस्पुरुदंसोऽनेहसां च ’ इति अनङि अनुबन्धलोपे ‘ सर्वनामस्थाने चासम्बुद्धौ ’ इति दीर्घे सुलोपे नलोपे च ना इति सिद्धम् ।

नरौ । नृशब्दाद् औप्रत्यये ‘ ऋतो ङिसर्वनामस्थानयोः ’ इति गुणे रपरत्वे नरौ इति सिद्धम् ।

नृ च । नृ इति लुप्तषष्ठीकम् । अत्र ‘ नामि ’ इतिसूत्रम् ‘ ढ्रलोपे ’ इत्यतो दीर्घ इति ‘ छन्दस्युभयथा ’ इत्यतः उभयथेति चानुवर्तते ।

नॄणाम् । नृशब्दादाम्प्रत्यये ‘ ह्रस्वनद्यापो नुट् ’ इति नुट्यनुबन्धलोपे ‘ नामि ’ इति दीर्घे प्राप्ते ‘ नृ च ’ इति वैकल्पिके दीर्घे ‘ ऋवर्णान्नस्य णत्वं वाच्यम् ’ इतिणत्वे नॄणाम् इति दीर्घाभावपक्षे नृणामिति च साधु । ना, नरौ, नरः । नरम् , नरौ, नॄन् । न्रा, नृभ्याम् , नृभिः । न्रे, नृभ्याम् , नृभ्यः । नुः, नृभ्याम् , नृभ्यः । नुः, न्रोः, नृणाम्-नृणाम् । नरि, न्रोः, नृषु । हेनः, हे नरौ, हे नरः ।

गोतो णित् । अत्र ‘ इतोऽत्सर्वनामस्थाने ’ इत्यतः सर्वनामस्थाने इत्यनुवर्तते तस्य प्रथमान्तत्वेन विपरिणामः । णिद्वत् इत्यस्य णिति परे यत्कार्यन्तत्कार्यकृदित्यर्थः ।

गौः । गोशब्दात्सौ अनुबन्धलोपे ‘ गोतो णित् ’ इति णिद्वद्भावे ‘ अचो ञ्णिति ’ इति वृद्धौ रुत्वे विसर्गे च गौः इति सिद्धम् ।

ऽम्शसोः ६।१।९३॥ औतोऽम्शसोरचि आकार एकादेशः । गाम् । गावौ । गाः । गवा । गवे । गोः इत्यादि ॥ **रायो हलि ७।२।८९ ॥** अस्याकारादेशो हलि विभक्तौ । राः । रायौ । रायः । राभ्यामित्यादि ॥

गावौ । गोशब्दादौप्रत्यये 'गोतोणित्' इति णिद्वद्भावे 'अचो ञ्णिति' इति वृद्धौ 'एचोऽयवायावः, इत्यावादेशे गावौ इति सिद्धम् ।

औतोऽम्शसोः । आ ओतः इति पदच्छेदः । अत्र 'इको यणचि' इत्यतः अचीत्यनुवर्तते । एकः पूर्वपरयोरित्यधिक्रियते ।

गाम् । गोशब्दाद् अम्प्रत्यये 'गोतो णित्' इति णिद्वद्भावे 'अचोञ्णिति' इति प्राप्तां वृद्धिमपवादत्वाद्बाधित्वा 'औतोऽम्शसोः' इति आकारैकादेशे गाम् इति सिद्धम् ।

गाः । गोशब्दाच्छसि अनुबन्धलोपेऽसर्वनामस्थानत्वाद् णिद्वद्भाववृद्ध्योरभावे 'औतोऽम्शसोः' इति आकारैकादेशे रुत्वे विसर्गे च गाः इति सिद्धम् ।

गोः । गोशब्दान्ङसिप्रत्ययेऽनुबन्धलोपे 'ङसिङसोश्च' इति पूर्वरूपे रुत्वे विसर्गे च गोः इति सिद्धम् । अजादौ विभक्तावबादेशः । गौः, गावौ, गावः । गाम्, गावौ, गाः । गवा, गोभ्याम्, गोभिः । गवे, गोभ्याम्, गोभ्यः । गोः, गोभ्याम्, गोभ्यः । गोः, गवोः, गवाम् । गवि, गवोः, गोषु । हे गौः, हे गावौ, हे गावः ।

रायो हलि । अत्र 'अष्टन आ विभक्तौ' इत्यतः आ इति विभक्तौ इति चानुवर्तते । हलीति विभक्तावित्यस्य विशेषणम् 'यस्मिन्विधिस्तदादावल्ग्रहणे' इति परिभाषया तदादिविधिः । ततश्च हलादौ विभक्तावित्यर्थलाभः । राय इति रैशब्दस्य षष्ठ्यन्तम् ।

राः । रैशब्दात्सुप्रत्ययेऽनुबन्धलोपे 'रायो हलि' इत्यात्वे रुत्वे विसर्गे च कृते राः इति सिध्यति । अजादौ विभक्तौ तु आयादेशः । राः, रायौ, रायः । रायम्, रायौ, रायः । राया, राभ्याम्, राभिः ।

ग्लौः । ग्लावौ । ग्लावः । ग्लौभ्यामित्यादि ॥

इत्यजन्तपुल्लिङ्गाः ॥

◆

रमा । **औङ आपः ७।१।१८॥** आबन्तादङ्गात्परस्यौङः शी स्यात् । औङित्यौकारविभक्तेः संज्ञा । रमे । रमाः ॥ **सम्बुद्धौ च**

राये, राभ्याम्, राभ्यः । रायः, राभ्याम्, राभ्यः । रायः, रायोः, रायाम् । रायि, रायोः । रासु । हे राः, हे रायौ, हे रायः ।

ग्लौशब्दस्याजादौ आवादेशः । ओकारौकारयोः सावर्ण्याद् 'औतोऽम्शसोः, इतिसूत्रेण अमि शसि च आत्वन्तु न शङ्क्यम् ऐऔच् इतिसूत्रारम्भसामर्थ्याद् ओकारौकारयोः सावर्ण्याभावकल्पनात् । ग्लौः, ग्लावौ, ग्लावः । ग्लावम्, ग्लावौ, ग्लावः । ग्लावा, ग्लौभ्याम्, ग्लौभिः । ग्लावे, ग्लौभ्याम्, ग्लौभ्यः । ग्लावः, ग्लौभ्याम्, ग्लौभ्यः । ग्लावः, ग्लावोः ग्लावाम् । ग्लावि, ग्लावोः, ग्लौषु । हे ग्लौः, हे ग्लावौ, हे ग्लावः ।

॥ इत्यजन्ताः पुँल्लिङ्गाः ॥

◆

रमा । रमते इति रमा । क्रीडार्थकरम्धातोः पचाद्यचि 'अजाद्यतष्टाप्' इति टाप्प्रत्यये रमा इति भवति ।

रमा इत्यस्याप्रातिपदिकत्वेऽपि आवन्तत्वेन 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि गृहणम्' इति परिभाषया प्रातिपदिकत्वेन वा 'स्वौजसमौट्···'इति सुप्रत्ययेऽनुबन्धलोपे हल्ङ्यादिना सुलोपे रमेति सिद्धम् ।

औङ आपः । आपः प्रत्ययत्वेन 'प्रत्ययगृहणे यस्मात्स विहितस्तदादेस्तदन्तस्य गृहणम्' इति परिभाषया तदन्तविधिः । अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणम्यते । 'जसः शी' इत्यतः शीत्यनुवर्तते ।

रमे । रमाशब्दाद् औप्रत्यये 'औङ आपः' इति औ इत्यस्य श्यादेशेऽनुबन्धलोपे 'आद्गुणः' इति गुणे रमे इति सिद्धम् ।

रमाः । रमाशब्दाज्जसि अनुबन्धलोपे 'प्रथमयोः पूर्वसवर्णः'

७।३।१०६॥ आप एकारः स्यात्सम्बुद्धौ । एङ्ह्रस्वादिति संबुद्धिलोपः । हे रमे । हे रमे । हे रमाः । रमाम् । रमे । रमाः ॥ **आङि चापः** ७।४।१०५॥ आङि ओसि चाप एकारः । रमया । रमाभ्याम् । रमाभिः ॥ **याडापः** ७।३।११३ ॥ आपो ङितो याट् । वृद्धिः । रमायै । रमाभ्याम् । रमाभ्यः । रामायाः । रमयोः । रमाणाम् । रमा-

---

इति पूर्वसवर्णदीर्घे प्राप्ते तस्य 'दीर्घाज्जसि च' इति निषेधे 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे रुत्वे विसर्गे च रमाः इति सिद्धम् ।

सम्बुद्धौ च । अत्र 'बहुवचने झल्येत्' इत्यतः एदिति 'आङि चापः' इत्यत आप इति चानुवर्तते ।

हे रमे । रमाशब्दात्सम्बोधने सौ 'सम्बुद्धौ च' इत्येत्वे कृते एङ्ह्रस्वात्सम्बुद्धेः' इति सुलोपे हे शब्दस्य प्राक्प्रयोगे हे रमे इति सिद्धम् ।

रमाम् । रमाशब्दादमि 'अमि पूर्वः' इति पूर्वरूपे तत्सिद्धिः ।

रमाः । रमाशब्दाच्छसि अनुबन्धलोपे 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे पुंस्त्वाभावान्नत्वाभावे रुत्वे विसर्गे च कृते रमाः इति सिद्धम् ।

आङि चापः । अत्र 'ओसि च' इत्यनुवर्तते । आप इति षष्ठी । अङ्गस्येत्यधिक्रियते । तदन्तविधिः । 'बहुवचने झल्येत्' इत्यतः एदित्यनुवर्तते ।

रमया । रमाशब्दात् टाविभक्तौ अनुबन्धलोपे 'आङि चापः' इत्येत्वे 'एचोऽयवायावः' इत्ययादेशे रमया इति सिद्धम् ।

याडापः । अत्र 'घेर्ङिति' इत्यतो ङितीत्यनुवर्तते । तस्य षष्ठ्यन्तत्वेन विपरिणामः ।

रमायै । रमाशब्दान्ङेप्रत्ययेऽनुबन्धलोपे 'याडापः' इति याडागमेऽनुबन्धलोपे वृद्धिरेचि' इति वृद्धौ रमायै इति सिद्धम् ।

रमायाः । रमाशब्दान्ङसिप्रत्ययेऽनुबन्धलोपे 'याडापः' इति

याम् । रमासु । एवं दुर्गाम्बिकादयः ॥ **सर्वनाम्नः स्याड्ढ्रस्वश्च ७।३।११४॥** आबन्तात्सर्वनाम्नो ङितः स्याट् स्यादापश्च ह्रस्वः । सर्वस्यै । सर्वस्याः । सर्वासाम् । सर्वस्याम् । शेषं रमावत् ॥ एवं विश्वादय आबन्ताः ॥

याडागमेऽनुबन्धलोपे ' अकः सवर्णे दीर्घः ' इति सवर्ण दीर्घे रुत्वे विसर्गे रमायाः इति साधु ।

रमयोः । रमाशब्दादोसि ' आङि चापः' इत्येत्वे कृते 'एचोऽयवायावः' इत्ययादेशे रुत्वे विसर्गे च कृते रमयोः इति सिद्धम् ।

रमाणाम् । रमाशब्दादामि ' ह्रस्वनद्यापो नुट् ' इति नुडागमेऽनुबन्धलोपे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इतिणत्वे रमाणामिति सिद्धम् ।

रामायाम् । रमाशब्दान्ङिप्रत्ययेऽनुबन्धलोपे ' ङेराम्नद्याम्नीभ्यः ' इति ङेरामि ' याडापः ' इति याडागमेऽनुबन्धलोपे सवर्णदीर्घे रमायामिति सिद्धम् ।

सर्वनाम्नः स्याड्ढ्रस्वश्च । अत्र 'याडापः' इत्यत आप इत्यनुवर्तते । तच्च सर्वनाम्न इत्यस्य विशेषणम् । तदन्तविधिः । 'घेर्ङिति' इत्यतः ङितीत्यनुवृत्तं षष्ठ्या विपरिणम्यते । ततश्च आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादित्यर्थः । ह्रस्वश्चेति वाक्यान्तरम् । आप इत्यनुवृत्तमावर्तते । तस्य षष्ठ्यन्तत्वेन विपरिणामः ह्रस्व इत्यनेनान्वयश्च । आपः स्थाने ह्रस्वो भवतीति तदर्थः ।

सर्वस्यै । सर्वाशब्दान्ङेविभक्तौ अनुबन्धलोपे 'याडापः' इति याडागमे प्राप्ते तम्प्रबाध्य 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमेऽनुबन्धलोपे आपो ह्रस्वे च 'वृद्धिरेचि' इति वृद्धौ सर्वस्यै इति सिद्धम् ।

सर्वस्याः । सर्वाशब्दान्ङसिप्रत्ययेऽनुबन्धलोपे 'याडापः' इति प्राप्तं याडागमं बाधित्वा 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमेऽनुबन्धलोपे आपो ह्रस्वे सवर्णदीर्घे रुत्वे विसर्गे च सर्वस्याः इति सिद्धम् ।

सर्वासाम् । सर्वाशब्दादामि दीर्घैकादेशस्य पूर्वान्तत्वेन ग्रहणात् सर्वा इत्यस्य सर्वनामत्वेन 'आमि सर्वनाम्नः सुट्' इति सुडागमेऽनुबन्धलोपे सर्वासामिति सिद्धम् ।

विभाषा दिक्समासे बहुव्रीहौ १।१।२८ ॥ सर्वनामता वा । उत्तरपूर्वस्यै, उत्तरपूर्वायै । तीयस्येति वा सर्वनामसंज्ञा । द्वितीयस्यै,

---

सर्वस्याम् । सर्वाशब्दान्ङिप्रत्ययेऽनुबन्धलोपे 'ङेराम्नद्याम्नीभ्यः' इति ङेरामि 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमेऽनुबन्धलोपे आपो ह्रस्वे सवर्णदीर्घे च कृते सर्वस्यामिति सिद्धम् । सर्वा, सर्वे, सर्वाः । सर्वाम्, सर्वे, सर्वाः । सर्वया, सर्वाभ्याम्, सर्वाभिः । सर्वस्यै, सर्वाभ्याम्, सर्वाभ्यः । सर्वस्याः, सर्वाभ्याम्, सर्वाभ्यः । सर्वस्याः, सर्वयोः, सर्वासाम् । सर्वस्याम्, सर्वयोः, सर्वासु । हे सर्वे, हे सर्वे, हे सर्वाः ।

विभाषेति । अत्र 'सर्वादीनि सर्वनामानि' इत्यतः सर्वनामग्रहणमनुवर्तते ।

उत्तरपूर्वस्यै । उत्तरपूर्वाशब्दान्ङेविभक्तावनुबन्धलोपे 'विभाषा दिक्समासे बहुव्रीहौ' इति वैकल्पिकसर्वनामसंज्ञायां याटं बाधित्वा 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमेऽनुबन्धलोपे आपो ह्रस्वे च 'वृद्धिरेचि' इति वृद्धौ उत्तरपूर्वस्यै इति सर्वनामसंज्ञाया अभावपक्षे 'याडापः' इति याडागमेऽनुबन्धलोपे वृद्धौ उत्तरपूर्वायै इति च सिद्धम् ।

उत्तरपूर्वा, उत्तरपूर्वे, उत्तरपूर्वाः । उत्तरपूर्वाम्, उत्तरपूर्वे, उत्तरपूर्वाः । उत्तरपूर्वया, उत्तरपूर्वाभ्याम्, उत्तरपूर्वाभिः । उत्तरपूर्वस्यै-उत्तरपूर्वायै, उत्तरपूर्वाभ्याम् उत्तरपूर्वाभ्यः । उत्तरपूर्वस्याः-उत्तरपूर्वायाः, उत्तरपूर्वाभ्याम्, उत्तरपूर्वाभ्यः । उत्तरपूर्वस्याः-उत्तरपूर्वायाः, उत्तरपूर्वयोः, उत्तरपूर्वासाम्-उत्तरपूर्वाणाम् । उत्तरपूर्वस्याम्-उत्तरपूर्वायाम्, उत्तरपूर्वयोः उत्तरपूर्वासु । हे उत्तरपूर्वे, हे उत्तरपूर्वे, हे उत्तरपूर्वाः ।

द्वितीयस्यै । द्वितीयाशब्दान्ङेप्रत्ययेऽनुबन्धलोपे 'तीयस्य ङित्सु वा' इति वैकल्पिकसर्वनामसंज्ञायाम् 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमेऽनुबन्धलोपे आपो ह्रस्वे वृद्धौ द्वितीयस्यै इति, सर्वनामसंज्ञाया अभावपक्षे याटि वृद्धौ उत्तरपूर्वायै इति च सिध्यति ।

एवं तृतीया । 'अम्बार्थेति ह्रस्वः । हे अम्ब । हे अक्क । हे अल्ल । जरा । जरसौ इत्यादि । हलादौ च रमावत् । गोपा विश्वपावत् । मतिः । मत्या । **ङिति ह्रस्वश्च १।४।६॥** इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ च इवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति ।

द्वितीया, द्वितीये, द्वितीयाः । द्वितीयाम्, द्वितीये, द्वितीयाः । द्वितीयया, द्वितीयाभ्याम्, द्वितीयाभिः । द्वितीयस्यै-द्वितीयायै, द्वितीयाभ्याम्, द्वितीयाभ्यः । द्वितीयस्याः-द्वितीयायाः, द्वितीयाभ्याम्, द्वितीयाभ्यः । द्वितीयस्याः-द्वितीयायाः, द्वितीययोः, द्वितीयानाम् । द्वितीयस्याम्-द्वितीयायाम्, द्वितीययोः, द्वितीयासु । हे द्वितीये, हे द्वितीये, हे द्वितीयाः ।

हे अम्ब । अम्बाशब्दात्सम्बोधने सौ 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वे 'एङ्ह्रस्वात्सम्बुद्धेः' इति सम्बुद्धिलोपे हे शब्दस्य प्राक्प्रयोगे हे अम्बेति सिद्धम् । रमावदस्य रूपम् ।

जरसौ । जराशब्दादौविभक्तौ 'जराया जरसन्यतरस्याम्' इति पाक्षिके जरसादेशे जरसौ इति, जरसादेशाभावे औङः श्यादेशे गुणे जरे इति च सिद्धम् ।

जरा, जरसौ-जरे, जरसः-जराः । जरसम्-जराम्, जरसौ-जरे, जरसः-जराः । जरसा-जरया, जराभ्याम्, जराभिः । जरसे-जरायै, जराभ्याम्, जराभ्यः । जरसः-जरायाः, जराभ्याम्, जराभ्यः । जरसः-जरायाः, जरसोः-जरयोः, जरसाम्-जराणाम् । जरसि-जरायाम्, जरसोः-जरयोः, जरासु । हे जरे, हे जरसौ-हे जरे, हे जरसः-हे जराः ।

मत्या । मतिशब्दात् तृतीयैकवचने टाप्रत्ययेऽनुबन्धलोपे 'शेषो घ्यसखि' इति घिसंज्ञायाम् अस्त्रियामितिपर्युदासात् 'आङो नाऽस्त्रियाम्' इति नाभावाभावे यणि मत्या इति सिद्धम् ।

ङितिह्रस्वश्च । अत्र 'यू स्त्र्याख्यौ नदी' इति सूत्रम्, नरहितम् 'नेयङुवङ्स्थानावस्त्री' इति सूत्रम्, 'वामि' इत्यतो वेति चानुवर्तते । ह्रस्वश्चेति वाक्यान्तरम् । अत्रापि 'यू स्त्र्याख्यौ'इत्यस्य वेत्यस्य च सम्ब-

मत्यै, मतये। मत्याः २। मतेः २। **इदुद्भ्याम् ७।३।११७॥** इदुद्भ्यां नदीसंज्ञकाभ्यां परस्य ङेराम् स्यात्। मत्याम्, मतौ। शेषं हरिवत्। **त्रिचतुरोः स्त्रियां तिसृचतसृ ७।२।९९॥**

न्धः। ह्रस्ववाक्ये स्त्र्याख्यावित्यनेन स्त्रीलिङ्गावित्येतावदेव विवक्षितं न तु नित्यस्त्रीलिङ्गाविति' व्याख्यानात्। ततश्च मूलोक्तार्थलाभः।

मत्यै। मतिशब्दान्ङेविभक्तावनुबन्धलोपे 'ङिति ह्रस्वश्च' इति वैकल्पिकनदीसंज्ञायाम् 'आण्नद्याः' इत्याडागमेऽनुबन्धलोपे 'आटश्च' इति वृद्धौ 'इकोयणचि' इति यणि मत्यै इति, नदीसंज्ञाया अभावपक्षे 'शेषोघ्यसखि' इति घिसंज्ञायां 'घेर्ङिति' इति गुणे 'एचोऽयवायावः' इत्ययादेशे मतये इति च सिद्धम्।

मत्याः। मतिशब्दान्ङसिप्रत्ययेऽनुबन्धलोपे 'ङिति ह्रस्वश्च' इति वैकल्पिकनदीसंज्ञायाम् 'आण्नद्याः' इत्याडागमेऽनुबन्धलोपे 'आटश्च' इति वृद्धौ यणि रुत्वे विसर्गे मत्याः इति, नदीसंज्ञाया अभावपक्षे घिसंज्ञायां गुणे 'ङसिङसोश्च' इति पूर्वरूपे रुत्वे विसर्गे च कृते मतेः इति च सिद्धम्।

इदुद्भ्याम्। अत्र 'ङेराम्नद्याम्नीभ्यः' इत्यतो ङेराम् इति नदी इतिचानुवर्तते।

मत्याम्। मतिशब्दात् ङिप्रत्ययेऽनुबन्धलोपे 'ङिति ह्रस्वश्च' इति वैकल्पिकनदीसंज्ञायाम् 'ङेराम्नद्याम्नीभ्यः' इति ङेरामि प्राप्ते तं बाधित्वा 'औत्' इति ङेरौत्वे प्राप्ते तम्प्रबाध्य 'इदुद्भ्याम्' इति ङेरामि 'आण्नद्याः' इत्याडागमेऽनुबन्धलोपे वृद्धौ यणि च कृते मत्याम् इति, नदीत्वाभावपक्षे घिसंज्ञायां 'घेर्ङिति' इति प्राप्तं गुणं बाधित्वा 'अच्च घेः' इति ङेरौत्वे अन्तादेशेऽकारे च कृते वृद्धौ मतौ इति च सिद्धम्।

मतिः, मती, मतयः। मतिम्, मती, मतीः। मत्या, मतिभ्याम्, मतिभिः। मत्यै-मतये, मतिभ्याम्, मतिभ्यः। मत्याः-मतेः, मतिभ्याम्, मतिभ्यः। मत्याः-मतेः, मत्योः, मतीनाम्। मत्याम्-मतौ, मत्योः, मतिषु। हे मते, हे मती, हे मतयः।

स्त्रीलिङ्गयोरेतयोरेतौ स्तो विभक्तौ। **अचि र ऋतः ७।२।१००॥** तिसृचतसृ एतयोर्ऋकारस्य रेफादेशः स्यादचि। गुणदीर्घोत्वानामपवादः। तिस्रः। तिस्रः। तिसृभिः। तिसृभ्यः। तिसृभ्यः। आमि नुट्॥ **न तिसृचतसृ ६।४।४॥** एतयोर्नामि दीर्घो न। तिसृणाम्। तिसृषु॥ द्वे। द्वे। द्वाभ्याम्। द्वाभ्याम्। द्वाभ्याम्। द्वयोः। द्वयोः। गौरी। गौ-

---

त्रिचतुरोरिति। अत्र 'अष्टन आ विभक्तौ' इत्यतः विभक्तौ इत्यनुवर्तते।

अचि र ऋतः। अत्र 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति सूत्रात् तिसृचतसृ इत्यनुवर्तते तच्चात्र लुप्तषष्ठीकमाश्रीयते।

तिस्रः। त्रिशव्दाज्जसि प्रत्ययेऽनुवन्धलोपे 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति तिस्रादेशे तिसृ अस् इति स्थिते 'इको यणचि' इति यणि प्राप्ते तम्प्रवाध्य 'ऋतो ङिसर्वनामस्थानयोः' इति गुणे प्राप्ते तं वाधित्वा 'अचि र ऋतः' इति ऋकारस्य रेफादेशे रुत्वे विसर्गे च तिस्रः इति सिद्धम्। शसि तु पूर्वसवर्णदीर्घं वाधित्वा रेफादेशो भवतीति विशेषः।

न तिसृचतसृ। अत्र 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इत्यतो दीर्घ इति 'नामि' इति सूत्रञ्चानुवर्तते। तिसृचतसृ इति लुप्तषष्ठीकम्।

तिसृणाम्। त्रिशव्दादामि 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति तिस्रादेशे तिसृ आम् इति स्थिते 'ह्रस्वनद्यापो नुट्' इति प्राप्तं नुटं वाधित्वा 'अचि र ऋतः' इति ऋकारस्य रेफादेशे प्राप्ते 'नुमचिर-तृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' इति वार्तिकेन रेफादेशं वाधित्वा नुडागमेऽनुवन्धलोपे 'नामि' इति दीर्घे प्राप्ते 'न तिसृचतसृ' इति निषेधे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति णत्वे तिसृणामिति सिद्धम्।

द्वे। द्विशव्दादौ विभक्तौ 'त्यदादीनामः' इत्यत्वे 'अजाद्यतष्टाप्' इति टाप्प्रत्ययेऽनुवन्धलोपे सवर्णदीर्घे 'औङ आपः' इति श्यादेशेऽनुवन्धलोपे गुणे द्वे इति सिद्धम्।

य्यौं । गौर्य्यः । हे गौरि । गौर्य्यै इत्यादि । एवं नद्यादयः ॥ लक्ष्मीः । शेषं गौरीवत् ॥ एवं तरीतन्त्र्यादयः ॥ स्त्री । हे स्त्रि । **स्त्रियाः ६।४।७९** । अस्येयङ् स्यादजादौ प्रत्यये परे । स्त्रियौ । स्त्रियः । **वाम्शसोः**

द्वयोः । द्विशब्दादोसि अन्तादेशे 'त्यदादीनामः' इति अकारे टाप् प्रत्ययेऽनुबन्धलोपे दीर्घे 'आङि चापः' इत्येत्वे अयादेशे रुत्वे विसर्गे द्वयोरिति साधु ।

गौरी । गौरीशब्दात्सौ 'हल्ङ्याब्भ्य' इत्यादिना सुलोपे गौरीति साधु ।

गौर्य्यौ । गौरीशब्दाद् औप्रत्यये 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे प्राप्ते 'दीर्घाज्जसि च' इति निषेधे 'इको यणचि' इति यणि 'अचो रहाभ्यां द्वे' इति द्वित्वे गौर्य्यौ इति सिद्धम् ।

हे गौरि । गौरीशब्दात्सम्बोधने सौ 'यू स्त्र्याख्यौ नदी' इति नदीसंज्ञायाम् 'अम्बार्थनद्योर्ह्रस्वः', इति ह्रस्वे 'एङ्ह्रस्वात्सम्बुद्धेः' इतिसुलोपे हे इत्यस्य प्राक्प्रयोगे हे गौरि इति सिद्धम् ।

गौरी, गौर्य्यौ, गौर्य्यः । गौरीम्, गौर्य्यौ, गौरीः । गौर्य्या, गौरीभ्याम्, गौरीभिः । गौर्य्यै, गौरीभ्याम्, गौरीभ्यः । गौर्य्याः, गौरीभ्याम्, गौरीभ्यः । गौर्य्याः, गौर्य्योः, गौरीणाम् । गौर्य्याम्; गौर्य्योः, गौरीषु । हे गौरि, हे गौर्य्यौ, हे गौर्य्यः ।

लक्ष्मीः । लक्ष्मीशब्दात्सौ अनुबन्धलोपे 'लक्षेर्मुट् ईप्रत्ययश्च' इति ईप्रत्ययान्तत्वेन ङ्यन्तत्वाभावात् 'हल्ङ्याब्भ्य' इत्यादिना सुलोपाभावे रुत्वे विसर्गे च लक्ष्मीः इति सिद्धम् ।

✓ तदुक्तम्—अवी तन्त्री तरी लक्ष्मी धी ह्री श्रीणामुदाहृतः ।
सप्तानामपि शब्दानां सुलोपो न कदाचन ॥ इति ॥

स्त्रियाः । अत्र 'अचिश्नुधातु' इत्यादिना अचीति इयङिति चानुवर्तते ।

स्त्रियौ । स्त्रीशब्दादौप्रत्यये पूर्वसवर्णदीर्घं बाधित्वा 'स्त्रियाः' इति सूत्रेण इयङादेशेऽनुबन्धलोपे स्त्रियौ इति सिद्धम् ।

।६।४।८०॥ अमि शसि च स्त्रिया इयङ् वा स्यात् । स्त्रियम्, स्त्रीम् । स्त्रियः, स्त्रीः । स्त्रिया । स्त्रियै । स्त्रियाः । परत्वान्नुट् । स्त्रीणाम् ।

वाम्शसोः । अत्र अचीति 'स्त्रियाः' इति चानुवर्तते ।

स्त्रियम् । स्त्रीशव्दाद् अम्प्रत्यये 'वाम्शसोः' इति पाक्षिके इयङादेशे स्त्रियम् इति, इयङ्भावपक्षे 'अमि पूर्वः' इति पूर्वरूपे स्त्रीमिति च सिद्धम् ।

स्त्रियः । स्त्रीशव्दाच्छसि अनुवन्धलोपे 'वाम्शसोः' इति वैकल्पिके इयङादेशे रुत्वे विसर्गे च कृते स्त्रियः इति, इयङ्भावपक्षे 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे रुत्वे विसर्गे स्त्रीः इति च सिद्धम् ।

स्त्रिया । स्त्रीशव्दात् टाप्रत्ययेऽनुबन्धलोपे 'स्त्रियाः' इति इयङादेशेऽनुवन्धलोपे स्त्रिया इति सिद्धम् ।

स्त्रियै । स्त्रीशव्दान्ङेविभक्तावनुवन्धलोपे 'यू स्त्र्याख्यौ नदी' इति नदीसंज्ञायाम् 'आण्नद्याः' इत्याडागमेऽनुबन्धलोपे 'आटश्च' इति वृद्धौ 'स्त्रियाः' इति इयङादेशेऽनुवन्धलोपे स्त्रियै इति सिद्धम् ।

स्त्रियाः । स्त्रीशव्दान्ङसिप्रत्ययेऽनुबन्धलोपे 'यू स्त्र्याख्यौ नदी' इति नदीसंज्ञायाम् 'आण्नद्याः' इत्याडागमेऽनुवन्धलोपे 'आटश्च' इति वृद्धौ 'स्त्रियाः' इतीयङादेशेऽनुवन्धलोपे रुत्वे विसर्गे च स्त्रियाः इति साधु ।

स्त्रीणाम् । स्त्रीशव्दादामि 'यू स्त्र्याख्यौ नदी' इति नदीसंज्ञायाम् 'स्त्रियाः' इति इयङं बाधित्वा परत्वात् 'ह्रस्वनद्यापो नुट्' इति नुडागमेऽनुवन्धलोपे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति णत्वे स्त्रीणामिति सिद्धम् ।

स्त्री, स्त्रियौ, स्त्रियः । स्त्रियम्–स्त्रीम्, स्त्रियौ, स्त्रियः–स्त्रीः । स्त्रिया, स्त्रीभ्याम्, स्त्रीभिः । स्त्रियै, स्त्रीभ्याम्, स्त्रीभ्यः । स्त्रियाः, स्त्रीभ्याम्, स्त्रीभ्यः । स्त्रियाः, स्त्रियोः, स्त्रीणाम् । स्त्रियाम्, स्त्रियोः, स्त्रीषु । हे स्त्रि, हे स्त्रियौ, हे स्त्रियः ।

स्त्रीषु । श्रीः । श्रियौ । श्रियः । **नेयङुवङ्स्थानावस्त्री १।४।४॥** इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री । श्रीणाम्,

---

श्रीः । श्रीशब्दात्सौ अङ्यन्तत्वात्सुलोपाभावे रुत्वे विसर्गे च श्रीः इति साधु ।

श्रियौ । श्रीशब्दादौप्रत्यये 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' इति इयङादेशेऽनुबन्धलोपे श्रियौ इति सिद्धम् ।

नेयङुवङिति । अत्र 'यू स्त्र्याख्यौ नदी' इत्यतो यू इति नदी इति चानुवर्तते ।

हे श्रीः । श्रीशब्दात्सम्बोधने सौ अनुबन्धलोपे 'यू स्त्र्याख्यौ नदी' इति नदीसंज्ञायां प्राप्तायाम् 'नेयङुवङ्स्थानावस्त्री' इति नदीसंज्ञानिषेधे तेन 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वाभावे रुत्वे विसर्गे हे श्रीः इति साधुः ।

श्रियै । श्रीशब्दान्ङेविभक्तावनुबन्धलोपे 'ङिति ह्रस्वश्च' इति वैकल्पिकनदीसंज्ञायाम् 'आण्नद्याः' इत्याडागमेऽनुबन्धलोपे 'आटश्च' इति वृद्धौ 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' इतीयङादेशेऽनुबन्धलोपे श्रियै इति, नदीसंज्ञाया अभावपक्षे इयङ्यनुबन्धलोपे श्रिये इति च सिद्धम् ।

श्रियाः । श्रीशब्दान्ङसिविभक्तावनुबन्धलोपे वैकल्पिकनदीसंज्ञायाम्, आडागमेऽनुबन्धलोपे वृद्धौ इयङि रुत्वे विसर्गे च श्रियाः इति तदभावे श्रिय इति च सिद्धम् ।

वामि । अत्र 'यू स्त्र्याख्यौ नदी' इति नराहितम् 'नेयङुवङ्स्थानावस्त्री' इंति चानुवर्तते ।

श्रीणाम् । श्रीशब्दादामि 'वामि' इति वैकल्पिकनदीसंज्ञायाम् 'ह्रस्वनद्यापो नुट्' इति नुडागमेऽनुबन्धलोपे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति णत्वे श्रीणाम् इति, नदीत्वाभावपक्षे 'अचिश्नुधातु' इत्यादिना इयङि श्रियाम् इति च सिद्धम् ।

श्रियाम् । श्रियि, श्रियाम् ॥ धेनुर्मतिवत् ॥ **स्त्रियां च ७।१।९६॥** स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते । **ऋन्नेभ्यो ङीप् ४।१।५॥** ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् । क्रोष्ट्री गौरीवत् ॥ भ्रूः श्रीवत् ॥ स्वयम्भूः पुंवत् ॥ **न षट्स्वस्रादिभ्यः ४।१।१०॥** ङीप्टापौ न स्तः । स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा । याता मातेति सप्तैते

श्रियाम् । श्रीशब्दान्ङिप्रत्ययेऽनुबन्धलोपे 'ङिति ह्रस्वश्च' इति वैकल्पिकनदीसंज्ञायाम् 'ङेराम्नद्याम्नीभ्यः' इति ङेरामि आटि वृद्धौ 'अचि श्नुधातु' इत्यादिना इयङि श्रियाम् इति, नदीत्वाभावपक्षे इयङि श्रियि इति च सिद्धम् ।

श्रीः, श्रियौ, श्रियः । श्रियम्, श्रियौ, श्रियः । श्रिया, श्रीभ्याम् श्रीभिः । श्रियै–श्रिये, श्रीभ्याम्, श्रीभ्यः । श्रियाः–श्रियः, श्रीभ्याम्, श्रीभ्यः । श्रियाः–श्रियः, श्रियोः, श्रीणाम्-श्रियाम् । श्रियाम्–श्रियि श्रियोः, श्रीषु । हे श्रीः, हे श्रियौ, हे श्रियः ।

धेनुः, धेनू, धेनवः । धेनुम्, धेनू, धेनूः । धेन्वा, धेनुभ्याम्, धेनुभिः । धेन्वै-धेनवे, धेनुभ्याम्, धेनुभ्यः । धेन्वाः–धेनोः, धेनुभ्याम्, धेनुभ्यः । धेन्वाः–धेनोः, धेन्वोः, धेनूनाम् । धेन्वाम्–धेनौ, धेन्वोः, धेनुषु । हे धेनो, हे धेनू, हे धेनवः ।

स्त्रियां च । अत्र 'तृज्वत्क्रोष्टुः, इति सूत्रमनुवर्तते ।

ऋन्नेभ्यो ङीप् । अत्र स्त्रियामित्यधिक्रियते ।

क्रोष्ट्री । क्रोष्टुशब्दात् सौ अङ्गसंज्ञायां 'स्त्रियां च' इति तृज्वद्भावे 'ऋन्नेभ्योङीप्' इति ङीप्प्रत्ययेऽनुबन्धलोपे यणि ततो 'हल्ङ्याब्भ्यः' इत्यादिना सुलोपे क्रोष्ट्री इति सिद्धम् । गौरीशब्दवदस्यरूपं बोध्यम् ।

न षट्स्वस्रादिभ्यः । अत्र 'टाबृचि' इत्यतः टाप् इति 'ऋन्नेभ्यो ङीप्' इत्यतः ङीप् इति चानुवर्तते ।

स्वसा । स्वसृशब्दात् 'ऋन्नेभ्यो ङीप्' इति ङीपि प्राप्ते 'न

स्त्रीषु । श्रीः । श्रियौ । श्रियः । **नेयङुवङ्स्थानावस्त्री १।४।४॥** इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री । श्रीणाम्,

---

श्रीः । श्रीशब्दात्सौ अङ्यन्तत्वात्सुलोपाभावे रुत्वे विसर्गे च श्रीः इति साधु ।

श्रियौ । श्रीशब्दादौप्रत्यये 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' इति इयङादेशेऽनुबन्धलोपे श्रियौ इति सिद्धम् ।

नेयङुवङिति । अत्र ' यू स्त्र्याख्यौ नदी' इत्यतो यू इति नदी इति चानुवर्तते ।

हे श्रीः । श्रीशब्दात्सम्बोधने सौ अनुबन्धलोपे 'यू स्त्र्याख्यौ नदी' इति नदीसंज्ञायां प्राप्तायाम् 'नेयङुवङ्स्थानावस्त्री' इति नदीसंज्ञानिषेधे तेन 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वाभावे रुत्वे विसर्गे हे श्रीः इति साधुः ।

श्रियै । श्रीशब्दान्ङेविभक्तावनुबन्धलोपे 'ङिति ह्रस्वश्च' इति वैकल्पिकनदीसंज्ञायाम् 'आण्नद्याः' इत्याडागमेऽनुबन्धलोपे 'आटश्च' इति वृद्धौ ' अचिश्नुधातुभ्रुवां य्वोरियङुवङौ ' इतीयङादेशेऽनुबन्धलोपे श्रियै इति, नदीसंज्ञाया अभावपक्षे इयङ्यनुबन्धलोपे श्रिये इति च सिद्धम् ।

श्रियाः । श्रीशब्दान्ङसिविभक्तावनुबन्धलोपे वैकल्पिकनदीसंज्ञायाम् , आडागमेऽनुबन्धलोपे वृद्धौ इयङि रुत्वे विसर्गे च श्रियाः इति तदभावे श्रिय इति च सिद्धम् ।

वामि । अत्र 'यू स्त्र्याख्यौ नदी' इति नराहितम् 'नेयङुवङ्स्थानावस्त्री' इति चानुवर्तते ।

श्रीणाम् । श्रीशब्दादामि ' वामि ' इति वैकल्पिकनदीसंज्ञायाम् 'ह्रस्वनद्यापो नुट्' इति नुडागमेऽनुबन्धलोपे ' अट्कुप्वाङ्नुम्व्यवायेऽपि ' इति णत्वे श्रीणाम् इति, नदीत्वाभावपक्षे 'अचिश्नुधातु' इत्यादिना इयङि श्रियाम् इति च सिद्धम् ।

श्रियाम् । श्रियि, श्रियाम् ॥ धेनुर्मतिवत् ॥ **स्त्रियां च ७।१।९६॥** स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते । **ऋन्नेभ्यो ङीप् ४।१।५॥** ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् । क्रोष्ट्री गौरीवत् ॥ भ्रूः श्रीवत् ॥ स्वयम्भूः पुंवत् ॥ **न षट्स्वस्रादिभ्यः ४।१।१०॥** ङीप्टापौ न स्तः । स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा । याता मातेति सप्तैते

श्रियाम् । श्रीशब्दान्ङिप्रत्ययेऽनुबन्धलोपे 'ङिति ह्रस्वश्च' इति वैकल्पिकनदीसंज्ञायाम् 'ङेराम्नद्याम्नीभ्यः' इति ङेरामि आटि वृद्धौ 'अचि श्नुधातु' इत्यादिना इयङि श्रियाम् इति, नदीत्वाभावपक्षे इयङि श्रियि इति च सिद्धम् ।

श्रीः, श्रियौ, श्रियः । श्रियम् , श्रियौ, श्रियः । श्रिया, श्रीभ्याम् श्रीभिः । श्रियै–श्रिये, श्रीभ्याम् , श्रीभ्यः । श्रियाः–श्रियः, श्रीभ्याम् , श्रीभ्यः । श्रियाः–श्रियः, श्रियोः, श्रीणाम्-श्रियाम् । श्रियाम्–श्रियि श्रियोः, श्रीषु । हे श्रीः, हे श्रियौ, हे श्रियः ।

धेनुः, धेनू , धेनवः । धेनुम् , धेनू , धेनूः । धेन्वा, धेनुभ्याम् , धेनुभिः । धेन्वै-धेनवे, धेनुभ्याम् , धेनुभ्यः । धेन्वाः–धेनोः, धेनुभ्याम्, धेनुभ्यः । धेन्वाः–धेनोः, धेन्वोः, धेनूनाम् । धेन्वाम्–धेनौ, धेन्वोः, धेनुषु । हे धेनो, हे धेनू , हे धेनवः ।

स्त्रियां च । अत्र 'तृज्वत्क्रोष्टुः, इति सूत्रमनुवर्तते ।

ऋन्नेभ्यो ङीप् । अत्र स्त्रियामित्यधिक्रियते ।

क्रोष्ट्री । क्रोष्टुशब्दात् सौ अङ्गसंज्ञायां 'स्त्रियां च' इति तृज्वद्भावे 'ऋन्नेभ्योङीप्' इति ङीप्प्रत्ययेऽनुबन्धलोपे यणि ततो 'हल्ङ्याब्भ्यः' इत्यादिना सुलोपे क्रोष्ट्री इति सिद्धम् । गौरीशब्दवदस्यरूपं बोध्यम् ।

न षट्स्वस्रादिभ्यः । अत्र 'टाबृचि' इत्यतः टाप् इति 'ऋन्नेभ्यो ङीप्' इत्यतः ङीप् इति चानुवर्तते ।

स्वसा । स्वसृशब्दात् 'ऋन्नेभ्यो ङीप्' इति ङीपि प्राप्ते 'न

स्वस्रादय उदाहृताः ॥ स्वसा । स्वसारौ ॥ माता पितृवत् । शसि मातॄः ॥ द्यौर्गोवत् ॥ राः पुंवत् ॥ नौर्ग्लौवत् ॥

इत्यजन्तस्त्रीलिङ्गाः ॥

अतोऽम् ७।१।२४॥ अतोऽङ्गात् क्लीबात्स्वमोरम् । अमि पूर्वः ।

षट्स्वस्रादिभ्यः, इति तन्निषेधे ततः सौ अनुबन्धलोपे 'ऋदुशनस्पुरुदंसोऽनेहसां च' इत्यनङादेशेऽनुबन्धलोपे 'अप्तृन्' इत्यादिना दीर्घे 'हल्ङ्याब्भ्यः' इत्यादिना सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे स्वसा इति सिद्धम् ।

स्वसारौ । स्वसृशब्दादौप्रत्यये 'ऋतो ङिसर्वनामस्थानयोः' इति गुणे रपरत्वे 'अप्तृन्' इत्यादिना दीर्घे स्वसारौ इति सिद्धम् ।

स्वसा, स्वसारौ, स्वसारः । स्वसारम्, स्वसारौ, स्वसॄः । स्वस्रा, स्वसृभ्याम्, स्वसृभिः । स्वस्रे, स्वसृभ्याम्, स्वसृभ्यः । स्वसुः, स्वसृभ्याम्, स्वसृभ्यः । स्वसुः, स्वस्रोः, स्वसॄणाम् । स्वसरि, स्वस्रोः, स्वसृषु । हे स्वसः, हे स्वसारौ, हे स्वसारः ।

ननान्दा, ननान्दरौ, ननान्दरः । ननान्दरम्, ननान्दरौ, ननान्दॄः । ननान्द्रा, ननान्दृभ्याम् । ननान्दृभिः । ननान्द्रे, ननान्दृभ्याम्, ननान्दृभ्यः । ननान्दुः, ननान्दृभ्याम्, ननान्दृभ्यः । ननान्दुः; ननान्द्रोः, ननान्दॄणाम् । ननान्दरि, ननान्द्रोः, ननान्दृषु । हे ननान्दः, हे ननान्दरौ, हे ननान्दरः । दुहितृ यातृ मातृ शब्दानां पितृशब्दवदेव रूपं बोध्यम् । केवलमेषां शसि नत्वाभावो विशेषः ।

इत्यजन्ताः स्त्रीलिङ्गाः ॥

* * *

अतोऽम् । अत्र 'अङ्गस्य' इत्यधिक्रियते । तस्य पञ्चम्यन्तत्वेन विपरिणामः । 'स्वमोर्नपुंसकात्' इत्यनुवर्तते ।

ज्ञानम् । एङ्ह्रस्वादिति हल्लोपः । हे ज्ञान ॥ **नपुंसकाच्च ७।१।१९॥** क्लीबादौङः शी स्यात् । भसंज्ञायाम् । **यस्येति च ६।४।१४८॥** ईकारे तद्धिते च परे भस्येवर्णावर्णयोर्लोपः । इत्यल्लोपे प्राप्ते (औङः श्यां प्रतिषेधो वाच्यः) ज्ञाने । **जश्शसोः शिः ७।१।२०॥** क्लीबादनयोः शिः स्यात् । **शि सर्वनामस्थानम् ।१।१।४२॥** शि इत्येतदुक्तसंज्ञं स्यात् । **नपुंसकस्य झलचः ७।१।७२॥** झलन्त-

---

ज्ञानम् । ज्ञानशब्दात्सौ ‘ स्वमोर्नपुंसकात् ’ सोर्लुकि प्राप्ते तं बाधित्वा ‘ अतोऽम् ’ इति सोरमादेशे ‘ अमि पूर्वः ’ इति पूर्वरूपे ज्ञानम् इति सिद्धम् ।

हे ज्ञान । ज्ञानशब्दात्सम्बोधने सौ ‘ स्वमोर्नपुंसकात् ’ इति लुकं बाधित्वा ‘ अतोऽम् ’ इति सोरमादेशे ‘ अमि पूर्वः ’ इति पूर्वरूपे ‘ एङ्ह्रस्वात्सम्बुद्धेः ’ इति मकारलोपे हेशब्दस्य प्राक्प्रयोगे हे ज्ञान इति सिद्धम् ।

नपुंसकाच्च । अत्र ‘ जसः शी ’ इत्यतः शी इति ‘ औङ आपः ’ इत्यत औङ इति चानुवर्तते ।

यस्येति च । अत्र ‘ नस्तद्धिते ’ इत्यतः तद्धिते इत्यनुवर्तते । भस्येत्यधिक्रियते । इश्च अश्च अनयोः समाहारः यं तस्य यस्येति विग्रहः । ततो सूत्रोक्तार्थलाभः ।

ज्ञाने । ज्ञानशब्दाद् औप्रत्यये ‘ नपुंसकाच्च ’ इति श्यादेशे ज्ञानेत्यस्य भसंज्ञायाम् ‘ यस्येति च ’ इत्यकारलोपे प्राप्ते ‘ औङः श्यां प्रतिषेधो वाच्यः ’ इति निषेधे ‘ आद्गुणः ’ इति गुणे ज्ञाने इति सिद्धम् ।

जश्शसोः शिः । अत्र ‘नपुंसकाच्च’ इत्यतो नपुंसकादित्यनुवर्तते ।

नपुंसकस्य झलचः । झल् च अच्चेति समाहारद्वन्द्वः । ‘इदितो नुम्धातोः’ इत्यतो नुम् इति, । ‘ उगिदचां सर्वनामस्थानेऽधातोः ’ इत्यतः सर्वनामस्थाने इति चानुवर्तते । तदन्तविधिः ।

CC0. In Public Domain. Digitization by eGangotri

③ डित्वभस्या[illegible] (६/४/१४३)
भाष्यवार्तिकम् । पठितम् ॥ [illegible] प्र. भा. परिशिष्ट-पृ. ६८
इति टेर्लोपात्लोपः (२) [illegible] भाष्यवार्तिकम् ।

स्याजन्तस्य च क्लीबस्य नुम् स्यात् सर्वनामस्थाने ॥ **मिदचोऽन्त्यात्परः १।१।४७ ॥** अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित्स्यात् । उपधादीर्घः । ज्ञानानि । पुनस्तद्वत् । शेषं पुंवत् ॥ एवं धनवनफलादयः ॥ **अद्ड्डतरादिभ्यः पञ्चभ्यः ७।१।२५॥** एभ्यः क्लीबेभ्यः स्वमोरद्ड्डादेशः स्यात् । **टेः ६।४।१४३॥** डिति भस्य टेर्लोपः । कतरत्, कतरद् । कतरे । कतराणि । हे कतरत् । शेषं पुंवत् ॥

ज्ञानानि । ज्ञानशब्दाज्जसि विभक्तौ 'जश्शसोः शिः' इति जसः श्यादेशेऽनुबन्धलोपे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायाम् 'मिदचोऽन्त्यात्परः' इति सूत्रबलात् 'नपुंसकस्य झलचः' इति सूत्रेण अन्तावयवे नुमागमेऽनुबन्धलोपे, 'सर्वनामस्थाने चासम्बुद्धौ' इति उपधादीर्घे ज्ञानानि इति सिद्धम् ।

ज्ञानम्, ज्ञाने, ज्ञानानि । ज्ञानम्, ज्ञाने, ज्ञानानि । ज्ञानेन, ज्ञानाभ्याम्, ज्ञानैः । ज्ञानाय, ज्ञानाभ्याम्, ज्ञानेभ्यः । ज्ञानात्-ज्ञानाद्, ज्ञानाभ्याम्, ज्ञानेभ्यः । ज्ञानस्य, ज्ञानयोः, ज्ञानानाम् । ज्ञाने, ज्ञानयोः, ज्ञानेषु । हे ज्ञान, हे ज्ञाने, हे ज्ञानानि ।

अद्ड्डतरादिभ्यः । अत्र 'स्वमोर्नपुंसकात्' इति सूत्रमनुवर्तते । नपुंसकादित्यस्य बहुवचनान्तत्वेन विपरिणामः । डतरडतमयोः प्रत्ययत्वात्तदन्तग्रहणम् ।

टेः । अत्र 'भस्य' इत्यधिक्रियते । 'अल्लोपोऽनः' इत्यतो लोप इति 'ति विंशतेर्डिति' इत्यतो डिति इति चानुवर्तते ।

कतरत् । कतरशब्दात्सौ 'स्वमोर्नपुंसकात्' इति लुको बाधकम् 'अतोऽम्' इति प्राप्तम् तं बाधित्वा 'अद्ड्डतरादिभ्यः पञ्चभ्य' इति सोरद्ड्डादेशेऽनुबन्धलोपे 'टेः' इति टिलोपे टेर्लुप्तत्वात् 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घाभावे 'वावसाने' इति वैकल्पिकचर्त्वे कतरत्-कतरद् इति रूपद्वयं सिद्धम् ।

हे कतरत् । कतरशब्दात्सम्बोधने सौ 'अद्ड्डतरादिभ्यः

एवं कतमत् । इतरत् । अन्यत् । अन्यतरत् । अन्यतमस्य त्वन्यतममित्येव । (एकतरात्प्रतिषेधो वक्तव्यः) एकतरम् ॥ **ह्रस्वो नपुंसके प्रातिपादिकस्य १।२।४७॥** अजन्तस्येत्येव । श्रीपं ज्ञानवत् ॥ **स्वमोर्नपुंसकात् ७।१।२३॥** लुक् स्यात् । वारि । इकोऽ-

---

पञ्चभ्यः' इति सोरड्डादेशेऽनुबन्धलोपे भसंज्ञायाम् 'टेः' इति टिलोपे टेर्लुप्तत्वात् 'प्रथमयोः पूर्वसवर्णः' इति दीर्घाभावे एङन्तह्रस्वान्ताङ्गपरसंबुद्ध्यवयवहल्लोऽभावेन 'एङ्ह्रस्वात्सम्बुद्धेः' इति सम्बुद्धिलोपाभावे चर्त्वे च हे कतरत्-हे कतरद् इति सिद्धम् ।

कतरत्-कतरद्, कतरे, कतराणि । कतरत्-कतरद्, कतरे, कतराणि । कतरेण, कतराभ्याम्, कतरैः । कतरस्मै, कतराभ्याम्, कतरेभ्यः । कतरस्मात्-कतरस्माद्, कतराभ्याम्, कतरेभ्यः । कतरस्य, कतरयोः, कतरेषाम् । कतरस्मिन्, कतरयोः, कतरेषु । हे कतरत्-हे कतरद् हे कतरे, हे कतराणि ।

अन्यतमम् । अन्यतमशब्दात्सौ अस्य शब्दस्य अव्युत्पन्नप्रातिपदिकत्वेन डतमप्रत्ययान्तत्वाभावात् 'अद्ड्डतरादिभ्यः पञ्चभ्यः' इति सोरड्डादेशाभावे 'स्वमोर्नपुंसकात्' इति सोर्लुकं बाधित्वा 'अतोऽम्' इति सोरमादेशे 'अमि पूर्वः' इति पूर्वरूपे अन्यतममिति सिद्धम् । अस्य सर्वादौ पाठाभावेन ज्ञानशब्दवदेव रूपं बोध्यम् ।

एकतरम् । एकतरशब्दात्सौ सोर्लुग्बाधकममं बाधित्वा 'अद्ड्डतरादिभ्यः पञ्चभ्यः', इति सोरड्डादेशे प्राप्ते 'एकतरात् प्रतिषेधो वक्तव्यः' इति तत्प्रतिषेधे 'अतोऽम्' इति सोरमादेशे 'अमि पूर्वः' इति पूर्वरूपे एकतरमिति सिद्धम् । शेषं कतरशब्दवदेवास्य रूपम् ।

श्रीपम् । श्रीपाशब्दस्य 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे ततः सौ 'अतोऽम्' इति सोरमादेशे 'अमि पूर्वः' इति पूर्वरूपे श्रीपम् इति सिद्धम् ।

स्वमोरिति । अत्र 'षड्भ्यो लुक्' इत्यतो लुगित्यनुवर्तते ।

वारि । वारिशब्दात्सौ 'स्वमोर्नपुंसकात्' इति सोर्लुकि वारि

चि विभक्तौ ७।१।७३॥ इगन्तस्य क्लीबस्य नुमाचि विभक्तौ । वारिणी । वारीणि । न लुमतेत्यस्यानित्यत्वात्पक्षे संबुद्धिनिमित्तो गुणः । हे वारे, हे वारि । घेर्ङितीति गुणे प्राप्ते । (वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन) वारिणे । वारिणः । वारिणोः ।

इति सिद्धम् ।

इकोऽचि । अत्र 'इदितोनुम् धातोः' इत्यतो नुम् इति 'नपुंसकस्य झलचः' इत्यतो नपुंसकस्येति चानुवर्तते । तदन्तविधिः ।

वारिणी । वारिशब्दाद् औ विभक्तौ 'नपुंसकाच्च' इति श्यादेशेऽनुबन्धलोपे 'इकोऽचि विभक्तौ' इति नुमागमेऽनुबन्धलोपे णत्वे वारिणी इति सिद्धम् ।

वारीणि । वारिशब्दाज्जसि 'जश्शसोः शिः' इति श्यादेशेऽनुबन्धलोपे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायाम् 'इकोऽचि विभक्तौ' इति नुमागमेऽनुबन्धलोपे 'सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घे णत्वे वारीणि इति सिद्धम् ।

हे वारे । वारिशब्दात्सम्बोधने सौ 'स्वमोर्नपुंसकात्' इति सोर्लुकि 'न लुमताङ्गस्य' इत्यस्यानित्यत्वात् 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति प्रत्ययलक्षणेन पाक्षिके 'ह्रस्वस्य गुणः' इति गुणे हे वारे इति, गुणाभावपक्षे हे वारि इति च सिद्धम् । हलादौ सत्यपि नुमागमे 'न लोपः प्रातिपदिकान्तस्य' इति नलोपेन, सम्बुद्धेर्लुका लुप्तत्वेन प्रत्ययलक्षणाभावेन नुमः प्राप्त्यभावात्सम्बुद्धौ दोषाभावेन च सकलेष्टसिद्धौ 'इकोऽचि विभक्तौ' इति सूत्रस्थम् अज्ग्रहणमेव व्यर्थं सद् 'न लुमताङ्गस्य' इत्यस्यानित्यत्वे प्रमाणम् ।

वारिणा । वारिशब्दात् टाविभक्तावनुबन्धलोपे घिसंज्ञायां परत्वाद् 'इकोऽचि विभक्तौ' इति सूत्रप्राप्तं नुमं बाधित्वा 'आङो नाऽस्त्रियाम्' इति नाऽदेशे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति णत्वे वारिणा इति सिद्धम् ।

वारिणे । वारिशब्दान्ङेविभक्तावनुबन्धलोपे घिसंज्ञायाम् 'इको

नुमचिरेति नुट् । वारीणाम् । वारिणि । हलादौ हरिवत् ॥ **आस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ७।१।७५** ॥ एषामनङ् स्याट्टादावचि । **अल्लोपोऽनः ६।४।१३४॥** अङ्गावयवोऽसर्वनामस्था-

---

ऽचि विभक्तौ' इति नुमं वाधित्वा परत्वाद् 'घेर्ङिति' इति गुणे प्राप्ते 'वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन' इतिवार्त्तिकबलान्नुमागमेऽनुबन्धलोपे णत्वे वारिणे इति सिद्धम् । अतिसखीनि इत्यत्र 'सख्युरसम्बुद्धौ' इति णिद्वद्भावेन वृद्धिः प्राप्नोति । वारिणि इत्यत्र 'अच्च घेः' इत्यौत्वम्प्राप्नोति । प्रियक्रोष्टूनि इत्यत्र 'तृज्वत्क्रोष्टुः' इति तृज्वद्भावः प्राप्नोति । वारिणे इत्यादौ गुणः प्राप्नोति। अत्र सर्वत्र पूर्वविप्रतिषेधान्नुमेव भवति ।

वारीणाम् । वारिशब्दादामि परत्वान्नुटं पूर्वविप्रतिषेधात्तृज्वद्भावं च वाधित्वा नुमि प्राप्ते 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' इति वार्त्तिकवलान्नुडागमेऽनुवन्धलोपे 'नामि' इति दीर्घे णत्वे वारीणामिति सिद्धम् ।

वारिणि । वारिशब्दान्ङिप्रत्ययेऽनुवन्धलोपे घिसंज्ञायाम् 'अच्च घेः' इति नुमं वाधित्वा परत्वादौत्वे प्राप्ते 'वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन' इति वार्त्तिकवलान्नुमागमेऽनुवन्धलोपे णत्वे वारिणि इति साधु ।

वारि, वारिणी, वारीणि । वारि, वारिणी, वारीणि । वारिणा, वारिभ्याम्, वारिभिः । वारिणे, वारिभ्याम्, वारिभ्यः । वारिणः, वारिभ्याम्, वारिभ्यः । वारिणः, वारिणोः, वारीणाम् । वारिणि, वारिणोः, वारिषु । हे वारे-हे वारि, हे वारिणी, हे वारीणि ।

अस्थिदधीति । 'इकोऽचि विभक्तौ' इत्यतः अचीति 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' इत्यतः तृतीयादिषु इति चानुवर्तते ।

अल्लोपोऽनः । अत् इति लुप्तषष्ठीकं पदम् । अन इत्यवयवषष्ठ्यन्तम्, अत् इत्यनेनान्वेति । भस्येत्यधिक्रियते तेनाक्षिप्तः सर्वो भसंज्ञा-

नयजादिस्वादिपरो योऽन् तस्याकारस्य लोपः । दध्ना । दध्ने । दध्नः । दध्नः । दध्नोः । दध्नोः ॥ **विभाषा ङिश्योः ६।४।१३६ ॥** अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः परयोः । दध्नि, दधनि । शेषं वारिवत् ॥ एवमस्थि-सक्थ्यक्षि ॥ सुधि । सुधिनी । सुधीनि । हे सुधे, हे सुधि । **तृतीयादिषु**

निमित्तकः प्रत्ययः, अवयवषष्ठ्यन्तमधिकृतमङ्गस्येति च उभयमनोविशेषणम् । अन् चाकारस्य विशेषणम् ।

दध्ना । दधिशब्दात् टाविभक्तावनुबन्धलोपे 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इति अनङादेशेऽनुबन्धलोपे 'अल्लोपोऽनः' इति अनोऽकारस्य लोपे दध्ना इति सिद्धम् ।

दध्नि । दधिशब्दान्ङौ अनुबन्धलोपे 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इत्यनङादेशेऽनुबन्धलोपे 'विभाषा ङिश्योः' इति वैकल्पिकेऽकारस्य लोपे दध्नि इति, अल्लोपाभावपक्षे दधनि इति च सिद्धम् ।

दधि, दधिनी, दधीनि । दधि, दधिनी, दधीनि । दध्ना, दधिभ्याम्, दधिभिः । दध्ने, दधिभ्याम् , दधिभ्यः । दध्नः, दधिभ्याम् , दधिभ्यः । दध्नः, दध्नोः, दध्नाम् । दध्नि–दधनि, दध्नोः, दधिषु । हे दधे-हे दधि, हे दधिनी, हे दधीनि ।

सुधि । सुधीशब्दात्सौ 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे 'स्वमोर्नपुंसकात्' इति सोर्लुकि सुधि इति साधु ।

सुधिनी । सुधीशब्दाद् औविभक्तौ 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे श्यादेशे 'अचि श्नु' इत्यादिना प्राप्तम् इयङादेशं परत्वाद्बाधित्वा 'इकोऽचि विभक्तौ' इति नुमागमेऽनुबन्धलोपे सुधिनी इति सिद्धम् ।

सुधे । सुधीशब्दात्सम्बोधने सौ 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे 'स्वमोर्नपुंसकात्' इति सोर्लुकि 'न लुमताङ्गस्य' इत्यस्यानित्यत्वात्पक्षे 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति प्रत्ययलक्षणेन 'ह्रस्वस्य गुणः' इति गुणे हे सुधे इति, हे सुधि इति च सिद्धम् ।

तृतीयादिष्विति । अत्र भाषितः पुमान् यस्मिन्नर्थे तत् भाषित

भाषितपुंस्कं पुंवद्गालवस्य ७।१।७४ ॥ प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा टादावचि । सुधिया, सुधिनेत्यादि ॥ मधु । मधुनी । मधूनि । हे मधो, हे मधु ॥ सुलु । सुलुनी । सुलूनि ।

पुंस्कं प्रवृत्तिनिमित्तम्, तदस्यास्तीति भाषितपुंस्कमिति विग्रहः । अर्शआदित्वादच् । एकस्मिन् प्रवृत्तिनिमित्ते भाषितपुंस्कं यच्छब्दस्वरूपं तद्वा पुंवदिति तदर्थः । 'इकोऽचि विभक्तौ' इत्यतः अचीत्यनुवर्तते ।

भाषितपुंस्कलक्षणं तु—
यन्निमित्तमुपादाय पुंसि शब्दः प्रवर्तते ।
क्लीबवृत्ति तदेव स्यादुक्तपुंस्कं तदुच्यते ॥ इति ।

सुधीशब्दे सुष्ठु ध्यायतीति, सुष्ठु-शोभना धीर्यस्येति वा विग्रहः । तेन सुष्ठुध्यानकर्तृत्वं शोभनबुद्धिमत्त्वं वा प्रवृत्तिनिमित्तम् । तच्च पुंसि स्त्रियां क्लीबे च समानमेव ।

सुधिया । सुधीशब्दात् टाविभक्तावनुबन्धलोपे 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' इति पुंवद्भावेन ह्रस्वनुमोरभावे 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति इयङादेशेऽनुबन्धलोपे सुधिया इति, पुंवद्भावाभावपक्षे 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे 'इकोऽचि विभक्तौ' इति नुमागमेऽनुबन्धलोपे सुधिना इति च सिद्धम् ।

सुधि, सुधिनी, सुधीनि । सुधि, सुधिनी, सुधीनि । सुधिया—सुधिना, सुधिभ्याम्, सुधिभिः । सुधिये—सुधिने, सुधिभ्याम्, सुधिभ्यः । सुधियः—सुधिनः, सुधिभ्याम्, सुधिभ्यः । सुधियः—सुधिनः, सुधियोः—सुधिनोः, सुधियाम्-सुधीनाम् । सुधियि—सुधिनि, सुधियोः—सुधिनोः, सुधिषु । हे सुधे—हे सुधि, हे सुधिनी, हे सुधीनि ।

'मधु मद्ये पुष्परसे' 'मधुर्वसन्ते चैत्रे च' इति कोशात् मधुशब्दस्य पुंनपुंसकयोः मद्यत्ववसन्तत्वादिरूपप्रवृत्तिनिमित्तभेदात् न पुंवत्त्वविकल्पः । मधुशब्दस्य रूपाणि सिद्धिप्रकारश्च वारिशब्दवदेवेति शम् ।

सुलूशब्दे सुष्ठु लुनातीति विग्रहात् सुष्ठुलवनकर्तृत्वरूपप्रवृत्तिनिमि-

सुलुनेत्यादि । धातृ । धातृणी । धातॄणि । हे धातः, हे धातृ । धातॄणाम् । एवं ज्ञात्रादयः ॥ **एच इग्घ्रस्वादेशे १।१।४८ ॥**

त्तस्य पुंनपुंसकयोरैक्यात्पुंवद्भावो भवत्येव ।

सुल्वा । सुलूशब्दात् टाविभक्तावनुबन्धलोपे 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' इति पाक्षिकपुंवद्भावेन ह्रस्वनुमोरभावे 'अचि श्नु-इत्यादिना प्राप्तमुवङादेशं बाधित्वा 'ओः सुपि' इति यणि सुल्वा इति, पुंवद्भावाभावपक्षे 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे 'इकोऽचि विभक्तौ' इति नुमागमेऽनुबन्धलोपे सुलुना इति च सिद्धम् ।

सुलु, सुलुनी, सुलूनि । सुलु, सुलुनी, सुलूनि । सुल्वा–सुलुना, सुलुभ्याम्, सुलुभिः । सुल्वे–सुलुने, सुलुभ्याम्, सुलुभ्यः । सुल्वः–सुलुनः, सुलुभ्याम्, सुलुभ्यः । सुल्वः–सुलुनः, सुल्वोः–सुलुनोः, सुल्वाम्–सुलूनाम् । सुल्वि–सुलुनि, सुल्वोः–सुलुनोः, सुलुषु । हे सुलो, हे सुलु, हे सुलुनी, हे सुलूनि ।

हे धातः

हे धातृ

७।१।२३॥

हे धातः । धातृशब्दात्सम्बोधने सौ 'स्वमोर्नपुंसकात्' इति सोर्लुकि 'न लुमताङ्गस्य' १।१।६३ इत्यस्यानित्यत्वात्पक्षे प्रत्ययलक्षणेन 'ह्रस्वस्य गुणः' इति सम्बुद्धिनिमित्ते गुणे रपरे विसर्गे च कृते हे धातः इति, हे धातृ इति च सिद्धम् ।

धात्रा । धातृशब्दात् टाविभक्तावनुबन्धलोपे धारणकर्तृत्वरूपप्रवृत्तिनिमित्तस्य पुंनपुंसकयोरैक्येन 'तृतीयादिषु भाषितपुंस्कं पुवद्गालवस्य' इति पाक्षिके पुंवद्भावे नुमोऽभावेन यणि धात्रा इति, पुंवद्भावाभावपक्षे 'इकोऽचि विभक्तौ' इति नुमागमेऽनुबन्धलोपे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति णत्वे धातृणा इति च सिद्धम् ।

धातॄणाम् । धातृशब्दादामि 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' इति पाक्षिके पुंवाद्भवेन नुमोऽभावे 'ह्रस्वनद्यापो नुट्' इति नुडागमेऽनुबन्धलोपे 'नामि' इति दीर्घे 'ऋवर्णान्नस्य णत्वं वाच्यम्, इति णत्वे धातॄणाम् इति, पुंवद्भावाभावपक्षेऽपि 'नुमचिरतृज्वद्भावेभ्यो-

आदिश्यमानेषु ह्रस्वेषु मध्ये एच इगेव स्यात् । प्रद्यु । प्रद्युनी । प्रद्यूनि । प्रद्युनेत्यादि ॥ प्ररि । प्ररिणी । प्ररीणि । प्ररिणा । एकदेशविकृतमनन्यवत् । प्रराभ्याम् । प्ररीणाम् । सुनु । सुनुनी । सुनूनि । सुनुनेत्यादि ॥

इत्यजन्तनपुँसकलिङ्गाः ॥

नुट्पूर्वविप्रतिषेधेन' इति वार्तिकेन नुमागमं वाधित्वा नुडागमेऽनुवन्धलोपे दीर्घे णत्वे धातॄणामित्येव सिद्ध्यतीति दिक् ।

एच इग्घ्रस्वादेशे । एच्प्रत्याहारस्थवर्णेषु अवर्णांशस्यापि सत्त्वेन 'ह्रस्वो नपुंसके प्रातिपदिकस्य, इति सूत्रेण एच इगेव ह्रस्वो यथा स्यात् कदाचित् अकारोऽपि ह्रस्वो न स्यादिति नियमार्थमिदं सूत्रम् ।

प्रद्यु । प्रद्योशव्दात्सौ 'एच इग्घ्रस्वादेशे' इति ह्रस्वे 'स्वमोर्नपुंसकात्' इति सोर्लुकि प्रद्यु इति सिद्धम् । यदिगन्तं प्रद्यु इति तस्य भाषितपुंस्कत्वाभावात् पुंवद्भावो न भवति । अस्य रूपाणि सिद्धिप्रकारश्च वारिशव्दवदेवेतिवोध्यम् ।

प्रराभ्याम् । प्ररैशव्दाद् भ्यासि 'एच इग्घ्रस्वादेशे' इति ह्रस्वे 'एकदेशविकृतमनन्यवत्' इतिपरिभाषया रैशव्देन रि इत्यस्यापि ग्रहग्रहणात् 'रायो हलि' इत्यात्वे प्रराभ्यामिति सिद्धम् । अस्य हलादावात्वम् । अजादौ तु वारिशव्दवदेव रूपम् । यदिगन्तं प्ररि इति तस्य भाषितपुंस्कत्वाभावात्पुंवद्भावो न भवति ।

प्ररि, प्ररिणी, प्ररीणि, । प्ररि, प्ररिणी, प्ररीणि । प्ररिणा, प्रराभ्याम्, प्रराभिः । प्ररिणे, प्रराभ्याम्, प्रराभ्यः । प्ररिणः, प्रराभ्याम्, प्रराभ्यः । प्ररिणः, प्ररिणोः, प्ररीणाम् । प्ररिणि, प्ररिणोः, प्ररासु । हे प्ररे-हे प्ररि, हे प्ररिणी, हे प्ररीणि ।

सुनु । सुनौ शव्दात्सौ 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इतिसूत्रेण 'एच इग्घ्रस्वादेशे' इति नियमादुकारे ह्रस्वे 'स्वमोर्नपुंसकात्' इति सोर्लुकि सुनु इति सिद्धम् । यदिगन्तं सुनु इति तस्य भाषितपुंस्कत्वाभावात्पुंवद्भावो न भवति प्रद्योशव्दवच्चास्य रूपं वोध्यम् ।

॥ इत्यजन्तनपुंसकलिङ्गाः ॥

हो ढः ८।२।३१॥ हस्य ढः स्याज्झलि पदान्ते च। लिट्, लिड्। लिहौ। लिहः। लिड्भ्याम्। लिट्सु, लिटत्सु॥ **दादे-**

होढः। ह इति षष्ठ्यन्तम्। 'झलो झलि' इत्यतो झलीत्यनुवर्तते। पदस्येत्यधिक्रियते। 'स्कोः संयोद्योरन्ते च' इत्यतोऽन्ते इत्यनुवर्तते।

लिट्। लिह् शब्दात्सौ विभक्तावनुबन्धलोपे 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सुलोपे 'होढः' इति हकारस्य ढकारे 'झलां जशोऽन्ते' इति जश्त्वे 'वावसाने' इति वैकल्पिके चर्त्वे लिट् इति, चर्त्वाभावपक्षे लिड् इति च सिद्धम्।

लिड्भ्याम्। लिह्शब्दाद् भ्यामि विभक्तौ 'होढः' इति हस्य ढत्वे 'स्वादिष्वसर्वनामस्थाने' इति पदत्वात् झलांजशोऽन्ते' इति जश्त्वे लिड्भ्याम् इति सिद्धम्।

लिट्त्सु। लिह्शब्दात्सुपि विभक्तावनुबन्धलोपे 'होढः' इति हस्य ढत्वे पदत्वाज्जश्त्वेन डकारे 'खरि च' इति चर्त्वस्यासिद्धत्वात्पूर्वं 'डः सि धुट्' इति वैकल्पिके धुडागमेऽनुबन्धलोपे ततः 'खरि च' इति धकारस्य चर्त्वेन तकारे डकारस्य चर्त्वेन टकारे च कृते लिट्त्सु इति। चर्त्वनिष्पन्नतकारस्यासिद्धत्वात् 'चयोद्वितीया' इति थकारो न भवति। 'न पदान्ताट्टोरनाम्' इति निषेधात् ष्टुत्वमपि न भवति। धुडभावपक्षे डकारस्य चर्त्वेन टकारे लिट्सु इति च सिद्ध्यति। अत्रापि टस्यासिद्धत्वात् ठकारो न। 'न पदान्ताट्टोरनाम्' इति निषेधात् ष्टुत्वमपि न भवतीति दिक्।

लिट्–लिड्, लिहौ, लिहः। लिहम्, लिहौ, लिहः। लिहा, लिड्भ्याम्, लिड्भिः। लिहे, लिड्भ्याम्, लिड्भ्यः। लिहः, लिड्भ्याम्, लिड्भ्यः। लिहः, लिहोः, लिहाम्। लिहि, लिहोः लिट्त्सु-लिट्सु। हे लिट्-हे लिड्, हे लिहौ, हे लिहः।

दादेर्धातोर्घः। अत्र दादिपदमौपदेशिकदादिपरम्। 'होढः' इत्यतो ह इतिषष्ठ्यन्तमनुवर्तते। झलि इति पदस्य इति अन्ते इति

र्धातोर्घः ८।२।३२॥ झलि पदान्ते चोपदेशे दादेर्धातोर्हस्य घः ।
एकाचो बशो भष् झषन्तस्य स्ध्वोः ८।२।२७ ॥
धात्ववयवस्यैकाचो झषन्तस्य बशो भष् से ध्वे पदान्ते च । धुक्, धुग् । दुहौ । दुहः । धुग्भ्याम् । धुक्षु ॥ **वा द्रुहमुहष्णुहष्णि-**

च पूर्वसूत्रवदनुवर्तते ।

एकाच इति । अत्र 'दादेर्धातोर्घः' इत्यतो धातोरित्यवयषष्ठ्यन्तमनुवर्तते । पदस्य इत्याधीक्रियते । 'स्कोः संयोगाद्योरन्ते च' इत्यतः अन्ते इत्यनुवर्तते ।

धुक् । दुहशब्दात्सौ अनुबन्धलोपे 'हल्ङ्याब्भ्य' इत्यादिना सुलोपे 'दादेर्धातोर्घः' इति हस्य घत्वे 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इतिसूत्रेण अत्र धातुर्दुह् इति तदवयवोऽपि 'व्यपदेशिवदेकस्मिन्' इति परिभाषया दुध् इति स च एकाच् झषन्तश्च तदवयवस्य बशो दकारस्य भष्भावेन धकारेकृते 'झलां जशोऽन्ते' इति जश्त्वे 'वावसाने' इति पाक्षिके चर्त्वे धुक्-धुग् इति रूपद्वयं सिद्ध्यति ।

धुग्भ्याम् । दुहशब्दाद् भ्यामि 'दादेर्धातोर्घः' इति हस्य घत्वे 'एकाचो वशोभष् झषन्तस्य स्ध्वोः' इति भष्भावे 'स्वादिष्वसर्वनामस्थाने' इति पदत्वाज्जश्त्वे धुग्भ्याम् इति सिद्धम् ।

धुक्षु । दुहशब्दात्सुप्यनुबन्धलोपे 'दादेर्धातोर्घः' इति हस्य घत्वे 'एकाचो वशो भष् झषन्तस्य स्ध्वोः' इति दस्य भष्भावेन धकारे कृते 'झलां जशोऽन्ते' इति जश्त्वेन गकारे 'खरि च' इति चर्त्वस्यासिद्धत्वात् पूर्वम् 'आदेशप्रत्यययोः' इति षत्वे चर्त्वे धुक्षु इति सिद्धम् ।

धुक्-धुग् , दुहौ, दुहः । दुहम् , दुहौ, दुहः । दुहा, धुग्भ्याम् , धुग्भिः । दुहे, धुग्भ्याम् , धुग्भ्यः । दुहः, धुग्भ्याम् , धुग्भ्यः । दुहः, दुहोः, दुहाम् । दुहि, दुहोः, धुक्षु । हे धुक्–हे धुग् , हे दुहौ, हे दुहः ।

वाद्रुह इति । अत्र 'दादेर्धातोर्घः' इत्यतो घ इति 'हो ढः' इत्यतो ह इति झलि इति अन्ते इति चानुवर्तते । पदस्येत्यधिक्रियते ।

हाम् ८।२।३३॥ एषां हस्य वा घो झलि पदान्ते च । ध्रुक्; ध्रुग्, ध्रुट्; ध्रुड् । द्रुहौ । द्रुहः । ध्रुग्भ्याम्, ध्रुड्भ्याम् । ध्रुक्षु, ध्रुट्सु, ध्रुट्त्सु ॥ एवं मुक्, मुग् । इत्यादि ॥ **धात्वादेः षः सः** ६।१।५४ ॥ स्नुक्,

---

ध्रुक् । द्रुह्शब्दात्सौ अनुबन्धलोपे 'हल्ङ्याब्भ्य' इत्यादिना सुलोपे 'वाद्रुह्मुह्ष्णुह्ष्णिहाम्' इति पाक्षिके हस्य घत्वे 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति भष्भावेन दस्य धकारे जश्त्वे वैकल्पिके चर्त्वे च ध्रुक्-ध्रुग् इतिरूपद्वयं सिद्धम् । घत्वाभावपक्षे तु 'होढः' इति हस्य ढत्वे भष्भावे जश्त्वे पाक्षिके चर्त्वे च ध्रुट्-ध्रुड् इति रूपद्वयं सिद्ध्यति ।

ध्रुग्भ्याम् । द्रुह्शब्दात् भ्यामि' 'वा द्रुहमुहष्णुहष्णिहाम्' इति वैकल्पिके हस्य घत्वे 'एकाच' इति भष्भावे 'स्वादिष्वसर्वनामस्थाने' इति पदत्वाज्जश्त्वेध्रुग्भ्यामिति, घत्वाभावपक्षे 'होढः' इति ढत्वे जश्त्वे ध्रुड्भ्यामिति च सिद्धम् ।

ध्रुक्षु । द्रुह्शब्दात् सुपि अनुबन्धलोपे 'वाद्रुहमुहष्णुहष्णिहाम्' इति वैकल्पिके हस्य घत्वे भष्भावे जश्त्वे षत्वे चर्त्वे ध्रुक्षु इति, घत्वाभावपक्षे 'हो ढः' इति हस्य ढत्वे भष्भावे जश्त्वे 'डः सि धुट्' इति वैकल्पिके धुडागमेऽनुबन्धलोपे 'खरि च' इति चर्त्वेन धकारस्य तकारे डकारस्य टकारे ध्रुट्त्सु इति, धुडभावपक्षे डस्य चर्त्वेन टकारे ध्रुट्सु इति च सिद्धम् 'न पदान्ताट्टोरनाम्' इति निषेधात् ष्टुत्वं न । चर्त्वस्यासिद्धत्वात् टतयोष्टथौ नेति शम् ।

ध्रुक्-ध्रुग्-ध्रुट्-ध्रुड्, द्रुहौ, द्रुहः । द्रुहम्, द्रुहौ, द्रुहः । द्रुहा, ध्रुग्भ्याम्-ध्रुड्भ्याम् ध्रुग्भिः-ध्रुड्भिः । द्रुहे, ध्रुग्भ्याम्-ध्रुड्भ्याम् ध्रुग्भ्यः- ध्रुड्भ्यः । द्रुहः, ध्रुग्भ्याम्-ध्रुड्भ्याम्, ध्रुग्भ्यः-ध्रुड्भ्यः । द्रुहः, द्रुहोः, द्रुहाम् । द्रुहि, द्रुहोः, ध्रुक्षु-ध्रुट्त्सु-ध्रुट्सु । हेध्रुक्-हे ध्रुग-हे-ध्रुट्-हे ध्रुड्-हे द्रुहौ, हे द्रुहः ।

स्नुक् । ष्णुह शब्दात्सौ अनुबन्धलोपे 'हल्याब्भ्य' इत्यादिना सु-

स्नुग्; स्नुट्, स्नुड् । एवं स्निक्, स्निग्; स्निट्, स्निड् ॥ विश्ववाट्, विश्ववाड् । विश्ववाहौ । विश्ववाहः । विश्ववाहम् । विश्ववाहौ ॥ **इग्यणः संप्रसारणम् १।१।४५॥** यणः स्थाने प्रयुज्यमानो य इक् स संप्रसारणसंज्ञः स्यात् ॥ **वाह ऊठ् ६।४।१३२॥** भस्य वाहः संप्रसारणमूठ् ॥ **संप्रसारणाच्च ६।१।१०८॥** संप्रसारणादचि पूर्वरूपमेकादेशः । एत्येधत्यूठ्स्विति वृद्धिः । विश्वौहः इत्यादि । **चतुरन-**

लोपे ' धात्वादेः षः सः ' इति षस्य सकारे ' निमित्तापाये नैमित्तिकस्याप्यपायः ' इति न्यायेन णत्वस्यापि निवृत्तौ ' वा द्रुहमुहष्णुहष्णिहाम् ' इति वैकल्पिके हस्य घत्वे जश्त्वे चर्त्वे च कृते स्नुक्-स्नुग् इति रूपद्वयम्-घत्वाभावपक्षे 'होढः' इति हस्य ढत्वे जश्त्वे चर्त्वे च कृते स्नुट्-स्नुड् इति रूपद्वयं च सिद्धम् । स्नुह्शब्दस्य रूपाणि सिद्धिप्रकारश्च द्रुह्शब्दवदेवेति बोध्यम् ।

वाह ऊठ् । अत्र 'भस्य' इत्यधिक्रियते । 'वसोः सम्प्रसारणम्' इत्यतः सम्प्रसारणमित्यनुवर्तते ।

सम्प्रसारणाच्च । अत्र ' एकः पूर्वपरयोः ' इत्याधिक्रियते । 'इको यणचि' इत्यतः अचीति 'अमि पूर्वः' इत्यतः पूर्व इति चानुवर्तते ।

विश्वौहः । विश्ववाह्शब्दात् शसि विभक्तावनुबन्धलोपे 'वाह ऊठ्' इति सूत्रेण यणः स्थाने प्रयुज्यमान इकः सम्प्रसारणसंज्ञया वाह इत्यत्र वकारस्य ऊठि सम्प्रसारणेऽनुबन्धलोपे विश्व ऊ आह् इति जाते 'सम्प्रसारणाच्च' इति पूर्वरूपे 'एत्येधत्यूठ्सु' इति वृद्धौ रुत्वे विसर्गे च कृते विश्वौहः इति सिद्धम् ।

विश्ववाट्-विश्ववाड्, विश्ववाहौ, विश्ववाहः । विश्ववाहम्, विश्ववाहौ, विश्वौहः । विश्वौहा, विश्ववाड्भ्याम्, विश्ववाड्भिः । विश्वौहे, विश्ववाड्भ्याम्, विश्ववाड्भ्यः । विश्वौहः, विश्ववाड्भ्याम, विश्ववाड्भ्यः । विश्वौहः, विश्वौहोः, विश्वौहाम् । विश्वौहि, विश्वौहोः, विश्ववाट्त्सु-विश्ववाट्सु । हे विश्ववाट्- हे विश्ववाड्, हे विश्ववाहौ, हे विश्ववाहः ।

डुहोरामुदात्तः ७।१।९८॥ अनयोराम् स्यात्सर्वनामस्थाने परे । **सावनडुहः ७।१।८२॥** अस्य नुम् स्यात् सौ परे । अनड्वान् ॥ **अम् संबुद्धौ ७।१।९९ ॥** हे अनड्वन् । हे अनड्वाहौ । हे अनड्वाहः । अनडुहः । अनडुहा ॥ **वसुस्रंसुध्वंस्वनडुहां दः ८।२।७२ ॥** सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात्पदान्ते । अनडुद्भ्यामित्यादि ।

चतुरनडुहोरिति । अत्र 'इतोत्सर्वनामस्थाने' इत्यतः सर्वनामस्थाने इत्यनुवर्तते ।

सावनडुहः । अत्र 'आच्छीनद्योर्नुम्' इत्यतः आत् इति नुम् इति चानुवर्तते ।

अनड्वान् । अनडुह्शब्दात्सौ अनुबन्धलोपे 'चतुरनडुहोरामुदात्तः' इति मित्त्वादन्त्यादचः परे आमागमेऽनुबन्धलोपे यणि 'सावनडुहः' इति नुमागमेऽनुबन्धलोपे 'हल्ङ्याब्भ्य' इत्यादिना सुलोपे संयोगान्तलोपे अनड्वान् इति सिद्धम् ।

अम्सम्बुद्धौ । अत्र 'चतुरनडुहोरामुदात्तः' इत्यतश्चतुरनडुहोरित्यनुवर्तते ।

हे अनड्वन् । अनडुह्शब्दात्सम्बोधने सौ अनुबन्धलोपे 'चतुरनडुहोरामुदात्तः' इति प्राप्तमामागमं बाधित्वा 'अम् सम्बुद्धौ' इति मित्त्वादन्त्यादचः परे अमागमेऽनुबन्धलोपे यणि 'सावनडुहः' इति नुम्यनुबन्धलोपे सुलोपे संयोगान्तलोपे तस्यासिद्धत्वान्नलोपाभावे हे अनड्वन् इति सिद्धम् ।

अनड्वाहौ । अनडुह्शब्दाद् औविभक्तौ 'चतुरनडुहोरामुदात्तः' इत्यामागमेऽनुबन्धलोपे यणि अनड्वाहौ इति सिद्धम् ।

वसुस्रंसु । अत्र 'ससजुषो रुः' इत्यतः स इत्यनुवृत्तं वसोर्विशेषणम् । तदन्तविधिः । पदस्येत्यधिक्रियते 'झलां जशोन्ते' इत्यतः अन्ते इत्यनुवर्तते ।

अनडुद्भ्याम् । अनडुह्शब्दाद्भ्यामि विभक्तौ, 'वसुस्रंसुध्वंस्वन-

सान्तेति किम्—विद्वान् । पदान्ते किम्—स्रस्तम् । ध्वस्तम् ॥ **सहेः साडः सः ८।३।५६** ॥ साड्रूपस्य सहेः सस्य मूर्धन्यादेशः । तुराषाट्, तुराषाड् । तुरासाहौ । तुरासाहः । तुराषाड्भ्यामित्यादि ॥ **दिव औत् ७।१।८४** ॥ दिविति प्रातिपदिकस्यौत्स्यात्सौ । सुद्यौः । सुदिवौ ॥ **दिव उत् ६।१।१३१**॥ दिवोन्तादेश उकारः स्यात् पदान्ते । सुद्युभ्यामित्यादि ॥ चत्वारः । चतुरः ।

डुहांदः' इति हस्य दत्वे अनडुद्भ्यामिति सिद्धम् ।

अनड्वान्, अनड्वाहौ, अनड्वाहः । अनड्वाहम्, अनड्वाहौ, अनडुहः । अनडुहा, अनडुद्भ्याम्, अनडुद्भिः । अनडुहे, अनडुद्भ्याम्, अनडुद्भ्यः । अनडुहः, अनडुद्भ्याम्, अनडुद्भ्यः । अनडुहः, अनडुहोः, अनडुहाम् । अनडुहि, अनडुहोः अनडुत्सु । हे अनड्वन्, हे अनड्वाहौ, हे अनड्वाहः ।

सहेः साडः सः । अत्र 'अपदान्तस्य मूर्धन्यः' इत्यतो मूर्धन्य इत्यधिक्रियते ।

तुराषाड् । तुरासाह्शब्दात्सौ अनुबन्धलोपे 'हल्ङ्याब्भ्य' इत्यादिना सुलोपे 'होढः' इति हस्य ढत्वे जश्त्वे 'सहेः साडः सः' इति षत्वे 'वावसाने' इति वैकल्पिके चर्त्वे तुराषाट् इति, चर्त्वाभावपक्षे तुराषाड् इति च सिद्धम् । रूपं सुगमम् ।

दिवऔत् । अत्र 'सावनडुहः' इत्यतः सावित्यनुवर्तते ।

सुद्यौः । सुदिव्शब्दात्सौ 'दिवऔत्' इति औकारेऽन्तादेशे यणि अल्विधित्वेन स्थानिवत्त्वाभावात् 'हल्ङ्याब्भ्यः' इत्यादिना सुलोपाभावे रुत्वे विसर्गे च सुद्यौः इति सिद्धम् ।

दिवउत् । अत्र 'एङः पदान्तादति' इत्यतः पदान्तादित्यनुवृत्तं सप्तम्या विपरिणम्यते ।

सुद्युभ्याम् । सुदिव्शब्दाद्भ्यामि विभक्तौ 'स्वादिष्वसर्वनामस्थाने' इति पदत्वात् 'दिव उत्' इत्यन्तादेशे उकारे यणि सुद्युभ्याम् इति सिद्धम् ।

चतुर्भिः । चतुर्भ्यः ॥ **षट्चतुर्भ्यश्च ७।१।५५** ॥ षट्संज्ञकेभ्यश्चतुरश्च परस्य आमो नुडागमः ॥ **रषाभ्यां नो णः समानपदे ८।४।१** ॥ रेफषकाराभ्यां परस्य नस्य णः स्यादेकपदे (**अचो रहाभ्यां द्वे ८।४।४६** ॥ अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः।) चतुर्ण्णाम्, चतुर्णाम् ॥ **रोः सुपि ८।३।१६** ॥ रोरेव विसर्गः सुपि । षत्वम् । षस्य द्वित्वे प्राप्ते ॥ **शरोऽचि ८।४।४९** ॥ अचि परे शरो न द्वे स्तः । चतुर्षु ॥ **मो**

सुद्यौः, सुदिवौ, सुदिवः । सुदिवम्, सुदिवौ, सुदिवः । सुदिवा, सुद्युभ्याम्, सुद्युभिः । सुदिवे, सुद्युभ्याम्, सुद्युभ्यः । सुदिवः, सुद्युभ्याम्, सुद्युभ्यः । सुदिवः, सुदिवोः, सुदिवाम् । सुदिवि, सुदिवोः सुद्युषु । हे सुद्यौः, हे सुदिवौ, हे सदिवः ।

चत्वारः । चतुर्शब्दाज्जसि विभक्तावनुवन्धलोपे 'चतुरनडुहोरामुदात्तः' इति मित्त्वादन्त्यदिचः परे आमागमेऽनुवन्धलोपे यणि रुत्वे विसर्गे च चत्वारः इति सिद्धम् ।

षट्चतुर्भ्यश्च । अत्र 'आमिसर्वनाम्नः सुट्' इत्यतः आमीत्यनुवृत्तं षष्ठ्यन्तत्वेन विपरिणम्यते । 'ह्रस्वनद्यापोनुट्' इत्यतोनुडित्यनुवर्तते ।

चतुर्ण्णाम् । चतुर्शब्दादामिविभक्तौ 'षट्चतुर्भ्यश्च' इतिनुडागमेऽनुबन्धलोपे 'रषाभ्यां नोणः समानपदे' इति णत्वे 'अचोरहाभ्यां द्वे' इति वैकल्पिके णस्य द्वित्वे चतुर्ण्णाम् इति, द्वित्वाभावपक्षे चतुर्णाम् इति च सिद्धम् ।

शरोऽचि । अत्र 'अचोरहाभ्यांद्वे' इत्यतो द्वे इति 'नादिन्याक्रोशे पुत्रस्य' इत्यतो नेति चानुवर्तते ।

चतुर्षु । चतुर्शब्दात्सुप्यनुबन्धलोपे 'खरवसानयोर्विसर्जनीयः' इतिप्राप्तविसर्गस्य 'रोः सुपि' इतिनियमान्निषेधे 'आदेशप्रत्यययोः' इति षत्वे 'अचो रहाभ्यांद्वे' इति षस्य द्वित्वे प्राप्ते 'शरोऽचि' इति निषेधे चतुर्षु इति सिद्धम् ।

मो नो धातोः । अत्र पदस्येत्यधिक्रियते । 'झलांजशोऽन्ते' इत्यतो-

नो धातोः ८।२।६४ ॥ धातोर्मस्य नः पदान्ते । प्रशान् ॥ **किमः कः ७।२।१०३** ॥ किमः कः स्याद्विभक्तौ । कः । कौ । के । इत्यादि । शेषं सर्ववत् ॥ **इदमो मः ७।२।१०८** ॥ इदमो मस्य मः स्यात् सौ परे । त्यदाद्यत्वापवादः ॥ **इदोऽय् पुंसि ७।२।१११** ॥ इदम इदोऽय् सौ पुंसि । अयम् । त्यदाद्यत्वे ॥ **अतो**

ऽन्ते इत्यनुवर्तते ।

प्रशान् । प्रशाम्शब्दात्सौ अनुबन्धलोपे 'हल्ङ्याब्भ्य' इत्यादिना सुलोपे 'मोनोधातोः' इति मस्य नत्वे प्रशान् इति सिद्धम् ।

प्रशान्, प्रशामौ, प्रशामः । प्रशामम्, प्रशामौ, प्रशामः । प्रशामा, प्रशान्भ्याम्, प्रशान्भिः । प्रशामे, प्रशान्भ्याम्, प्रशान्भ्यः । प्रशामः, प्रशान्भ्याम्, प्रशान्भ्यः । प्रशामः, प्रशामोः, प्रशामाम् । प्रशामि, प्रशामोः, प्रशान्त्सु–प्रशान्सु । हे प्रशान्, हे प्रशामौ, हे प्रशामः ।

किमः कः । अत्र 'अष्टन आविभक्तौ' इत्यतो विभक्तावित्यनुवर्तते ।

कः । किम् शब्दात्सौ अनुबन्धलोपे 'किमः कः' इति कादेशे हलन्तात्परत्वाभावेन सुलोपाभावे रुत्वे विसर्गे कः इति सिद्धम् । सर्वशब्दवदस्य रूपम् ।

इदमो मः । अत्र 'तदोः सः सावनन्त्ययोः' इत्यतः सौ इत्यनुवर्तते । 'अलोऽन्त्यस्य' इति परिभाषासूत्रप्रवृत्त्या मस्य मः इत्यर्थलाभः

इदोऽय् पुंसि । अत्र 'इदमो मः' इत्यत इदमः इत्यनुवर्तते । 'यः सौ' इत्यतः सौइत्यनुवर्तते ।

अयम् । इदम् शब्दात्सौ अनुबन्धलोपे 'त्यदादीनामः' इत्यकारेऽन्तादेशे प्राप्ते तम्प्रबाध्य 'इदमोमः' इति मस्य मकारे 'इदोऽय् पुंसि' इति इदोऽयादेशे 'हल्ङ्याब्भ्य' इत्यादिना सुलोपे अयम् इति सिद्धम् ।

अतो गुणे । अत्र 'एङि पररूपम्' इत्यतः पररूपम् इति उस्य-

गुणे ६।१।९७॥ अपदान्तादतो गुणे परे पररूपमेकादेशः॥ **दश्च ७।२।१०९ ॥** इदमो दस्य मः स्याद्विभक्तौ । इमौ । इमे । त्यदादेः संबोधनं नास्तीत्युत्सर्गः ॥ **अनाप्यकः ७।२।११२॥** अक्कारस्येदम इदोऽनापि विभक्तौ । आबिति प्रत्याहारः । अनेन ॥ **हलि लोपः ७।२।११३ ॥** अक्कारस्येदम इदो लोप आपि हलादौ । नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे ॥ **आद्यन्तवदेकस्मिन् १।१।२१॥** एकस्मिन्क्रियमाणं कार्य-

---

पदान्तात्' इत्यतः अपदान्तात् इति चानुवर्तते। 'एकः पूर्वपरयोः' इत्यधिक्रियते ।

दश्च । अत्र 'इदमो मः' इति सूत्रमनुवर्तते । 'अष्टन आविभक्तौ' इत्यतः विभक्तौ इत्यनुवर्तते ।

इमौ । इदम् शब्दाद् औविभक्तौ 'त्यदादीनामः' इत्यन्तादेशेऽकारे 'अतो गुणे' इति पररूपे 'दश्च' इति दकारस्य मकारे 'वृद्धिरेचि' इति वृद्धौ इमौ इति सिद्धम् ।

इमे । इदम्शब्दाज्जसि विभक्तावनुबन्धलोपे 'त्यदादीनाम' इत्यन्तादेशे अकारे 'अतो गुणे' इति पररूपे 'दश्च' इति दस्य मत्वे 'जशः शी' इति शयादेशेऽनुबन्धलोपे गुणे इमे इति सिद्धम् ।

अनाप्यकः । अत्र 'इदमो मः' इत्यतः इदम इति, 'इदोऽय् पुंसि' इत्यत इद इति, 'अष्टन आविभक्तौ' इत्यतो विभक्ताविति-चानुवर्तते ।

अनेन । इदम्शब्दात् टाविभक्तौ 'त्यदादीनामः' इत्यन्तादेशेऽकारे 'अतो गुणे' इति पररूपे 'अनाप्यकः' इति इदः स्थाने अनादेशे 'टाङसिङसामिनात्स्याः' इति इनादेशे गुणे अनेन इति सिद्धम् ।

हलि लोपः । अत्र 'अनाप्यकः' इत्यत आप्यक इति 'इदमो मः' इत्यत इदम इति 'इदोऽय् पुंसि' इत्यत इद इति चानुवर्तते ।

आद्यन्तवदेकस्मिन् । तदादितदन्तयोः क्रियमाणं कार्यम् एक-

मादाविवान्त इव स्यात् ।सुपि चेति दीर्घः। आभ्याम् ॥ **नेदमदसोरकोः** ७।१।११॥ अककारयोरिदमदसोर्भिस ऐस् न । एभिः । अस्मै । एभ्यः ।

स्मिन् असहायेऽपि तदादौ इव तदन्ते इव च भवतीति तदर्थः । एकस्मिन्नपि वर्णे तदादित्वव्यवहारः तदन्तत्वव्यवहारश्च भवतीति यावत् । यथा लोके एकपुत्रसत्त्वे तस्मिन्नेव ज्येष्ठत्वकनिष्ठत्वादिव्यवहारस्तथा शास्त्रेऽपि ।

आभ्याम् । इदम्शब्दाद्भ्यामिविभक्तौ त्यदाद्यत्वे पररूपत्वे 'अनाप्यकः' इतिसूत्रप्राप्तमनादेशं बाधित्वा 'हलिलोपः' इति इदो लोपे 'अलोऽन्त्यस्य' इति परिभाषाप्रवृत्त्या दकारमात्रस्य लोपस्तु न, 'नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे' इति परिभाषया तन्निषेधात्। अ भ्याम् इति स्थिते 'आद्यन्तवदेकस्मिन्' इति सूत्रेण अकारे अदन्तत्वमाश्रित्य 'सुपि च' इति दीर्घे आभ्यमिति सिद्धम् ।

नेदमदसोरकोः । 'अतो भिस ऐस्' इत्यतो भिस ऐसित्यनुवर्तते ।

एभिः । इदम्शब्दाद् भिसि त्यदाद्यत्वे पररूपत्वे, 'नानर्थकऽलोऽन्त्यविधिरनभ्यासविकारे' इति परिभाषया 'अलोऽन्यस्य' इतिसूत्राप्रवृत्त्या 'अनाप्यकः' इति सूत्रप्राप्तमनादेशं बाधित्वा 'हलिलोपः' इति इदो लोपे 'आद्यन्तवदेकस्मिन्' इति अकारेऽदन्तत्वमाश्रित्य 'अतो भिस ऐस' इति भिस ऐसादेशे प्राप्ते 'नेदमदसोरकोः' इति तन्निषेधे 'बहुवचने झल्येत्' इत्येत्वे रुत्वे विसर्गे च कृते एभिः इति सिद्धम् ।

अस्मै । इदम् शब्दान्ङे विभक्तावनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे 'अनाप्यकः' इति प्राप्तमनादेशं बाधित्वा नित्यत्वात्पूर्वं 'सर्वनाम्नः स्मै' इति स्मै आदेशे ततोऽनादेशं बाधित्वा 'हलिलोपः' इति इदो लोपे अस्मै इति सिद्धम् ।

एभ्यः । इमम्शब्दाद् भ्यसि त्यदाद्यत्वे पररूपत्वे 'हलिलोपः' इति इदो लोपे 'आद्यन्तवदेकस्मिन्' इति अकारेऽदन्तत्वमाश्रित्य 'बहुवचने झल्येत्' इति एत्वे रुत्वे विसर्गे च कृते एभ्यः इति सिद्धम् ।

अस्मात् । अस्य । अनयोः । एषाम् । आस्मिन् । अनयोः । एषु ॥

द्वितीयाटौस्स्वेनः २।४।३४ ॥ द्वितीयायां टौसोश्च परतः इदमेतदोरेनादेशः स्यादन्वादेशे । किंचित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः । यथा-अनेन व्याकरणमधीतमेनं

अस्मात् । इदम्शब्दान्ङसिविभक्तौ अनुबन्धलोपे त्वदाद्यत्वे पररूपत्वे नित्यत्वात्पूर्वं ङसेः स्मादादेशे ततः 'हलिलोपः' इतीदो लोपे जश्त्वे चर्त्वे च कृते 'अस्मात्-अस्माद् इति रूपद्वयं सिद्ध्यति ।

अस्य । इदम्शब्दान्ङस्यनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे नित्यंत्वात्पूर्वं स्यादेशे तत इदोलोपे अस्येति सिद्धम ।

अनयोः । इदम् शब्दादोसि त्यदाद्यत्वे पररूपत्वे 'अनाप्यकः इति इदोऽनादेशे 'ओसि च' इत्येत्वे अयादेशे रुत्वे विसर्गे च अनयोरिति सिद्ध्यति ।

एषाम् । इदम् शब्दादामिविभक्तौ त्यदाद्यत्वे पररूपत्वे नित्यत्वादनादेशात्पूर्वम् 'आमि सर्वनाम्नः सुट्' इति सुडागमेऽनुबन्धलोपे ततः 'हलिलोपः' इति इदोलोपे 'आद्यन्तवेदकस्मिन्' इति अदन्तत्वमाश्रित्य 'बहुवचने झल्येत्'इति एत्वे'आदेशप्रत्यययोः'इति षत्वे एषाम् इति सिद्धम् ।

अस्मिन् । इदम्शब्दान्ङौ अनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे नित्यत्वादनादेशात्पूर्वं स्मिन्नादेशे ततः 'हलिलोपः' इतीदो लोपे अस्मिन्निति सिद्धम ।

एषु । इदम्शब्दात्सुप्यनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे 'हलिलोपः' इति इदो लोपे एत्वे षत्वे एषु इति सिद्धम् ।

अयम् , इमौ, इमे । इमम् , इमौ, इमान् । अनेन, आभ्याम् , एभिः । अस्मै, आभ्याम् , एभ्यः । अस्मात्-अस्माद्, आभ्याम्, एभ्यः । अस्य, अनयोः, एषाम् । अस्मिन् , अनयोः, एषु ।

द्वितीया टौस्स्वेनः । अत्र 'इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ' इत्यतः इदमोऽन्वादेशे इति 'एतदस्त्रतसौ चानुदात्तौ' इत्यत एतद इति चानुवर्तते ।

छन्दोऽध्यापयेति। अनयोः पवित्रं कुलमेनयोः प्रभूतं स्वमिति। एनम्। एनौ। एनान्। एनेन। एनयोः। एनयोः। राजा॥ **न ङिसम्बुद्ध्योः ८।२।८॥** नस्य लोपो न ङौ संबुद्धौ च। हे राजन्। (ङावुत्तरपदे प्रतिषेधो वक्तव्यः)। ब्रह्मनिष्ठः। राजानौ। राजानः। राज्ञः। **नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ८।२।२॥** सुब्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च नलोपोऽसिद्धो, नान्यत्र राजाश्व इत्यादौ। इत्यसिद्धत्वादात्वमेत्वमैस्त्वं च न। राजभ्याम्। राजभिः। राज्ञि, राजनि॥

एनम्। इदम् शब्दादमि 'द्वितीया टौस्स्वेनः' इति एनादेशे 'अमिपूर्वः' इति पूर्वरूपे एनम् इति सिद्धम्।

राजा। राजन् शब्दात्सौ अनुबन्धलोपे 'सर्वनामस्थाने चासम्बुद्धौ' इति उपधादीर्घे 'हल्ङ्याब्भ्य' इत्यादिना सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे राजा इति सिद्धम्।

नङिसम्बुद्ध्योः। अत्र 'नलोपः प्रातिपदिकान्तस्य' इत्यतो नलोप इत्यनुवर्तते।

हे राजन्। राजन् शब्दात्सम्बोधने सौ अनुबन्धलोपे सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे प्राप्ते 'नङिसम्बुद्ध्योः' इति तन्निषेधे हे राजन् इति सिद्धम्।

ब्रह्मनिष्ठः। ब्रह्मन् ङि निष्ठा सु इत्यलौकिके विग्रहे समासे समासत्वात्प्रातिपदिकत्वेन 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुकि ब्रह्मन् निष्ठ इति स्थिते प्रत्ययलक्षणत्वेन ब्रह्मन्इत्यस्य पदत्वात्प्राप्तस्य 'नलोपः प्रातिपदिकान्तस्य' इति नलोपस्य 'न ङिसम्बुद्धयोः' इति निषेधे प्राप्ते 'ङावुत्तरपदे प्रतिषेधोवक्तव्यः' इति तन्निषेधे नलोपे तत्सिद्ध्यति।

राज्ञः। राजन् शब्दात् शसि अनुबन्धलोपे भसंज्ञायाम् 'अल्लोपोऽनः' इत्यल्लोपे 'स्तोः श्चुना श्चुः' इति श्चुत्वे रुत्वे विसर्गे राज्ञः इति सिद्धम्।

राजभ्याम्। राजन्शब्दाद्भ्यामि विभक्तौ 'स्वादिष्वसर्वनाम-

राजसु ॥ यज्वा । यज्वानौ । यज्वानः ॥ **न संयोगाद्वमन्तात्** ६।
४।१३७॥ वमन्तसंयोगादनोऽकारस्य लोपो न। यज्वनः । यज्वना । यज्व-
भ्याम् ॥ ब्रह्मणः । ब्रह्मणा ॥ **इन्हन्पूषार्यम्णां शौ** ६।४।१२॥ एषां

स्थाने' इति पदत्वात् 'न लोपः प्रातिपदिकान्तस्य' इति नलोपे 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इति नलोपस्यासिद्धत्वात् अदन्तत्वाभावेन 'सुपि च' इति दीर्घाभावे राजभ्याम् इति सिद्धम् ।

राजभिः । राजन्शब्दाद् भिसि नलोपे तस्यासिद्धत्वाददन्तत्वाभावेन 'अतो भिस ऐस्' इति भिस ऐसोऽभावे रुत्वे विसर्गे राजभिः इति सिद्धम् । एवं राजभ्य इत्यत्र नलोपस्यासिद्धत्वादेत्वं नेति शम् ।

राज्ञि । राजन् शब्दान्ङौ अनुबन्धलोपे भसंज्ञायाम् 'विभाषाङिश्योः' इति वैकल्पिके अल्लोपे श्चुत्वे राज्ञि इति, अल्लोपाभावपक्षे राजनि इति च सिद्धम् ।

राजा, राजानौ, राजानः । राजानम् , राजानौ, राज्ञः । राज्ञा, राजभ्याम्, राजभिः । राज्ञे, राजभ्याम् , राजभ्यः । राज्ञः, राजभ्याम्, राजभ्यः । राज्ञः, राज्ञोः, राज्ञाम् । राज्ञि-राजनि । राज्ञोः, राजसु । हे राजन् , हे राजानौ, हे राजानः ।

न संयोगादिति । 'अल्लोपोऽनः' इत्यनुवर्तते ।

यज्वनः । यज्वन्शब्दात् शसि अनुबन्धलोपे भसंज्ञायाम् 'अल्लोपोऽनः' इत्यल्लोपे प्राप्ते 'न संयोगाद्वमन्तात्' इति तन्निषेधे रुत्वे विसर्गे यज्वनः इति साधु ।

यज्वा, यज्वानौ, यज्वानः । यज्वानम् , यज्वानौ, यज्वनः । यज्वना, यज्वभ्याम् , यज्वभिः । यज्वने, यज्वभ्याम् , यज्वभ्यः । यज्वनः, यज्वभ्याम्, यज्वभ्यः । यज्वनः, यज्वनोः, यज्वनाम् । यज्वनि, यज्वनोः, यज्वसु । हे यज्वन् , हे यज्वानौ, हे यज्वानः ।

ब्रह्मणः । ब्रह्मन् शब्दात् शसि अनुबन्धलोपे भसंज्ञायाम् 'अल्लो-

शावेवोपधाया दीर्घो नान्यत्र । इति निषेधे प्राप्ते ॥ **सौ च ६।४।१३ ॥** इन्नादीनामुपधाया दीर्घोऽसंबुद्धौ सौ । वृत्रहा । हे वृत्रहन् ॥ **एकाजुत्तरपदे णः ८।४।१२ ॥** एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य णः । वृत्रह-

---

पोऽनः' इत्यल्लोपे प्राप्ते 'न संयोगाद्वमन्तात्' इति तन्निषेधे 'अट्कुप्वाङ्नुम्व्यवायेऽपि'ति णत्वे रुत्वे विसर्गे ब्रह्मणः इति सिद्धम् ।

ब्रह्मा, ब्रह्माणौ, ब्रह्माणः । ब्रह्माणम् , ब्रह्माणौ, ब्रह्मणः । ब्रह्मणा, ब्रह्मभ्याम्, ब्रह्मभिः। ब्रह्मणे, ब्रह्मभ्याम्, ब्रह्मभ्यः। ब्रह्मणः, ब्रह्मभ्याम् , ब्रह्मभ्यः । ब्रह्मणः, ब्रह्मणोः, ब्रह्मणाम् । ब्रह्मणि, ब्रह्मणोः, ब्रह्मसु । हे ब्रह्मन् , हे ब्रह्माणौ, हे ब्रह्माणः ।

इन्हन्निति । अत्र 'नोपधायाः' इत्यत उपधाया इति 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इत्यतो दीर्घ इति चानुवर्तते । शेः सर्वनामस्थानत्वेन 'सर्वनामस्थाने चासम्बुद्धौ' इत्यनेनैव दीर्घे सिद्धे मूलोक्तनियमार्थमिदं सूत्रम् ।

सौ च । पूर्वसूत्राद् इन्हन्पूषार्यम्णामित्यनुवर्तते । 'नोपधायाः' इत्यत उपधाया इति 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इत्यतो दीर्घ इति 'सर्वनामस्थाने चासम्बुद्धौ' इत्यतः असम्बुद्धौ इति चानुवर्तते ।

वृत्रहा । वृत्रहन्शब्दात्सौ 'सर्वनामस्थाने चासम्बुद्धौ' इति प्राप्तदीर्घस्य 'इन्हन्पूषार्यम्णां शौ' इति नियमान्निषेधे प्राप्ते तम्प्रबाध्य 'सौ च' इति दीर्घे 'हल्ङ्याब्भ्य' इत्यादिना सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे वृत्रहा इति सिद्धम् ।

एकाजुत्तरपदे णः । अत्र 'रषाभ्यां नोणः' इति सूत्रमनुवर्तते । 'पूर्वपदात्संज्ञायामगः' इत्यतः पूर्वपदादित्यनुवृत्तं पूर्वपदस्थपरम् । 'प्रातिपदिकान्तनुम्विभक्तिषु च' इति सूत्रमप्यनुवर्तते ।

वृत्रहणौ । वृत्रहन्शब्दाद् औ विभक्तौ 'इन्हन्पूषार्यम्णां शौ' इति नियमाद्दीर्घाभावे 'एकाजुत्तरपदे णः' इति णत्वे वृत्रहणौ इति सिद्धम् ।

णौ ॥ **हो हन्तेर्ञ्णिन्नेषु ७।३।५४॥** ञिति णिति प्रत्यये नकारे च परे हन्तेर्हकारस्य कुत्वम्। वृत्रघ्नः इत्यादि। एवं शार्ङ्गिन्, यशस्विन्, अर्यमन्, पूषन् ॥ **मघवा बहुलम् ६।४।१२८ ॥** मघवन्शब्दस्य वा तृ इत्यन्तादेशः। ऋ इत् ॥ **उगिदचां सर्वनामस्थानेऽधातोः ७।१।७० ॥** अधातोरुगितो नलोपिनोऽञ्चतेश्च नुम् स्यात्सर्वनामस्थाने परे। मघवान्। मघवन्तौ। मघवन्तः। हे मघवन्।

हो हन्तेरिति। अत्र 'चजोः कु घिण्यतोः' इत्यतः कु इत्यनुवर्तते।

वृत्रघ्नः। वृत्रहन्शब्दात् शसि अनुबन्धलोपे भसंज्ञायाम् 'अल्लोपोऽनः' इत्यल्लोपे 'हो हन्तेर्ञ्णिन्नेषु' इति हस्य कुत्वेन घत्वे रुत्वे विसर्गे च कृते वृत्रघ्नः इति सिद्धम्। एवमजादौ सर्वत्र सिद्धिप्रकारो बोध्यः।

वृत्रहा, वृत्रहणौ, वृत्रहणः। वृत्रहणम् वृत्रहणौः वृत्रघ्नः। वृत्रघ्ना वृत्रहभ्याम्, वृत्रहभिः। वृत्रघ्ने, वृत्रहभ्याम्, वृत्रहभ्यः। वृत्रघ्नः, वृत्रहभ्याम्, वृत्रहभ्यः। वृत्रहघ्नः वृत्रघ्नोः, वृत्रघ्नाम्। वृत्रघ्नि, वृत्रघ्नोः वृत्रहसु। हे वृत्रहन्, हे वृत्रहणौ, हे वृत्रहणः।

मघवा बहुलम्। 'अर्वणस्त्रसावनञः' इति सूत्रात् तृ इत्यनुवर्त्तते।

उगिदचाम्। अत्र 'इदितो नुम् धातोः' इत्यतो नुम् इत्यनुवर्तते। सूत्रे अच् इति लुप्तनकारस्याञ्चतेर्निर्देशः।

मघवान्। मघवन्शब्दात्सौ अनुबन्धलोपे 'मघवा बहुलम्' इति पाक्षिके तृ इत्यन्तादेशेऽनुबन्धलोपे 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमेऽनुबन्धलोपे 'हल्ङ्याब्भ्य' इत्यादिनासुलोपे 'संयोगान्तस्य लोपः' इति तलोपे प्रत्ययलक्षणेन 'सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घे मघवान् इति सिद्धम्। दीर्घे कर्त्तव्ये बहुलग्रहणात्संयोगान्तलोपाभावः। तृत्वाभावपक्षे दीर्घे सुलोपे नलोपे च कृते मघवा इति सिद्ध्यति।

बरतानिया, करौंदी
अजन्तो-5

मघवद्भ्याम् । तृत्वाभावे मघवा । सुटि राजवत् ॥ **श्वयुवमघोनामतद्धिते ६।४।१३३॥** अन्नन्तानां भानामेषामतद्धिते संप्रसारणम् । मघोनः । मघवभ्याम् । एवं श्वन्, युवन् ॥ **न संप्रसारणे संप्रसारणम् ६।१।३७ ॥** संप्रसारणे परतः पूर्वस्य यणः संप्रसारणं न स्यात् । इति यकारस्य नेत्वम् । अत एव ज्ञापकादन्त्यस्य यणः पूर्वं संप्रसारणम् । यूनः । यूना । युवभ्याम् इत्यादि ॥ अर्वा । हे अर्वन् ॥

मघवन्तौ । मघवन्शब्दाद् औविभक्तौ 'मघवा बहुलम्' इति पाक्षिके तृ इत्यन्तादेशेऽनुबन्धलोपे 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुम्यनुबन्धलोपे मघवन्ता इति, तृत्वाभावपक्षे दीर्घे मघवानौ इति च सिद्धम् ।

श्वयुवेति । अत्र 'भस्य' इत्यधिक्रियते । 'वसोः सम्प्रसारणम्' इत्यतः सम्प्रसारणमित्यनुवर्तते । 'अल्लोपोऽनः' इत्यत अपकृष्टम् अन इति भस्य विशेषणम् । तदन्तविधिः ।

मघोनः । मघवन्शब्दाच्छसि विभक्तावनुबन्धलोपे भसंज्ञायां तृत्वाभावपक्षे 'श्वयुवमघोनामतद्धिते' इति सम्प्रसारणे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'आद्गुणः' इति गुणे रुत्वे विसर्गे च कृते मघोन इति सिद्धम् ।

मघवान्, मघवन्तौ, मघवन्तः । मघवन्तम्, मघवन्तौ, मघवतः । मघवता, मघवद्भ्याम्, मघवद्भिः । मघवते, मघवद्भ्याम्, मघवद्भ्यः । मघवतः, मघवद्भ्याम्, मघवद्भ्यः । मघवतः, मघवतोः, मघवताम् । मघवति, मघवतोः, मघवत्सु । हे मघवन्, हे मघवन्तौ, हे मघवन्तः ।

तृत्वाभावपक्षे तु—मघवा, मघवानौ, मघवानः । मघवानम्, मघवानौ, मघोनः । मघोना, मघवभ्याम्, मघवभिः । मघोने. मघवभ्याम्, मघवभ्यः । मघोनः मघवभ्याम्, मघवभ्यः । मघोनः, मघोनोः, मघोनाम् । मघोनि, मघोनोः, मघवसु । हे मघवन्, हे मघवानौ, हे मघवानः ।

अर्वणस्त्रसावनञः ६।४।२२७ ॥ नञा रहितस्यार्वन्नित्यस्याऽङ्गस्य तृ इत्यन्तादेशो न तु सौ । अर्वन्तौ । अर्वन्तः । अर्वद्भ्यामित्यादि ॥ **पथिमथ्यृभुक्षामात् ७।१।८५ ॥** एषामाकारोन्तादेशः स्यात् सौ परे । **इतोऽत्सर्वनामस्थाने ७।१।८६ ॥** पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने परे । **थो न्थः ७।१।८७॥** पथिमथोस्थस्य न्यादेशः

यूनः । युवन्शब्दात् शसि अनुबन्धलोपे भसंज्ञायां 'श्वयुवमघोनामतद्धिते' इति सम्प्रसारण 'सम्प्रसारणाच्च' इति पूर्वरूपे सवर्णदीर्घे- यकारस्यापि सम्प्रसारणे प्राप्ते 'अचः परस्मिन्पूर्वविधौ' इति दीर्घस्य स्थानिवद्भावेन संप्रसारणपरत्वसत्त्वात् 'न सम्प्रसारणे सम्प्रसारणम्' इति यकारस्य सम्प्रसारणनिषेधे 'न सम्प्रसारणे सम्प्रसारणम्' इति सूत्रसामर्थ्यात् अन्त्यस्य यणः पूर्वं सम्प्रसारणं भवतीति कल्पनया पूर्वं यकारस्य सम्प्रसारणाभावे रुत्वे विसर्गे च कृते यूनः इति सिद्धम् ।

युवा, युवानौ, युवानः । युवानम्, युवानौ, यूनः । यूना, युवभ्याम्, युवभिः । यूने, युवभ्याम्, युवभ्यः । यूनः, युवभ्याम्, युवभ्यः । यूनः, यूनोः, यूनाम् । यूनि, यूनोः, युवसु । हे युवन्, हे युवानौ, हे युवानः ।

अर्वन्तौ । अर्वन्शब्दाद् औविभक्तौ 'अर्वणस्त्रसावनञः' इति तृइत्यन्तादेशेऽनुबन्धलोपे 'उगिदचां सर्वनामस्थानेऽधातोः' इति मित्त्वादन्त्यादचः परे नुमागमेऽनुबन्धलोपे अर्वन्तौ इति सिद्धम् ।

अर्वा, अर्वन्तौ, अर्वन्तः । अर्वन्तम्, अर्वन्तौ, अर्वतः । अर्वता, अर्वद्भ्याम्, अर्वद्भिः । अर्वते, अर्वद्भ्याम्, अर्वद्भ्यः । अर्वतः, अर्वद्भ्याम्, अर्वद्भ्यः । अर्वतः, अर्वतोः, अर्वताम् । अर्वति, अर्वतोः, अर्वत्सु । हे अर्वन्, हे अर्वन्तौ, हे अर्वन्तः ।

पथीति । अत्र 'सावनडुहः,' इत्यतः सौ इत्यनुवर्तते ।

इतोऽत् । अत्र पथिमथ्यृभुक्षामित्यनुवर्तते ।

सर्वनामस्थाने । पन्थाः । पन्थानौ । पन्थानः ॥ **भस्य टेर्लोपः ७।१।८८** ॥ भस्य पथ्यादेष्टेर्लोपः । पथः । पथा । पथिभ्याम् । एवं मथिन्, ऋभुक्षिन् ॥ **ष्णान्ता षट् १।१।२४** ॥ षान्ता नान्ता च संख्या षट्संज्ञा स्यात् । पञ्चन्शब्दो नित्यं बहुवचनान्तः । पञ्च ।

थोन्थः । अत्र 'पथिमथ्यृभुक्षामात्' इत्यतः पथिमथीति 'इतोऽत्सर्वनामस्थाने' इत्यतः सर्वनामस्थाने इति चानुवर्तते ।

पन्थाः । पथिन्शब्दात्सौ अनुबन्धलोपे 'पथिमथ्यृभुक्षामात्', इति आकारेऽन्तादेशे 'इतोऽत्सर्वनामस्थाने' इति इकारस्य अकारे 'थोन्थः' इति थस्य न्थादेशे सवर्णदीर्घे रुत्वे विसर्गे च पन्थाः इति सिद्धम् ।

पन्थानौ । पथिन्शब्दाद् औविभक्तौ 'इतोऽत्सर्वनामस्थाने' इति इकारस्य अकारे 'थोन्थः' इति न्थादेशे 'सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घे पन्थानौ इति सिद्धम् ।

भस्य टेर्लोपः । अत्र पथिमथ्यृभुक्षामित्यनुवर्तते ।

पथः । पथिन्शब्दात् शसि अनुबन्धलोपे 'यचिभम्' इति भसंज्ञायां 'भस्य टेर्लोपः' इति टेर्लोपे रुत्वे विसर्गे च पथः इति सिद्धम् ।

पन्थाः, पन्थानौ, पन्थानः । पन्थानम्, पन्थानौ, पथः । पथा, पथिभ्याम्, पथिभिः । पथे, पथिभ्याम्, पथिभ्यः । पथः, पथिभ्याम् पथिभ्यः । पथः, पथोः, पथाम् । पथि, पथोः, पथिषु । हे पन्थाः, हे पन्थानौ, हे पन्थानः । एवं मथिन्ऋभुक्षिन्शब्दयोरपि रूपाणि सिद्धिप्रकारश्च बोध्यः ।

ष्णान्ता षट् । अत्र 'बहुगणवतुडतिसंख्या' इत्यतः संख्येत्यनुवर्तते । संख्याशब्दस्य षान्तनान्तत्वासम्भवात् संज्ञापरस्यापि संख्याशब्दस्यात्र संज्ञिपरत्वम् ।

पञ्च । पञ्चन्शब्दात् जसि विभक्तावनुबन्धलोपे 'ष्णान्ता षट्' इति षट्संज्ञायाम् 'षड्भ्यो लुक्' इति जसो लुकि नलोपे पञ्च इति सिद्धम् ।

पञ्च। पञ्चभिः। पञ्चभ्यः। पञ्चभ्यः। नुट्। **नोपधायाः ६।४।७॥** नान्तस्योपधाया दीर्घो नामि। पञ्चानाम्। पञ्चसु॥ **अष्टन आ विभक्तौ ७।२।८४॥** अष्टन आत्वं वा स्याद्धलादौ विभक्तौ। **अष्टाभ्य औश् ७।१।२१॥** कृताकारादष्टनःपरयोर्जश्शसोरौश् स्यात्। अष्टभ्य इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति। अष्टौ। अष्टौ। अष्टाभिः।

पञ्चभिः। पञ्चनशब्दाद्भिसि 'स्वादिष्वसर्वनामस्थाने' इति पदत्वात् 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे रुत्वे विसर्गे च पञ्चभिरिति सिद्धम्। एवं पञ्चभ्यः।

नोपधायाः। न इति लुप्तषष्ठीकम् तदन्तविधिः। 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इत्यतो दीर्घ इति 'नामि' इति सूत्रं चानुवर्तते।

पञ्चानाम्। पञ्चन्शब्दादामि 'ष्णान्ता षट्' इति षट्संज्ञायाम् 'षट्चतुर्भ्यश्च' इति नुडागमेऽनुबन्धलोपे नलोपस्यासिद्धत्वात्पूर्वं 'नोपधायाः' इति दीर्घे ततो नलोपे पञ्चानाम् इति सिद्धम्।

अष्टन आ विभक्तौ। अत्र 'रायो हलि' इत्यतो हलि इत्यनुवर्तते। तदादिविधिः 'अष्टनो दीर्घात्' इत्यत्र दीर्घग्रहणसामर्थ्याद् वा इत्यस्य लाभः।

अष्टाभ्य औश्। 'जश्शसोः शिः' इत्यतः जश्शसोरित्यनुवर्तते।

अष्टौ। अष्टन्शब्दाज्जसि अष्टभ्य इति वक्तव्ये अष्टाभ्य इति कृतात्वनिर्देशात् हलादिपरत्वाभावेऽपि जश्शसोर्विषये आत्वस्य कल्पनात् 'अष्टन आ विभक्तौ' इत्यात्वे सवर्णदीर्घे 'अष्टाभ्य औश्' इति जस औशादेशेऽनुबन्धलोपे 'वृद्धिरेचि' इति वृद्धौ अष्टौ इति, आत्वाभावपक्षे अष्टन् शब्दस्य 'ष्णान्ता षट्' इति षट्संज्ञकत्वेन 'षड्भ्यो लुक्' इति जसो लुकि 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे अष्ट इति च सिद्धम्।

अष्टाभिः। अष्टन्शब्दाद्भिसि 'अष्टन आ विसक्तौ' इत्यात्वे सवर्णदीर्घे रुत्वे विसर्गे च अष्टाभिरिति' आत्वाभावपक्षे नस्य लोपे रुत्वे विसर्गे अष्टभिरिति च सिद्धम्।

अष्टाभ्यः । अष्टाभ्यः । अष्टानाम् । अष्टासु । आत्वाभावे अष्ट, पञ्चवत् ॥ **ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ३।२।५९ ॥** एभ्यः क्विन्, अञ्चेः सुप्युपपदे, युजिक्रुञ्चोः केवलयोः क्रुञ्चेर्नलोपाभावश्च निपात्यते । कनावितौ ॥ **कृदतिङ् ३।१।९३॥** अत्र धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात् । **वेरपृक्तस्य ६।१।६७ ॥** अपृक्तस्य वस्य लोपः । **क्विन्प्रत्ययस्य कुः ८।२।६२ ॥** क्विन्प्र-

---

अष्टानाम् । अष्टन्शब्दादामि षट्संज्ञायाम् 'षट्चतुर्भ्यश्च' इति नुडागमेऽनुबन्धलोपे 'अष्टन आ विभक्तौ इति पाक्षिके आत्वे सवर्णदीर्घे अष्टानामिति सिद्धम् । आत्वाभावपक्षेऽपि नुटि 'नोपधायाः' इति दीर्घे नलोपे अष्टानामित्येवेति शम ।

ऋत्विग्दधृग् । अत्र 'स्पृशोऽनुदके क्विन्' इत्यतः क्विन् इत्यनुवर्तते । पञ्चम्यर्थे षष्ठी । ऋत्विग् दधृग् इत्यादिसिद्धरूपनिर्देशात् सूत्रानुपदिष्टमपि किञ्चित् कार्यं निपातनाल्लभ्यते । तथाहि ऋतावुपपदे यज्धातोः क्विन् । तस्य कित्त्वात् 'वचिस्वपियजादीनां किति' इति सम्प्रसारणं 'व्रश्च' इति षत्वापवादः कुत्वं च, धृष्धातोः क्विनि द्वित्वमन्तोदात्तत्वं च, सृज्धातोः कर्मणि क्विन् अमागमश्च, दिश्धातोः कर्मणि क्विन्, उत्पूर्वात् स्निह्धातोः क्विन् उदोदलोपः षत्वं च, अञ्चु, धातोः सुप्युपपदे क्विन्, युज्धातोः केवलात् क्विन्, क्रुञ्चधातोः केवलात् क्विन् नलोपाभावश्च निपात्यते ।

कृदतिङ् । धातोरित्यधिक्रियते प्रत्यय इति च । धातोरिति विहितविशेषणम् । तेन धातोरित्यधिकृत्य विहितः प्रत्यय इति लभ्यते । ततो मूलोक्तार्थलाभः ।

वेरपृक्तस्य । अत्र 'लोपो व्योर्वलि' इत्यतो लोप इत्यनुवर्तते ।

क्विन्प्रत्ययस्य कुः । अत्र 'पदस्य' इत्यधिक्रियते । 'झलां जशोऽन्ते' इत्यतः अन्ते इत्यनुवर्तते । 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्त-

त्ययो यस्मात्तस्य कवर्गोऽन्तादेशः पदान्ते । अस्यासिद्धत्वाच्चोः कुरिति कुत्वम् । ऋत्विक्, ऋत्विग् । ऋत्विजौ । ऋत्विग्भ्याम् ॥ **युजेरसमासे** ७।१।७१ ॥ युजेः सर्वनामस्थाने नुम् स्यादसमासे । सुलोपः । संयोगान्तलोपः । कुत्वेन नस्य ङः । युङ् । अनुस्वारपरसवर्णौ ।

दन्तस्य ग्रहणम्' इति परिभाषया तदन्तविधिनैव सिद्धे प्रत्ययग्रहणं क्विन्प्रत्ययो यस्माद्दृष्टइति दृष्टपदार्थान्तर्भावेण बहुव्रीहिलाभार्थम् । ततश्च यस्माद्यस्मात्क्विन् दृष्टस्तस्य कवर्गोऽन्तादेश इति लभ्यते । तेन स्पृग् इत्यादौ क्विनोऽभावेऽपि कुत्वम्भवत्येवेतिशम् ।

ऋत्विक् । ऋतूपपदात् यज्धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इति क्विन्प्रत्ययेऽनुबन्धलोपे 'वचिस्वपियजादीनां किति' इति सम्प्रसारणे 'सम्प्रसारणाच्च' इति पूर्वरूपे यणि 'कृदतिङ्' इति क्विनः कृत्संज्ञायां 'वेरपृक्तस्य' इति वलोपे कृदन्तत्वात्प्रतिपदिकसंज्ञायां प्रातिपदिकत्वात्सौ 'हल्ङ्याब्भ्य' इत्यादिना सुलोपे 'क्विन्प्रत्ययस्य कुः' इति कुत्वस्यासिद्धत्वात् 'चोः कुः' इति कुत्वे पाक्षिके चर्त्वे ऋत्विक् इति, चर्त्वाभावपक्षे ऋत्विग् इति च सिद्धम् ।

ऋत्विग्भ्याम् । ऋतावुपपदे यजेः क्विनि अनुबन्धलोपे सम्प्रसारणे पूर्वरूपे यणि 'कृदतिङ्' इति क्विनः कृत्संज्ञायां 'वेरपृक्तस्य' इति वलोपे कृदन्तत्वात्प्रातिपदिकत्वेन भ्यामि 'क्विन्प्रत्ययस्य कुः' इति कुत्वस्यासिद्धत्वात् 'चोः कुः' इति कुत्वे ऋत्विग्भ्यामिति सिद्धम् ।

ऋत्विक्-ऋत्विग्, ऋत्विजौ, ऋत्विजः । ऋत्विजम, ऋत्विजौ, ऋत्विजः । ऋत्विजा, ऋत्विग्भ्याम, ऋत्विग्भिः । ऋत्विजे, ऋत्विग्भ्याम्, ऋत्विग्भ्यः । ऋत्विजः, ऋत्विग्भ्याम्, ऋत्विग्भ्यः । ऋत्विजः, ऋत्विजोः, ऋत्विजाम् । ऋत्विजि, ऋत्विजोः, ऋत्विक्षु । हे ऋत्विक्-हे ऋत्विग्, हे ऋत्विजौ, हे ऋत्विजः ।

युजेरसमासे । अत्र 'उगिदचां सर्वनामस्थानेऽधातोः' इत्यतः सर्वनामस्थाने इति 'इदितो नुम् धातोः' इत्यतो नुम् इति चानुवर्तते ।

युञ्जौ । युञ्जः । युग्भ्याम् ॥ **चोः कुः ८।२।३०॥** चवर्गस्य कवर्गः स्याज्झलि पदान्ते च । सुयुक्, सुयुग् । सुयुजौ । सुयुग्भ्याम् ॥ खन् । खञ्जौ । खन्भ्याम् ॥ **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ८।**

युङ् । युज्धातोः 'ऋत्विग्' इत्यादिना क्विन्प्रत्ययेऽनुबन्धलोपे 'कृदतिङ्' इति कृत्संज्ञायां 'वेरपृक्तस्य' इति वलोपे कृदन्तत्वात्प्रातिपदिकत्वेन सौ परत्वात्पूर्वं 'युजेरसमासे' इति नुमागमेऽनुबन्धलोपे ततः सुलोपे जकारस्य संयोगान्तलोपे 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन नस्य ङकारे युङ् इति सिद्धम् ।

युञ्जौ । युज्धातोः 'ऋत्विग्' इत्यादिना क्विन्प्रत्ययेऽनुबन्धलोपे कृत्संज्ञायां वलोपे कृदन्तत्वात्प्रातिपदिकत्वेन औविभक्तौ 'युजेरसमासे' इति नुमागमेऽनुबन्धलोपे 'नश्चापदान्तस्य झलि' इति नस्यानुस्वारे 'अनुस्वारस्य ययि परसवर्णः' इति अनुस्वारस्य परसवर्णेन ञकारे तस्यासिद्धत्वात् 'चोः कुः' इति कुत्वाभावे युञ्जौ इति सिद्धम् ।

चोः कुः । अत्र 'पदस्य' इत्यधिक्रियते । 'झलो झलि' इत्यतो झलि इति 'स्कोः संयोगाद्योरन्ते च' इत्यतः अन्ते इति चानुवर्तते ।

सुयुक् । सुपूर्वाद् युज्धातोः 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्, इति क्विप्प्रत्यये तस्य लोपे निष्पन्नसुयुज् शब्दात्प्रातिपदिकत्वेन सावनुबन्धलोपे 'हल्ङ्याब्भ्य' इत्यादिना सुलोपे क्विन्प्रत्ययो यस्माद् दृष्ट इत्यर्थसत्त्वात्प्राप्तस्य 'क्विन्प्रत्ययस्य कुः' इति कुत्वस्यासिद्धात् 'चोः कुः' इति कुत्वे पाक्षिके चर्त्वे सुयुक्-सुयुग् इति सिद्धम् ।

खन् । इदितः खज्धातोः क्विपि तल्लोपे इदित्वान्नुम्यनुबन्धलोपेऽनुस्वारे परसवर्णे च कृते निष्पन्नखञ्जशब्दात्सौ तल्लोपे 'संयोगान्तस्य लोपः' इति जलोपे 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायेन ञकारनिवृत्तौ खन् इति सिद्धम् ।

व्रश्चभ्रस्ज । व्रश्चादयः सप्तधातवः छशौ वर्णौ ताभ्यां शब्दस्व-

२।३६ ॥ व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशः स्याज्झलि पदान्ते च । जश्त्वचर्त्वे । राट्, राड् । राजौ । राजः । राड्भ्याम् ॥ एवं विभ्राट् । देवेट् । विश्वसृट् ॥ (परौ व्रजेः षः पदान्ते) । परावुपपदे व्रजेः क्विप् स्याद्दीर्घश्च पदान्ते षत्वमपि । परिवाट् । परिव्राजौ ॥

विश्वस्य वसुराटोः ६।३।१२८ ॥ विश्वशब्दस्य दीर्घोऽन्तादेशः स्याद्वसौ राट्शब्दे च परे । विश्वाराट्, विश्वाराड् । विश्वराजौ । विश्वा-

---

रूपविशेष्यमादाय तदन्तविधिः । 'झलो झलि' इत्यतो झलीत्यनुवर्तते । 'पदस्य' इत्यधिक्रियते । 'स्कोः संयोगाद्योरन्ते च' इत्यतः अन्ते इत्यनुवर्तते ।

राट् । राज्शब्दात्सावनुबन्धलोपे 'हल्ङ्याब्भ्यः' इत्यादिना सुलोपे 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति जस्य षत्वे तस्य 'झलां जशोऽन्ते' इति जश्त्वेन डकारे 'वावसाने' इति पाक्षिके चर्त्वे राट्-राड् इति रूपद्वयं सिद्धम् ।

परिव्राट् । परिपूर्वकाद्व्रज्धातोः 'परौ व्रजेः षः पदान्ते' इति क्विप्प्रत्यये दीर्घे षत्वे च कृते क्विपो लोपे प्रातिपदिकत्वात्सौ 'हल्ङ्याब्भ्यः' इत्यादिना तल्लोपे जश्त्वे चर्त्वे परिव्राट् इति सिद्धम् ।

विश्वस्य । अत्र 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इत्यतो दीर्घ इत्यनुवर्तते । अत्र चर्त्वमविवक्षितम् ।

विश्वाराट् । विश्वोपपदात् राज्धातोः 'सत्सूद्विष' इत्यादिना क्विपि तल्लोपे, निष्पन्नविश्वराजशब्दात्सौ तल्लोपे 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति जस्य षत्वे 'झलांजशोऽन्ते' इति जश्त्वेन षस्य डकारे तस्य 'वावसाने' इति पाक्षिकचर्त्वेन टकारे कृते 'विश्वस्य वसुराटोः' इति दीर्घे विश्वाराट् इति, सूत्रे राडित्यस्य पदान्तत्वोपलक्षणार्थत्वाच्चर्त्वाभावपक्षेऽपि दीर्घे विश्वाराड् इति च सिद्धम् ।

विश्वाराड्भ्याम् । विश्वराज्शब्दाद्भ्यामिविभक्तौ 'स्वादिष्वसर्वनामस्थाने' इति पदत्वात् 'व्रश्च'इत्यादिना षत्वे तस्य जश्त्वे 'विश्वस्य वसुराटोः' इति दीर्घे विश्वाराड्भ्यामिति सिद्धम् ।

राड्भ्याम् ॥ **स्कोः संयोगाद्योरन्ते च ८।२।२९ ॥** पदान्ते झलि च यः संयोगस्तदाद्योः सकारककारयोर्लोपः । भृट् । सस्य श्चुत्वेन शः । झलाञ्जश् झशि इति शस्य जः । भृज्जौ । भृड्भ्याम् ॥ त्यदाद्यत्वं पररूपत्वं च ॥ **तदोः सः सावनन्त्ययोः ७।२।१०६ ॥** त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात्सौ । स्यः । त्यौ । त्ये ॥ सः । तौ । ते ॥ यः । यौ । ये ॥ एषः । एतौ । एते ॥ **ङे प्रथम-**

स्कोः । अत्र संयोगेति लुप्तषष्ठीकम् ‘पदस्य’ इत्यधिक्रियते । ‘झलो झलि’ इत्यतो झलीति ‘संयोगान्तस्य लोप’ इति चानुवर्तते । स् च क् च स्कौ तयोरिति विग्रहः ।

भृट् । भृस्ज्शव्दात्सौ, हल्ङ्याब्भ्यः’ इत्यादिना सुलोपे ‘स्कोः संयोगाद्योरन्ते च’ इति सलोपे ‘व्रश्च’ इत्यादिना जस्य षत्वे तस्य जश्त्वेन डकारे पाक्षिके चर्त्वे भृट्-भृड् इति रूपद्वयं सिद्धम् ।

भृज्जौ । भृस्जशव्दादौविभक्तौ पदान्तझल्परसंयोगादित्वाभावात्संयोगादिलोपाभावे ‘झलां जश् झशि’ इति जश्त्वस्यासिद्धत्वात्पूर्वं ‘स्तोः श्चुना श्चुः’ इति सकारस्य श्चुत्वेन शकारे कृते तस्य ‘झलां जश् झशि’ इति जश्त्वेन जकारे कृते भृज्जौ इति सिद्धम् ।

तदोः सः । अत्र ‘त्यदादीनामः’ इत्यतस्त्यदादीनामित्यनुवर्तते ।

स्यः । त्यद्शव्दात्सौ ‘त्यदादीनामः’ इति अन्तादेशेऽकारे ‘अतो गुणे’ इति पररूपे ‘तदोः सः सावनन्त्ययोः’ इति तकारस्य सकारे सस्य ‘ससजुषो रुः’ इति रुत्वे विसर्गे च स्यः इति सिद्धम् ।

त्यौ । त्यद्शव्दादौ विभक्तौ ‘त्यदादीनामः’ इति अकारेऽन्तादेशे ‘अतो गुणे’ इति पररूपे पूर्वसवर्णदीर्घस्य ‘नादिचि’ इति निषेधे वृद्धौ त्यौ इति सिद्धम् । रूपं तु सर्वशव्दवदेव ।

ङेप्रथमयोरम् । ङे इति लुप्तषष्ठीकम् । प्रथमा च प्रथमा च प्रथमे तयाः प्रथमयोरिति विग्रहः । एकः प्रथमाशव्दः प्रथमावोधकः द्वितीयस्तु द्वितीयावोधकः । ‘युस्मदस्मद्भ्यां ङसोऽश्’ इत्यतो युष्मदस्मद्भ्यामित्यनुवर्तते ।

योरम् ७।१।२८ ॥ युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः । **त्वाहौ सौ ७।२।९४** ॥ अनयोर्मपर्यन्तस्य त्वाऽहौ आदेशौ स्तः । **शेषे लोपः ७।२।९२** ॥ एतयोष्टिलोपः । त्वम् । अहम् ॥ **युवावौ द्विवचने ७।२।९०**॥ द्वयोरुक्तावनयोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ ॥ **प्रथमायाश्च द्विवचने भाषायाम्**

त्वाहौसौ । 'मपर्यन्तस्य' इत्यधिक्रियते 'युष्मदस्मदोरनादेशे' इत्यतः युष्मदस्मदोरित्यनुवर्तते ।

शेषे लोपः । अष्टन आ विभक्तौ, इत्यतोविभक्तावित्यनुवर्तते । 'युष्मदस्मदोरनादेशे' इत्यतो युष्मदस्मदोरित्यनुवर्तते । 'मपर्यन्तस्य' इत्यपकृष्य पञ्चम्यन्ततया विपरिणम्यते । शेषे इति सप्तमी स्थानिनोऽधिकरणत्वविवक्षया । तेन मपर्यन्ताच्छेषस्य युष्मदस्मदोर्लोपः स्याद्विभक्ताविति सूत्रार्थः ।

त्वम् । युष्मद्शब्दात्सौ 'ङेप्रथमयोरम्' इति सोरमादेशे 'न विभक्तौ तुस्माः' इति मकारेत्संज्ञानिषेधे 'त्वाहौ सौ' इति मपर्यन्तस्य त्वइत्यादेशे अन्तरङ्गत्वात्पूर्वम् 'अतो गुणे' इति पररूपे 'साम्प्रतिकाभावे भूतपूर्वगतिराश्रीयते' इति न्यायेन पूर्वकालिकमपर्यन्तशेषत्वमादाय 'शेषे लोपः' इति अदोलोपे त्वम् इति सिद्धम् ।

अहम् । अस्मच्छब्दात्सौ 'ङेप्रथमयोरम्' इति सोरमादेशे 'त्वाहौ सौ' इति मपर्यन्तस्य अह इत्यादेशे अन्तरङ्गत्वात्पूर्वम् 'अतो गुणे' इति पररूपे पूर्वकालिकमपर्यन्तशेषत्वमादाय 'शेषे लोपः' इति अदोलोपे अहम् इति सिद्धम् ।

युवावौ । अत्र'युष्मदस्मदोरनादेशे'इत्यतो युष्मदस्मदोरित्यनुवर्तते । मपर्यन्तस्येत्यधिक्रियते । 'अष्टन आविभक्तौ'इत्यतो विभक्तावित्यनुवर्तते । वचनमुक्तिः । द्वयोर्वचनं द्विवचनं तस्मिन्द्विवचने इति विग्रहः ।

प्रथमायाश्च । 'अष्टन आ विभक्तौ, इत्यत आ विभक्ताविति 'युष्म-

७।२।८८ ॥ औङ्येतयोरात्वं लोके । युवाम् । आवाम् ॥ **यूयवयौ जसि ७।२।९३** ॥ अनयोर्मपर्यन्तस्य यूयवयौ स्तो जसि । यूयम् । वयम् ॥ **त्वमावेकवचने ७।२।९७** ॥ एकस्योक्तावनयोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ ॥ **द्वितीयायाञ्च ७।२।२८** ॥ अनयोरात्स्यात् । त्वाम् । माम् ॥

दस्मदोरनादेशे' इत्यतो युष्मदस्मदोरिति चानुवर्तते ।

युवाम्-आवाम् । युष्मद्शब्दाद् अस्मद्शब्दाच्च औविभक्तौ 'ङे प्रथमयोरम्' इति अमादेशे 'युवावौ द्विवचने' इति मपर्यन्तस्य युष्मदो युवादेशे अस्मद आवादेशे 'अतो गुणे' इति पररूपे युवद् अम्-आवद् अम् इति स्थिते 'शेषे लोपः' इति टिलोपे प्राप्ते तम्प्रबाध्य 'प्रथमायाश्च द्विवचने भाषायाम् ' इति दकारस्य आकारे कृते सवर्णदीर्घे युवाम् इति आवाम् इति च सिद्धम् ।

यूयवयौ । अत्र 'युष्मदस्मदोरनादेशे' इत्यतो युष्मदस्मदोरित्यनुवर्तते । मपर्यन्तस्येत्यधिक्रियते ।

यूयम् वयम् । युष्मच्छब्दाद् अस्मच्छब्दाच्च जसि 'ङे प्रथमयोरम्' इति जसोऽमादेशे 'यूयवयौ जसि' इति मपर्यन्तस्य युष्मदो यूयादेशे अस्मदो वयादेशे 'अतोगुणे' इति पररूपे 'शेषे लोपः' इति अदो लोपे यूयम् इति वयम् इति च सिद्धम् ।

त्वमावेकवचने । 'युष्मदस्मदोरनादेशे' इत्यतो युष्मदस्मदोरिति 'अष्टन आ विभक्तौ' इत्यतो विभक्ताविति चानुवर्तते । मपर्यन्तस्येत्यधिक्रियते ।

द्वितीयायां च । 'युष्मदस्मदोरनादेशे' इत्यतो युष्मदस्मदोरिति 'अष्टन आ विभक्तौ' इत्यत आ विभक्ताविति चानुवर्तते ।

त्वाम्-माम् । युष्मच्छब्दाद् अस्मच्छब्दाच्च[1] अमि विभक्तौ 'ङे प्रथमयोरम्' इति [2]अमादेशे 'त्वमावेकवचने' इति मपर्यन्तस्य युष्मदस्त्वादेशे[3] अस्मदो मादेशे 'अतो गुणे' इति पररूपे[4] 'शेषे लोपः' इतिप्राप्तं टिलोपम्प्रबाध्य

1- युष्मद्+अम्
2- युष्मद्+अम्
3 त्व+अद्+अम्
4- त्वद्+अम्।

4- त्वद् इत्यत्र "अद्" इति टिः। तम्प्रबाध्य।

शसो न ७।१।२८ ॥ आभ्यां शसो नः स्यात् । अमोऽपवादः । आदेः परस्य । संयोगान्तलोपः । युष्मान् । अस्मान् ॥ **योऽचि ७।१।८९** ॥ अनयोर्यकारादेशः स्यादनादेशेऽजादौ परतः । त्वया । मया ॥ **युष्मदस्मदोरनादेशे ७।२।८६** ॥ अनयोरात्स्यादनादेशे हलादौ विभक्तौ । युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः ॥

द्वितीयायां च इति दकारस्य आकारे सवर्णदीर्घे 'अमि पूर्वः' इति पूर्वरूपे त्वाम् इति माम् इति च सिद्धम् ।

शसो न । नेत्यविभक्तिकम्पदम् । युष्मदस्मद्भ्यां ङसोऽश्' इत्यतो युष्मदस्मद्भ्यामित्यनुवर्तते ।

युष्मान्-अस्मान् । युष्मच्छब्दाद् अस्मच्छब्दाच्च शसि विभक्तावनुबन्धलोपे 'द्वितीयायां च' इत्यात्वे दीर्घे 'ङे प्रथमयोरम्' इति प्राप्तममं वाधित्वा १।१।५४ 'आदेः परस्य' इतिसूत्रवलात् 'शसो न' इति अकारस्य नकारे 'संयोगान्तस्य लोपः' इति संलोपे युष्मानिति अस्मान् इति च सिद्धम् ।

योऽचि । 'युष्मदस्मदोरनादेशे' इति 'अष्टन आ विभक्तौ' इत्यतो विभक्ताविति चानुवर्तते । अचीति विभक्तिविशेषणम् । तदादिविधिः ।

त्वया-मया । युष्मच्छब्दाद् अस्मच्छब्दाच्च टाविभक्तावनुबन्धलोपे 'त्वमावेकवचने' इति मपर्यन्तस्य युष्मदस्त्वादेशेऽस्मदो मादेशे च 'अतो गुणे, इति पररूपे 'योऽचि' इति दकारस्य यकारे कृते त्वया इति मया इति च सिद्धम् ।

युष्मदस्मदोरनादेशे । अत्र 'अष्टन आ विभक्तौ' इत्यतोविभक्तावित्यनुवर्तते । 'रायो हलि' इत्यतो हलीत्यनुवर्तते । तच्च विभक्तिविशेषणम् । तदादिविधिः ।

युवाभ्याम्-आवाभ्याम् । युष्मच्छब्दाद् अस्मच्छब्दाच्च भ्यामि विभक्तौ 'युवावौ द्विवचने' इतिमपर्यन्तस्य युष्मदो युवादेशेऽस्मद आवा-

१· त्व+आ+अम्
२- त्वा+अम्
३- त्वाम् |

तुभ्यमह्यौ ङयि ७।२।९५ ॥ अनयोर्मपर्यन्तस्य तुभ्यमह्यौस्तोङयि । टिलोपः । तुभ्यम् । मह्यम् ॥ **भ्यसोऽभ्यम् ७।१।३०॥** आभ्यां परस्य भ्यसोऽभ्यमादेशः स्यात् । युष्मभ्यम् । अस्मभ्यम् ॥ **एकवचनस्य च ७।१।३२॥** आभ्यां ङसेरत् । त्वत् । मत् ॥ **पञ्चम्या अत् ७।१।३१॥** आभ्यां

देशे पररूपे 'युष्मदस्मदोरनादेशे' इति दकारस्य आत्वे सवर्णदीर्घे च कृते युवाभ्यामिति आवाभ्यामिति च सिद्धम् ।

तुभ्यमह्यौ ङयि । अत्र 'युष्मदस्मदोरनादेशे' इत्यतो युष्मदस्मदोरित्यनुवर्तते । मपर्यन्तस्येत्यधिक्रियते ।

तुभ्यम्-मह्यम् । युष्मच्छब्दादस्मच्छब्दाच्च ङेविभक्तौ 'त्वमावेकवचने' इतिसूत्रम्प्रबाध्य 'तुभ्यमह्यौ ङयि' इति मपर्यन्तस्य युष्मदस्तुभ्यादेशे अस्मदश्च मह्यादेशे पररूपे ङेरमादेशे टिलोपे तुभ्यमिति मह्यमिति च सिद्धम् ।

भ्यसोऽभ्यम् । अत्र 'युष्मदस्मद्भ्यां ङसोऽश्' इत्यतो युष्मदस्मद्भ्यामित्यनुवर्तते ।

युष्मभ्यम्-अस्मभ्यम् । युष्मच्छब्दादस्मच्छब्दाच्च चतुर्थीबहुवचने भ्यसि विभक्तौ 'भ्यसोऽभ्यम्' इति भ्यसोऽभ्यमादेशे 'शेषे लोप' इति टिलोपे युष्मभ्यमिति अस्मभ्यमिति च सिद्धम् ।

एकवचनस्य च । अत्र 'युष्मदस्मद्भ्यां ङसोऽश्' इत्यतो युष्मदस्मद्भ्यामिति 'पञ्चम्या अत्' इतिसूत्रञ्चानुवर्तते ।

त्वत् मत् । युष्मच्छब्दादस्मच्छब्दाच्च ङसिविभक्तावनुबन्धलोपे 'त्वमावेकवचने' इति मपर्यन्तस्य युष्मदस्त्वादेशे अस्मदश्च मादेशे 'एकवचनस्य च' इति ङसेरदादेशे 'अतो गुणे' इति पररूपे 'शेषे लोपः' इति टिलोपे त्वत् इति मत् इति च सिद्धम् । अस्मद् + ङस् । म + अद् + ङस् ।
म + अद् + अत् । पूर्व

पञ्चम्या अत् । अत्र 'युष्मदस्मद्भ्यां ङसोऽश्' इत्यतो युष्मदस्मद्भ्यामिति 'भ्यसोऽभ्यम्' इत्यतो भ्यस इति चानुवर्तते ।

पञ्चम्या भ्यसोऽत्स्यात् । युष्मत् । अस्मत् ॥ **तवममौ ङसि ७।२।९६॥** अनयोर्मपर्यन्तस्य तवममौ स्तो ङसि ॥ **युष्मदस्मद्भ्यां ङसोऽश् ७।१।२७** ॥ तव । मम । युवयोः । आवयोः ॥ **साम आकम् ७।१।३३** ॥ आभ्यां परस्य साम आक स्यात् युष्माकम् । अस्माकम् । त्वयि । मयि । युवयोः आवयोः ।

युष्मत्-अस्मत् । युष्मच्छब्दादस्मच्छब्दाच्च पञ्चमीबहुवचने भ्यसि 'भ्यसोऽभ्यम्' इतिसूत्रम्बाधित्वा 'पञ्चम्या अत्' इत्यतो भ्यसः अत् आदेशे 'शेषे लोपः' इति टिलोपे युष्मत् इति अस्मत् इति च सिद्धम् ।

तवममौ । अत्र 'युष्मदस्मदोरनादेशे' इत्यतोयुष्मदस्मदोरित्यनुवर्तते । मपर्यन्तस्येत्यधिक्रियते ।

तव मम । युष्मच्छब्दादस्मच्छब्दाच्च ङस्यनुबन्धलोपे 'त्वमावेकवचने' इतिसूत्रम्बाधित्वा 'तवममौ ङसि' इति मपर्यन्तस्य युष्मदस्तवादेशे अस्मदश्च ममादेशे 'युष्मदस्मद्भ्यां ङसोऽश्' इति ङसः अशादेशेऽनुबन्धलोपे अतो गुणे' इति पररूपे 'शेषे लोपः' इति टिलोपे तव इति मम इति च सिद्धम् ।

साम आकम् । अत्र 'युष्मदस्मद्भ्यां ङसोऽश्' इत्यतो युष्मदस्मदोरित्यनुवर्तते । भाविनः सुटो निवृत्त्यर्थं सूत्रे ससुट्कनिर्देशः ।

युष्माकम् अस्माकम् । युष्मच्छब्दादस्मच्छब्दाच्च आमिविभक्तौ आमि साम्त्वारोपात् 'साम आकम्' इति आम आकमादेशे 'शेषे लोपः' इति टिलोपे युष्माकम् इति अस्माकम् इति च सिद्धम् ।

त्वयि मयि । युष्मच्छब्दादस्मच्छब्दाच्च ङिविभक्तावनुबन्धलोपे 'त्वमावेकवचने' इति मपर्यन्तस्य युष्मदस्त्वादेशे अस्मदो मादेशे 'अतो गुणे' इति पररूपे 'योऽचि' इति दकारस्य यकारे त्वयि इति मयि इति च सिद्धम् ।

युष्मासु । अस्मासु ॥ **युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ ८।१।२०** ॥ पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वां नौ इत्यादेशौ स्तः ॥ **बहुवचनस्य वस्नसौ ८।२।२१** ॥ उक्तविधयोरनयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः ॥ **तेमयावेकवचनस्य ८।१।२२** ॥ उक्तविधयोरनयोष्षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः ॥ **त्वामौ द्वितीयायाः**

युष्मासु अस्मासु । युष्मच्छब्दादस्मच्छब्दाच्च सुप्यनुबन्धलोपे 'युष्मदस्मदोरनादेशे' इति दस्यात्वे सवर्णदीर्घे युष्मासु इति अस्मासु इति च सिद्धम् ।

त्वम्, युवाम्, यूयम् । त्वाम्, युवाम्, युष्मान् । त्वया; युवाभ्याम्, युष्माभिः । तुभ्यम्, युवाभ्याम्, युष्मभ्यम् । त्वत्, युवाभ्याम्, युष्मत् । तव, युवयोः, युष्माकम् । त्वयि, युवयोः, युष्मासु ।

अहम्, आवाम्, वयम् । माम्, आवाम्, अस्मान् । मया, आवाभ्याम्, अस्माभिः, । मह्यम्, आवाभ्याम्, अस्मभ्यम् । मत्, आवाभ्याम्, अस्मत् । मम, आवयोः, अस्माकम् । मयि, आवयोः अस्मासु ।

युष्मदस्मदोः । अत्र 'पदस्य' 'पदात्' अनुदात्तं सर्वमपादादौ' इति सूत्रत्रयमधिक्रियते ।

वहुवचनस्य । अत्रापि 'पदस्य' 'पदात्' 'अनुदात्तं सर्वमपादादौ' इतिसूत्रत्रयमधिक्रियते । पूर्वसूत्रात् युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोरित्यनुवर्तते ।

तेमयोवकवचनस्य । अत्रापि पूर्वसूत्रवत् पूर्वोक्तसूत्रत्रयमधिक्रियते । युष्मदस्मदोः षष्ठीचतुर्थीत्यनुवर्तते ।

त्वामौ द्वितीयायाः । पूर्वोक्तसूत्रत्रयमधिक्रियते । युष्मदस्मदोरिति एकवचनस्येति चानुवर्तते ।

८।१।२३॥ द्वितीयैकवचनान्तयोस्त्वा मा इत्यादेशौ स्तः ॥ श्रीशस्त्वाऽवतु मापीह, दत्तात्ते मेऽपि शर्म सः ॥ स्वामी ते मेऽपि स हरिः, पातु वामपि नौ विभुः ॥ सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः । सोऽव्याद्वो नः शिवं वो नो, दद्यात् सेव्योऽत्र वः स नः ॥ (एकवाक्ये युष्मदस्मदादेशा वक्तव्याः) । (एकतिङ वाक्यम्) तेनेह न । ओदनं पच तव भविष्यति ॥ इह तु स्यादेव । शालीनां ते ओदनं दास्यामि । (एते वान्नावादयोऽनन्वादेशे वा वक्तव्याः) । अन्वादेशे तु नित्यं स्युः ।

द्वितीयादिक्रमेणोदाहरति **श्रीशस्त्वावतु** इत्यादिना । श्रियाः ईशः श्रीशः विष्णुः इह=संसारे त्वा=त्वाम् मा=मामपि अवतु=रक्षतु । अत्र श्रीशपदात्परयोः त्वाम् माम् इति द्वितीयैकवचनान्तयोर्युष्मदस्मदोस्त्वा मा इत्यादेशौ । सः श्रीशः ते=तुभ्यम्, मे=मह्यम् अपि शर्म=सुखं दत्तात् । अत्र तुभ्यम् मह्यम् इति चतुर्थ्येकवचनान्तयोर्दत्तात्पदपरयोः ते मे इत्यादेशौ । स हरिः ते=तव मे=मम अपि स्वामी । अत्र स्वामिपदात्परयोः तव मम इतिषष्ठ्येकवचान्तयोः ते मे इत्यादेशौ । विभुः=सर्वव्यापकः वाम्-युवाम्, नौ-आवाम् अपि पातु-रक्षतु । अत्र पतिपदात्परयोः युवाम् आवाम् इति द्वितीयाद्विवचनान्तयोः वाम् नौ इत्यादेशौ । ईशः वां-युवाभ्याम् नौ-आवाभ्याम् सुखं ददातु । अत्र सुखपदात्परयोः युवाभ्याम् आवाभ्याम् इति चतुर्थीद्विवचनान्तयोः वाम् नौ इत्यादेशौ । हरिः वाम्-युवयोः नौ-आवयोरपि पतिः । अत्र पतिपदात्परयोः युवयोः आवयोः इति षष्ठीद्विवचनान्तयोः वाम् नौ इत्यादेशौ । स हरिः वः=युष्मान् नः=अस्मान् अपि अव्याद्रक्षतु । अत्र अव्यात्पदपरयोः युष्मान् अस्मान् इति द्वितीयाबहुवचनान्तयोः वस्नसौ । स हरिः वः=युष्मभ्यम् नः=अस्मभ्यम् शिवं दद्यात् । अत्र शिवशब्दात्परयोः युष्मभ्यम् अस्मभ्यम् इति चतुर्थीबहुवचनान्तयोः वस्नसौ । अत्र स हरिः वः युष्माकं नः=अस्माकम् अपि सेव्यः भजनीयः । अत्र अत्रपदात्परयोः युष्माकम् अस्माकम् इति षष्ठीबहुचनान्तयोः वस्नसौ ।

धाता ते भक्तोऽस्ति, धाता तव भक्तोऽस्ति वा। तस्मै ते नम इत्येव॥ सुपात्, सुपाद्। सुपादौ॥ **पादः पत् ६।४।१३०॥** पाच्छब्दान्तं यदङ्गं भं तदवयवस्य पाच्छब्दस्य पदादेशः। सुपदः। सुपदा। सुपाद्भ्याम्॥ अग्निमत्, अग्निमद्। अग्निमथौ। अग्निमथः॥ **अनिदितां हल उपधायाः क्ङिति ६।४।२४॥** हलन्तानामनिदितामङ्गानामुपधाया नस्य लोपः किति ङिति। नुम्। संयोगान्तस्य लोपः। नस्य कुत्वेन ङः। प्राङ्।

एकतिङ् वाक्यम्। अत्र तिङ्पदेन तिङन्तग्रहणम्। एकः तिङ् यस्य तदेकतिङ्। तथा च एकतिङन्तघटितं वाक्यमिति तदर्थः।

धाता ते भक्तोऽस्ति। अत्र अन्वादेशाभावेन 'एते वान्नावादय अनन्वादेशे वा वक्तव्याः' इतिवार्त्तिकबलात् विकल्पेन तव इत्यस्य ते इत्यादेशः। तस्मै ते नम इत्यत्र तु अन्वादेशसत्त्वान्न विकल्प आदेशः।

पादः पत्। अत्र 'अङ्गस्य' इति 'भस्य' इति चाधिक्रियते। तत्र पाद इति विशेषणम्। तेन 'येन विधिस्तदन्तस्य' इति तदन्तविधिः।

सुपदः। सुपाद्शब्दाच्छसिविभक्तावनुबन्धलोपे भसंज्ञायामङ्गसंज्ञायां च 'पादः पत्' इत्यनेन 'निर्दिश्यमानस्यादेशाः भवन्ति' इति परिभाषया पादित्यस्यैव पदादेशे रुत्वे विसर्गे च सुपदः इति सिद्धम्।

अनिदितां हलः। अत्र 'अङ्गस्य' इत्यधिक्रियते। तस्य षष्ठ्यन्तत्वेन विपरिणामः। तत्र हल इति विशेषणम्। तदन्तविधिः। 'श्नान्नलोपः' इत्यतो लुप्तषष्ठीकं नेति लोप इति चानुवर्तते। क् च ङ् च क्ङौ तौ इतौ यस्येति विग्रहः।

प्राङ्। प्रपूर्वादञ्चधातोः 'ऋत्विग्' इत्यादिना क्विन्प्रत्यये तस्य लोपे सवर्णदीर्घे कृदन्तत्वात्प्रातिपदिकत्वेन सौ अनुबन्धलोपे 'अनिदितां हल उपधायाः क्ङिति' इति नलोपे 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुम्यनुबन्धलोपे 'हल्ङ्याब्भ्य' इत्यादिना सुलोपे 'संयोगान्तस्य

प्राञ्चौ । प्राञ्चः ॥ **अचः ६।४।१२८** ॥ लुप्तनकारस्याऽञ्चतेर्भस्याकारस्य लोपः ॥ **चौ ६।३।१३८** ॥ लुप्ताकारनकारेऽञ्चतौ परे पूर्वस्याणो दीर्घः । प्राचः । प्राचा । प्राग्भ्याम् ॥ प्रत्यङ् । प्रत्यञ्चौ ॥ प्रतीचः ॥

लोप ' इति चलोपे ' क्विन्प्रत्ययस्य कुः ' इति नस्य कुत्वेन ङकारे प्राङ् इति सिद्धम् ।

प्राञ्चौ । प्रपूर्वादञ्च्धातोः 'ऋत्विग्' इत्यादिना क्विनि तस्य लोपे कृदन्तत्वात्प्रातिपदिकत्वेन औ विभक्तौ सवर्णदीर्घे ' अनिदितां हल उपधायाः क्ङिति ' इति नलोपे ' उगिदचां सर्वनामस्थानेऽधातोः ' इति नुम्यनुबन्धलोपे नकारस्य अनुस्वारे परसवर्णे च कृते प्राञ्चौ इति सिद्धम् ।

अचः । अच इति लुप्तनकारस्याञ्चधातोः षष्ठ्यन्तम् । ' भस्य ' इत्यधिक्रियते । ' अल्लोपोऽनः ' इत्यत अल्लोप इत्यनुवर्तते ।

चौ । लुप्तनकाराकारस्य उकारान्तस्य अञ्चधातोः सप्तम्यन्तं चाविति । ' ढ्रलोपे पूर्वस्य दीर्घोऽणः, इत्यतः पूर्वस्यदीर्घोऽण इत्यनुवर्तते ।

प्राचः । प्रपूर्वादञ्चधातोः ' ऋत्विग्' इत्यादिना क्विन्प्रत्यये तस्य लोपे कृदन्तत्वात्प्रतिपदिकत्वेन शसि विभक्तावनुबन्धलोपे । अनिदितां हल उपधायाः क्ङिति ' इति नस्य लोपे अचः इति अकारलोपे ' चौ ' इति दीर्घे रुत्वे विसर्गे च प्राचः इति सिद्धम् ।

प्राग्भ्याम् । प्रपूर्वादञ्चधातोः क्विनि तस्य लोपे कृदन्तत्वात्प्रातिपदिकत्वेन भ्यामि ' अनिदितां हल उपधायाः क्ङिति ' इति नलोपे सवर्णदीर्घे ' क्विन्प्रत्ययस्य कुः ' इति कुत्वस्यासिद्धत्वात् ' चोः कुः ' इति कुत्वे जश्त्वे प्राग्भ्यामिति सिद्धम् ।

प्राङ्, प्राञ्चौ, प्राञ्चः । प्राञ्चम्, प्राञ्चौ, प्राचः । प्राचा, प्राग्भ्याम्, प्राग्भिः । प्राचे, प्राग्भ्याम्, प्राग्भ्यः । प्राचः, प्राग्भ्याम्, प्राग्भ्यः । प्राचः, प्राचोः, प्राचाम् । प्राचि, प्राचोः, प्राक्षु । हे प्राङ्, हे प्राञ्चौ, हे प्राञ्चः ।

प्रत्यग्भ्याम् ॥ उदङ् । उदञ्चौ ॥ **उद ईत् ६।४।१३९** ॥ उच्छब्दात्परस्य लुप्तनकारस्याञ्चतेर्भस्याकारस्य ईत् । उदीचः उदीचा । उदग्भ्याम् ॥ **समः समि ६।३।९३** ॥ वप्रत्ययान्तेऽञ्चतौ परे समः सम्यादेशः स्यात् ।

प्रत्यङ् । प्रतिपूर्वादञ्चधातोः क्विनि तस्यलोपे यणि प्रातिपदिकत्वात्सौ ‘ अनिदितां हल उपधायाः क्ङिति ’ इति नस्यलोपे ‘ उगिदचाम् ’ इति नुम्यनुबन्धलोपे सुलोपे संयोगान्तलोपे ‘ क्विन्प्रत्ययस्य कुः ’ इति नस्य कुत्वेन ङकारे प्रत्यङ् इति सिद्धम् ।

प्रतीचः । प्रतिपूर्वादञ्चतेः क्विनि तल्लोपे शस्यनुबन्धलोपे ‘ अनिदिताम् ’ इति नस्य लोपे ‘ अकृतव्यूहाः पाणिनीयाः ’ इतिपरिभाषया यणोऽप्रवृत्त्या ‘अचः’ इति अलोपे ‘ चौ ’ इति दीर्घे रुत्वे विसर्गे च प्रतीचः इति सिद्धम् ।

प्रत्यङ्, प्रत्यञ्चौ, प्रत्यञ्चः । प्रत्यञ्चम्, प्रत्यञ्चौ, प्रतीचः । प्रतीचा, प्रत्यग्भ्याम, प्रत्यग्भिः । प्रतीचे, प्रत्यग्भ्याम्, प्रत्यग्भ्यः । प्रतीचः प्रत्यग्भ्याम्, प्रत्यग्भ्यः । प्रतीचः, प्रतीचोः, प्रतीचाम् । प्रतीचि, प्रतीचोः, प्रत्यक्षु । हे प्रत्यङ्, हे प्रत्यञ्चौ, हे प्रत्यञ्चः ।

उद ईत् । अत्र ‘ भस्य ’ इत्याधिक्रियते । ‘ अचः ’ इतिसूत्रम् ‘ अल्लोपोऽनः ’ इत्यतः अत् इति चानुवर्तते ।

उदीचः । उत्पूर्वादञ्चधातोः क्विनि तल्लोपे शस्यनुबन्धलोपे ‘अनिदिताम् ’ इति नलोपे ‘ अचः ’ इत्यकारलोपम्बाधित्वा ‘ उद ईत् ’ इति ईत्वे रुत्वे विसर्गे च उदीचः इति सिद्धम् ।

समः समि । अत्र समि इति लुप्तप्रथमान्तम् । विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये ’ इत्यतः अञ्चतावप्रत्यये इत्यनुवर्तते ।

सम्यङ् । सम्पूर्वादञ्चतेः क्विनि तल्लोपे ‘समः समि’ इति समः सम्यादेशे यणि सौ ‘ अनिदिताम् ’ इति नलोपे ‘ उगिदचाम् ’ इति नुम्यनुबन्धलोपे सुलोपे संयोगान्तलोपे ‘क्विन्प्रत्ययस्य कुः’ इति कुत्वेन नस्य ङकारे सम्यङ् इति सिद्धम् ।

सम्यङ्। सम्यञ्चौ समीचः। सम्यग्भ्याम्॥ **सहस्य सध्रिः** ६।३।९५॥ वप्रत्ययान्तेऽञ्चतौ परे सहस्य सध्र्यादेशः स्यात् सध्र्यङ्॥ **तिरसस्तिर्यलोपे** ६।३।९४॥ अलुप्ताकारेऽञ्चतौ वप्रत्ययान्ते तिरसस्तिर्यादेशः॥ तिर्यङ्। तिर्यञ्चौ। तिरश्चः। तिर्य-

---

समीचः। सम्पूर्वादञ्चुधातोः ‘ऋत्विग्’ इत्यादिना क्विनि तल्लोपे ‘समः समि’ इति समः सम्यादेशे अकृतव्यूहपरिभाषया यणोऽभावे कृदन्तत्वेन प्रातिपदिकत्वाच्छस्यनुबन्धलोपे ‘अचः’ इत्यकारलोपे ‘चौ’ इति दीर्घे रुत्वे विसर्गे च समीचः इति सिद्धम्।

सहस्य सध्रिः। विष्वग्देवयोश्चटेरद्र्यञ्चतावप्रत्यये’ इत्यतः अञ्चतावप्रत्यये इत्यनुवर्तते।

सध्र्यङ्। सहपूर्वादञ्चतेः क्विनि तल्लोपे ‘सहस्य सध्रिः’ इति सहस्य सध्र्यादेशे यणि सौ ‘अनिदिताम्’ इत्यादिना नलोपे ‘उगिदचाम्’ इति नुम्यनुबन्धलोपे सुलोपे चस्य संयोगान्तलोपे ‘क्विन्प्रत्ययस्य कुः’ इति नस्य कुत्वेन ङकारे सध्र्यङ् इति सिद्धम्।

तिरसस्तिर्यलोपे। तिरि इति लुप्तप्रथमान्तम्। अञ्चतावप्रत्यये इत्यनुवर्तते।

तिर्यङ्। तिरस्पूर्वादञ्चधातोः क्विनि तस्य लोपे ‘तिरसस्तिर्यलोपे’ इति तिरसस्तिर्यादेशे यणि सौ ‘अनिदिताम्’ इति नलोपे ‘उगिदचाम्’ इति नुम्यनुबन्धलोपे सुलोपे संयोगान्तलोपे ‘क्विन्प्रत्ययस्य कुः’ इति नस्य कुत्वेन ङकारे तिर्यङ् इति सिद्धम्।

तिरश्चः। तिरस्पूर्वादञ्चतेः क्विनि तल्लोपे प्रातिपदिकत्वाच्छस्यनुबन्धलोपे ‘अनिदिताम्’ इति नलोपे ‘अचः’ इत्यकारलोपे सस्य श्चुत्वेन शकारे रुत्वे विसर्गे तिरश्चः इति साधु।

तिर्यङ्, तिर्यञ्चौ, तिर्यञ्चः। तिर्यञ्चम्, तिर्यञ्चौ, तिरश्चः। तिरश्चा, तिर्यग्भ्याम्, तिर्यग्भिः। तिरश्चे, तिर्यग्भ्याम्, तिर्यग्भ्यः। तिरश्चः, तिर्यग्भ्याम्, तिर्यग्भ्यः। तिरश्चः। तिरश्चोः, तिरश्चाम्।

ग्भ्याम् ॥ **नाञ्चेः पूजायाम् ६।४।३०** ॥ पूजार्थस्याञ्चतेरुपधाया नस्य लोपो न । प्राङ्। प्राञ्चौ । नलोपाभावादलोपो न । प्राञ्चः । प्राङ्भ्याम् । प्राङ्क्षु ॥ एवं पूजार्थे प्रत्यङ्ङादयः ॥ क्रुङ् । क्रुञ्चौ । क्रुङ्भ्याम् ॥ पयोमुक्, पयोमुग् । पयोमुचौ । पयोमुग्भ्याम् ॥ उगित्त्वान्नुम्

तिरश्चि, तिरश्चोः, तिर्यक्षु । हे तिर्यङ्, हे तिर्यञ्चौ, हे तिर्यञ्चः ।

नाञ्चेः पूजायाम् । अत्र 'अनिदितां हल उपधायाः क्ङिति' इत्यतः उपधायाः क्ङिति इत्यनुवर्तते । 'श्नान्नलोपः' इत्यतो नलोप इत्यनुवर्तते ।

प्राङ् । प्रपूर्वात्पूजार्थकाञ्चतेः क्विनि तल्लोपे सवर्णदीर्घे 'अनिदिताम्' इति नलोपे प्राप्ते 'नाञ्चेः पूजायाम्' इति तन्निषेधे सौ 'हल्ङ्याब्भ्यः' इत्यादिना सुलोपे चकारस्य संयोगान्तलोपे 'निमित्तापाये नैमित्तिकस्याप्यपायः' इतिन्यायेनानुस्वारपरसवर्णयोर्निवृत्तौ 'क्विन्प्रत्ययस्य कुः' इति नस्य कुत्वेन ङकारे प्राङ् इति सिद्धम् ।

प्राञ्चः । प्रपूर्वात्पूजार्थकाञ्चतेः क्विनि तल्लोपे सवर्णदीर्घे 'अनिदिताम्' इति नलोपे प्राप्ते 'नाञ्चेः पूजायाम्' इति तन्निषेधे शस्यनुबन्धलोपे नलोपाभावादकारलोपाभावे रुत्वे विसर्गे च प्राञ्चः इति सिद्धम् ।

प्राङ्भ्याम् । प्रपूर्वात्पूजार्थकाञ्चतेः क्विनि तल्लोपे सवर्णदीर्घे 'अनिदिताम्' इति नलोपे प्राप्ते 'नाञ्चेः पूजायाम्' इति तन्निषेधे भ्यामि 'स्वादिष्वसर्वनामस्थाने' इतिपदत्वात्संयोगान्तचकारस्य लोपे अनुस्वारपरसवर्णयोर्निवृत्तौ 'क्विन्प्रत्ययस्य कुः' इति नकारस्य कुत्वेन ङकारे प्राङ्भ्यामिति सिद्धम् ।

प्राङ्, प्राञ्चौ, प्राञ्चः। प्राञ्चम्, प्राञ्चौ, प्राञ्चः । प्राञ्चा, प्राङ्भ्याम्, प्राङ्भिः । प्राञ्चे, प्राङ्भ्याम्, प्राङ्भ्यः । प्राञ्चः, प्राङ्भ्याम्, प्राङ्भ्यः । प्राञ्चः, प्राञ्चोः, प्राञ्चाम् । प्राञ्चि, प्राञ्चोः, प्राङ्ख्षु-प्राङ्क्षु-प्राङ्षु । हे प्राङ्, हे प्राञ्चौ, हे प्राञ्चः । एवमेव पूजायां प्रत्यञ्चादीनामपि रूपं बोध्यम् ।

सान्त महतः संयोगस्य ६।४।१०॥ सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने । महान् । महान्तौ । महान्तः । हे महन् । महद्भ्याम् ॥ **अत्वसन्तस्य चाधातोः ६।४।१४॥** अत्वन्तस्योपधाया दीर्घो धातुभिन्नासन्तस्य चासंबुद्धौ सौ परे । उगित्त्वान्नुम् धीमान् । धीमन्तौ । धीमन्तः । हे धीमन् । शसादौ महद्वत् ॥ भातेर्डवतुः ।

सान्तमहतः संयोगस्य । अत्र ' सर्वनामस्थाने चासम्बुद्धौ ' इति 'नोपधायाः' इति च सूत्रद्वयमनुवर्तते । नेतिलुप्तषष्ठीकम् । 'ढ्रलोपेपूर्वस्य दीर्घोऽणः' इत्यतो दीर्घ इत्यनुवर्तते ।

महान् । महत्शब्दात्सावनुबन्धलोपे 'उगिदचां सर्वनामस्थानेऽधातोः' इति' नुमागमेऽनुबन्धलोपे 'सान्तमहतः संयोगस्य' इति दीर्घे 'हल्ङ्याब्भ्यः' इत्यादिना सुलोपे संयोगान्तलोपे तस्यासिद्धत्वान्नलोपाभावे महान् इति सिद्धम् ।

महान्, महान्तौ, महान्तः । महान्तम्, महान्तौ, महतः । महता, महद्भ्याम्, महद्भिः । महते, महद्भ्याम्, महद्भ्यः । महतः, महद्भ्याम्, महद्भ्यः । महतः, महतोः, महताम् । महति, महतोः, महत्सु । हे महन्, हे महान्तौ, हे महान्तः ।

अत्वसन्तस्य चाधातोः । अतु इति लुप्तषष्ठीकम् । अङ्गविशेषणत्वात्तदन्तविधिः । अधातोरित्यसन्तविशेषणम् । ' नोपधायाः ' इत्यत उपधाया इति, ' सर्वनामस्थानेचासम्बुद्धौ' इत्यतः असम्बुद्धाविति, 'सौ च' इत्यतः साविति, ' ढ्रलोपे पूर्वस्य दीर्घोऽणः' इत्यतो दीर्घ इति चानुवर्तते । ततो मूलोक्तार्थलाभः ।

धीमान् । धीमत्शब्दात्सावनुबन्धलोपे आरम्भसामर्थ्याद् 'उगिदचाम्, इतिप्राप्तनुमं वाधित्वा पूर्वम् 'अत्वसन्तस्य चाधातोः' इतिदीर्घे ततो नुमागमेऽनुबन्धलोपे 'हल्ङ्याब्भ्य'. इत्यादिना सुलोपे संयोगान्तलोपे धीमान् इति सिद्धम् ।

धीमान्, धीमन्तौ, धीमन्तः । धीमन्तम्, धीमन्तौ, धीमतः ।

डित्त्वसामर्थ्यादभस्यापि टेर्लोपः । भवान् । भवन्तौ । भवन्तः । शत्रन्तस्य भवन् ॥ **उभे अभ्यस्तम् ६।१।५** ॥ षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः ॥ **नाभ्यस्ताच्छतुः ७।१।७८** ॥ अभ्यास्तात्परस्य शतुर्नुम् न । ददत्, ददद् । ददतौ । ददतः ॥ **जक्षि-**

धीमता, धीमद्भ्याम्, धीमद्भिः । धीमते, धीमद्भ्याम्, धीमद्भ्यः । धीमतः, धीमद्भ्याम्, धीमद्भ्यः । धीमतः, धीमतोः, धीमताम् । धीमति, धीमतोः धीमत्सु । हे धीमन्, हे धीमन्तौ हे धीमन्तः ।

भवान् । भाधातोः 'भातेर्डवतुः' इति डवतुप्रत्ययेऽनुबन्धलोपे डित्वसामर्थ्यादभस्यापि टेर्लोपे निष्पन्नभवत्शब्दात्सावनुबन्धलोपे 'अत्वसन्तस्य चाधातोः' इति दीर्घे ततः 'उगिद्चाम्' इतिनुम्यनुबन्धलोपे हल्ङ्यादिलोपे संयोगान्तलोपे तस्यासिद्धत्वान्नलोपाभावे भवान् इति सिद्धम् ।

भवन् । भूधातोः 'लटः शतृशानचावप्रथमासमानाधिकरणे' इति शतृप्रत्यये शपि अनुबन्धलोपे गुणे अवादेशे पररूपे निष्पन्नभवच्छब्दात्सौ अत्वन्तत्वाभावेन 'अत्वसन्तस्य चाधातोः' इति दीर्घाभावे नुमि सुलोपे संयोगान्तलोपे भवन् इति सिद्धम् ।

उभे अभ्यस्तम् । अत्र 'एकाचो द्वे प्रथमस्य' इत्यतोऽनुवृत्तं द्वे इति 'अनन्तरस्य विधिर्वा प्रतिषेधो वा' इति न्यायेन षष्ठाध्यायविहितद्वित्वपरम् । उभेग्रहणं समुदायप्रतिपत्त्यर्थम् ।

नाभ्यस्ताच्छतुः । 'इदितो नुम् धातोः' इत्यतो नुम् इत्यनुवर्तते ।

ददत् । ददत्शब्दात्सावनुबन्धलोपे 'उभे अभ्यस्तम्' इत्यभ्यस्तसंज्ञायाम् 'उगिदचां सर्वनामस्थानेऽधातोः' इति प्राप्तनुमः 'नाभ्यस्ताच्छतुः' इति निषेधे अत्वन्तत्वाभावाद्दीर्घाभावे सुलोपे ददत् इति सिद्धम् ।

१. दृग्दृशवतुषु (६।३।८९)॥ [illegible] दृक्षे चेति वक्तव्यम् (३३९२) इत्यनेन दृशः "क्सः" प्रत्ययः

CC0 In Public Domain. Digitization by eGangotri

त्यादयः षट् ६।१।६ ॥ षड्धातवोऽन्ये जक्षितिश्च सप्तम एते अभ्यस्तसंज्ञाः स्युः । जक्षत्, जक्षद् । जक्षतौ । जक्षतः ॥ एवं जाग्रत् । दरिद्रत् । शासत् । चकासत् । गुप्, गुब् । गुपौ । गुपः । गुब्भ्याम् ॥ **त्यदादिषु दृशोऽनालोचने कञ्च ३।२।६० ॥** त्यदादिषूपपदेष्वज्ञानार्थदृशेः कञ् चात् क्विन् । **आ सर्वनाम्नः ६।३।९१ ॥** सर्वनाम्न आकारोऽन्तादेशः स्याद्दृग्दृशवतुषु । तादृक्, तादृग् । तादृशौ । तादृशः । तादृग्भ्याम् ॥ व्रश्चेति

तादृशः — १ [तादृशाः] अस्मादृशः ॥१।१।७३॥ [illegible]

दददत्, ददतौ, ददतः । ददतम्, ददतौ, ददतः । ददता, दद‍द्भ्याम्, दद‌द्भिः । ददते, दद‌द्भ्याम्, दद‌द्भ्यः । ददतः, दद‌द्भ्याम्, दद‌द्भ्यः । ददतः, ददतोः, ददताम् । ददति, ददतोः, ददत्सु । हे ददत्, हे ददतौ, हे ददतः ।

जक्षित्यादयः षट् । 'उभेऽभ्यस्तम्' इत्यतोऽनुवृत्तमभ्यस्तमिति बहुवचनान्ततया विपरिणम्यते । जक्ष भक्षणहसनयोः' जागृनिद्राक्षये' दरिद्रादुर्गतौ, चकासृ दीप्तौ, शासु अनुशिष्टौ, दीधीङ् दीप्तिदेवतयोः, वेवीङ् वेतिना तुल्ये, एभ्यः शतृप्रत्यये सुबुत्पत्तौ 'नाभ्यस्ताच्छतुः, इति नुमः प्रतिषेध इष्यते । अभ्यस्तसंज्ञायाश्च द्वित्वनिबन्धनत्वादिहाप्राप्त्या तदर्थमिदमारभ्यते ।

जक्षत् । जक्षधातोः शतृप्रत्यये निष्पन्नजक्षत्शब्दात्सौ हल्ङ्यादिलोपे 'नाभ्यस्ताच्छतुः' इति निषेधाद् 'उगिदचाम्' इति नुमोऽभावे जक्षत् इति सिद्धम् ।

त्यदादिषु दृशोऽनालोचने कञ्च । अनालोचनपदेन ज्ञानसामान्यं विवक्षितम् । चकारात्क्विन्ननुकृष्यते ।

आसर्वनाम्नः । आ इत्यविभक्तिको निर्देशः । 'दृग्दृशवतुषु' इति सूत्रमनुवर्तते ।

तादृक् । तद्शब्दोपपदाद्दृश्धातोः 'त्यदादिषु दृशोऽनालोचने कञ्च' इतिक्विन्प्रत्यये तस्य लोपे 'आ सर्वनाम्नः' इति दकारस्याकारे

षः । जश्त्वचर्त्वे । विट्, विड् । विशौ । विशः । विड्भ्याम् ॥ **नशेर्वा ८।२।६३** ॥ नशेः कवर्गोऽन्तादेशो वा पदान्ते । नक्, नग् । नट्, नड् ।

सवर्णदीर्घे ततः कृदन्तत्वात्प्रतिपदिकत्वेन सावनुवन्धलोपे हल्ङ्यादिलोपे ‘ क्विन्प्रत्ययस्य कुः ’ इतिकुत्वस्यासिद्धत्वात् ‘ व्रश्च ’ इत्यादिना शकारस्य षत्वे तस्य जश्त्वेन डकारे तस्य कुत्वेन गकारे ‘वावसाने’ इति वैकल्पिके चर्त्वे तादृक्-तादृग् इति रूपद्वयं सिद्धम् ।

तादृग्भ्याम् । तदुपपदाद्दृश्धातोः ‘ त्यदादिषु दृशोऽनालोचने कञ्च ’ इति क्विनि तल्लोपे ‘आ सर्वनाम्नः ’ इति दकारस्यात्वे सवर्णदीर्घे कृदन्तत्वात्प्रातिपदिकत्वेन भ्यामि विभक्तौ कुत्वस्यासिद्धत्वात् ‘ व्रश्च ’ इत्यादिना षत्वे तस्य जश्त्वेन डकारे तस्य च स्वादिष्वसर्वनामस्थाने ’ इति पदत्वात् ‘ क्विन्प्रत्ययस्य कुः ’ इति कुत्वेन गकारे तादृग्भ्यामिति सिद्धम् ।

तादृक्-तादृग्, तादृशौ, तादृशः । तादृशम्, तादृशौ, तादृशः । तादृशा, तादृग्भ्याम्, तादृग्भिः । तादृशे, तादृग्भ्याम्, तादृग्भ्यः । तादृशः, तादृग्भ्याम्, तादृग्भ्यः । तादृशः, तादृशोः, तादृशाम् । तादृशि, तादृशोः, तादृक्षु । हे तादृक्-हे तादृग्, हे तादृशौ, हे तादृशः ।

विट् । विश्शव्दात्सावनुवन्धलोपे ‘ हल्ङ्याब्भ्यः ’ इत्यादिना सुलोपे ‘ व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ’ इति षत्वे जश्त्वे चर्त्वे विट्–विड् इति रूपद्वयं सिद्धम् ।

नशेर्वा । अत्र ‘ क्विन्प्रत्ययस्य कुः ’ इत्यतः कुरिति ‘ झलां जशोऽन्ते ’ इत्यतः अन्ते इति चानुवर्तते । पदस्येत्यधिक्रियाते ।

नक् । नश्शव्दात्सावनुवन्धलोपे हल्ङ्यादिलोपे कुत्वस्यासिद्धत्वात्पूर्वं ‘ व्रश्च ’ इति षत्वे तस्य जश्त्वेन डकारे तस्य ‘ नशेर्वा ’ इति वैकल्पिककुत्वेन गकारे तस्य ‘ वावसाने ’ इति पाक्षिके चर्त्वे नक्-नग् इति, कुत्वाभावपक्षे पाक्षिकचर्त्वेन नट् नड् इति च सिद्धम् ।

नक्-नग्-नट्-नड्, नशौ, नशः, । नशम्, नशौ, नशः । नशा,

नशौ । नशः । नग्भ्याम्, नड्भ्याम् **स्पृशोऽनुदके क्विन् ३।२।५८ ॥** अनुदके सुप्युपपदे स्पृशेः क्विन् । घृतस्पृक्, घृतस्पृग् । घृतस्पृशौ । घृतस्पृशः ॥ दधृक्, दधृग् । दधृषौ । दधृग्भ्याम् ॥ रत्नमुषौ । रत्नमुड्भ्याम् ॥ षट्, षड् । षड्भिः । षड्भ्यः । षण्णाम् । षट्सु ॥ रुत्वं प्रति षत्वस्यासिद्धत्वात्ससजु-

---

नग्भ्याम्-नड्भ्याम्, नग्भिः-नड्भिः । नशे, नग्भ्याम्-नड्भ्याम्, नग्भ्यः-नड्भ्यः । नशः, नग्भ्याम्-नड्भ्याम्, नग्भ्यः-नड्भ्यः । नशः, नशोः, नशाम् । नशि, नशोः, नक्षु-नट्त्सु-नट्सु । हे नक्-हे नग्-हेनट्-हेनड्-हे नशौ, हे नशः ।

स्पृशोऽनुदके क्विन् । अत्र ‘ सुपिस्थः ’ इत्यतः सुपीत्यनुवर्तते ।

घृनस्पृक् । घृतोपपदात्स्पृश्धातोः ‘ स्पृशोऽनुदके क्विन् ’ इति क्विन्प्रत्यये तस्य लोपे कृदन्तत्वात्प्रातिपदिकत्वेन सौ हल्ङ्यादिलोपे ‘ व्रश्च ’ इति षत्वे तस्य जशत्वेन डकारे तस्य ‘ क्विन्प्रत्ययस्यकुः ’ इति कुत्वने गकारे पाक्षिकचर्त्वे घृतस्पृक्-घृनस्पृग् इतिरूपद्वयं साधु ।

दधृक् । धृष्धातोः ‘ ऋत्विग्’ इत्यादना क्विन्प्रत्यये निपातनाद्द्वित्वे च कृते अभ्यासकार्ये क्विनोलोपे निष्पन्नदधृष्शब्दात्सौ हल्ङ्यादिलोपे जश्त्वेन कुत्वस्यासिद्धत्वात्पूर्वं षस्य डकारे तस्य ‘ क्विन्प्रत्ययस्य कुः ’ इति कुत्वेन गकारे तस्य पाक्षिकचर्त्वे दधृक्-दधृग् इति रूपद्वयं सिद्धम् ।

रत्नमुट् । रत्नमुष्शब्दात्सौ हल्ङ्यादिलोपे जश्त्वे पाक्षिके चर्त्वेरत्नमुट्-रत्नमुड् इति साधुः ।

षट् । षष्शब्दाज्जसि विभक्तौ ‘ ष्णान्ता षट् ’ इतिषट्संज्ञायां षड्भ्यो लुक् ’ इति जसो लुकि जश्त्वे पाक्षिके चर्त्वे च षट्-षड् इति रूपद्वयं सिद्धम् ।

षण्णाम् । षष्शब्दादामि ‘ ष्णान्ता षट् ’ इतिषट्संज्ञायां ‘ षट्चतुर्भ्यश्च ’ इति नुडागमेऽनुबन्धलोपे ‘ स्वादिष्वसर्वनामस्थाने ’ इति

षोरुरिति रुत्वम् ॥ **र्वोरुपधाया दीर्घ इकः ८।२।७६** ॥ रेफवान्तयोर्धात्वोरुपधाया इको दीर्घः पदान्ते । पिपठीः पिपाठिषौ । पिपठीर्भ्याम् ॥ **नुम्विसर्जनीयशर्व्यवायेऽपि ८।३।५८** ॥ एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः । ष्टुत्वेन पूर्वस्य षः । पिपठीष्षु,

---

पदत्वात् 'झलां जशोऽन्ते' इति षस्य जश्त्वेन डकारे' अनामिति पर्युदासात् ष्टुत्वनिषेधाभावेन ष्टुत्वे 'यरोऽनुनासिकोऽनुनासिको वा' इति विकल्पं बाधित्वा 'प्रत्यये भाषायां नित्यम्' इति नित्येऽनुनासिकणकारे षण्णाम् इति सिद्धम् ।

षट्त्सु । षष्शब्दात्सुप्यनुबन्धलोपे 'स्वादिषु' इति पदत्वात् षस्य जश्त्वेन डकारे 'डः सि धुट्' इति पाक्षिके धुडागमेऽनुबन्धलोपे 'खरि च' इति चर्त्वेन धकारस्य तकारे डकारस्य टकारे च कृते चर्त्वस्यासिद्धत्वात् टतयोः ठकारथकाराभावे षट्त्सु षट्सु इति रूपद्वयं सिद्धम् ।

र्वोरुपधाया । अत्र 'सिपि धातो रुर्वा' इत्यतो धातोरित्यनुवर्तते । र्वोरिति तद्विशेषणम्, तदन्तविधिः । पदस्येत्यधिक्रियते । झलां जशोऽन्ते' इत्यतः अन्ते इत्यनुवर्तते ।

पिपठीः । पिपठिष्शब्दात्सौ हल्ङ्यादिलोपे रुत्वम्प्रति षत्वस्यासिद्धत्वात् 'ससजुषो रुः' इति रुत्वे 'र्वोरुपधाया दीर्घ इकः' इति दीर्घे विसर्गे पिपठीः इति सिद्धम् ।

पिपठीर्भ्याम् । पिपठिष्शब्दाद्भ्यामि विभक्तौ रुत्वम्प्रति षत्वस्यासिद्धत्वात् 'ससजुषो रुः' इति रुत्वे 'स्वादिषु' इति पदत्वात् 'र्वोरुपधाया दीर्घ इकः' इति दीर्घे पिपठीर्भ्यामिति साधु ।

नुम्विसर्जनीयशर्व्यवायेऽपि । अत्र 'इण्कोः' इत्यधिक्रियते । अपदान्तस्य मूर्धन्यः, इत्यतो मूर्धन्य इत्यनुवर्तते । 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते ।

पिपठीःषु । पिपठिष्शब्दात्सुप्यनुबन्धलोपे रुत्वम्प्रति षत्वस्या-

सिद्धत्वात् 'ससजुषोरुः' इति रुत्वे 'र्वोरुपधाया दीर्घ इकः' इति दीर्घे विसर्गे 'वा शरि' इति पाक्षिके विसर्गस्य विसर्गे 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति सस्य षत्वे पिपठीःषु इति, विसर्गस्य विसर्गाभावपक्षे 'विसर्जनियस्य सः' इति विसर्गस्य सकारे 'नुम्विसर्जनीयशर्व्यवायऽपि, इति विभक्तिसकारस्य षत्वे पूर्वसकारस्य ष्टुत्वे पिपठीष्षु इति च सिद्धम् ॥

पिपठीः, पिपठिषौ, पिपठिषः । पिपठिषम्, पिपठिषौ, पिपठिषः । पिपठिषा, पिपठीर्भ्याम्, पिपठीर्भिः । पिपठिषे, पिपठीर्भ्याम्, पिपठीर्भ्यः पिपठिषः, पिपठीर्भ्याम, पिपठीर्भ्यः । पिपठिषः, पिपठिषोः, पिपठिषाम् । पिपठिषि, पिपठिषोः, पिपठीःषु-पिपठीष्षु । हे पिपठीः, हे पिपठिषौ, हे पिपठिषः ।

चिकीः । चिकीर्ष्शब्दात्सौ 'हल्ङ्याब्भ्यः' इत्यादिना सुलोपे षत्वस्यासिद्धत्वात् 'रात्सस्य' इति सलोपे रेफस्य विसर्गे चिकीः इति सिद्धम् ।

चिकीर्भ्याम् । चिकीर्ष्शब्दाद्भ्यामि षत्वस्यासिद्धत्वात् 'स्वादिष्वसर्पनामस्थाने' इति पदत्वेन सकारस्य 'रात्सस्य' इति लोपे चिकीर्भ्याम इति सिद्धम् ।

चिकीर्षु । चिकीर्ष्शब्दात्सुप्यनुबन्धलोपे 'स्वादिषु' इति पदत्वेन षत्वस्यासिद्धत्वात्सकारस्य 'रात्सस्य' इतिलोपे 'रोःसुपि' इति नियमाद् रेफस्य विसर्गाभावे 'आदेशप्रत्यययोः' इति षत्वे 'शरोऽचि' इति द्वित्वनिषेधे चिकीर्षु इति सिद्धम् ।

विद्वान् । विद्वस्शब्दात्सावनुबन्धलोपे 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुम्यनुबन्धलोपे 'सान्तमहतः संयोगस्य' इति दीर्घे हल्ङ्यादिलोपे सस्य संयोगान्तलोपे तस्यासिद्धत्वान्नलोपाभावे विद्वान् इति सिद्धम्

विद्वांसौ । विद्वस्शब्दाद् औविभक्तौ 'उगिदचां सर्वनामस्थाने-

वसोःसम्प्रसारणम् ६।४।१३१॥ वस्वन्तस्य भस्य सम्प्रसारणं स्यात्। विदुषः । वसुस्रंस्विति दः । विद्वद्भ्याम् ॥ **पुंसोऽसुङ् ७।१।८९ ॥** सर्वनामस्थाने विवक्षितेपुंसोऽसुङ्स्यात्। पुमान् । हे पुमन्। पुमांसौ । पुंसः।

ऽधातोः' इति नुम्यनुबन्धलोपे 'सान्तमहतः संयोगस्य' इतिदीर्घे 'नश्चापदान्तस्य झलि' इत्यनुस्वारे विद्वांसौ इति सिद्धम् ।

वसोः सम्प्रसारणम् । भस्येत्यधिक्रियते । प्रत्ययग्रहणपरिभाषया वसोरिति तदन्तग्रहणाम् ।

विदुषः । विद्वस्शब्दाच्छस्यनुबन्धलोपे भसंज्ञायां 'वसोः सम्प्रसारणम्' इति सम्प्रसारणे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'आदेशप्रत्ययोः' इति सस्य षत्वे रुत्वे विसर्गे च कृते विदुषः इति सिद्धम् ।

विद्वद्भ्याम् । विद्वस्शब्दाद्भ्यामि 'वसुस्रंसुध्वंस्वनडुहां दः' इति सकारस्य दकारे विद्वद्भ्यामिति सिद्धम् ।

विद्वान्, विद्वांसौ, विद्वांसः । विद्वांसम्, विद्वांसौ, विदुषः । विदुषा, विद्वद्भ्याम्, विद्वद्भिः । विदुषे, विद्वद्भ्याम्, विद्वद्भ्यः । विदुषः, विद्वद्भ्याम्, विद्वद्भ्यः । विदुषः, विदुषोः, विदुषाम् । विदुषि, विदुषोः, विद्वत्सु । हे विद्वन्, हे विद्वांसौ, हे विद्वांसः ।

पुंसोऽसुङ् । अत्र 'इतोऽत्सर्वनामस्थाने' इत्यतः सर्वनामस्थाने इत्यनुवर्तते । विवक्षित इत्यध्याह्रियते ।

पुमान् । पुंस्शब्दात्सौ विवक्षिते 'पुंसोऽसुङ्' इति ङित्वात्सकारस्य असुङादेशेऽनुबन्धलोपे 'निमित्तापाये नैमित्तिकस्याप्यपाय' इति न्यायेनानुस्वारनिवृत्तौ ततः सौ 'उगिदचां सर्वनामस्थानेऽधातोः इति नुम्यनुबन्धलोपे 'सान्तमहतः संयोगस्य' इति दीर्घे सुलोपे संयोगान्तलोपे तस्यासिद्धत्वान्नलोपाभावे पुमान् इति सिद्धम् ।

हे पुमन् । पुंस्शब्दात्सम्बोधने सौ विवक्षिते 'पुंसोऽसुङ्' इति सस्यासुङादेशेऽनुबन्धलोपे अनुस्वारनिवृत्तौ सौ 'उगिदचाम्' इति नुम्यनु-

पुम्भ्याम् । पुंसु ॥ ऋदुशनेत्यनङ् । उशना । उशनसौ । (अस्य संबुद्धौ वानङ्, नलोपश्च वा वाच्यः) । हे उशन, हे उशनन् हे उशनः । हे उशनसौ ।

वन्धलोपे सान्तमहत इति सूत्रेऽसम्वुद्धावित्युक्तेर्दीर्घाभावे सुलोपे संयोगान्तलोपे हे पुमन् इति सिद्धम् ।

पुमांसौ । पुंस्शव्दाद् औविभक्तौ विवक्षितायां 'पुंसोऽसुङ्' इति सकारस्यासुङादेशेऽनुवन्धलोपेऽनुस्वारनिवृत्तौ औविभक्तौ 'उगिद्चाम्' इति नुम्यनुवन्धलोपे 'सान्तमहतः संयोगस्य' इतिदीर्घे 'नश्चापदान्तस्य झलि' इत्यनुस्वारे पुमांसौ इति सिद्धम् ।

पुम्भ्याम् । पुंस्शव्दाद्भ्यामि विभक्तौ सस्य संयोगान्तलोपे निमित्तापायादनुस्वारनिवृत्तौ भकारमादाय पुनरनुस्वारे परसवर्णे पुम्भ्याम् इति सिद्धम् ।

पुमान्, पुमांसौ, पुमांसः । पुमांसम्, पुमांसौ, पुंसः । पुंसा, पुम्भ्याम्, पुम्भिः । पुंसे, पुम्भ्याम्, पुम्भ्यः । पुंसः, पुम्भ्याम्, पुम्भ्यः । पुंसः, पुंसोः, पुंसाम् । पुंसि, पुंसोः, पुंसु । हे पुमन्, हे पुमांसौ, हे पुमांसः ।

उशना । उशनस् शव्दात्सावनुवन्धलोपे 'ऋदुशनस्पुरुदंसोऽनेहसां च' इति ङित्त्वात्सकारस्यानङादेशेऽनुवन्धलोपे 'सर्वनामस्थाने चासम्वुद्धौ' इति दीर्घे 'हल्ङ्याव्भ्य' इत्यादिना सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे उशना इति सिद्धम् ।

हे उशन । उशनस्शव्दात्सम्वोधने सावनुवन्धलोपे 'अस्य सम्वुद्धौ वाऽनङ् नलोपश्च वा वाच्यः' इति पाक्षिकेऽनङादेशेऽनुवन्धलोपे पाक्षिके नलोपे च कृते ततः सुलोपे हे उशन इति, नलोपाभावपक्षे हे उशनन् इति, अनङभावपक्षे सुलोपे रुत्वे विसर्गे हे उशनः इति च सिद्धम् ।

उशनोभ्याम् । उशनस्सु ॥ अनेहा । अनेहसौ । हे अनेहः ॥ वेधाः । वेधसौ । हे वेधः । वेधोभ्याम् ॥ **अदस औ सुलोपश्च ७।२।१०७॥** अदस औत्स्यात्सौ परे सुलोपश्च । तदोरिति सः । असौ । त्यदाद्यत्वम् । पररूपत्वम् । वृद्धिः । **अदसोऽसेर्दादु दो मः ८।२।८०** ॥ अदसोऽ

उशनोभ्याम् । उशनस्शब्दाद्भ्यामि पदत्वात्सस्य रुत्वे 'हशि च' इत्युत्वे गुणे उशनोभ्यामिति सिद्धम् ।

उशना, उशनसौ, उशनसः । उशनसम्, उशनसौ, उशनसः । उशनसा, उशनोभ्याम्, उशनोभिः । उशनसे, उशनोभ्याम्, उशनोभ्यः । उशनसः, उशनोभ्याम्, उशनोभ्यः । उशनसः, उशनसोः, उशनसाम् । उशनसि, उशनसोः, उशनःसु-उशनस्सु । हे उशन-हे उशनन्-हे उशनः, हे उशनसौ, हे उशनसः ।

अनेहा । अनेहस्शब्दात्सावनुबन्धलोपे 'ऋदुशनस्पुरुदंसोऽनेहसां च' इत्यनङादेशेऽनुबन्धलोपे उपधादीर्घे सुलोपे नलोपे अनेहा इति सिद्धम् ।

हे अनेहः । अनेहस्शब्दात्सम्बोधनेसावनुबन्धलोपे 'अत्वसन्तस्य चाधातोः' इत्यत्र असम्बुद्धावित्यस्यानुवृत्त्या दीर्घाभावे सुलोपे रुत्वे विसर्गे हे अनेहः इति सिद्धम् । शेषरूपाणि उशनश्शब्दवज्ज्ञेयानि ।

वेधाः । वेधस्शब्दात्सावनुबन्धलोपे 'अत्वसन्तस्य चाधातोः' इति दीर्घे सुलोपे रुत्वे विसर्गे वेधाः इति सिद्धम् । शेषमनेहस्शब्दवदेव ।

अदस औ । अत्र 'तदोः सः सावनन्त्ययोः' इत्यतः सावित्यनुवर्तते ।

असौ । अदस्शब्दात्सावनुबन्धलोपे 'अदस औ सुलोपश्च' इति सस्यौत्वे सुलोपे च कृते वृद्धौ 'तदोः सः सावनन्त्ययोः' इति दकारस्य सकारे असौ इति सिद्धम् ।

अदसोऽसेः । अत्र अदसः असेः दात् उ दः मः इति च्छेदः ।

सान्तस्य दात्परस्य उदूतौस्तो दस्य मश्च । आन्तरतम्याद्ध्रस्वस्य उः, दीर्घस्य ऊः । अमू । जसः शी । गुणः । **एतईद्बहुवचने ८।२।८१** ॥ अदसो दात्परस्यैत ईद्दस्य च मो बह्वर्थोक्तौ । अमी । पूर्वत्रासिद्धमिति विभक्तिकार्यं प्राक् पश्चादुत्वमत्वे । अमुम् । अमू । अमून् । मुत्वे कृते घिसंज्ञायां नाभावः ॥ **न मु ने ८।२।३** ॥ नाभावे कर्तव्ये कृते च मुभावो

उश्च ऊश्च अनयोः समाहारः उ इति विग्रहः ।

अमू । अदस्शब्दाद् औविभक्तौ 'त्यदादीनामः' इति अकारेऽन्तादेशे 'अतोगुणे' इति पररूपे 'पूर्वत्रासिद्धम्' इति मुत्वस्यासिद्धत्वात्पूर्वं वृद्धौ ततः 'अदसोऽसेर्दादुदो मः' इति आन्तरतम्यादौकारस्य ऊकारे दकारस्य मकारे च कृते अमू इति सिद्धम् ।

एतईद्बहुवचने । अत्र 'अदसोऽसेर्दादुदोमः' इत्यस्मात् अदसोदादिति दोम इति चानुवर्तते ।

अमी । अदस्शब्दाज्जसि त्यदाद्यत्वे पररूपत्वे 'जसः शी' इति जसः श्यादेशेऽनुबन्धलोपे गुणे 'एतईद्बहुवचने' इति एकारस्य ईकारे दस्यमकारे च कृते अमी इति सिद्धम् ।

अमुम् । अदस्शब्दादम्विभक्तौ त्यदाद्यत्वे पररूपत्वे 'अमि पूर्वः' इति पूर्वरूपे ततः 'अदसोऽसेर्दादु दोमः' इति मुत्वे अमुमिति सिद्धम् ।

अमून् । अदस्शब्दाच्छस्यनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे पूर्वसवर्णदीर्घे सस्य नत्वे 'अदसोऽसेर्दादु दोमः' इति आन्तरतम्याद्दीर्घोकारस्य ऊकारे दस्य मत्वे अमून् इति सिद्धम् ।

न मुने । अत्र 'पूर्वत्रासिद्धम्' इत्यतः असिद्धमित्यनुवर्तते । ने इति विषयसप्तम्यन्तमत आह—नाभावे कर्तव्य इति । ने इत्यत्र सत्सप्तमी चेत्यत आह—कृते चेति ।

नासिद्धः । अमुना । अमूभ्याम् ३ । अमीभिः । अमुष्मै । अमीभ्यः २ ।
अमुष्मात् । अमुष्य । अमुयोः २ । अमीषाम् । अमुष्मिन् । अमीषु ॥

इति हलन्तपुँल्लिङ्गाः ॥

अमुना । अदस्शब्दात् टाविभक्तावनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे ‘ अदसोऽसेर्दादुदोमः ’ इति मुत्वे अमु आ इति स्थिते ’ ‘पूर्वत्रासिद्धम् ’ इति मुत्वस्यासिद्धत्वे प्राप्ते ‘ न मु ने ’ इति तन्निषेधे ‘ शेषो घ्यसखि ’ इति घिसंज्ञायाम् ‘ आङो नाऽस्त्रियाम् ’ इति नाभावे अमुना इति सिद्धम् । नाभावे कृते मुत्वस्यासिद्धत्वात् ‘ सुपि च ’ इति दीर्घस्तु न भवति नाभावे कृतेऽपि ‘ न मु ने ’ इति सूत्रेण मुत्वस्यासिद्धत्वनिषेधादिति शम् ।

अमूभ्याम् । अदस्शब्दाद्भ्यामि विभक्तौ त्यदाद्यत्वे पररूपत्वे ‘ सुपि च ’ इति दीर्घे ‘ अदसोऽसेर्दादु दो मः ’ इति आकारस्य ऊकारे दस्य मत्वे च अमूभ्यामिति सिद्धम् ।

अमीभिः । अदस्शब्दाद् भिसि त्यदाद्यत्वे पररूपत्वे ‘अतो भिस ऐस् ’ इति भिस ऐसादेशे प्राप्ते ‘नेदमदसोरकोः ’ इति तन्निषेधे ‘ बहुवचने झल्येत् ’ इत्येत्वे ‘ एत ईद् बहुवचने ’ इति एकारस्य ईकारे दस्य मत्वे च कृते रुत्वे विसर्गे अमीभिरिति सिद्धम् ।

अमुष्मै । अदस्शब्दान्ङेविभक्तावनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे ‘ सर्वनाम्नः स्मै ’ इति स्मै आदेशे ‘ अदसोऽसेर्दादु दो मः ’ इति मुत्वे षत्वे अमुष्मै इति सिद्धम् ।

अमुष्मात् । अदस्शब्दान्ङसि विभक्तावनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे ‘ङसिङ्योः स्मात्स्मिनौ’ इति स्मादादेशे मुत्वे षत्वे च’ अमुष्मादिति साधु ।

अमुष्य । अदस्शब्दान्ङस्विभक्तावनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे ‘टाङसिङसामिनात्स्याः’ इति ङसः स्यादेशे मुत्वे षत्वे अमुष्येति सिद्धम् ।

नहो धः ८।२।३४॥ नहो हस्य धः स्यात् झलि पदान्ते च ॥

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ६।३।११६॥ एषु क्विबन्तेषु पूर्वपदस्य दीर्घः । उपानत्, उपानद् । उपानहौ । उपानत्सु ॥

अमुयोः । अदस्शब्दादोसि त्यदाद्यत्वे पररूपत्वे 'ओसि च' इत्येत्वे अयादेशे 'अदसोऽसेर्दादु दो मः' इति मुत्वे रुत्वे विसर्गे अमुयोः इति सिद्धम् ।

अमीषाम् । अदस्शब्दादामि त्यदाद्यत्वे पररूपत्वे 'आमि सर्वनाम्नः सुट्' इति सुडागमेऽनुबन्धलोपे 'वहुवचने झल्येत्' इति एत्वे षत्वे 'एत ईद्वहुवचने' इति एकारस्य ईकारे दस्य मत्वे अमीषाम् इति सिद्धम् ।

असौ, अमू, अमी । अमुम्, अमू, अमून् । अमुना, अमूभ्याम्, अमीभिः । अमुष्मै, अमूभ्याम्, अमीभ्यः । अमुष्मात्-अमुष्माद्, अमूभ्याम्, अमीभ्यः । अमुष्य, अमुयोः, अमीषाम् । अमुष्मिन्, अमुयोः, अमीषु ।

॥ इति हलन्तपुंल्लिङ्गाः ॥

* * *

नहो धः । अत्र 'हो ढः' इत्यतो ह इति 'झलो झलि' इत्यतो झलीति 'स्कोः संयोगाद्योरन्ते च' इत्यतः, अन्ते इति चानुवर्तते । पदस्येत्यधिक्रियते ।

नहिवृति । अत्र 'ढ्लोपे पूर्वस्य दीर्घोऽणः' इत्यतः पूर्वस्य दीर्घोऽण इत्यनुवर्तते ।

उपानत् । उपपूर्वाद् नहधातोः सम्पदादित्वात् क्विपि 'नहिवृति वृषिव्यधिरुचिसहितनिषु क्वौ' इति पूर्वपदस्य दीर्घे क्विपो लोपे निष्पन्नाद् उपानह्शब्दात्प्रातिपदिकत्वेन सौ तल्लोपे 'हो ढः' इति प्राप्तं ढत्वम्प्रबाध्य 'नहो धः' इति हस्य धत्वे जश्त्वे 'वावसाने' इति पाक्षिके चर्त्वे उपानत् उपानद् इति सिद्धम् ।

क्विन्नन्तत्वात् कुत्वेन घः । उष्णिक्, उष्णिग् । उष्णिहौ । उष्णिग्भ्याम् ॥ द्यौः । दिवौ । दिवः । द्युभ्याम् ॥ गीः । गिरौ । गिरः ॥ एवं पूः ॥ चतस्रः । चतसृणाम् ॥ का । के । काः । सर्वावत् ॥ यः सौ

उपानद्भ्याम् । उपानह्शब्दाद्भ्यामि 'नहो धः' इति हस्य धकारे जश्त्वे उपानद्भ्यामिति सिद्धम् । रूपं त्वस्य सुगमत्वादुपेक्ष्यते ।

उष्णिक् । उत्पूर्वात् स्निह्धातोः 'ऋत्विग्' इत्यादिना क्विन्प्रत्यये निपातनाद् उदो दकारस्य लोपे क्विनो लोपे षत्वे णत्वे कृदन्तत्वात्प्रातिपदिकत्वेन सौ तल्लोपे 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन हकारस्य घकारे जश्त्वे चर्त्वे उष्णिक्-उष्णिग् इति रूपद्वयं सिद्धम् ।

द्यौः । दिव्शब्दात्सौ 'दिव औत्' इति वकारस्य औकारे यणि हल्न्तात्परत्वाभावेन सुलोपाभावे रुत्वे विसर्गे द्यौः इति सिद्धम् ।

द्युभ्याम् । दिव्शब्दाद् भ्यामि विभक्तौ 'दिव उत्' इति उकारेऽन्तादेशे यणि द्युभ्यामिति सिद्धम् । सुदिव्शब्दवदेवास्य रूपम् ।

गीः । गिर्शब्दात्सौ तस्य लोपे 'र्वोरुपधाया दीर्घ इकः' इति दीर्घे 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे गीः इति साधुः ।

चतस्रः । चतुर् शब्दाज्जसि विभक्तावनुबन्धलोपे 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति चतसृआदेशे 'जसि च' इति प्राप्तगुणम्प्रबाध्य 'अचि र ऋतः' इति ऋकारस्य रेफादेशे रुत्वे विसर्गे चतस्रः इति सिद्धम् ।

चतसृणाम् । चतुर्शब्दादामि 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति चतसृआदेशे नुडागमेऽनुबन्धलोपे 'न तिसृचतसृ' इति दीर्घनिषेधे णत्वे चतसृणामिति सिद्धम् ।

का । किम् शब्दात्सौ 'किमः कः' इति कादेशे टाप्यनुबन्धलोपे दीर्घे सुलोपे का इति सिद्धम् । सर्वाशब्दवदस्य रूपम् ।

यः सौः । अत्र 'इदमो मः' इत्यत इदम इति 'दश्च' इत्यतो द इति चानुवर्तते ।

७।२।११०॥ इदमो दस्य यः स्यात् सौ। इयम्। त्यदाद्यत्वम्। पररूपत्वम्। टाप्। दश्चेति मः। इमे। इमाः। इमाम्। अनया। हलि लोपः। आभ्याम्। आभिः। अस्यै। अस्याः। अनयोः। आसाम्। अस्याम्। आसु॥ त्यदाद्यत्वम्। टाप्। स्या। त्ये। त्याः॥ एवं तद्, एतद्॥

इयम्। इदम् शब्दात्सौ त्यदाद्यत्वम्प्रबाध्य 'इदमो मः' इति मकारस्य मकारे कृते 'यः सौ' इति दस्य यकारे सुलोपे इयम इति सिद्धम्।

आभ्याम्। इदम् शब्दाद्भ्यामि त्यदाद्यत्वे पररूपत्वे टाप्यनुबन्धलोपे दीर्घे 'हलि लोपः' इति इदो लोपे आभ्यामिति सिद्धम्।

अस्यै। इदम् शब्दान्ङेविभक्तावनुबन्धलोपे त्यदाद्यत्वे पररूपत्वं टाप्प्रत्ययेऽनुबन्धलोपे दीर्घे 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याटि आपो ह्रस्वे वृद्धौ 'हलि लोपः' इति इदो लोपे अस्यै इति सिद्धम्।

अनयोः। इदम् शब्दादोसि विभक्तावनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे टापि दीर्घे 'आङि चापः' इत्येत्वे अयादेशे 'अनाप्यकः' इति इदः अनादेशे रुत्व विसर्गे अनयोरिति सिद्धम्।

आसाम्। इदम्शब्दादामि अत्वे पररूपे टापि दीर्घे 'आमि सर्वनाम्नः सुट्' इति सुट्यनुबन्धलोपे 'हलि लोपः' इति इदो लोपे आसाम् इति।

अस्याम्। इदमो ङौ अत्वे पररूपे टापि दीर्घे 'ङेराम्नद्याम्नीभ्यः' ङेरामि 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याटि ह्रस्वे इदो लोपे दीर्घे अस्यामिति।

आसु। इदमः सुपि अत्वे पररूपे टापि दीर्घे इदो लोपे आसु इति।

इयम्, इमे, इमाः। इमाम्, इमे, इमाः। अनया, आभ्याम्, आभिः। अस्यै, आभ्याम्, आभ्यः। अस्याः, आभ्याम्, आभ्यः। अस्याः, अनयोः, आसाम्। अस्याम्, अनयोः, आसु।

स्याः। त्यद्शब्दात्सौ त्यदाद्यत्वे पररूपत्वे टाप्यनुबन्धलोपे दीर्घे

वाक्, वाग् । वाचौ । वाग्भ्याम् । वाक्षु ॥ अप्शब्दो नित्यं बहुवचनान्तः । अप्तृन्निति दीर्घः । आपः । अपः ॥ **अपो भि ७।४।४८ ॥** अपस्तकारो भादौ प्रत्यये । अद्भिः । अद्भ्यः । अद्भ्यः । अपाम् । अप्सु ॥ दिक्, दिग् । दिशौ । दिशः । दिग्भ्याम् । त्यदादिष्विति दृशेः क्विन्विधानादन्यत्रापि कुत्वम् । दृक्, दृग् । दृशौ । दृग्भ्याम् । त्विट्, त्विड् । त्विषौ । त्विड्भ्याम् ॥ ससजुषोरुरिति रुत्वम् । सजूः । सजुषौ । सजूर्भ्याम् ॥ आशीः । आशिषौ । आशीर्भ्याम् ॥ असौ । उत्वमत्वे ।

'तदोः सः सावनन्त्ययोः' इति तकारस्य सकारे सुलोपे स्या इति सिद्धम् । सर्वावद्रूपं ज्ञेयम् ।

आपः । अप्शब्दाज्जस्यनुबन्धलोपे 'अप्तृन्' इति दीर्घे रुत्वे विसर्गे आपः इति ।

अपोभिः । 'अच उपसर्गात्तः' इत्यतः त इत्यनुवर्तते । अस्य अङ्गाधिकारस्थत्वेन प्रत्ययस्याक्षेपः । तदादिविधिः ।

अद्भिः । अप् शब्दाद्भिसि 'अपोभि' इति पस्य तकारे जश्त्वे रुत्वे विसर्गे अद्भिरिति ।

दिक् । दिश् धातोः 'ऋत्विग्' इत्यादिना क्विन्प्रत्यये तस्य लोपे प्रातिपदिकत्वात् सौ 'हल्ङ्याब्भ्य' इत्यादिना तस्य लोपे 'व्रश्च' इत्यादिना षत्वे तस्य जश्त्वेन डकारे तस्य 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन गकारे चर्त्वे दिक्-दिग् इति रूपद्वयं निष्पन्नम् ।

दृक् । दृश्शब्दात्सौ तस्य लोपे 'व्रश्च' इत्यादिना शस्य षत्वे तस्य जश्त्वेन डकारे 'त्यदादिषु दृशोऽनालोचने कञ्च' इति दृशेः क्विनो विधानात् अत्र क्विनोऽभावेऽपि डकारस्य 'क्विन्प्रत्ययस्य कुः' इत्यनेन क्विन्प्रत्ययो यस्माद् दृष्टस्तस्य कवर्गोऽन्तादेशः स्यादित्यर्थकेन कुत्वेन गकारे चर्त्वे दृक्–दृग् इति रूपद्वयं सिद्धम् ।

सजूः । सजुष्शब्दात्सौ तस्य लोपे 'ससजुषो रुः' इति रुत्वे 'र्वोरुपधाया दीर्घ इकः' इत्युपधादीर्घे विसर्गे सजूः इति ।

आशीः । आशिष् शब्दात्सौ तस्य लोपे षत्वस्यासिद्धत्वात् ।

अमू । अमूः । अमुया । अमूभ्याम् ३ । अमूभिः । अमुष्यै । अमूभ्यः २ । अमुष्याः । अमुयोः । अमूषाम् । अमुष्याम् अमूषु ॥

इति हलन्तस्त्रीलिङ्गाः ॥

'ससजुषो रुः' इति रुत्वे 'र्वोरुपधाया दीर्घ इकः' इति दीर्घे विसर्गे आशीः इति ।

अमू । अदस्शव्दाद् औविभक्तौ त्यदाद्यत्वे पररूपत्वे टापि दीर्घे 'औङ आपः' इत्याङः श्यादेशेऽनुवन्धलोपे गुणे 'अदसोऽसेर्दादु दोमः' इति मुत्वे अमू इति सिद्धम् ।

अमूः । अदस्शव्दाज्जस्यनुवन्धलोपे त्यदाद्यत्वे पररूपत्वे टापि दीर्घे मुत्वे रुत्वे विसर्गे अमूः इति ।

अमुया । अदस्शव्दात् टाविभक्तौ त्यदाद्यत्वे पररूपत्वे टापि दीर्घे 'आङि चापः' इति एत्वे अयादेशे मुत्वे अमुया इति ।

अमूभ्याम् । अदसो भ्यामि त्यदाद्यत्वे पररूपत्वे टापि दीर्घे मुत्वे अमूभ्यामिति ।

अमुष्यै । अदस्शव्दान्ङेविभक्तौ त्यदाद्यत्वे पररूपत्वे टापि दीर्घे 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याटि आपो ह्रस्वे वृद्धौ मुत्वे षत्वे तत्सिद्धम् ।

अमूषाम् । अदस आमि त्यदाद्यत्वे पररूपत्वे टापि दीर्घे 'आमि सर्वनाम्नः सुट्' इति सुट्यनुबन्धलोपे 'अदसोऽसेर्दादु दोमः' इति मुत्वे षत्वे अमूषाम् इति ।

असौ, अमू, अमूः । अमूम्, अमू, अमूः । अमुया, अमूभ्याम्, अमूभिः । अमुष्यै, अमूभ्याम्, अमूभ्यः । अमुष्याः, अमूभ्याम्, अमूभ्यः । अमुष्याः, अमुयोः, अमूषाम् । अमुष्याम्, अमुयोः, अमूषु ।

॥ इति हलन्ताः स्त्रीलिङ्गाः ॥

स्वमोर्लुक् । दत्वम् । स्वनडुत्, स्वनडुद् । स्वनडुही । चतुरनडुहोरित्याम् । स्वनड्वांहि । पुनस्तद्वत् । शेषं पुंवत् ॥ वाः ॥ वारी । वारि । वार्भ्याम् ॥ चत्वारि ॥ किम् । के । कानि ॥ इदम् ।

स्वनडुत् । स्वनडुह्शब्दात्सौ ‘ स्वमोर्नपुंसकात् ’ इति सोर्लुकि ‘ वसुस्रंसुध्वंस्वनडुहां दः ’ इति हकारस्य दकारे ‘वावसाने’ इति पाक्षिके चर्त्वे स्वनडुत्-स्वनडुद् इति रूपद्वयं सिद्धम् ।

स्वनड्वांहि । स्वनडुह्शब्दाज्जसि ‘ जश्शसोः शिः ’ इति जसः श्यादेशोऽनुबन्धलोपे ‘ शि सर्वनामस्थानम् ’ इति सर्वनामस्थानसंज्ञायां ‘ चतुरनडुहोरामुदात्तः ’ इति आमागमेऽनुबन्धलोपे यणि ‘ नपुंसकस्य झलचः ’ इति नुम्यनुबन्धलोपे ‘ नश्चापदान्तस्य झलि ’ इति नस्यानुस्वारे स्वनड्वांहि इति सिद्धम् ।

वाः । वार्शब्दात्सौ हल्ङ्यादिलोपात्परत्वात् ‘स्वमोर्नपुंसकात्’ इति सोर्लुकि विसर्गे वाः इति सिद्धम् ।

वारी । वार्शब्दादौ विभक्तौ ‘ नपुंसकाच्च ’ इति श्यादेशेऽनुबन्धलोपे वारी इति साधुः । अस्य रूपं सुगमत्वादुपेक्ष्यते ।

चत्वारि । चतुर्शब्दाज्जसि ‘ जश्शसोः शिः ’ इति जसः श्यादेशे ‘ शि सर्वनामस्थानम् ’ इति सर्वनामस्थानसंज्ञायां ‘ चतुरनडुहोरामुदात्तः ’ इति आम्यनुबन्धलोपे यणि झलन्तत्वाभावान्नुमोऽभावे चत्वारि इति सिद्धम् ।

किम् । किम्शब्दात्सौ परत्वात् ‘ स्वमोर्नपुंसकात् ’ इति सोर्लुकि ‘ न लुमताङ्गस्य ’ इति निषेधात्प्रत्ययलक्षणाभावेन ‘किमः कः’ इति कादेशाभावे किम् इति सिद्धम् ।

के । किम्शब्दाद् औविभक्तौ ‘ किमः कः ’ इति कादेशे ‘ नपुंसकाच्च ’ इति औङः श्यादेशेऽनुबन्धलोपे गुणे के इति सिद्धम् ।

कानि । किम्शब्दाज्जसि जसः श्यादेशेऽनुबन्धलोपे सर्वनामस्थानसंज्ञायां ‘ नपुसकस्य झलचः ’ इति नुम्यनुबन्धलोपे उपधादीर्घे कानि इति ।

इमे । इमानि ॥ (अन्वादेशे नपुंसके एनद्वक्तव्यः) । एनत् । एने । एनानि । एनेन । एनयोः ॥ अहः । विभाषा ङिश्योः । अह्नी । अहनी । अहानि ॥ **अहन् ८ । २ । ६८** ॥ अहन्नित्यस्य रुः पदान्ते । अहोभ्याम् ॥

इदम् । इदमूशब्दात्सौ परत्वात् ' स्वमोर्नपुंसकात् ' इति सोर्लुकि ' न लुमताङ्गस्य ' इति निषेधात्प्रत्ययलक्षणाभावेन इदमो मः ' इत्यादेरप्रवृत्तौ इदमिति ।

इमे । इदम औ विभक्तौ श्यादेशे त्यदाद्यत्वे पररूपत्वे 'दश्च ' इति मत्वे ' आद्गुणः ' इति गुणे इमे इति ।

इमानि । इदमो जसि श्यादेशे अत्वे पररूपे ' दश्च ' इति मत्वे ' नपुंसकस्य झलचः ' इति नुमि 'सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घे इमानि इति । शेषं पुंवदेव ।

एनत् । इदमः अमि तस्य लुकि ' अन्वादेशे नपुंसके एनद्वक्तव्य :' इति इदम एनदादेशे चर्त्वे एनत्-एनद् इति रूपद्वयं निष्पन्नम् ।

अहः । अहन्शब्दात्सौ तस्य ' स्वमोर्नपुंसकात् ' इति लुकि ' रोऽसुपि ' इति नस्य रेफादेशे रेफस्य विसर्गे अहः इति सिद्धम् ।

अह्नी । अहन्शब्दाद् औविभक्तौ श्यादेशे ' यचिभम् ' इति भसंज्ञायां ' विभाषा ङिश्योः ' इति पाक्षिके अल्लोपे अह्नी इति अल्लोपाभावपक्षे अहनी इति च सिद्धम ।

अहानि । अहन्शब्दाज्जसि तस्य श्यादेशे सर्वनामस्थानसंज्ञायां ' सर्वनामस्थाने चासम्बुद्धौ ' इति दीर्घे अहानि इति ।

अहोभ्याम् । अहन्शब्दाद् भ्यामि विभक्तौ ' स्वादिष्वसर्वनामस्थाने ' इति पदत्वात् ' अहन् ' इति नस्य रुत्वे ' हशि च ' इत्युत्वे गुणे अहोभ्यामिति ।

अहः, अह्नी अहनी, अहानि । अहः, अह्नी-अहनी, अहानि । अह्ना, अहोभ्याम, अहोभिः । अह्ने, अहोभ्याम् , अहोभ्यः । अह्नः, अहोभ्याम, अहोभ्यः । अह्नः, अहोभ्याम् , अहोभ्यः । अह्नः, अह्नोः, अह्नाम् । अह्नि-अहनि, अह्नोः, अहःसु । हे अहः, हे अह्नी-हे अहनी, हे अहानि ।

दण्डि । दण्डिनी । दण्डीनि । दण्डिना । दण्डिभ्याम् ॥ सुपथि । टेर्लोपः ॥ सुपथी । सुपन्थानि ॥ ऊर्क्, ऊर्ग् । ऊर्जी । ऊर्न्जि । नरजानां संयोगः ॥ तत् । ते । तानि ॥ यत् । ये । यानि ॥ एतत् । एते । एतानि ॥ गवाक्,

---

दण्डि । दण्डिन् शब्दात्सौ तस्य लुकि 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे दण्डि इति ।

दण्डीनि । दण्डिन्शब्दाज्जसि जसः श्यादेशेऽनुबन्धलोपे 'इन्हन्पूषार्यम्णां शौ' इति दीर्घे दण्डीनि इति ।

हे दण्डि । दण्डिन्शब्दात्सम्बोधने सौ 'सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः' इति पाक्षिके नलोपे हे दण्डि इति तदभावपक्षे हे दण्डिन् इति च सिद्ध्यति । शेषं वारिवत् आमि दण्डिनाम् इति विशेषः ।

सुपथि । सुपथिन्शब्दात्सौ तस्य लुकि नलोपे सुपथि इति ।

सुपथी । सुपथिन्शब्दाद् औ विभक्तौ औङः श्यादेशेऽनुबन्धलोपे सर्वनामस्थानत्वाभावेन 'यचि भम्' इति भसंज्ञायां 'भस्य टेर्लोपः' इति टेर्लोपे सुपथी इति ।

सुपन्थानि । सुपथिन्शब्दाज्जसि जसः श्यादेशे सर्वनामस्थानसंज्ञायां 'इतोऽत्सर्वनामस्थाने' इति इकारस्य अकारे 'थो न्थः' इति थस्य न्थादेशे 'सर्वनामस्थाने चासम्बुद्धौ' इत्युपधादीर्घे सुपन्थानि इति सिद्धम् । शेषं पुंवत् ।

ऊर्क् । ऊर्ज्शब्दात्सौ तस्य 'स्वमोर्नपुंसकात्' इति लुकि 'चोः कुः' इति जस्य कुत्वेन गकारे तस्य पाक्षिके 'वावसाने' इति चर्त्वे ऊर्क्-ऊर्ग् इति रूपद्वयम् ।

ऊर्न्जि । ऊर्ज्शब्दाज्जसि जसः श्यादेशेऽनुबन्धलोपे सर्वनामस्थानसंज्ञायां 'नपुंसकस्य झलचः' इति मित्त्वादन्त्यादचः ऊकारात्परे नुम्यनुबन्धलोपे नरजानां संयोगेन श्चुत्वाभावे ऊर्न्जि इति सिद्धम् ।

गवाक् । गोपूर्वादञ्चुधातोः 'ऋत्विग्' इत्यादिना क्विन्प्रत्यये तस्य लोपे प्रातिपदिकत्वात्सौ तस्य लुकि 'अनिदितां हल उपधायाः

गवाग् । गोची । गवाञ्चि । पुनस्तद्वत् गोचा । गवाग्भ्याम् । शकृत् ।

क्ङिति ' इति नलोपे ' अवङ् स्फोटायनस्य ' इति पाक्षिकेऽवङादेशे-दीर्घे कुत्वे जश्त्वे पाक्षिके चर्त्वे गवाक्-गवाग् इति रूपद्वयम् । अवङभावे ' सर्वत्र विभाषा गोः ' इति पाक्षिके प्रकृतिभावे गो अक्-गो अग् इति रूपद्वयम् । प्रकृतिभावाभावपक्षे ' एङः पदान्तादति ' इति पूर्वरूपे गोऽक्-गोऽग् इति रूपद्वयं च सिध्यति । पूजायां तु ' नाञ्चेः पूजायाम् ' इति निषेधात् नलोपाभावेन चस्य संयोगान्तलोपे नस्य ' क्विन्प्रत्ययस्य कुः ' इति कुत्वेन ङकारे अवङि गवाङ् प्रकृतिभावे गोअङ् पूर्वरूपे-गोऽङ् इति रूपत्रयं सिद्धयति ।

गोची । गोपूर्वादञ्चुधातो ' ऋत्विग् ' इत्यादिना क्विनि तस्य लोपे औविभक्तौ श्यादेशे गतौ ' अनिदिताम् ' इति नलोपे ' अच ' इति अकारलोपे गोची इति । पूजायां तु 'नाञ्चेः पूजायाम्' इति निषेधात् नलोपाभावे अवङ्प्रकृतिभावयोः पाक्षिकत्वेन गवाञ्ची-गोअञ्ची गोञ्ची इति रूपत्रयञ्च सिद्धयति ।

गवाक्शब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः ।
असन्ध्यवङ्पूर्वरूपैर्नवाधिकशतं मतम् ॥ १ ॥
स्वमूसुप्सु नव षड्भादौ षट्के स्युस्त्रीणि जश्शसोः ।
चत्वारि शेषे दशके रूपाणीति विभावय ॥ २ ॥

तथाहि-गवाक्-गवाग्-गोअक्-गोअग्-गोऽक् गोऽग्-गवाङ्-गोअङ्-गोऽङ्, गोची-गवाञ्ची-गोअञ्ची-गोञ्ची, गवाञ्चि-गोआञ्चि-गोञ्चि । पुनरपिगवाक्-गवाग्-गोअक्-गोअग्-गोक्-गोग्-गवाङ्-गोअङ्-गोङ्'गोची-गवाञ्ची-गोअञ्ची-गोञ्ची, गवाञ्चि-गोअञ्चि-गोञ्चि । गोचा-गवाञ्चा-गोअञ्चा-गोञ्चा, गवाग्भ्याम्-गोअग्भ्याम्-गोग्भ्याम्-गवाङ्भ्याम्-गोअङ्भ्याम्-गोङ्भ्याम्, गवाग्भिः-गोअग्भिः-गोग्भिः-गवाङ्भिः-गोअङ्भिः गोङ्भिः । गोचे-गवाञ्चे-गोअञ्चे-गोञ्चे, गवाग्भ्याम्-गोअग्भ्याम्-गोग्भ्याम्-गवाङ्भ्याम्-गोअङ्भ्याम्-गोङ्भ्याम्, गवाग्भ्यः गोअग्भ्यः-गोग्भ्यः-गवाङ्भ्यः-गोअङ्भ्यः-गोङ्भ्यः । गोचः-गवाञ्चः-गोअञ्चः-

शक्नुती । शक्नुन्ति ॥ ददत् ॥ **वा नपुंसकस्य ७।१।७९॥** अभ्यस्तात्परो यः शता तदन्तस्य क्लीबस्य वा नुम् सर्वनामस्थाने । ददन्ति, ददति ॥ तुदत् ॥ **आच्छीनद्योर्नुम् ७ । १ । ८० ॥** अवर्णान्तादङ्गात्परो यः शतुरवयवस्तदन्तस्य नुम् वा शीनद्योः । तुदन्ती, तुदती । तुदन्ति ॥ **शप्श्यनोर्नित्यम् ७ । १ । ८१ ॥** शप्श्यनोरात्परो यः शतुरव-

---

गोञ्चः, गवाऽभ्याम्-गोअग्भ्याम्-गोग्भ्याम्-गवाङ्भ्याम्-गोअङ्भ्याम्-गोङ्भ्याम्, गवाग्भ्यः-गोअग्भ्यः-गोग्भ्यः गवाङ्भ्यः-गोअङ्भ्यः गोङ्भ्यः । गोचः-गवाञ्चः-गोअञ्चः-गोञ्चः, गोचोः-गवाञ्चोः-गोअञ्चोः-गोञ्चोः, गोचाम्-गवाञ्चाम्-गोअञ्चाम्-गोञ्चाम् । गोचि गवाञ्चि-गोअञ्चि-गोञ्चि, गोचोः-गवाञ्चोः-गोअञ्चोः-गोञ्चोः, गवाक्षु-गोअक्षु-गोक्षु-गवाङ्क्षु-गोअङ्क्षु-गोङ्षु-गवाङ्षु-गोअङ्षु-गोङ्षु ।

वा नपुंसकस्य । अत्र ' नाभ्यस्ताच्छतुः ' इतिसूत्रं नरहितम ' इदितो नुम् धातोः । इत्यतो नुमिति 'उगिदचां सर्वनामस्थानेऽधातोः ' इत्यतः सर्वनामस्थाने इति चानुवर्तते ।

ददन्ति । ददत्शब्दाज्जसि जसः श्यादेशेऽनुबन्धलोपे ' वा नपुंसकस्य ' इति पाक्षिके नुम्यनुस्वारे परसवर्णे ददन्ति इति तदभावे ददति इति च सिद्धम् ।

आच्छीनद्योर्नुम् । ' नाभ्यस्ताच्छतुः ' इत्यतः शतुरिति ' वा नपुंसकस्य' इत्यतो वेति चानुवर्तते । अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणम्यते । तच्च आदित्यस्य विशेषणम् । तदन्तविधिः । परस्य इत्यध्याह्रियते । शतुरित्यनन्तरमवयवस्येत्यध्याह्रियते । तेन च अङ्गस्येतिषष्ठ्यन्तं विशेष्यते । तदन्तविधिः । अङ्गस्येति तु आवर्तते ।

तुदन्ती । तुदत्शब्दाद् औविभक्तौ औङः श्यादेशे 'आच्छीनद्योर्नुम्' इति पाक्षिके नुम्यनुबन्धलोपे तुदन्ती-तुदती इति रूपद्वयं सिद्धम् ।

शप्श्यनोर्नित्यम् । आच्छीनद्योर्नुम्, इति ' नाभ्यस्ताच्छतुः ' इत्यतः शतुरिति चानुवर्तते ।

यवस्तदन्तस्य नित्यं नुम् शीनद्योः । पचन्ती । पचन्ति ॥ दीव्यत् । दीव्यन्ती । दीव्यन्ति ॥ धनुः धनुषी । सान्तेति दीर्घः । नुम्विसर्जनीयेति षः । धनूंषि । धनुषा । धनुर्भ्याम् ॥ एवं चक्षुर्हविरादयः ॥ पयः । पयसी । पयांसि । पयसा । पयोभ्याम् ॥ सुपुम् । सुपुंसी । सुपुमांसि ॥ अदः । विभक्तिकार्यम् । उत्वमत्वे । अमू । अमूनि ॥ शेषं पुंवत् ॥

इति हलन्तनपुंसकलिङ्गाः ॥

पचन्ती । पचत्‌शब्दाद् औविभक्तौ श्यादेशे 'शप्श्यनोर्नित्यम्' इति नुम्यनुस्वारे परसवर्णे पचन्ती इति सिद्धम् ।

धनुः । धनुष्शब्दात्सौ तस्य लुकि पत्वस्यासिद्धत्वात् 'ससजुषो रुः' इति रुत्वे विसर्गे धनुः इति सिद्धम् ।

धनूंषि । धनुष्शब्दाज्जसि जसः श्यादेशे 'नपुंसकस्य झलचः' इति नुम्यनुबन्धलोपे पत्वस्यासिद्धत्वात्सान्तत्वेन 'सान्तमहतः संयोगस्य' इति दीर्घे 'नश्चापदान्तस्य झलि' इत्यनुस्वारे 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति पत्वे धनूंषि इति सिद्धम् ।

पयांसि । पयस्शब्दाज्जसि तस्य श्यादेशे नुमि सान्तेति दीर्घेऽनुस्वारे तत्सिद्धम्

अमू । अदस औविभक्तौ श्यादेशे त्यदाद्यत्वे पररूपत्वे गुणे मूत्वे तत्साधु ।

अमूनि । अदसो जसि श्यादेशे अत्वे पररूपे नुमि दीर्घे मूत्वे अमूनि इति सिद्ध्यति ।

इति हलन्तनपुंसकलिङ्गप्रकरणम् ।

स्वरादिनिपातमव्ययम् १।१।३७ ॥ स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः । स्वर् । अन्तर् । प्रातर् । पुनर् । सनुतर् । उच्चैस् । नीचैस् । शनैस् । ऋधक् । ऋते । युगपत् । आरात् । पृथक् । ह्यस् । श्वस् । दिवा । रात्रौ । सायम् । चिरम् । मनाक् । ईषत् । जोषम् । तूष्णीम् । बहिस् । अवस् । अधस् । समया । निकषा । स्वयम् । वृथा । नक्तम् । न । नञ् । हेतौ । इद्धा । अद्धा । सामि । वत्—ब्राह्मणवत्, क्षत्रियवत् । सना । सनत् । सनात् । उपधा । तिरस् । अन्तरा । अन्तरेण । ज्योक् । कम् । शम् । सहसा । विना । नाना । स्वस्ति । स्वधा । अलम् ।

स्वर् स्वर्गे परलोके च । **अन्तर्** मध्ये । **प्रातर्** प्रत्यूषे । **पुनर्** अप्रथमे, विशेषे च । **सनुतर्** अन्तर्धाने । **उच्चैस्** महति । **नीचैस्** अल्पे । **शनैस्** क्रियामान्द्ये । **ऋधक्** सत्ये । **ऋते** वर्जने । **युगपत्** एककाले । **आरात्** दूरसमीपयोः । **पृथक्** भिन्ने । **ह्यस्** अतीतेऽह्नि । **श्वस्** अनागतेऽह्नि । **दिवा** दिवसे । **रात्रौ** निशि । **सायम्** निशामुखे । **चिरम्** बहुकाले । **मनाक्-ईषत्** इदं द्वयमल्पे । **जोषम्** सुखे मौने च । **तूष्णीम्** मौने । **बहिस्-अवस्** इदं द्वयं बाह्ये । **समया** समीपे मध्ये च । **निकषा** अन्तिके । **स्वयम्** आत्मनेत्यर्थे । **वृथा** व्यर्थे । **नक्तम्** रात्रौ । **नञ्** निषेधे । 'तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ॥ अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः ॥ इत्यन्ये । **हेतौ** निमित्ते । **इद्धा** प्राकाश्ये । **अद्धा** स्फुटावधारणयोः । तत्त्वातिशययोरिति केचित् । **सामि** अर्धे जुगुप्सिते च । **वत्** सादृश्ये । उदाहरणमाह—ब्राह्मणवदिति । **सना-सनत्, सनात्** एतत्त्रयं नित्ये । **उपधा** भेदे । **तिरस्** अन्तर्धौ, तिर्यगर्थे, पराभवे च । **अन्तरा** मध्ये विनार्थे च । **अन्तरेण** वर्जने । **ज्योक्** कालभूयस्त्वे, प्रश्ने, शीघ्रार्थे, सम्प्रति इत्यर्थे च । **कम्** वारिमूर्धनिन्दासुखेषु । **शम्** सुखे । **सहसा** आकस्मिकाविमर्शयोः ।

वषट् । श्रौषट् । वौषट् । अन्यत् । अस्ति । उपांशु । क्षमा । विहायसा । दोषा । मृषा । मिथ्या । मुधा । पुरा । मिथो । मिथस् । प्रायस् । मुहुस् । प्रवाहुकम् । प्रवाहिका । आर्यहलम् । अभीक्ष्णम् ॥ साकम् । सार्धम् । नमस् । हिरुक् । धिक् । अथ । अम् । आम् । प्रताम् । प्रशान् । प्रतान् । मा । माङ् ॥ आकृतिगणोयम् ॥

विना वर्जने । **नाना** अनेकविनार्थयोः । **स्वस्ति** मङ्गले । **स्वधा** पितृहविर्दाने । **अलम्** भूषणपर्याप्तिशक्तिवारणनिषेधेषु । **वषट्, वौषट्, श्रौषट्** एतत्त्रयं देवहविर्दाने । **अन्यत्** अन्यार्थे । **अस्ति** सत्तायाम् । **उपांशु** अप्रकाशोच्चारणे रहस्ये च । **क्षमा** क्षान्तौ । **विहायसा** आकाशे । **दोषा** रात्रौ । **मृषा, मिथ्या** इदं द्वयं वितथे । **मुधा** व्यर्थे । **पुरा** अविरते, चिरातीते, भविष्यदासन्ने च । **मिथो, मिथस्** इदं द्वयं रहसि सहार्थे च । **प्रायस्** वाहुल्ये । **मुहुस्** पुनरर्थे । **प्रवाहुकम्** समकाले ऊर्ध्वार्थे च । **प्रवाहिका** इति पाठान्तरम् । **आर्यहलम्** वलात्कारे । **अभीक्ष्णम्** पौनःपुन्ये । **साकम् सार्धम्** इदं द्वयं सहार्थे । **नमस्** नतौ । **हिरुक्** वर्जने । **धिक्** निन्दाभर्त्सनयोः । **अम्** शैघ्र्ये अल्पे च । **आम्** अङ्गीकारे । **प्रताम्** ग्लानौ । **प्रशान्** समानार्थे । प्रशान् इति नान्तपाठोऽसाम्प्रदायिकः इति शेखरकृतः । कैयटोपाध्यायास्तु—नत्वस्यासिद्धत्वादव्यत्वं स्यादिति वदन्तो नान्तपाठमभिप्रयन्ति । **प्रतान्** विस्तारे । **मा, माङ्** एतौ निषेधे ।

आकृतिगणोयमिति । तेन अन्येऽप्येवं जातीयकाः स्वरादिगणे ज्ञेयाः । तथाहि—**कामम्** स्वाच्छन्द्ये । **प्रकामम्** अतिशये । **भूयस्** पुनरर्थे । **साम्प्रतम्** न्याय्ये । **परम्** किन्त्वर्थे । **साक्षात्** प्रत्यक्षे । **साचि** तिर्यगर्थे । **सत्यम्** अर्धाङ्गी कारे । **मङ्क्षु, आशु** इदं द्वयं शैघ्र्ये । **सम्वत्** वर्षे । **अवश्यम्** निश्चये । **सपदि** शैघ्र्ये । **वलवत्** अतिशये । **प्रादुस् आविस्** इदं द्वयं प्रकाशे । **अनिशम्, नित्यम्,**

च । वा । ह । अह । एव । एवम् । नूनम् । शश्वत् । युगपत् । भूयस् ।
कूपत् । सूपत् । कुवित् । नेत् । चेत् । चण् । यत्र । कच्चित् । नह् । हन्त ।
माकिः । माकिम् । नकिम् । नकिः । माङ् । नञ् । यावत् । तावत् । त्वै ।
न्वै । द्वै । रै । श्रौषट् । वौषट् । स्वाहा । स्वधा । वषट् । तुम् ।

सदा, अजस्रम्, सन्ततम् एतत्पञ्चकं सातत्ये । उषा रात्रौ । रोदसी द्यावापृथिव्यर्थे । ओम् अङ्गीकारे ब्रह्मणि च । भूः पृथिव्याम् । भुवर् अन्तरिक्षे । झगिति झटिति द्राक् तरसा इति शैघ्र्ये । सुष्ठु प्रशंसायाम् । दुष्ठु निकृष्टे । सु पूजायाम् । अह आश्चर्ये । कु कुत्सिते ईषदर्थे च । अञ्जसा तत्त्वे शीघ्रार्थे च । मिथु द्वावित्यर्थे । अस्तम् विनाशे । स्थाने युक्तार्थे । ताजक् शैघ्र्ये । चिराय, चिररात्राय, चिरस्य, चिरम्, चिरेण, चिरात् इति षट्कं चिरार्थकम् । वरम् ईषदुत्कर्षे । आनुषक् आनुपूर्व्ये । अनुषक् अनुमाने । अम्नस् शीघ्रसाम्प्रतिकयोः । सुदि शुक्ल पक्षे । वदि कृष्णपक्षे । इत्यादि । इति स्वरादयः ।

च समुच्चयान्वाचयेतरेतरयोगसमाहारेषु । वा विकल्पादिषु । ह प्रसिद्धे । अह अद्भुते खेदे च । एव अवधारणे अनवक्लृप्तौ च । एवम् उक्तपरामर्शे । नूनम् निश्चये तर्के च । शश्वत् पौनःपुन्ये सहार्थे नित्ये च । युगपत् एककाले । भूयस् पुनरर्थे आधिक्ये च । कूपत् प्रश्ने प्रशंसायां च । कुवित् भूर्यर्थे प्रशंसायां च । नेत् शङ्कायाम् प्रतिषेधविचारसमुच्चयेषु च । चेत् यद्यर्थे । चण् अयं चेदर्थे णित् । कच्चित् प्रश्ने । यत्र अनवक्लृप्त्यमर्षगर्हाश्चर्येषु । नह प्रत्यारम्भे । हन्त हर्षे विषादे अनुकम्पायां वाक्यारम्भे च । माकिः माकिम्, नकिः इदं त्रयं वर्जने । माङ् नञौ स्वरादिषूक्तौ । यावत्-तावत् इदं द्वयं साकल्यावधिमानावधारणेषु । त्व विशेषवितर्कयोः । द्वै वितर्के । न्वै इति पाठान्तरम् । रै दाने अनादरे च । श्रौषट्वौषट्स्वाहा इदं त्रयं देवहविर्दाने । स्वधा पितृदाने । तुम् तुङ्कारे । तथाहि

तथाहि । खलु । किल । अथो । अथ । सुष्ठु । स्म । आदह । (उपसर्गविभक्तिस्वरप्रतिरूपकाश्च) । अवदत्तम् । अहंयुः । अस्तिक्षीरा । अ । आ । इ । ई । उ । ऊ । ए । ऐ । ओ । औ । पशु । शुकम् । यथाकथाच । पाट् । प्याट् । अङ्ग । है । हे । भोः । अये । ह्य । त्रिषु । एकपदे । युत् । आतः ॥ चादिरप्याकृतिगणः ॥ तसि-

---

निदर्शने **खलु** निषेधवाक्यालङ्कारनिश्चयेषु । **किल** इवार्थे, वार्त्तायाम्, **अथो** अथेतिमङ्गलानन्तरारम्भप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु । **सुष्ठु** स्वरभेदार्थः पुनः पाठः । **स्म** प्रतीते पादपूरणे च । **आदह** उपक्रमहिंसाकुत्सनेषु । **उपसर्गविभक्तिस्वरप्रतिरूपकाश्च** । उपसर्गप्रतिप्रतिरूपकाः विभक्त्यन्तप्रतिरूपकाः स्वरप्रतिरूपकाश्च चादिगणे पठितव्या इत्यर्थः । तत्रोपसर्गप्रतिरूपकमुदाहरति—**अवदत्तम्** इति । अत्र अवेत्युपसर्गप्रतिरूपकम् न तूपसर्गः । ततश्च 'अच उपसर्गात्तः' इति तो न भवति । तादेशे तु अवत्तमिति स्यात् । विभक्तिप्रतिरूपकमुदाहरति—**अहंयुरिति** । अहमिति सुबन्तप्रतिरूपकम् अहङ्कारे । **अस्तिक्षीरा** । अत्र अस्तीति तिङन्तप्रतिरूपकमव्ययं नतु तिङन्तम् । स्वरप्रतिरूपकमुदाहरति—**अ** इत्यादिना । **अ** सम्बोधने । **आ** वाक्यस्मरणयोः । **इ** सम्बोधनजुगुप्साविस्मयेषु । **ई उ ऊ ए ऐ ओ औ** इति सप्तकं सम्बोधने । **पशु** सम्यगर्थे । **शुकम्** शैघ्र्ये । **यथाकथाच** संघातोयमनादरे । **पाट्, प्याट्, अङ्ग, है, हे, भोः, अये,** एते सप्त सम्बोधने । **ह्य** हिंसाप्रातिलोम्यपादपूरणेषु । **विषु** नानार्थे । **एकपदे** अकस्मादित्यर्थे । **युत्** कुत्सायाम् । **आतः** इतोऽर्थे ।

चादिरप्याकृतिगणः । तेन **यत् तत्** द्वयं हेतौ । **आहोस्वित्** विकल्पे । **सम्** सर्वतोभावे । **कम्** पादपूरणे । **सुकम्** अतिशये । **अनु** वितर्के । **शश्वत्** अन्तःकरणे आभिमुख्ये च । **च** पादपूरणे इवार्थे च । **चटु चाटु** द्वयं प्रियवाक्ये । **हुम्** भर्त्सने । **इव** सादृश्ये । **अद्यत्वे** इदानीमित्यर्थे । इत्यादयोऽपि संगृह्यन्ते ।

CC0. In Public Domain. Digitization by eGangotri

⑦ मकारान्त [illegible] शब्दों की अव्यय संज्ञा, अर्थात् म और (एच् प्रत्याहार) हैं अन्त में जिनके ऐसे जो "कृत्" हैं उनकी अव्यय संज्ञा होती है।

लादयः प्राक् पाशपः । शस्प्रभृतयः प्राक् समासान्तेभ्यः । अम् । आम् कृत्वोर्थाः । तसिवती । नानाञौ । एतदन्तमप्यव्ययम् ॥ **कृन्मेजन्तः** ⑦ १।१।३९॥ कृद्यो मान्त एजन्तश्च तदन्तमव्ययं (कृदन्त) स्यात् । स्मारंस्मारम् । जीवसे । पिबध्यै ॥ **क्त्वातोसुन्कसुनः १।१।४०॥** एतदन्तमव्य-

---

अम् आम् । 'अमु च च्छन्दसि' इत्यम्, 'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' इत्याम् च गृह्यते । **कृत्वोर्थाः** । 'सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' 'द्वित्रिचतुर्भ्यस्सुच्' 'विभाषा बहोर्धाऽविप्रकृष्टकाले' इति त्रय इत्यर्थः । **तसिवती** । 'तेनैकादिक्' 'तसिश्च' इति तसिः, 'तेन तुल्यं क्रियाचेद्वतिः' इति वतिश्च गृह्यते । **नानाञौ** । 'विनञ्भ्यां नानाञौ न सह' इति विहितौ नानाञौ ।

कृन्मेजन्तः । अत्र 'स्वरादिनिपातमव्ययम्' इत्यतोऽव्ययमित्यनुवर्तते । कृत् मेजन्त इति च्छेदः । म् च एच्च मेचौ तौ अन्ते यस्येति बहुव्रीहिः । तदाह कृद् यो मान्त इति । केवलस्य कृतः प्रयोगानर्हत्वात्संज्ञाविधावपि तदन्तविधिः ।

स्मारंस्मारम् । स्मृधातोः 'आभीक्ष्ण्ये णमुल् च' इति णमुल्यनुबन्धलोपे 'अचो ञ्णिति' इति वृद्धौ रपरत्वे 'नित्यवीप्सयोः' इति द्वित्वे कृदन्तत्वात्प्रातिपदिकत्वेन सुबुत्पत्तौ मान्तकृदन्तत्वात् 'कृन्मेजन्तः' इत्यव्ययत्वे 'अव्ययादाप्सुपः' इति सुपो लुकि तत्सिद्धम् ।

जीवसे । जीव प्राणधारणे इत्यस्मात् 'तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः' इति असेप्रत्यये 'कृन्मेजन्तः' इत्यव्ययत्वम् ।

पिबध्यै । पाधातोः 'तुमर्थे से' इत्यादिना शध्यैप्रत्ययेऽनुबन्धलोपे शित्त्वात् 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञायां 'पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' इति पा इत्यस्य पिबादेशे कृदन्तत्वात्प्रातिपदिकत्वेन सुपि 'कृन्मेजन्त' इत्यव्ययत्वात्सुपो लुकि पिबध्यै इति सिद्धम् ।

यम् । कृत्वा । उदेतोः । विसृपः ॥ **अव्ययीभावश्च १।१।४१॥** अधिहरि ॥ **अव्ययादाप्सुपः २।४।८२॥** अव्ययाद्विहितस्यापः सुपश्च लुक् । तत्र शालायाम् । सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ १ ॥ वष्टि भागु-

---

क्त्वातोसुन्कसुनः । 'स्वरादिनिपातमव्ययम्' इत्यतोऽव्ययमित्यनुवर्त्तते । तदन्तविधिः ।

कृत्वा । कृधातोः 'समानकर्त्तृकयोः पूर्वकाले' इति क्त्वाप्रत्यये कृदन्तत्वात्प्रातिपदिकत्वेन सुबुत्पत्तौ 'क्त्वातोसुन्कसुनः' इत्यव्ययत्वात्सुपो लुकि तत्सिद्धिः ।

उदेतोः । उत्पूर्वाद् इण्धातोः 'भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्' इति तोसुन्प्रत्ययेऽनुबन्धलोपे गुणे कृदन्तत्वात्प्रातिपदिकत्वेन सुबुत्पत्तौ 'क्त्वातोसुन्कसुनः' इत्यव्ययत्वात्सुपो लुकि रुत्वे विसर्गे च तत्सिद्धिः ।

विसृपः । विपूर्वात्सृप्धातोः 'सृपितृदोः कसुन्' इति कसुन्प्रत्ययेऽनुबन्धलोपे कृदन्तत्वात्प्रातिपदिकत्वेन सुपि 'अव्ययादाप्सुपः' इत्यव्ययत्वात्सुपो लुकि रुत्वे विसर्गे तत्सिद्धिः ।

अव्ययीभावश्च । 'स्वरादिनिपातमव्ययम्' इत्यतोऽव्ययमित्यनुवर्तते । हरौ अधि इति विग्रहे (लौकिके)

अधिहरि । हरि ङि अधि इति विग्रहे 'अव्ययं विभक्ति' इत्यादिना समासे समासत्वात्प्रातिपदिकसंज्ञायां 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति अधेः उपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इति अधेः पूर्वप्रयोगे 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुकि 'एकदेशविकृतमनन्यवत्' इति परिभाषया सुबुत्पत्तौ 'अव्ययीभावश्च इत्यव्ययत्वात्सुपो लुकि तत्सिद्धिः ।

अव्ययादाप्सुपः । अत्र 'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः'

रिरल्लोपमवाप्योरुपसर्गयोः ॥ आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥ २ ॥ वगाहः, अवगाहः । पिधानम्, अपिधानम् ॥

इत्यव्ययानि ॥

अथ तिङन्तम् । तत्रादौ भ्वादयः ॥ लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् । एषु पञ्चमो लकारश्छन्दोमात्रगोचरः ॥ [1]**लः कर्मणि च भावे चाकर्मकेभ्यः ३।४।६९॥** लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च ॥

इत्यतो लुगित्यनुवर्तते । विहितविशेषणञ्चाश्रीयते । तेन अत्युच्चैसौ इत्यत्र विभक्तेर्लुक् न ।

॥ इत्यव्ययप्रकरणम् ॥

लः कर्मणि । अत्र चकारात् 'कर्त्तरि कृत्' इत्यतः कर्त्तरीत्यनुकृष्यते । धातोरित्यधिक्रियते । कर्मणीति सकर्मकधातुविषयकम् । अकर्मकेभ्यः कर्मणीत्यस्य बाधितत्वात् । अत्र लः कर्मणि चेति एकं वाक्यम् । भावे चाकर्मकेभ्य इति द्वितीयं वाक्यम । द्वितीयवाक्ये चकारात् कर्त्तरीत्येवानुकृष्यते न तु कर्मणीति, असम्भवात् । 'लज्जासत्तास्थितिजागरणवृद्धिक्षयभयजीवितमरण । शयनक्रीडारुचिदीप्त्यर्थं धातुगणन्तमकर्मकमाहुः' इति कारिकोक्ता अकर्मका धातवः । तद्भिन्नाः सकर्मकाः । वस्तुतस्तु धातूनां फलव्यापारयोः शक्तिः । द्वयोरेकत्र विद्यमानत्वेऽकर्मकः । द्वयोराश्रयभेदे सकर्मकः । यथा भूधातोः आत्मधारणानुकूलव्यापारोऽर्थः । आत्मधारणरूपफलस्य तदनुकूलव्यापारस्य च एकत्रैव विद्यमानत्वेन भूधातुरकर्मकः । विक्लित्त्यनुकूलव्यापारः पच्धात्वर्थः । तत्र विक्लित्तिरूपफलस्य तण्डुलादौ तदनुकूलव्यापारस्य च कर्त्तरि विद्यमानत्वेन पच्धातुः सकर्मकः । अविवक्षितकर्मकोऽप्यकर्मकपदेन गृह्यते ।

---

[1] सकर्मकधातु से कर्म और कर्त्ता में लकार हो अकर्मकधातु से भाव और कर्त्ता में लकार हों ।

वर्तमाने लट् ३।२।१२३॥ [२]वर्तमानाक्रियावृत्तेर्धातोर्लट् स्यात्॥ अटावितौ। उच्चारणसामर्थ्याल्लस्य नेत्त्वम्। भू सत्तायाम्॥ १॥ कर्तृविवक्षायां भू ल् इति स्थिते—**तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथान्ध्वमिड्वहिमहिङ्** ३।४।७८॥ एतेऽष्टादश लादेशाः स्युः॥ **लः परस्मैपदम्** १।४।९९॥ लादेशाः परस्मैपदसंज्ञाः स्युः॥ **तङानावात्मनेपदम्** १।४।१००॥ तङ् प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः। पूर्वसंज्ञाऽपवादः॥ **अनुदात्तङित आत्मनेपदम्** १।३।१२॥

वर्तमाने लट्। धातोरित्यधिक्रियते। वर्तमान इति तत्रान्वेति। वर्त्तमानेऽर्थे विद्यमानाद्धात्तोर्लडिति लभ्यते। फलितमाह वर्तमानक्रियावृत्तेरिति। क्रियायाः प्रारम्भतः समाप्तिपर्यन्तं प्रारम्भसमाप्ती अभिव्याप्य वृत्तिमान् कालो वर्तमानकालः।

तिप्तस्। अत्र 'लस्य' इत्याधिक्रियते। तत्र च स्थानषष्ठी। तेन आदेश इति लभ्यते।

तङ् प्रत्याहार इति। त आताम् इत्यत्र त इत्यारभ्य महिङो ङकारेणेति तदर्थः।

अनुदात्तङित। अनुदात्तश्च ङ्च अनुदात्तङौ। तौ इतौ यस्य सः अनुदात्तङित्। तस्मात् अनुदात्तङितः। द्वन्द्वान्ते श्रूयमाणस्य इच्छब्दस्य प्रत्येकमन्वयः। 'भूवादयो धातवः' इत्यतो धातवः इत्यनुवर्तते तस्य पञ्चम्यन्तत्वेन विपरिणामः।

---

२ वर्तमान कालिक जो क्रिया तद्वाचकत्वेन विवक्षित जो धातु उससे लट् लकार हो।

३ तिप् तस् झि सिप् थस् थ मिप् वस् मस् त आताम् झ थास आथाम् धम् इट् वहि महिङ् ये अठारह आदेश ल के स्थान में हों।

४ ल के स्थान में आदेश परस्मैपद संज्ञक हों।

५ तङ् प्रत्याहार (त से लेकर महिङ् पर्यन्त प्रत्यय) और शानच् कानच् प्रत्यय आत्मनेपदसंज्ञक हों।

[६]अनुदात्तेतो ङितश्च धातोरात्मनेपदं स्यात् ॥ **स्वरितञितः कर्त्रभिप्राये क्रियाफले १।३।७२॥** [७]स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले । **शेषात्कर्तरि परस्मैपदम् १।३।७८॥** [८]आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् ॥ **तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमाः १।४।१०१॥** [९]तिङ उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः ॥ **तान्येकवचनद्विवचनबहुवचनान्येकशः १।४।१०२॥** [१०]लब्धप्रथमादिसंज्ञानि

स्वरितञितः । स्वरितश्च ञ् च स्वरितञौ तावितौ यस्य तस्मादिति विग्रहः । इतः प्रत्येकं सम्बन्धः ।

शेषात् । उक्तादन्यः शेषस्तस्मात् । अनुदात्तङित इति स्वरितञित इति चोक्तादात्मनेपदविषयादन्य इत्यर्थः ।

तिङस्त्रीणि । तिङः षट् त्रिकाः संज्ञाश्च तिस्र इति यथासङ्ख्यासम्भवादाह तिङ उभयोरिति । 'लः परस्मैपदम्' इत्यतः परस्मैपदमिति तङानावात्मनेपदम्' इत्यत आत्मनेपदमिति चानुवृत्तं षष्ठ्यन्ततया विपरिणम्यते । ततश्च परस्मैपदात्मनेपदयोरुभयोरपि प्रत्येकं त्रयस्त्रिकाः प्रथमादिसंज्ञाः क्रमेणेति फलितम् ।

---

६ अनुदात्तेत् और ङित् धातु से आत्मनेपदसंज्ञक प्रत्यय हों ।

७ स्वरितेत् और ञकारेत्संज्ञक धातु से आत्मनेपदसंज्ञक प्रत्यय हो कर्तृगामी क्रियाफल रहते ।

८ आत्मनेपद के निमित्त से रहित अर्थात् अनुदात्तेत् ङित् स्वरितेत् ञित् धातु से भिन्नधातु से कर्ता अर्थ में परस्मैपदसंज्ञक प्रत्यय हों ।

९ तिङ्सम्बन्धी आत्मनेपद और परस्मैपद के तीन तीन त्रिक क्रम से प्रथम मध्यम उत्तम संज्ञक हों। अर्थात् आत्मनेपद और परस्मैपद दोनों में प्रथम तीन प्रत्यय को प्रथमसंज्ञा हो । तदनन्तर तीन प्रत्यय को मध्यम संज्ञा हो । तदनन्तर तीन प्रत्यय को उत्तम संज्ञा हो ।

१० प्रथम मध्यम उत्तम संज्ञक जो तिङ्सम्बन्धी तीन तीन प्रत्यय उनमें प्रत्येक को क्रम से एकवचन द्विवचन बहुवचन संज्ञा हो । अर्थात् प्रथमसंज्ञक तीन प्रत्ययों में

तिङस्त्रीणित्रीणि प्रत्येकमेकवचनादिसंज्ञानि स्युः ॥ **युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः १।४।१०५॥** तिङ्[११]वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः ॥ **अस्मद्युत्तमः १ । ४ । १०७ ॥** त[१२]थाभूतेऽस्मद्युत्तमः ॥ **शेषे प्रथमः १।४।१०८॥** म[१३]ध्यमोत्तमयोरविषये प्रथमः स्यात् । भू ति इति जाते । **तिङ्शित्सार्वधातुकम् ३ । ४ । ११३ ॥** तिङः

युष्मद्युपपदे । उपोच्चारितम्पदम् उपपदं तस्मिन्निति विग्रहः । युष्मच्छब्दे समीपोच्चारिते सतीत्यर्थः । समानम्=एकम् अधिकरणं=वाच्यं यस्मिंन्निति विग्रहः । सामानाधिकरण्यं युष्मदः तिङः स्थानिभूतलकारेण विवक्षितम् । 'लः परस्मैपदम्' इत्यतो ल इत्यनुवृत्तेः । तत्फलितमाह तिङ्वाच्येत्यादि । स्थानं=प्रसङ्गः सोऽस्यास्तीति स्थानी तस्मिन्निति विग्रहः स्थानिपदस्य अप्रयुज्यमाने वैयाकरणनिकाये रूढिः । अपिना प्रयुज्यमान इति लभ्यते । तथाच तिङ्वाच्यं=तिङर्थः यत् कारकं=कर्त्ता कर्म तद्वाचके युष्मच्छब्देऽप्रयुज्यमाने प्रयुज्यमाने च मध्यमः पुरुष इति निष्कृष्टोऽर्थः ।

अस्मद्युत्तमः । अत्र 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' इत्यतः उपपदे समानाधिकरणे स्थानिन्यपीत्यनुवर्त्तते । ततश्च तिङ्वाच्यकारकवाचिनि अस्मदि अप्रयुज्यमाने प्रयुज्यमाने च उत्तमः पुरुष इति निष्कृष्टोऽर्थः । अत्र तिङो लकारे लक्षणेति शेखरः ।

तिङ्शित् । धातोरित्यधिक्रियते । तेन हरीनित्यादौ शसः

पहले को एकवचन संज्ञा दूसरे को द्विवचन संज्ञा तीसरे कों वहुवचन संज्ञा होती हैं। इसी प्रकार से मध्यम उत्तम में भी समझना चाहिये ।

[११] ल का वाच्य जो कारक—कर्त्ता या कर्म तद्वाचक युष्मद्शब्द के प्रयुज्यमान या अप्रयुज्यमान रहते मध्यम पुरुष हो ।

[१२] ल का वाच्य जो कारक—कर्ता या कर्म तद्वाचक अस्मद्शब्द के प्रयुज्यमान या अयुज्यमान रहते उत्तम पुरुष हो ।

[१३] मध्यमपुरुष और उत्तम पुरुष के विपय न रहने पर प्रथम पुरुष हो ।

शितश्च[14] धात्वधिकारोक्ता एतत्संज्ञाः स्युः ॥ **कर्तरि शप् ३।१।६८॥** कर्त्रर्थे[15] सार्वधातुके परे धातोः शप् ॥ **सार्वधातुकार्धधातुकयोः ७।३।८४॥** अनयोः[16] परयोरिगन्ताङ्गस्य गुणः । अवादेशः । भवति । भवतः ॥ **झोऽन्तः ७।१।३॥** प्रत्ययावयवस्य झस्यान्तादेशः ।

सार्वधातुकत्वात् । 'सार्वधातुकमपित्' इति तस्य ङित्त्वेन 'घेर्ङिति' इति गुणो न ।

कर्त्तरि शप् । अत्र 'सार्वधातुके यक्' इत्यतः सार्वधातुके इति 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इत्यतो धातोरिति चानुवर्तते ।

सार्व । 'इकोगुणवृद्धी' इति परिभाषया इक इत्युपतिष्ठते । अङ्गस्येत्यधिक्रियते । तदन्तविधिः ।

भवति । भू इत्यस्य 'भूवादयो धातवः' इति धातुसंज्ञायां धातुत्वात् 'वर्तमाने लट्' इति लटि अनुबन्धलोपे तत्स्थाने प्रथमपुरुषैकवचने 'तिप्तस्झि' इत्यादिना तिप्प्रत्ययेऽनुबन्धलोपे 'तिङ्शित्सार्व-
७।३।८८ वधातुकम्' इति तिपः सार्वधातुकसंज्ञायां 'भूसुवोस्तिङि' इतिगुणनिषेधे 'कर्त्तरि शप्' इति शपि अनुबन्धलोपे शपः सार्वधातुकत्वे 'सार्वधातुकार्धधातुकयोः' इति गुणेऽवादेशे भवतीति सिद्धम् ।

भवतः । भूधातोर्लटि लटस्तसि शपि गुणेऽवादेशे रुत्वे विसर्गे च तत्सिद्धिः ।

झोऽन्तः । अत्र 'आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम्' इत्यतोऽवयवषष्ठ्यन्तं प्रत्ययग्रहणमनुवर्तते ।

---

१४ धात्वधिकार में कहे हुये तिङ् और शकारेत्संज्ञक प्रथम सार्वधातुकसंज्ञक हों ।

१५ कर्ता अर्थ है जिसका ऐसे सार्वधातुकप्रत्यय पर रहते धातु से शप् हो ।

१६ सार्वधातुक और आर्धधातुकप्रत्यय पर रहते इगन्त अङ्ग को गुण हो ।

अतो गुणे । भवन्ति । भवसि । भवथः । भवथ ॥ **अतो दीर्घो यञि ७।३।१०१॥** अतोऽङ्गस्य दीर्घो यञादौ सार्वधातुके । भवामि । भवावः । भवामः । स भवति । तौ भवतः । ते भवन्ति । त्वं भवसि । युवां भवथः । यूयं भवथ । अहं भवामि । आवां भवावः । वयं भवामः ॥ **परोक्षे लिट् ३।२।११५॥** भूतानद्यत-

भवन्ति । भूधातोर्लटि तत्स्थाने प्रथमपुरुषबहुवचने झिप्रत्यये तस्य 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञायां 'कर्त्तरि शप्' इति शप्यनुबन्धलोपे शपः सार्वधातुकत्वे 'सार्वधातुकार्धधातुकयोः' इति गुणेऽवादेशे 'झोऽन्तः' इति झस्यान्तादेशे 'अतो गुणे' इति पररूपे भवन्तीति सिद्धम् ।

अतो दीर्घो यञि । 'अङ्गस्य' इत्यधिक्रियते । तस्य अत इति विशेषणम् । तदन्तविधिः । 'तुरुस्तुशम्यमः सार्वधातुके' इत्यतः सार्वधातुके इत्यनुवर्तते । तस्य यञीति विशेषणम् । तदादिविधिः ।

भवामि । भूधातोर्लटि तत्स्थाने मिप्यनुबन्धलोपे सार्वधातुकसंज्ञायां 'कर्त्तरि शप्' इति शपि तस्य सार्वधातुकत्वे 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे 'अतो दीर्घो यञि' इति दीर्घे भवामि इति सिद्धम् ।

परोक्षे लिट् । अत्र 'धातोः' इति 'भूते' इति चाधिक्रियते । 'अनद्यतने लङ्, इत्यतः अनद्यतने इत्यनुवर्तते । व्यतीतरात्रेरन्त्यार्धेन आगामिरात्रेः पूर्वार्धेन च सहितः कालोऽद्यतनः । तद्भिन्नोऽनद्यतनः । साक्षात्कृतमित्येतादृशविषयताशालिज्ञानाविषयत्वं परोक्षत्वम् ।

---

१७ प्रत्यय के अवयव झ के स्थान में अन्त आदेश हो ।

१८ ह्रस्वाकारान्त अङ्ग को दीर्घ हो यजादिसार्वधातुकप्रत्यय पर रहते ।

१९ भूत अनद्यतन परोक्ष अर्थ में विद्यमान धातु से लिट् लकार हो । परोक्ष जो क्रियाविष्टकर्ता तद्वृत्ति जो भूतानद्यतनकालिकक्रिया तद्वाचकत्वेन विवक्षित जो धातु उससे लिट् लकार हो । बीती हुई रात के उत्तरार्ध से लेकर आनेवाली रात के पूर्वार्धपर्यन्तकाल से भिन्नकाल को अनद्यतन कहते हैं ।

नपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात् । लस्य तिबादयः ॥ **परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ३ । ४ । ८२ ॥** [२०]लिटस्तिबादीनां नवानां णलादयोः नव स्युः । भू अ इति स्थिते—**भुवो वुग् लुङ्लिटोः ६ । ४ । ८२ ॥** [२१]भुवो वुगागमः स्यात् लुङ्लिटोरचि ॥ **लिटि धातोरनभ्यासस्य ६ । १ । ८ ॥** [२२]लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्त आदिभूतादचः परस्य तु द्वितीयस्य । भूव् भूव् अ इति स्थिते ॥ **पूर्वोऽभ्यासः ६ । १ । ४ ॥** [२३]अत्र ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात् ॥ **हलादिः शेषः ७ । ४ । ६० ॥** [२४]अभ्यासस्यादिर्हल् शिष्यते

परस्मैपदानाम् । 'लिटस्तझयोरेशिरेच्' इत्यतो लिट इत्यनुवर्तते । णल् अतुस्, उस्, थल्, अथुस्, अ, णल्, व, म , एते नव तिबादीनां नवानां क्रमेण स्युरिति तदर्थः ।

भुवोवुग्। 'आचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यत अचीत्यनुवर्तते ।

लिटि धातोः । अत्र 'एकाचो द्वे प्रथमस्य' 'अजादेर्द्वितीयस्य' इति सूत्रद्वयमधिक्रियते ।

हलादिःशेषः । 'अत्र लोपोऽभ्यासस्य' इत्यतोऽभ्यासस्येत्यनुवर्तते ।

---

२० लिट् के स्थान में जो तिप् तस् झि सिप् थस् थ मिप् वस् मस् ये नव प्रत्यय उनके स्थान में क्रम से णल् अतुस् उस् थल् अथुस् अ णल् व म ये नव आदेश हों ।

२१ भू को वुक् आगम हो लुङ् लिट् सम्बन्धी अच् पर रहते ।

२२ लिट् पर रहते अभ्यासरहित धातु का अवयव प्रथम एकाच् उसको द्वित्व हो । अजादिधातु के द्वितीय एकाच् को द्वित्व हो ।

२३ यहां पर जो दो वार विहित हैं उनमें प्रथम को अभ्यास संज्ञा हो ।

२४ अभ्यास का आदि हल् शेष रहे अन्य हल् का लोप हो ।

CC0. In Public Domain, Digitization by eGangotri

① अतीताया रात्रेः पश्चार्धेन आगामिन्याः रात्रेः पूर्वार्धेन च सहितो दिवसोऽद्यतनः तद्भिन्नोऽनद्यतनः॥ वै.सि.कौ. पृ.१२६

अन्ये हलो लुप्यन्ते । इति वलोपः ॥ **ह्रस्वः ७।४।५९॥** [२५]अभ्यासस्याचो ह्रस्वः स्यात् ॥ **भवतेरः ७ । ४ । ७३ ॥** [२६]भवतेरभ्यासोकारस्य अः स्याल्लिटि ॥ **अभ्यासे चर्च ८ । ४ । ५४ ॥** [२७]अभ्यास झलां चरः स्युर्जशश्च । झशां जशः खयां चर इति विवेकः । बभूव । बभूवतुः । बभूवुः ॥ **लिट् च ३।४।११५॥** [२८]लिडादेशस्तिङार्धधातुकसंज्ञः ॥ **आर्धधातुकस्येड्वलादेः ७ । २ । ३५ ॥** [२९]वलादेरार्धधातुकस्येडागमः स्यात् । बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम ॥ **अनद्यतने लुट् ३ । ३ । १५ ॥** ①

—[illegible]नद्यतन- भविष्यति।

ह्रस्वः । 'अत्र लोपोऽभ्यासस्य' इत्यतोऽभ्यासस्यत्यनुवर्तते 'अचश्च' इति परिभाषोपतिष्ठते ।

भवतेरः । भवतेः अः इति च्छेदः । भवतेरित्यस्य भूधातोरित्यर्थः । अभ्यासस्येत्यनुवर्तते । 'व्यथो लिटि' इत्यतो लिटीत्यनुवर्तते । अलोऽन्त्य परिभाषया अन्त्यस्योकारस्य अकारोभवति ।

अभ्यासे चर्च । अत्र 'झलां जश् झशि' इत्यतो झलामिति चकारात् जश् इति चानुवर्तते । तत्र कस्य जशः कस्य चरः इत्याशङ्कायामाह झशां जश इत्यादि ।

बभूव । भूधातोः 'परोक्षे लिट्' इति लिटि अनुबन्धलोपे लस्य स्थाने 'तिप्तस्झि' इत्यादिना प्रथमपुरुषैकवचने तिप्प्रत्यये 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति तिपो णलादेशेऽनुबन्धलोपे नित्यत्वाद्गुणवृद्धी बाधित्वा 'भुवो वुग्लुङ्लिटोः' इति वुगागमेऽनुबन्धलोपे 'वृक्षः

अचो ञ्णिति ७।२।११५ इति वृद्धौ,

"इन्धिभवतिभ्यां च" (१।२।६) इति लिटः कित्त्वात् णलि "क्ङिति च" इति गुणनिषेधः, वृद्धिनिषेधः

---

२५ अभ्यास के अच् को ह्रस्व हो।

२६ भूधातु के अभ्यास उकार को अकार हो लिट् पर रहते।

२७ अभ्यास झल् को चर् और जश् हो । अर्थात् झश् को जश् और खय् को चर हो।

२८ लिट् के स्थान में जो आदेश तिङ् उसको आर्धधातुक संज्ञा हो।

२९ वलादि आर्धधातुक को इट् आगम हो।

१ मुख्यं [illegible] एक [illegible] अकर्त्ता।
निमित्त सद्भावाद्विशिष्टोऽपदेशो मुख्यो व्यव-
हारो [illegible] इति सं [illegible]

---

[३०] भविष्यत्यनद्यतनेऽर्थे धातोर्लुट् ॥ **स्यतासी लृलुटोः ३।१।३३॥** [३१] धातोः स्यतासी एतौ प्रत्ययौ स्तो लृलुटोः परतः। शबाद्यपवादः। लृ इति लृङ्लृटोर्ग्रहणम् ॥ **आर्धधातुकं शेषः ३।४।११४॥**

परिभाषेन्दुशेखरः।

प्रचलन् सद्भावयवैः प्रचलति' इति न्यायेन १ 'व्यपदेशिवदेकस्मिन्' इति परिभाषया भूव् इत्यस्य एकाचः प्रथमत्वेन धात्ववयवत्वेन च 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इति प्रथमभूव् इत्यस्याभ्याससंज्ञायां 'हलादिः शेषः' इति वलोपे 'ह्रस्वः' इति ह्रस्वे 'भवतेरः' इति अभ्यासोकारस्य अकारे 'अभ्यासे चर्च' इति पूर्वभकारस्य जश्त्वेन बकारे बभूव इति सिद्धम्।

परि- ३०॥ पृ. ७८

लिट् च। अत्र लिडिति लुप्तस्थानषष्ठ्यन्तम्। 'तिङ्शित्सार्वधातुकम्' इत्यतस्तिङिति 'आर्धधातुकं शेषः' इत्यत आर्धधातुकमिति चानुवर्तते।

बभूविथ। भूधातोर्लिटि तत्स्थाने मध्यमपुरुषैकवचने सिपि तस्य 'लिट् च' इत्यार्धधातुकसंज्ञायां 'परस्मैपदानाम्' इत्यादिना सिपस्थलादेशेऽनुबन्धलोपे 'आर्धधातुकस्येड्वलादेः' इति थस्य इडागमेऽनुबन्धलोपे 'भुवो वुग् लुङ्लिटोः' इति वुगागमे 'लिटि धातोरनभ्यासस्य' इति भूव्इत्यस्य द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'ह्रस्वः' इति ह्रस्वे 'भवतेरः' इत्यभ्यासोकारस्याकारे 'अभ्यासे चर्च' इति जश्त्वेन बकारे बभूविथ इति सिद्धम्।

अनद्यतने लुट्। धातोरित्यधिक्रियते। 'भविष्यति गम्यादयः' इत्यतो भविष्यतीत्यनुवर्तते।

स्यतासी। स्यश्च तासिश्चेति विग्रहः। धातोरित्यधिक्रियते। लृङ्लृटोः स्यप्रत्ययो लुटि तास् इति फलितम्।

आर्धधातुकं शेषः। 'तिङ्शित्सार्वधातुकम्' इति पूर्वसूत्रोपात्ततिङ्-

---

३० भविष्यत् अनद्यतन अर्थ में धातु से लुट् लकार हो।

३१ धातु से स्य और तास् प्रत्यय हो लृङ् लृट् लुट् लकार पर रहते।

⑦ डित्वभ [illegible] ॥६।४।१४३
भाष्यवार्तिकम् ।

[३२] तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्यय एतत्संज्ञः स्यात् । इट् ॥ **लुटः प्रथमस्य डारौरसः २।४।८५॥** [३३] डित्त्वसामर्थ्यादभस्यापि टेर्लोपः ⑦। भविता ॥ **तासस्त्योर्लोपः ७।४।५०॥** [३४] तासेरस्तेश्च सस्य लोपः स्यात्सादौ प्रत्यये परे ॥ **रि च ७।४।५१॥** [३५] रादौ प्रत्यये तथा । भवितारौ । भवितारः । भवितासि । भवितास्थः ।

शिद्भिन्नः शेषः । धातोरित्यधिकृतं विहितविशेषणमाश्रीयते ।

भविता । भूधातोः 'अनद्यतने लुट्' इति लुटि तस्य स्थाने प्रथमपुरुषैकवचने तिप्प्रत्ययेऽनुबन्धलोपे 'कर्त्तरि शप्' इति प्राप्तं शपं बाधित्वा 'स्यतासी लृलुटोः' इति तास् प्रत्यये 'आर्धधातुकं शेषः' इति तास आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इति इडागमेऽनुबन्धलोपे भू इ तास्ति इति स्थिते 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे 'लुटः प्रथमस्य डारौरसः' इति तिपो डादेशेऽनुबन्धलोपे डित्त्वसामर्थ्यादभस्यापि टेर्लोपे भविता इति सिद्धम् ।

तासस्त्योः । तास्च अस्तिश्चेति विग्रहः । 'सः स्यार्धधातुके' इत्यतः सि इत्यनुवर्तते । अङ्गस्य' इत्यधिकारादाक्षिप्तप्रत्ययस्य सि इति विशेषणम् । तदादिविधिः ।

रि च। अत्र ' तासस्त्योर्लोपः ' इति सूत्रमास्तिवर्जमनुवर्तते । रिइत्यनेनाङ्गाक्षिप्तप्रत्ययस्य विशेषणात्तदादिविधिः ।

भवितारौ । भूधातोर्लुटि तत्स्थाने प्रथमपुरुषद्विवचने तस्प्रत्यये शपं बाधित्वा 'स्यतासी लृलुटोः' इति तास्प्रत्यये 'आर्धधातुकं शेषः' इति तस्यार्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इतीडागमेऽनुबन्ध-

---

३२ तिङ् और शित् से भिन्न जो धातुसे विहित प्रत्यय वह आर्धधातुकसंज्ञक हो ।

३३ लुट् के स्थान मे जो प्रथमपुरुष तिप् तिस् झि उसके स्थान में क्रम से डा रौ रस् आदेश हो ।

३४ तास् प्रत्यय और अस् धातु का लोप हो सकारादि प्रत्यय पर रहते ।

३५ तास् प्रत्यय और अस् धातु का लोप हो रादिप्रत्यय पर रहते ।

CC0. In Public Domain, Digitization by eGangotri

① लोट्- उ.पु. [illegible] किं ते प्रियं करवाणि ॥ २- कथं व्याघ्राणां संनिधौ निवसानि । वयस्य- उपवनं प्रविशाव ॥ म.पु.— बालका अनृतं मा वदत रे रे बालकाः! मा विनयं त्यजेत ॥ प्र.पु. → सत्यान्मा प्रमदाम ।

भवितास्थ । भवितास्मि । भवितास्वः । भवितास्मः ॥ **लृट् शेषे च ३ । ३ । १३** ॥ भविष्यदर्थाद्[३६]धातोर्लृट् क्रियार्थायां क्रियायां सत्यामसत्यां वा । स्यः । इट् । भविष्यति । भविष्यतः । भविष्यन्ति । भविष्यसि । भविष्यथः । भविष्यथ । भविष्यामि । भविष्यावः । भविष्यामः ॥ **लोट् च ३ । ३ । १६२** ① ॥ विध्याद्यर्थेषु[३७] धातोर्लोट् ॥ **आशिषि[३८] लिङ्लोटौ ३। ३। १७३** ॥ **एरुः ३।४।८६**॥

लोपे गुणेऽवादेशे 'लुटः प्रथमस्य डारौरसः' इति तसः रौ आदेशे 'रि च' इति तासः सलोपे भवितारौ इति सिध्यति ।

भवितासि । भूधातोर्लुटि तस्य स्थाने सिप्यनुबन्धलोपे शपं बधित्वा तास्प्रत्यये आर्धधातुकत्वे इडागमे गुणेऽवादेशे 'तासस्त्योर्लोपः' इति तासः सस्य लोपे भवितासि इति साधु ।

लृट् शेषे च । धातोरित्यधिक्रियते । 'भविष्यति गम्यादयः' इत्यतो भविष्यति इत्यनुवर्तते । 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इतिसूत्रोपात्तक्रियार्थायां क्रियायामित्यतो भिन्नः शेषः । ततः क्रियार्थायां क्रियायामसत्यामिति लभ्यते । चकारात्सत्यामित्यपि लभ्यते ।

भविष्यति । भूधातोः 'लृट् शेषे च' इति लृटि तत्स्थाने तिपि 'स्यतासी लृलुटोः' इति स्यप्रत्यये 'आर्धधातुकं शेषः' इति तस्यार्धधातुकत्वे 'आर्धधातुकस्येड्वलादेः' इतीडागमे अनुबन्धलोपे गुणेऽवादेशे षत्वे भविष्यति इति सिद्धम् ।

लोट् च । धातोरित्यधिक्रियते । 'विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इति सूत्रं लिङ्वर्जमनुवर्तते ।

---

[३६] भविष्यत् अर्थ में विद्यमान धातु से लृट् लकार हो क्रिया के लिये क्रिया रहे या न रहे ।

[३७] विधि निमन्त्रण आमन्त्रण अधीष्ट संप्रश्न प्रार्थना अर्थ में विद्यमान धातु से लोट् लकार हो ।

[३८] आशीर्वाद अर्थ में विद्यमान धातु से लिङ् और लोट् लकार हो ।

४. १- दूताः अयोध्यां गच्छन्तु । पुत्रौ आश्रमं आरो ताम् ।

लोट [३९]इकारस्य उः । भवतु ॥ **तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् ७ । १ । ३५** ॥ [४०]आशिषि तुह्योस्तातङ् वा । परत्वात्सर्वादेशः । भवतात् ॥ **लोटो [४१]लङ्वत् ३ । ४ । ८५** ॥ लोटस्तामादयस्सलोपश्च ॥ **तस्थस्थमिपां तान्तन्तामः ।३।४।१०१** ॥ [४२]ङितश्चतुर्णां तामादयः क्रमात्स्युः । भवताम् । भवन्तु ॥ **सेर्ह्यपिच्च ३।४।८७**॥ लोटः[४३] सेर्हिः सोऽपिच्च ॥ **अतो हेः ६।४।१०५**॥

एरुः । एः उः इतिच्छेदः । ‘ लोटो लङ्वत् ’ इत्यतो लोट इत्यनुवर्तते ।

भवतु । भूधातोः ‘ लोट् च ’ इत्यनेन ‘ आशिषि लिङ्लोटौ’ इत्यनेन वा लोटि तत्स्थाने तिपि शप्यनुबन्धलोपे गुणेऽवादेशे ‘एरुः’ इति तिप इकारस्य उत्वे भवतु इति सिद्ध्यति आशिषि तु ‘तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् ’ इति तुइत्यस्य पाक्षिकेऽनेकाल्त्वात्तातङ्ङादेशेऽनुबन्धलोपे भवतात् इति तातङोऽभावपक्षे भवतु इति च सिध्यति ।

तस्थस्थमिपाम् । ‘नित्यं ङितः’ इत्यतो ङित इत्यनुवर्तते ।

भवताम् । भूधातोर्लोटि तत्स्थाने तसि ‘ लोटो लङ्वत् ’ इति लङ्कार्यातिदेशे तेन ङित्त्वात् ‘तस्थस्थमिपां तांतंतामः’ इति तसस्तामादेशे शपि गुणेऽवादेशे भवताम इति सिद्धम् ।

सेर्ह्यपिच्च । हि इति लुप्तषष्ठ्यन्तम् । ‘ लोटो लङ्वत् ’ इत्यतो लोट इत्यनुवर्तते ।

---

३९ लोट्लकारसम्बन्धी इकार के स्थान में उकार हो।

४० आशीर्वाद अर्थ में तु और हि के स्थान में तातङ आदेश हो विकल्प से।

४१ लोट् को लङ् की तरह कार्य हो।

४२ ङित् लकारसम्बन्धी जो तस् थस् थ मिप् ये चारप्रत्यय उसके स्थान में क्रम से ताम् तम् त अम् ये चार आदेश हों।

४३ लोट् के स्थान में जो सि प्रत्यय उसके स्थान में हि आदेश हो और वह अपित् हो।

⑦ वर्वस्य [illegible] | सू. २.७ देखिए |

CC0. In Public Domain. Digitization by eGangotri

[44]अतः परस्य हेर्लुक् । भव । भवतात् । भवतम् । भवत ॥ **मेर्निः ३।४।८९।** लोटो मेर्निः [45]स्यात ॥ **आडुत्तमस्य पिच्च ३ । ४ । ९२ ॥** लोडुत्तमस्या[46]ट् स्यात् स पिच्च । हिन्योरुत्वं न इकारोच्चारणसामर्थ्यात् ॥ **ते प्राग्धातोः १ । ४ । ८० ॥** [47]ते गत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्याः ॥ **आनि लोट् ८ । ४ । १६** ⑦ ॥ [48]उप-

---

अतोहेः । 'चिणो लुक्' इत्यतो लुगित्यनुवर्तते । अत इति पञ्चमी हेरिति षष्ठी ।

भव । भूधातोर्लोटि तत्स्थाने सिपि शप्यनुबन्धलोपे गुणेऽवादेशे भव सि इति स्थिते 'सेर्ह्यपिच्च' इति सेर्ह्यादेशे 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इति हेस्तातङादेशेऽनुबन्धलोपे भवतात् इति, तातङोऽभाव पक्षे 'अतो हेः' इति हेर्लुकि भव इति च सिद्धम् ।

मेर्निः । 'लोटो लङ्वत्' इत्यतो लोट इत्यनुवर्तते ।

आडुत्तमस्य । अत्रापि 'लोटो लङ्वत्' इत्यतो लोट इत्यनुवर्तते । स्तवानीत्याद्यर्थपित्वम् ।

भवानि । भूधातोर्लोटि तत्स्थाने मिपि शपि गुणेऽवादेशे 'लोटो लङ्वत्' इति लङ्कार्यातिदेशेन 'तस्थस्थमिपां तांतंतामः' इति मिपः अमादेशे प्राप्ते तम्बाधित्वा 'मेर्निः' इति मेर्न्यादेशे इकारोच्चारणसामर्थ्यात् नेरिकारस्येत्त्वाभावे 'आडुत्तमस्य पिच्च' इत्याडागमेऽनुबन्धलोपे दीर्घे भवानि इति सिद्धम् ।

ते प्राग् । 'उपसर्गाः क्रियायोगे' 'गतिश्च' इत्यनयोः प्रकृतत्वा-

---

[44] अकार से पर जो हि उसका लोप हो ।

[45] लोट् के स्थान में जो मि प्रत्यय उसके नि आदेश हो ।

[46] लोट्लकारसम्बन्धी उत्तम पुरुष को आट् आगम हो और वह पित् हो ।

[47] गतिसंज्ञक और उपसर्गसंज्ञक धातु के पूर्व ही प्रयोग करने योग्य हैं ।

[48] उपसर्ग में रहने वाले निमित्त से पर जो लोट् के स्थान में आदेश आनि उसके न को ण हो ।

सर्गस्थान्निमित्तात्परस्य लोडादेशस्यानीत्यस्य नस्य णः स्यात्। प्रभवाणि। (दुरः[४९] षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः)। दुःस्थितिः। दुर्भवानि। (अन्तः[५०]शब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम्)। अन्तर्भवाणि॥ **नित्यं ङितः ३।४।९९॥** सकारान्तस्य ङिदुत्तमस्य

त्तत्पदेन परामर्शः।

आनिलोट्। आनि इति लोट् इति च लुप्तषष्ठ्यन्तम्। 'रषाभ्यां नो णः समानपदे' इत्यतो रषाभ्यां नो ण इत्यनुवर्तते। 'उपसर्गादसमासेऽपि णोपदेशस्य' इत्यत उपसर्गादित्यनुवर्तते।

प्रभवाणि। भूधातोर्लोटि तत्स्थाने मिपि शपि गुणेऽवादेशे मेर्न्यादेशे आटि दीर्घे 'ते प्राग्धातोः' इति सूत्रबलात्प्रइत्युपसर्गस्य पूर्वमेव प्रयोगे 'आनि लोट्' इति षत्वे तत्साधु।

दुरः। षत्वे णत्वे च कर्त्तव्ये दुर उपसर्गत्वप्रतिषेध इति तदर्थः।

दुःस्थितिः। दुःस्थितिरित्यत्र 'उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिच्सञ्जस्वञ्जाम्' इति सस्य षत्वे प्राप्ते 'दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः' इति दुर उपसर्गत्वप्रतिषेधात्षत्वाभावे तत्सिद्धिः।

दुर्भवानि। भूधातोर्लोटि तस्य स्थाने मिपि शपि गुणेऽवादेशे मेर्न्यादेशे आटि दीर्घे 'ते प्राग्धातोः' इतिसूत्रबलाद् दुरः पूर्वप्रयोगे 'दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः' इति दुर उपसर्गत्वप्रतिषेधात् 'आनिलोट्' इति णत्वाभावे दुर्भवानि इति सिद्धम्।

अन्तः शब्दस्य। अङ्विधौ किविधौ णत्वे च कर्त्तव्ये अन्तः

---

[४९] षत्व और णत्व कर्तव्य में दुर् के उपसर्गत्व का प्रतिषेध कहना। अर्थात् षत्वणत्व कर्तव्य में दुर् उपसर्ग नहीं माना जाता है।

[५०] अङ्विधि किविधि और णत्व कर्तव्य में अन्तः शब्द का उपसर्ग जानना चाहिये।

वाराणसी-5

नित्यं[1] लोपः । अलोऽन्त्यस्येति सलोपः । भवाव । भवाम ॥ **अनद्यतने[2] लङ् ३।२।१११॥** अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात् ॥ **लुङ्लङ्लृङ्क्ष्वडुदात्तः[3] ६।४।७१॥** एष्वङ्गस्याट् ॥ **इतश्च[4] ३।४।१००॥** ङितो लस्य परस्मैपदमिकारान्तं यत्तदन्तस्य

शब्दस्य उपसर्गत्वमित्यर्थः । 'आतश्चोपसर्गे' इत्यङ् । अन्तर्धा । 'उपसर्गे घोः किः' इति किविधिः । अन्तर्धिः ।

अन्तर्भवाणि । अन्तरुपपदाद्भूधातोर्लोटि तत्स्थाने मिपि शपि गुणेऽवादेशे आटि दीर्घे 'अन्तः शब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम्' इति अन्तरित्यस्योपसर्गत्वे 'आनि लोट्' इति णत्वे अन्तर्भवाणि इति सिद्धम् ।

नित्यं ङितः । 'स उत्तमस्य' इतिसूत्रमनुवर्तते । तत्र स इति षष्ठ्यन्तम् उत्तमस्य विशेषणम् । तदन्तविधिः । 'इतश्च लोपः परस्मैपदेषु' इत्यतो लोप इत्यनुवर्तते ।

भवाव । भूधातोर्लोटि तत्स्थाने वस्प्रत्यये शपि गुणेऽवादेशे 'आडुत्तमस्य पिच्च' इत्याडागमेऽनुबन्धलोपे सवर्णदीर्घे 'लोटो लङ्वत्' इति लङ्कार्यातिदेशेन ङित्त्वात् 'नित्यं ङितः' इति सलोपे भवाव इति सिद्धम् । एवं भवाम इत्यपि बोध्यम् ।

अनद्यतने लङ् । 'धातोः' इति 'भूते' इति चाधिक्रियते ।

लुङ् । अत्र 'अङ्गस्य' इत्यधिक्रियते ।

इतश्च । 'लस्य' इत्यधिक्रियते । 'नित्यं ङितः' इत्यतो ङित इत्यनु

उसके न को ण हो ।

[1] सकारान्त जो ङित्सम्बन्धी उत्तमपुरुष उसका नित्य लोप हो।

[2] अनद्यतनभूतार्थकालिक जो क्रिया तद्वाचकत्वेन विवक्षित जो धातु उससे लङ् लकार हो ।

[3] लुङ् लङ् लृङ् पर रहते अङ्ग को अट् आगम हो और वह उदात्त हो ।

[4] ङित्लकारसम्बन्धी जो परस्मैपदसंज्ञक इकारान्तप्रत्यय उसके अन्त का लोप हो।

[illegible]
तेऽपि वा धर्मं प्रयुज्यताम् ॥ इत्यादय आ[illegible] मया शार्ङ्ग[illegible]
[illegible] (लिन्दौभोटि) । [illegible] सर्पिषा मन्येधाम् ।

लोपः । अभवत् । अभवताम् । अभवन् । अभवः । अभवतम् । अभवत । अभवम् । अभवाव । अभवाम ॥ **विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ३।३।१६१॥** एष्वर्थेषु

वर्तते । 'इतश्च लोपः परस्मपदेषु' इत्यतो लोप इति परस्मैदेषु इति चानुवर्तते । तत्र परस्मपदेष्विति षष्ठ्येकवचनान्ततया विपरिणमते । तस्य इत इति विशेषणम् । तदन्तविधिः ।

अभवत् । भूधातोः 'अनद्यतने लङ्' इति लङि तत्स्थाने तिप्प्रत्यये शप्यनुबन्धलोपे सार्वधातुकत्वे गुणेऽवादेशे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति अङ्गस्य अडागम 'इतश्च' इति तिप इकारलोपे अभवत् इति सिद्धम् ।

अभवताम् । भूधातोलङस्तसि तस्य तामादेशे शपि गुणेऽवादेशेऽटि तत्सिद्धिः ।

अभवन् । भूधातोर्लङि तस्य झौ झस्यान्तादेशे शपि गुणेऽवादेशे पररूपेऽटि 'इतश्च' इति इकारलोपे तकारस्य संयोगान्तलोपे ८।२।२३ तत्सिद्धिः ।

अभवाव । भूधातोर्लङि तत्स्थाने वस्प्रत्यये शपि गुणेऽवादेशे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यडागमेऽनुबन्धलोपे 'अतो दीर्घो यञि' इति दीर्घे 'नित्यं ङितः' इति सलोपे अभवाव इति सिद्धम् । १

विधिनिमन्त्रणा—। 'धातोः' इत्यधिक्रियते । विधिः प्रेरणम्—भृत्यादेर्निकृष्टस्य प्रवर्तनम् । यथा त्वं वस्त्रं क्षालयेति । निमन्त्रणम् 2 नियोगकरणम्—आवश्यक श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम् । तद्यथा दौहित्रादीन् प्रति इह श्राद्धे भवान् भुञ्जीत इति । आमन्त्रणं-कामचारानुज्ञा । यथेच्छं क्रियतामित्यभ्यनुज्ञानमित्यर्थः । अधीष्टं सत्कारपूर्वको व्यापारः । सत्कृत्य प्रवर्तनमित्यर्थः । यथा भवान् पुत्रमध्यापयेदिति । इदं कार्यं न वेति विचार्य निर्धारणं संप्रश्नः । यथा किं भोः भवान् व्याकरणमधीयीतेति ।[५] प्रार्थनं

---

[५] विधि निमन्त्रण आमन्त्रण अधीष्ट संप्रश्न प्रार्थन अर्थ में धातु से लिङ् लकार हो ।

धातोर्लिङ् ॥ [६]**यासुट् परस्मैपदेषूदात्तो ङिच्च ३।४।१०३ ॥** लिङः परस्मैपदानां यासुडागमो ङिच्च ॥ **लिङः सलोपोऽनन्त्यस्य ७।२।७९॥** [७]सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः । इति प्राप्ते । [८]**अतो येयः ७।२।८०॥** अतः परस्य सार्वधातुकावयवस्य यास् इत्यस्य इय् । गुणः ॥ [९]**लोपो व्योर्वलि ६।१।६६॥** भवेत् ।

याच्ञा । यथा भवानन्नं मे दद्यादिति । प्रवर्तनासंप्रश्नप्रार्थनेषु लिङित्येव सुवचम् ।

यासुट् । 'लिङः सीयुट्' इत्यतो लिङ इत्यनुवर्तते । लिङ इति पञ्चम्यर्थे षष्ठी । परस्मैपदेष्विति षष्ठ्यर्थे सप्तमी ।

लिङः स--। अत्र स इति लुप्तषष्ठीकम् । 'रुदादिभ्यः सार्वधातुके' इत्यतः सार्वधातुक इत्यनुवर्तते । तस्य षष्ठ्यन्तत्वेन विपरिणामः ।

अतो येयः । अत्र 'रुदादिभ्यः सार्वधातुके' इत्यतः सार्वधातुके इत्यनुवर्त्य अवयवषष्ठ्यन्तत्वेन विपरिणामः । अत इति पञ्चमी । परस्येत्यध्याह्रियते । यास इति लुप्तषष्ठीकम् । येय इत्यत्र यास् इय् इति स्थिते रुत्वे यत्वे यलोपे सन्धिरार्षः । इय इत्यत्र अकार उच्चारणार्थः ।

भवेत् । भूधातोः 'विधिनिमन्त्रण' इत्यादिना लिङि तत्स्थाने तिपि शपि अनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इति गुणेऽवादेशे 'इतश्च' इतीकारलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति यासुट्यनुबन्धलोपे 'लिङः सलोपोऽनन्त्यस्य' इति यासः सस्य लोपे

---

[६] लिङ् के स्थान में जो परस्मैपदसंज्ञकप्रत्यय उसके यासुट् आगम हो और वह ङित् हो।

[७] सार्वधातुकलिङ्सम्बन्धी अन्त्यभिन्न सकार का लोप हो।

[८] ह्रस्व अकार से परे सार्वधातुकावयव यास् के स्थान में इय् आदेश हो।

[९] वकार और यकार का लोप हो वल् पर रहते।

⑦ पूर्व वर्णस्थित [illegible] सुरक्षित)

भवेताम् । **झेर्जुस्**[10] ३।४।१०८॥ लिङो झेर्जुस् स्यात् । भवेयुः । भवेः । भवेतम् । भवेत । भवेयम् । भवेव । भवेम ॥ **लिङाशिषि**[11] ⑦ ३।४।११६॥ आशिषि लिङस्तिङ् आर्धधातुकसंज्ञः स्यात् ॥ **किदाशिषि** ३।४।१०४॥ आशिषि[12] लिङो यासुट् कित् । स्कोः संयो-

---

प्राप्ते 'अतो येय': इति यास इयादेशे 'आद्गुणः' इति गुणे 'लोपो व्योर्वलि' इति यलोपे भवेदिति सिद्धम्।

भवेताम्। भूधातोर्लिङि तत्स्थाने तसि 'तस्थस्थमिपां तांतंताम:' इति तसस्तामादेशे शपि गुणेऽवादेशे यासुटि सलोपं बाधत्वा यास इयादेशे गुणे यलोपे तत्सिद्धिः।

झेर्जुस्। 'लिङः सीयुट्' इत्यतो लिङ इत्यनुवर्तते।

भवेयुः। भूधातोर्लिङि तत्स्थाने झिप्रत्यये शपि गुणेऽवादेशे 'झोऽन्तः' इति झस्यान्तादेशे प्राप्ते तं बाधित्वा 'झेर्जुस्' इति झेर्जुसादेशेऽनुबन्धलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति यासुटि 'अनुबन्धलोपे 'लिङः सलोपोऽनन्त्यस्य' इति सलोपं बाधित्वा 'अतो येयः' इति यास इयादेशे गुणे रुत्वे विसर्गे भवेयुः इति सिद्धम्।

लिङाशिषि। लिङिति लुप्तषष्ठीकम्। 'तिङ्शित्सार्वधातुकम्' इत्यतः तिङ् इति 'आर्धधातुकं शेषः' इत्यत आर्धधातुकमिति चानुवर्तते।

किदाशिषि। 'लिङः सीयुट्' इत्यतो लिङ इति 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यतो यासुडिति चानुवर्तते। यासुटो ङित्त्वेनैव गुणनिषेधे कित्त्वविधानम् इज्यादित्यादौ सम्प्रसारणाद्यर्थमेव।

---

[10] लिङ् के स्थान में जो झि उसको जुस् आदेश हो।

[11] आशीर्वाद अर्थ में जो लिङ् उसके स्थान में जो तिङ् वह आर्धधातुक संज्ञक हो।

[12] आशीर्वाद अर्थ में जो लिङ् तत्सम्बन्धी यासुट् कित् हो।

गाद्योरिति सलोपः ॥ [13]**क्ङिति च १।१।५॥** गित्क्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः । भूयात् । भूयास्ताम् । भूयासुः । भूयाः । भूयास्तम् । भूयास्त । भूयासम् । भूयास्व । भूयास्म ॥ [14]**लुङ् ३।२।११०॥** भूतार्थे धातोर्लुङ् स्यात् ॥ [15]**माङि लुङ् ३।३।१७५॥** सर्वलकारापवादः ॥ [16]**स्मोत्तरे लङ् च ३।३।१७६॥** स्मोत्तरे माङि लङ् स्याच्चाल्लुङ् ॥

क्ङिति च । ग्क्ङ् एषां समाहारद्वन्द्वः ततः ग्क्ङ् इत् यस्येति विग्रहः । निमित्तसप्तम्येषा । 'इको गुणवृद्धी' इति सूत्रमनुवर्तते । तेन इक इत्युच्चार्य विहिते गुणवृद्धी इति लभ्यते । 'न धातुलोप आर्धधातुके' इत्यतो नेत्यनुवर्तते ।

भूयात् । भूधातोः 'आशिषि लिङ्लोटौ' इति लिङि तत्स्थाने तिपि 'लिङाशिषि' इति तिप आर्धधातुकत्वात् शपोऽभावे 'इतश्च' इतीकारलोपे यासुटि 'सुट् तिथोः' इति सुटयनुबन्धलोपे 'स्कोः संयोगाद्योरन्ते च' इति सलोपे 'क्ङिति च' इति गुणनिषेधे भूयात् इति सिद्धम् । → ५२।२६

भूयास्ताम् । भूधातोराशिषि लिङस्तसस्तामादेशे 'लिङाशिषि' इत्यार्धधातुकत्वात् शबभावे यासुटि सुटि 'स्कोः' इति यासुटः सलोपे गुणनिषेधे तत्सिद्धिः ।

भूयाः । भूधातोराशीर्लिङः सिपि 'इतश्च' इतीकारलोपे यासुटि 'स्कोः' इति सलोपे कित्त्वाद् गुणनिषेधे रुत्वे विसर्गे तत्सिद्धिः ।

भूयास्व । भूधातोराशीर्लिङो वसि यासुटि 'नित्यं ङितः' इति सलोपे कित्त्वात् 'क्ङिति च' इति गुणनिषेधे तत्सिद्धिः ।

लुङ् । 'धातोः' इति 'भूते' इति चाधिक्रियते ।

---

[13] गित् कित् ङित् निमित्तक इग्लक्षण गुण वृद्धि न हो ।

[14] भूतार्थ कालिक जो क्रिया तद्वाचकत्वेन विवक्षित जो धातु उस से लुङ् लकार हो ।

[15] माङ् के योग में धातु से लुङ् लकार हो ।

[16] स्म है पर जिससे ऐसे माङ् के योग में धातु से लङ् और लुङ् लकार हो ।

अभूत्, इसमें सार्वधातुक तिप् को इट् का आगम प्राप्त है" आदि भूवारीरप्रतिषेधः (२।४।७७) आदि न गुणनिषेधः।

[17] **च्लि लुङि ३।१।४३॥** शवाद्यपवादः। **च्लेस्सिच्** [18] **३।१।४४॥** इचावितौ॥ **गातिस्थाघुपाभूभ्यस्सिचः परस्मैपदेषु २।४।७७॥** [19] एभ्यः सिचो लुक् स्यात्। गापाविहेणादेशपिबती गृह्येते॥ **भूसुवो-स्तिङि ७।३।८८॥** [20] भूसू एतयोः सार्वधातुके तिङि परे गुणो न। अभूत्। अभूताम्। अभूवन्। अभूः। अभूतम्। अभूत। अभूवम्।

गातिस्था। गाति स्था घु पा भू एषां द्वन्द्वः। परस्येत्यध्याह्रियते। सिच इति षष्ठी। गातीति श्तिपा निर्देशात् गाधातोर्ग्रहणम्। घुइत्यनेन 'दाधाघ्वदाप्' इति घुसंज्ञकयोः दाधातोः धाधातोश्च ग्रहणम्। 'ण्यक्ष-त्रियार्षञितो यूनि लुगणिञोः' इत्यतो लुगित्यनुवर्तते।

भूसुवोस्तिङि। अत्र 'मिदेर्गुणः' इत्यतो गुण इति 'नाभ्यस्त-स्याचि पिति सार्वधातुके' इत्यतो नेति सार्वधातुक इति चानुवर्तते। सू इत्यनेन पूङ् प्राणिगर्भविमोचने इत्यस्यैव ग्रहणम्। अस्ति सिचोऽपृक्ते॥ ॥७।३।९६॥ इट्

अभूत्। भूधातोः ३।२।११० 'लुङ्' इति लुङि तस्य स्थाने तिपि अडागमे 'इतश्च' इतीकारलोपे २ शपं बाधित्वा 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इति च्लेस्सिजादेशेऽनुबन्धलोपे 'गातिस्थाघुपाभूभ्यः सिचः परस्मै-पदेषु' इति सिचो लुकि तिपः सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे प्राप्ते 'भूसुवोस्तिङि' इति गुणनिषेधे अभूत् इति सिद्धम्।

अभूवन्। भूधातोर्लुङि तस्य स्थाने झिप्रत्यये च्लिप्रत्यये तस्य सिजादेशे तस्य लुकि अडागमे 'सिजभ्यस्तविदिभ्यश्च' इति झेर्जुसि ३।४।१०९

---

१७ लुङ् पर रहते धातु से च्लिप्रत्यय हो।

१८ च्लि के स्थान में सिच् आदेश हो।

१९ इण्स्थानिक गा स्था घुसंज्ञक पा भू इन धातु से पर सिच् का लुक् हो परस्मैपद पर रहते।

२० भू और सू धातु को सार्वधातुक तिङ् पर रहते गुण न हो।

लुङ्सनोर्घस्लृ ॥२।४।३७॥ से
लुङ् आर्धधातुक।

68

अभूव । अभूम ॥ [२१]**न माङ्योगे ६।४।४७॥** अडाटौ न स्तः । मा भवान् भूत् । मा स्म भवत् । मा स्म भूत् ॥ **लिङ्निमित्ते लृङ् क्रियातिपत्तौ ३ । ३ । १३९ ॥** [२२]हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायाम् । अभविष्यत् ।

प्राप्ते 'आतः' इति सूत्रनियमात्तदभावे 'झोऽन्तः' इति झस्यान्तादेशे 'इतश्च' इतीकारलोपे तकारस्य संयोगान्तलोपे 'भुवो वुग्लुङ्लिटोः' इति वुगागमेऽनुबन्धलोपे तत्सिद्धिः ।

मा भवान् भूत् । माङ्पूर्वाद् भूधातोः 'माङि लुङ्' इति लुङि तस्य स्थाने तिपि च्लौ च्लेः सिचि सिचो लुकि अडागमे प्राप्ते 'न माङ्योगे' इति तन्निषेधे इलोपे गुणनिषेधे तत्सिद्धिः । मध्ये भवानिति प्रयोगस्तु अडभावसूचनाय ।

मास्म भवत् । मास्मपूर्वाद् भूधातोः 'स्मोत्तरे लङ् च' इति लङि लुङि च पूर्ववत् तिवादिके 'न माङ्योगे' इति अडागमनिषेधे मास्म भवत् इति मास्म भूदिति च सिद्धम् । ३।३।१५६

लिङ्निमित्ते । 'हेतुहेतुमतोर्लिङ्' 'इच्छार्थेषु लिङ्लोटौ' इत्यादि लिङो निमित्तं तस्मिन् इति विग्रहः । क्रियाया अतिपत्तिः अनिष्पत्तिः असिद्धिरिति फलितम् । तस्यामिति विग्रहः । 'भविष्यति मर्यादावचनेऽवरस्मिन्' इत्यतो भविष्यतीत्यनुवर्त्तते ।

अभविष्यत् । भूधातोः 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति लृङि तत्स्थाने तिपि अनुबन्धलोपे 'इतश्च' इतीकारलोपे शपं बाधित्वा ३।१।३३ 'स्यतासी लृलुटोः' इति स्यप्रत्यये 'आर्धधातुकं शेषः' इत्यार्धधातुकत्वे 'आर्धधातुकस्येड्वलादेः' इतीडागमे गुणेऽवादेशे अडागमे 'आदेशप्रत्य-

---

[२१] माङ् के योग में अट्, आट् नहीं होते हैं ।

[२२] हेतुहेतुमद्भावादिक जो लिङ् का निमित्त उसके रहते भविष्यत्कालिक क्रिया बोधकत्वेन विवक्षित धातु से लृङ् लकार हो क्रिया की असिद्धि गम्यमान रहते ।

अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यम् । अभविष्याव । अभविष्याम । सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत् इत्यादि ज्ञेयम् ॥ अत सातत्यगमने ॥ २ ॥ अतति ॥ [२३] **अत आदेः ७।४।७०॥** अभ्यासस्यादेरतो दीर्घः स्यात् । आत । आततुः ।

ययोः' इति षत्वे अभविष्यत् इति सिद्धम् ।

अभविष्यताम् । भूधातोर्लृङस्तामादेशे स्यप्रत्यये अटि इटि गुणेऽवादेशे षत्वे तत्सिद्धिः ।

अभविष्यन् । भूधातोर्लृङो झौ स्ये अटि इटि गुणेऽवादेशे 'झोऽन्तः' इति झेरन्तादेशे 'इतश्च' इतीकारलोपे तकारस्य संयोगान्तलोपे षत्वे तत्सिद्धिः । **अभविष्यः ।** भूधातोर्लृङः सिपि स्ये अटि इटि गुणेऽवादेशे 'इतश्च' इतीकारलोपे षत्वे रुत्वे विसर्गे च तत्सिद्धिः । **अभविष्यतम् ।** भूधातोर्लृङः थसि तस्य तमादेशे स्ये अटि इटि गुणेऽवादेशे षत्वे तत्सिद्धिः । **अभविष्यम् ।** भूधातोर्लृङो मिपि मिपोऽमादेशे स्ये अटि इटि गुणेऽवादेशे 'अमि पूर्वः' इति पूर्वरूपे षत्वे तत्सिद्धिः । **अभविष्याव ।** भूधातोर्लृङो वसि स्ये अटि इटि गुणेऽवादेशे 'अतो दीर्घो यञि' इति दीर्घे 'नित्यं ङितः' इति सलोपे 'आदेशप्रत्यययोः' इति षत्वे तत्सिद्धिः ।

अत सातत्यगमने । सातत्यगमनं निरन्तरगमनम् ।

अत आदेः । अत्र 'अत्र लोपोऽभ्यासस्य' इत्यतोऽभ्यासस्येति 'दीर्घ इणः किति' इत्यतो दीर्घ इति चानुवर्तते ।

आत । अत्धातोर्लिटि तत्स्थाने तिपि 'परस्मैपदानाम्' इत्यादिना तिपो णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इति अभ्याससंज्ञायाम् 'हलादिः शेषः' इति लोपे अ-

---

[२३] अभ्यास के आदिभूत अकार को दीर्घ हो ।

आतुः । आतिथ । आतथुः । आत । आत । आतिव । आतिम । आतिता । अतिष्यति । अततु । [२४]**आडजादीनाम् ६।४।७२॥** अजादेरङ्गस्याट् लुङ्लङ्लृङ्क्षु । आतत् । अतेत् । अत्यात् । अत्यास्ताम् । लुङि सिचि इडागमे कृते ॥ [२५]**अस्तिसिचोऽपृक्ते ७।३।९६॥** विद्य-

अत् अ इति स्थिते 'अतो गुणे' इति प्राप्तं पररूपं बाधित्वा 'अत आदेः' इत्यभ्यासदीर्घे सवर्णदीर्घे तत्सिद्धिः ।

आतिथ । अत्धातोर्लिटः सिपि 'परस्मैपदानाम्' इति सिपस्थलादेशे द्वित्वेऽभ्यासत्वे 'हलादिः शेषः' इति लोपे पररूपं बाधित्वा 'अत आदेः' इत्यभ्यासदीर्घे सवर्णदीर्घे 'आर्धधातुकस्येड्वलादेः' इति ईडागमेऽनुबन्धलोपे आतिथ इति सिद्धम् ।

अतिता । अत्धातोर्लुटि तत्स्थाने तिपि 'स्यतासी लृलुटोः' इति तास्प्रत्यये 'आर्धधातुकं शेषः' इति तस्यार्धधातुकत्वे 'आर्धधातुकस्येड्वलादेः' इतीडागमेऽनुबन्धलोपे 'लुटः प्रथमस्य डारौरसः' इति तिपो डादेशेऽनुबन्धलोपे डित्वसामर्थ्यादभस्यापि टेर्लोपे तत्सिद्धिः ।

आडजादीनाम् । 'अङ्गस्य' इत्यधिक्रियते । 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यतो लुङ्लङ्लृङ्क्ष्वित्यनुवर्तते ।

आतत् । अत्धातोर्लङि तत्स्थाने तिपि शपि अनुबन्धलोपे अटं बाधित्वा ' आडजादीनाम् ' इत्याडागमे ' आटश्च ' इति वृद्धौ ' इतश्च ' इतीकारलोपे आतत् इति सिद्धम् ।

अतेत् । अत्धातोर्विधिलिङि तत्स्थाने तिपि शपि 'इतश्च' इतीकारलोपे ' यासुट् परस्मैपदेषूदात्तो ङिच्च ' इति यासुटि 'लिङः सलोपोऽनन्त्यस्य' इति सलोपं बाधित्वा 'अतो येयः' इति यास इयादेशे 'आद्गुणः' इति गुणे 'लोपो व्योर्वलि' इति यलोपे अतेत् इति सिद्धम् ।

अस्तिसिचोऽपृक्ते । सिच्च अस् चेति समाहारद्वन्द्वः । सिच्शब्दस्य

---

[२४] अजादि अङ्ग को आट् आगम हो लुङ् लङ् लृङ् पर रहते ।

[२५] विद्यमान सिच्प्रत्यय और अस्धातु से पर अपृक्त हल् को ईट् आगम हो ।

मानात् सिचोऽस्तेश्च परस्यापृक्तस्य हल ईडागमः ॥ **इट ईटि ८।२।२८॥** [२६]इटः परस्य सस्य लोपः स्यादीटि परे । (सिज्लोप एकादेशे सिद्धो वाच्यः) । आतीत् । आतिष्टाम् ॥ **सिजभ्यस्तविदिभ्यश्च ३।४।१०९॥** [२७]सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्संबन्धिनो झेर्जुस् । आतिषुः । आतीः । आतिष्टम् । आतिष्ट । आतिषम् । आतिष्व । आतिष्म । आतिष्यत् ॥ षिध

सौत्रभत्वेन पदत्वबाधात्कुत्वाभावः । ततो विद्यमानार्थकेन अस्तीत्यव्ययेन कर्मधारयः । अस्तिसिचसः इति वक्तव्ये 'सुपां सुलुक्' इत्यादिना पञ्चम्याः लुक् । 'तस्मादित्युत्तरस्य' इति परिभाषया अस्तिसिचस इति पञ्चमी अपृक्ते इति सप्तम्याः षष्ठीं प्रकल्पयति । 'उतो वृद्धिर्लुकि हलि' इत्यतो हलीत्यनुवर्तते । तस्य षष्ठ्यन्तत्वेन विपरिणामः । 'ब्रुव ईट्' इत्यत ईडित्यनुवर्तते ।

इट ईटि । 'संयोगान्तस्य लोपः' इत्यतो लोप इति 'रात्सस्य' इत्यतः सस्येति चानुवर्तते ।

आतीत् । अत्धातोर्लुङस्तिपि 'इतश्च' इतीकारलोपे च्लौ च्लेः सिचि 'आर्धधातुकस्येड्वलादेः' इति सिच इडागम 'अस्तिसिचोऽपृक्ते' इति ईडागमे 'आडजादीनाम्' इत्याडागमे 'आटश्च' इति वृद्धौ आतिस् ईत् इति स्थिते 'इट ईटि' इति सलोप 'सिज्लोपे एकादेशे सिद्धो वाच्यः' इति सिज्लोपस्यासिद्धत्वाभावेन सवर्णदीर्घे आतीत् इति सिद्धम ।

सिजभ्यस्त । 'झेर्जुस्' इति सूत्रम् 'नित्यं ङितः' इत्यतो ङितः इति चानुवर्तते ।

आतिषुः । अत्धातोर्लुङो झौ च्लौ तस्य सिच्यनुबन्धलोपे इटि षत्वे 'आडजादीनाम्' इत्यादि वृद्धौ 'सिजभ्यस्तविदिभ्यश्च' इति झेर्जुसादेशेऽनुबन्धलोपे रुत्वे विसर्गे च तत्सिद्धिः ।

---

[२६] इट् से पर स का लोप हो ईट् पर रहते ।

[२७] सिच्प्रत्यय अभ्यस्त और विद्धातु से पर झि के स्थान में जुस् आदेश हो ।

गत्याम् ॥ ३ ॥ [28] **ह्रस्वं लघु १।४।१०॥** [29] **संयोगे गुरु १।४।११॥** संयोगे परे ह्रस्वं गुरु स्यात् ॥ [30] **दीर्घं च ७।४।१७॥** गुरु स्यात् ॥ **पुगन्तलघूपधस्य च ७।३।८६॥** [31] पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः सार्वधातुकार्धधातुकयोः । धात्वादेरिति सः । सेधति । षत्वम् । सिषेध ॥ [32] **असंयोगाल्लिट् कित् १।२।५॥** असंयोगात्परोऽपिल्लिट् कित्

आतिष्यत् । अत्धातोर्लृङस्तिपि 'इतश्च' इतीकारलोपे 'स्यतासी लृलुटोः' इति 'स्यप्रत्यये तस्यार्धधातुकत्वे इटि षत्वे आटि वृद्धौ तत्सिद्धिः ।

पुगन्त । 'मिदेर्गुणः' इत्यतो गुण इत्यनुवर्तते । 'अङ्गस्य' इत्यधिकृतमवयवषष्ठ्यन्तमाश्रीयते । पुक् अन्तो यस्य तत् पुगन्तम् । लघ्वी उपधा यस्य तल्लघूपधम् । पुगन्तं च लघूपधं चेति समाहारद्वन्द्वात् षष्ठी । 'इको गुणवृद्धी' इत्यत इक इत्युपतिष्ठते । तच्च स्थानषष्ठ्यन्तम् ।

सेधति । षिधधातोर्लटि । तत्स्थाने तिपि शपि अनुबन्धलोपे 'धात्वादेः षः सः' इति षस्य सत्वे 'पुगन्तलघूपधस्य च' इति गुणे सेधति इति सिद्धम् ।

सिषेध । षिधधातोर्लिटि तत्स्थाने तिपि षस्य सत्वे 'लिट् च' इति तिप आर्धधातुकत्वेन शपोऽभाव 'परस्मैपदानाम्' इत्यादिना तिपो णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे पूर्वस्य अभ्याससंज्ञायां 'हलादिः शेषः' इति लोपे 'पुगन्तलघूपधस्य च' इति गुणे षत्वे सिषेध इति सिद्धम् ।

असंयोगात् । अत्र 'सार्वधातुकमपित्' इत्यतः अपिदित्य

---

[28] ह्रस्व लघुसंज्ञक होता है ।

[29] संयोग पर रहते ह्रस्व गुरुसंज्ञक होता है

[30] दीर्घ भी गुरुसंज्ञक होता है ।

[31] पुक् अन्त में हो जिसके अथवा लघुभूतउपधा हो जिसकी ऐसा जो अङ्ग उसके इक् को गुण हो सार्वधातुक आर्धधातुक पर रहते ।

[32] असंयोग से पर पित् भिन्न लिट् कित् हो ।

स्यात् । सिषिधतुः । सिषिधुः । सिषेधिथ । सिषिधथुः । सिषिध । सिषेध । सिषिधिव । सिषिधिम । सेधिता । सेधिष्यति । सेधतु । असेधत् । सेधेत् । सिध्यात् । असेधीत् । असेधिष्यत् । एवम्—चिती संज्ञाने ॥ ४ ॥ शुच शोके ॥ ५ ॥ गद व्यक्तायां वाचि ॥ ६ ॥ गदति ॥ **नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवह-**

नुवर्तते ।

सिषिधतुः । षिध्धातोर्लिटस्तसि षस्य सत्वे 'परस्मैपदानाम्' इत्यादिना तसः अतुसादेशे द्वित्वेऽभ्यासकार्ये सस्य षत्वे 'असंयोगाल्लिट् कित्' इति अतुसः कित्त्वेन 'पुगन्तलघूपधस्य च' इति प्राप्तगुणस्य 'क्ङिति च' इति निषेधे रुत्वे विसर्गे च सिषिधतुः इति सिद्ध्यति ।

सिषेधिथ । षिध्धातोर्लिटः सिपि षस्य सत्वे 'परस्मैपदानाम्' इति सिपस्थलि द्वित्वेऽभ्यासकार्ये सस्य षत्वे 'लिट् च' इत्यार्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति थल इडागमे 'पुगन्तलघूपधस्य च' इति गुणे सिषेधिथ इति सिद्धम् ।

सिषिधिव । षिध्धातोर्लिटो वसि षस्य सत्वे 'परस्मैपदानाम्' वसावादेशे द्वित्वेऽभ्यासकार्ये सस्य षत्वे 'लिट् च' इति वस आर्धधातुकत्वादिडागमेऽनुबन्धलोपे 'असंयोगाल्लिट् कित्' इति कित्त्वेन 'पुगन्तलघूपधस्य च' इति प्राप्तगुणस्य 'क्ङिति च' इति निषेधे तत्सिद्धिः ।

असेधीत् । षिध्धातोर्लुङस्तिपि षस्य सत्वे 'इतश्च' इतीकारलोपे अडागमे शपं बाधित्वा च्लौ च्लेः सिजादेशे गुणे सिच आर्धधातुकत्वेन 'आर्धधातुकस्येड्वलादेः' इति इडागमे 'अस्तिसिचोऽपृक्ते' इति ईडागमेऽनुबन्धलोपे 'वदव्रजहलन्तस्याचः' इति प्राप्तवृद्धेः 'नेटि' इति निषेधे 'इट ईटि' इति सलोपे 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति सिज्लोपस्यासिद्धत्वाभावेन सवर्णदीर्घे असेधीत् इति सिद्धम् ।

नेर्गदनद । अत्र 'रषाभ्यां नो णः समानपदे' इत्यतः रषाभ्यां नो ण

तिशाम्यतिचिनोतिदेग्धिषु च ७ । ४ । १७ ॥ उपसर्गस्थान्निमित्तात्परस्य नेर्नस्य णो गदादिषु परेषु । प्रणिगदति ॥ **कुहोश्चुः ७।४।६२॥** अभ्यासकवर्गहकारयोश्चवर्गादेशः ॥ **अत उपधायाः ७।२।११६ ॥** उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परे । जगाद । जगदतुः । जगदुः । जगदिथ । जगदथुः । जगद ॥ **णलुत्तमो वा ७।१।९१ ॥** उत्तमो णल् वा णित्स्यात् । जगाद, जगद ।

इति 'उपसर्गादसमासेऽपि णोपदेशस्य' इत्यत उपसर्गादिति चानुवर्तते । उपसर्गपदमत्र उपसर्गस्थे लाक्षणिकम् ।

प्रणिगदति । प्रनिपूर्वाद् गद्धातोर्लटस्तिपि शपि अनुबन्धलोपे 'नेर्गदनदपपतदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च' इति प्रोपसर्गस्थरेफात्परस्य नेर्नकारस्य णत्वे प्रणिगदति इति सिद्धम् ।

कुहोश्चुः । 'अत्र लोपोऽभ्यासस्य' इत्यतोऽभ्यासस्येत्यनुवर्तते ।

अत उपधायाः । 'मृजेर्वृद्धिः' इत्यतो वृद्धिरिति 'अचोञ्णिति' इत्यतः ञ्णिति इति चानुवर्तते ।

जगाद । गद्धातोर्लिटस्तिपि 'परस्मैपदानाम्' इति तिपो णलि- अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वेऽभ्यासत्वे 'हलादिः शेषः' इति लोपे 'कुहोश्चुः इति अभ्यासगकारस्य चुत्वेन जकारे जगद् अ इति स्थिते 'अत उपधाया' इति उपाधाभूताकारस्य वृद्धौ जगाद इति सिद्धम् ।

णलुत्तमो वा । अत्र 'गोतोणित्' इत्यतो णिदित्यनुवर्तते ।

जगाद-जगद । गद्धातोर्लिटो मिपि 'परस्मैपदानाम्' इति मिपो णलादेशेऽनुबन्धलोपे द्वित्वेऽभ्यासत्वे 'हलादिः शेषः' इति लोपे 'कुहोश्चुः'

---

३३ उपसर्ग में रहनेवाले जो णत्व के निमित्त रेफ षकार उनसे पर नि के नकार को ण हो गदादिधातु पर रहते ।

३४ अभ्याससंज्ञक कवर्ग और हकार को चवर्गादेश हो ।

३५ उपधाभूत ह्रस्व अ को वृद्धि हो ञित् और णित् प्रत्यय पर रहते ।

जगदिव । जगदिम । गदिता । गदिष्यति । गदतु । अगदत् । गदेत् । गद्यात् ॥ **अतो हलादेर्लघोः ७।२।७** ॥ हलादेर्लघोरकारस्य वृद्धिर्वेडादौ परस्मैपदे सिचि । अगादीत्, अगदीत् । अगदिष्यत् ॥ णद अव्यक्ते शब्दे ॥ ७ ॥ **णो नः ६।१।६५** ॥ धात्वादेर्णस्य नः । णोपदेशास्त्वनर्द्नाटिनाथ्नाध्नन्द्नक्नॄनृतः ॥ **उपसर्गादसमासेपि णोपदेशस्य ८।४।१४** ॥ उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः । प्रणदति । प्रणिनदति । नदति ननाद ॥

इति अभ्यासगकारस्य चुत्वेन जकारे जगद् अ इति स्थिते 'णलुत्तमो वा' इति णलः पाक्षिके णित्त्वे 'अत उपधायाः' इति वृद्धौ जगाद इति णित्त्वाभावपक्षे जगद इति च सिद्धम् ।

अतो हलादेर्लघोः । अत्र 'सिचि वृद्धिः परस्मैपदेषु' इति सूत्रम् 'नेटि' इत्यत इटीति 'ऊर्णोतेर्विभाषा' इत्यतो विभाषेति चानुवर्तते ।

अगादीत् । गद्धातोर्लुङस्तिपि 'इतश्च' इतीकारलोपे अटि शपं बाधित्वा च्लौ च्लेः सिच्यनुबन्धलोपे 'आर्धधातुकं शेषः' इति सिच आर्धधातुकत्वे 'आर्धधातुकस्येड्वलादेः' इति सस्य इडागमे 'अस्तिसिचोऽपृक्ते' इति तकारस्य ईडागमेऽनुबन्धलोपे अगद् इस् ईत् इति जाते 'अतो हलादेर्लघोः' इति पाक्षिकवृद्धौ 'इट ईटि' इति सलोपे 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति सिज्लोपस्यासिद्धत्वाभावेन सवर्णदीर्घे अगादीत् इति वृद्ध्यभावपक्षे अगदीत् इति च सिद्धम् ।

णद् अव्यक्ते शब्दे । अव्यक्तशब्दः अमनुष्यपशुपक्ष्यादिकृतशब्दप्रयोगः ।

णो नः । ण इति षष्ठ्यन्तम् । 'धात्वादेः षः सः' इत्यतो धात्वादेरित्यनुवर्तते ।

नदति । णद्धातोर्लटस्तिपि शप्यनुबन्धलोपे 'णो नः' इति णस्य नकारे तत्सिद्धिः ।

अत एकहल्मध्येऽनादेशादेर्लिटि ६।४।१२० ॥ लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्यासंयुक्तहल्मध्यस्थस्यात एत्वमभ्यासलोपश्च किति लिटि। नेदतुः। नेदुः॥ **थलि च सेटि ६।४।१२१ ॥** प्रागुक्तं स्यात्। नेदिथ। नेदथुः नेद। ननाद, ननद। नेदिव। नेदिम।

'उपसर्गादसमासेऽपि णोपदेशस्य' इतिसूत्रोक्तणोपदेशपदेन के धातवो गृह्यन्त इत्याकाङ्क्षायां पूर्वमेवाह—**णोपदेशास्त्विति**। तथा च नर्द शब्दे। नट अवस्यन्दने चरादिः। नाधृ नाथृ याच्ञादौ। टुनदि समृद्धौ। नक्ष नाशने। न नये। नृती गात्रविक्षेपे। एतेभ्योऽष्टाभ्यो भिन्नाः णकारादिधातवः णोपदेशपदेनोच्यन्ते इति तदर्थः।

उपसर्गादसमासेऽपि। रेषाभ्यांनो णः इत्यनुवर्तते। अपिशब्दात्समासेऽपीत्यर्थः।

प्रणदति। प्रोपसर्गपूर्वात् णद्धातोर्लटस्तिपि शप्यनुबन्धलोपे 'णो नः' इति णकारस्य नकार 'उपसर्गादसमासेऽपि णोपदेशस्य' इति प्रोपसर्गस्थरेफात्परस्य नद्धातोर्नस्य णत्वे तत्सिद्धिः।

अत एकहल्मध्ये। लिटीत्यावर्तते। पूर्वत्र निमित्तसप्तमी। परत्र परसप्तमी। एकशब्दोऽसहायवाची। ततश्च एकौ-असंयुक्ता हलौ एकहलौ तयोर्मध्ये इति विग्रहः। अङ्गस्येत्यधिक्रियते। 'ध्वसोरेद्धावभ्यासलोपश्च' इत्यत एदिति अभ्यासलोप इति 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्यतः कितीति चानुवर्तते।

नेदतुः। णद्धातोर्लिटस्तसि णस्य नत्वे तस अतुसि द्वित्वेऽभ्यसकार्ये 'अतएकहल्मध्येऽनादेशादेर्लिटि' इति एत्वेऽभ्यासलोपे रुत्वे विसर्गे च नेदतुरिति सिद्धम्।

थलि च। लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्यासंयुक्तहल्मध्यस्थस्यात एत्वं स्यादभ्यासलोपश्च सेटि थलि इति तदर्थः।

नेदिथ। णद्धातोर्लिटः सिपि णस्य नत्वे सिपस्थलादेशे द्वित्वेऽभ्यासकार्ये 'आर्धधातुकस्येड्वलादेः' इति थल इडागमे 'थलि च सेटि'

नदिता । नादिष्यति । नदतु । अनदत् । नदेत । नद्यात् । अनादीत्, अनदीत् । अनदिष्यत् ॥ टुनदि समृद्धौ ॥ ८ ॥ **आदिर्ञिटुडवः १।३।५॥** उपदेशे धातोराद्या एते इतः स्युः ॥ **इदितो नुम् धातोः ७।१।५८॥** नन्दति । ननन्द । नन्दिता । नन्दिष्यति । नन्दतु । अनन्दत् । नन्देत् । नन्द्यात् । अनन्दीत् । अनान्दिष्यत् ॥ अर्च पूजायाम् ॥ ९ ॥ अर्चति ॥ **तस्मान्नुड् द्विहलः ७।४।७१॥** द्विहलो धातोर्दीर्घीभूतादकारात्परस्य नुट् स्यात् । आनर्च । आनर्चतुः । अर्चिता । अर्चिष्यति । अर्चतु । आर्चत् । अर्चेत् । अर्च्यात् । आर्चीत् । आर्चिष्यत् ॥ व्रज गतौ ॥ १० ॥ व्रजति । वव्राज । व्राजिता ।

इत्येत्वेऽभ्यासलोपे च नेदिथेति सिद्धम् ।

अनादीत् । णद् इत्यस्य धातुत्वे 'णो नः' इति णस्य नत्वे लुङि तिपि 'इतश्च' इतीकारलोपे अटि शपं बाधित्वा च्लौ, च्लेः सिचि 'आर्धधातुकस्येड्वलादेः' इति इटि 'आस्तिसिचोऽपृक्ते' इति ईटि 'अतोहलादेर्लघोः' इति पाक्षिकवृद्धौ 'इट ईटि' इति सलोपे सिज्लोपस्यासिद्धत्वाभावेन सवर्णदीर्घे अनादीत् इति वृद्ध्यभावपक्षे अनदीत् इति च सिद्धम् ।

आदिः । 'भूवादयो धातवः' इत्यतोऽनुवृत्तं धातव इति षष्ठ्या विपरिणम्यते । 'उपदेशेऽजनुनासिक इत्' इत्यत उपदेशे इति इदिति चानुवर्तते ।

नन्दति । टुनद् इत्यस्य धातुत्वे 'आदिर्ञिटुडवः' इति टु इत्यस्येत्संज्ञायां लोपे ततो लटि तत्स्थाने तिपि शपि 'इदितो नुम् धातोः' इति नुम्यनुबन्धलोपे नन्दतीति सिद्धम् ।

तस्मान्नुट् । द्वौ हलौ यस्य तस्येति विग्रहः । तच्छब्देन 'अत आदेः' इति कृतदीर्घ आकारः परामृश्यते ।

आनर्च । अर्च् धातोर्लिटस्तिपि 'परस्मैपदानाम्' इति तिपो णलि द्वित्वेऽभ्यासत्वे 'हलादिः शेषः' इतिलोपे 'अत आदेः' इत्यभ्यासाकारस्य दीर्घे 'तस्मान्नुड्द्विहलः' इति नुट्यनुबन्धलोपे तत्सिद्धिः ।

आर्चीत् । अर्च् धातोर्लुङस्तिपि 'इतश्च' इतीकारलोपे आटि वृद्धौ

व्रजिष्यति । व्रजतु । अव्रजत् । व्रजेत् । व्रज्यात् ॥ **वदव्रजहलन्तस्याचः ७।२।३॥** वदेर्व्रजेर्हलन्तस्य चाङ्गस्याचः स्थाने वृद्धिः स्यात् सिचि परस्मैपदेषु । अव्राजीत् । अव्रजिष्यत् ॥ कटे वर्षावरणयोः ॥ ११ ॥ कटति । चकाट । चकटतुः । कटिता । कटिष्यति । कटतु । अकटत् । कटेत् । कट्यात् ॥ **ह्मयन्तक्षणश्वसजागृणिश्व्येदिताम् । ७।२।५ ॥** हमयान्तस्य क्षणादेर्ण्यन्तस्य श्वयतेरेदितश्च वृद्धिर्नेडादौ सिचि । अकटीत् । अकटिष्यत् ॥ गुपू रक्षणे ॥ १२ ॥ **गुपूधूपविच्छिपणिपनिभ्य**

च्लौ च्लेः सिच्यनुबन्धलोपे इटि ईटि च कृते 'इट ईटि' इति सलोपे सिज्लोपस्यासिद्धत्वाभावेन सवर्णदीर्घे आर्चीदिति सिद्धम् ।

वव्राज । व्रज्धातोर्लिटस्तिपि तस्य णलि द्वित्वेऽभ्यासत्वे 'हलादिः शेषः' इति लोपे 'अत उपधायाः' इति वृद्धौ वव्राजेति सिद्धम् ।

वदव्रज । 'अङ्गस्य' इत्यधिक्रियते । 'सिचि वृद्धिः परस्मैपदेषु' इति सूत्रमनुवर्तते ।

अव्राजीत् । व्रज्धातोर्लुङस्तिपि इकारलोपे अटि च्लौ च्लेः सिचि 'आर्धधातुकस्येड्वलादेः' इति इटि 'अस्तिसिचोऽपृक्ते' इति ईटि 'वदव्रजहलन्तस्याचः' इति वृद्धौ 'इट ईटि' इति सलोपे सिज्लोपस्यासिद्धत्वाभावात्सवर्णदीर्घे अव्राजीत् इति सिद्धम् ।

चकाट । कट्धातोर्लिटस्तिपो णलि द्वित्वेऽभ्यासत्वे 'हलादिः शेषः' इति लोपे 'कुहोश्चुः' इति कस्य चुत्वेन चकारे 'अत उपधायाः' इति वृद्धौ चकाट इति सिद्धम् ।

ह्मयन्तक्षण । अत्र 'सिचिवृद्धिः' इति 'नेटि' इति चानुवर्तते । ततश्च हान्त मान्त यान्त क्षण श्वस जागृ ण्यन्त श्वि एदित् एषां वृद्धिर्न स्यादिडादौ सिचि इति तदर्थः ।

अकटीत् । कट्धातोर्लुङस्तिपि इकारलोपे अटि च्लौ च्लेः सिचि इडागमे ईडागमे च 'अतो हलादेर्लघोः' इति वृद्धौ प्राप्तायां 'ह्मयन्तक्षणश्वसजागृणिश्व्येदिताम्' इति तन्निषेधे 'इट ईटि' इति सलोपे सिज्लोपस्य सिद्धत्वात्सवर्णदीर्घे अकटीत् इति सिद्धम् ।

आयः ३।१।२८ ॥ एभ्य आयः प्रत्ययः स्यात् स्वार्थे ॥ **सनाद्यन्ता धातवः ३।१।३२** ॥ सनादयः कमोर्णिङन्ताः प्रत्यया अन्ते येषां ते धातुसंज्ञकाः । धातुत्वाल्लडादयः । गोपायति ॥ **आयादय आर्धधातुके वा ३।१।३१** ॥ आर्धधातुकविवक्षायामायादयो वा स्युः । (कास्यनेकाच आम् वक्तव्यः) । लिटि आस्कासोराम्विधानान्मस्य नेत्त्वम् ॥ **अतो लोपः ६।४।४८** ॥ आर्धधातुकोपदेशे यददन्तं तस्यातो लोप आर्धधातुके ॥ **आमः २।१।८१** ॥ आमः परस्य लुक् ॥ **कृञ्चानुप्रयुज्यते लिटि ३।१।४०** ॥ आमन्ताल्लिट्पराः कृभ्वस्तयोऽनुप्रयुज्यन्ते । तेषां द्वित्वादि ॥

सनादय इति । सन्क्यच्काम्यच्क्यङ्क्यषोऽथाचारक्विब्णिज्यङौ तथा। यगायेयङ्णिङ श्चेति द्वादशामी सनादयः ।

गोपायति । गुप् इत्यस्मात् 'गुपूधूपविच्छिपणिपनिभ्य आयः' इति आयप्रत्यये 'आर्धधातुकं शेषः' इति तस्यार्धधातुकत्वेन 'पुगन्तलघूपधस्य च' इति गुणे 'सनाद्यन्ता धातवः' इति गोपाय इत्यस्य धातुसंज्ञायां धातुत्वाल्लटि लटस्तिपि शपि 'अतोगुणे' इति पररूपे गोपायति इति सिद्धम् ।

आयादयः । आर्धधातुके इत्यत्र विषयसप्तमी । आय इयङ् णिङ् एते त्रय आयादयः ।

अतो लोपः । 'आर्धधातुके' इत्यधिक्रियते । 'अनुदात्तोपदेश' इत्यादित उपदेशइत्यनुवर्तते । आर्धधातुके इत्यावर्तते । एकमुपदेशेऽन्वेति । द्वितीयं तु लोपे परनिमित्तम् ।

आमः । 'ण्यक्षत्रियार्षञितो यूनिलुगणिञोः' इत्यतो लुगित्यनुवर्तते ।

कृञ्चानु । 'कास्प्रत्ययादाममन्त्रे लिटि' इत्यत आमित्यनुवृत्तं पञ्चम्या विपरिणम्यते । प्रत्ययग्रहणपरिभाषया तदन्तविधिः । कृञ् इत्यनेन कृभ्वस्तीनां ग्रहणम ।

उरत् ७।४।६६ ॥ अभ्यासऋवर्णस्यात् स्यात् प्रत्यये। रपरः। हलादिः शेषः। वृद्धिः। गोपायाञ्चकार। द्वित्वात्परत्वाद्यणि प्राप्ते—। **द्विर्वचनेऽचि १।१।५९** द्वित्वनिमित्तेऽचि अच आदेशो न द्वित्वे कर्तव्ये। गोपायाञ्चक्रतुः ॥

उरत् । उः अत् इति च्छेदः। 'अत्र लोपोऽभ्यासस्य' इत्यतोऽभ्यासस्येत्यनुवर्तते। 'अङ्गस्य' इत्यधिक्रियते। तद्वशात्प्रत्यये परत इति लभ्यते। प्रत्यये परत एवाङ्गसंज्ञाविधानात्।

गोपायाञ्चकार । गुप् इत्यस्मात् 'आयादय आर्धधातुके वा' इत्यत आयप्रत्यये तस्यार्धधातुकत्वात् 'पुगन्तलघूपधस्य च' इति गुणे 'सनाद्यन्ता-धातवः' इति धातुत्वाल्लिटि 'कास्यनेकाच आम्वक्तव्यः' इत्याम्प्रत्यये लिटि आस्कासोराम्विधानान्मकारस्येत्वाभावे 'अतो लोपः' इत्यल्लोपे 'आमः' इति लिटो लुकि लिटः कृत्त्वात्प्रत्ययलक्षणेन गोपायामित्यस्य कृदन्तत्वात्प्रातिपदिकत्वेन सुबुत्पत्तौ 'आमः' इति तस्यापि लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परकृप्रयोगे लिटस्तिपो णलि कृइत्यस्य द्वित्वेऽभ्यासत्वे 'उरत्' इत्यभ्यासऋकारस्य अकारे रपरत्वे 'हलादिः शेषः' इति रलोपे 'कुहोश्चुः' इति कस्य चुत्वेन चकारे मस्यानुस्वारे 'वा पदान्तस्य' इति पाक्षिके,ऽनुस्वारस्य परसवर्णे ञकारे परत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरत्वे 'अत उपधायाः' इति वृद्धौ गोपायाञ्चकार इति सिद्धम् ॥

द्विर्वचनेऽचि । 'अचः परस्मिन्पूर्वविधौ' इत्यतः अचः इति 'स्थानिवदादेशोऽनल्विधौ' इत्यत आदेश इति 'न पदान्तद्विर्वचन' इत्यतो-नेति चानुवर्तते। द्विर्वचन इत्यावर्तते। पूर्वस्य द्वित्वनिमित्ते इत्यर्थः परस्य द्वित्वे कर्त्तव्ये इत्यर्थः।

गोपायाञ्चक्रतुः । गुप् इत्यस्मादायप्रत्यये गुणे धातुत्वाल्लिटि आम्प्रत्ययेऽल्लोपे लिटो लुकि लिट्परकृप्रयोगे लिटस्तसोऽतुसि गोपायाम् कृ अतुस् इति स्थिते द्वित्वापेक्षया परत्वाद् यणि प्राप्ते 'द्विर्वचनेऽचि' इति तन्निषेधे द्वित्वेऽभ्यासत्वे 'उरत्' इत्यत्वे रपरत्वे 'हलादिः शेषः' इति रलोपे चुत्वेऽनुस्वारे परसवर्णे यणि रुत्वे विसर्गे च तत्सिद्धिः।

एकाच उपदेशेऽनुदात्तात् ७ । २ । १० ॥ उपदेशे यो धातुरेकाजनुदात्तश्च तत आर्धधातुकस्येण्न । ऊदॄदन्तैर्यौतिरुक्ष्णुशीस्नुनुक्षुश्विडीङ्श्रिभिः । वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥ कान्तेषु शक्लेकः । चान्तेषु पच्मुच्रिच्वच्विच्सिचः षट् । छान्तेषु प्रच्छेकः । जान्तेषु त्यज्निजिर्भज्भञ्ज्भुज्भ्रस्ज्मस्ज्यज्युज्रुज्रञ्ज्विजिर्स्वञ्ज्सञ्जसृजः पञ्चदश । दान्तेषु अद् क्षुद् खिद् छिद् तुद् नुद् पद्यभिद्विद्यतिविनद्विन्द्शद्सद्स्विद्यस्कन्दहदः षोडश । धान्तेषु क्रुध्क्षुध्बुध्यबन्ध्युध्रुध्राध्व्यध्साध्शुध्सिध्या एकादश । नान्तेषु मन्यहनौ द्वौ । पान्तेषु आप्छुप्क्षिप्तपतिप्तृप्यदृप्यलिप्लुप्वप्शप्स्वप्सृपस्त्रयोदश । भान्तेषु यभ्रभ्लभस्त्रयः । मान्तेषु गम्नम्यम्रमश्चत्वारः । शान्तेषु क्रुश्दंशदिश्दृश्मृश्रिश्रुश्लिश्विश्स्पृशो दश । षान्तेषु कृष्त्विष्तुष्द्विष्दुष्पुष्यपिष्विष्शिष्शुष्श्लिष्या एकादश ॥ सान्तेषु घस्वसती द्वौ । हान्तेषु दह्दिह्दुह्नह्मिह्रुह्लिह्वहोष्टौ । अनुदात्ता हलन्तेषु धातवस्त्र्यधिकं शतम् ॥ गोपायाञ्चकर्थ । गोपायाञ्चक्रथुः । गोपायाञ्चक्र । गोपायाञ्चकार, गोपाया-

---

एकाच उपदेशे। 'ऋत इद्धातोः' इत्यतो धातोरिति 'नेड्वशि कृति' इत्यतो नेडिति चानुवर्तते। वलादेरार्धधातुकस्येति तु फलितार्थकथनमनुवृत्त्यसम्भवात् । तत्र क ऽनुदात्ता इत्याकाङ्क्षायामाह ऊदॄदन्तैरित्यादिना। ऊकारान्त ॠकारान्त यु रु क्ष्णु शीङ् स्नु नु क्षु श्वि डीङ् श्रि वृङ् वृञ् एतान्धातून्विहाय एकाचः अजन्तधातवः अनुदात्ताः इति तदर्थः । हलन्तेषु तु शक्लृ इत्यारभ्य वह् पर्यन्ता एकाचस्त्र्यधिकशतधातवोऽनुदात्ताः मूलोक्ता एव ।

गोपायाञ्चकर्थ । गुप् इत्यस्मादायप्रत्यये गुणे धातुत्वाल्लिटि आम्प्रत्ययेऽल्लोपे लिटो लुकि लिट्परकृञोऽनुप्रयोगे लिटः सिपस्थलि कृञो द्वित्वेऽभ्यासत्वे 'उरत्' इत्यत्वे रपरत्वे 'हलादिः शेषः' इति लोपे चुत्वेऽनुस्वारे परसवर्णे गोपायाञ्चकृ थ इति स्थिते 'आर्धधातुकस्येड्वलादेः'इति

श्चकर । गोपायाञ्चकृव । गोपायाञ्चकृम । गोपायाम्बभूव । गोपायामास । जुगोप । जुगुपतुः । जुगुपुः ॥ **स्वरतिसूतिसूयतिधूञूदितो वा ७ । २ । ४४ ॥** स्वरत्यादेरूदितश्च परस्य वलादेरार्धधातुकस्येड् वा स्यात् । जुगोपिथ, जुगोप्थ । गोपायिता, गोप्ता । गोपायिष्यति, गोपिष्यति, गोप्स्यति । गोपायतु । अगोपायत् । गोपायेत् । गोपाय्यात् । गुप्यात् ।

इडागमे प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इति तन्निषेधे 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरत्वे गोपायाञ्चकर्थ इति सिद्धम् ।

गोपायाम्बभूव । गुप् इत्यस्मात्पाक्षिके आयप्रत्यये गुणे धातुत्वाल्लिटि आम्प्रत्यये अल्लोपे लिटो लुकि लिट्परभूप्रयोगे लिटस्तिपो णलि वुकि द्वित्वेऽभ्यासत्वे 'हलादिः शेषः' इति लोपे ह्रस्वेऽत्त्वे जश्त्वे तत्सिद्धिः ।

गोपायामास । गुप् इत्यस्मादायप्रत्यये गुणे लिटि आमि अल्लोपे लिटो लुकि लिट्परे असः प्रयोगे लिटस्तिपो णलि द्वित्वेऽभ्यासकार्ये 'अत आदेः' इति दीर्घे सवर्णदीर्घे तत्सिद्धिः ।

जुगोप । गुप् इत्यस्माद्धातोरायप्रत्ययाभावपक्षे लिटि तत्स्थाने तिपि तिपो णलादेशेऽनुबन्धलोपे द्वित्वेऽभ्यासत्वे हलादेः शेषे 'कुहोश्चुः' इति चुत्वे पुगन्तलघूपधस्य च' इति गुणे तत्सिद्धिः ।

स्वरति । 'आर्धधातुकस्येड्वलादेः' इत्यनुवर्तते ।

जुगोपिथ । गुप्धातोरायप्रत्ययाभावपक्षे लिटि तत्स्थाने सिपि 'परस्मैपदानाम्' इति सिपस्थलादेशे द्वित्वेऽभ्यासत्वे हलादेः शेषे 'कुहोश्चुः' इति चुत्वे 'पुगन्तलघूपधस्य च' इति गुणे 'स्वरतिसूतिसूयतिधूञूदितो वा' इति पाक्षिके इटि अनुबन्धलोपे जुगोपिथ-जुगोप्थ इति रूपद्वयं सिद्धम् ।

गोपायिता । गुप् इत्यस्मात् 'आयादय आर्धधातुके वा' इत्यायप्रत्यये 'पुगन्तलघूपधस्य च' इति गुणे 'सनाद्यन्ता धातवः' इति धातुत्वाल्लुटि तत्स्थाने तिपि तास्प्रत्यये तास आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति इडागमे 'अतो लोपः' इत्यल्लोपे तिपो डादेशेऽनुबन्धलोपे डित्त्वसामर्थ्यादभस्यापि टेर्लोपे गोपायिता इति सिद्ध्यति, आयप्रत्ययाभावपक्षे गुपो लुटस्तिपि तास्यार्धधातुकत्वे 'स्वरतिसूतिसूयतिधूञूदितो

अगोपायीत् ॥ **नेटि ७।२।३॥** इडादौ सिचि हलन्तस्य वृद्धिर्न। अगोपीत्, अगौप्सीत् ॥ **झलो झलि ८।२।३६॥** झलः परस्य सस्य लोपो झलि। अगौप्ताम्। अगौप्सुः। अगौप्सीः। अगौप्तम्। अगौप्त। अगौप्सम्। अगौप्स्व। अगौप्स्म। अगोपायिष्यत्, अगोपिष्यत, अगोप्स्यत् ॥ क्षि क्षये ॥ १३॥ क्षयति। चिक्षाय। चिक्षियतुः चिक्षियुः।

वा' इति पाक्षिके इडागमेऽनुबन्धलोपे गुणे तिपो डादेशे डित्त्वात् टिलोपे गोपिता गोप्ता इति रूपद्वयं सिद्ध्यति।

नेटि। 'सिचि वृद्धिः परस्मैपदेषु' इति 'वदव्रजहलन्तस्याचः' इत्यतो हलन्तस्येति चानुवर्तते।

अगोपायीत्। गुप् इत्यस्मादायप्रत्यये गुणे धातुत्वाल्लुङि अडागमे तिपि च्लौ च्लेः सिजादेशे 'इतश्च' इतीकारलोपे इटि ईटि 'अतोलोपः' इत्यल्लोपे 'इट ईटि' इति सलोपे सवर्णदीर्घे अगोपायीत् इति सिद्ध्यति। आयप्रत्ययाभावपक्षे तु गुपो लुङस्तिपि इकारलोपे च्लौ च्लेः सिचि अटि 'स्वरतिसूति सूयतिधूञूदितोवा' इति पाक्षिके इडागमे ईटि नित्यत्वाद्गुणं वाधित्वा 'वदव्रजहलन्तस्याचः' इति वृद्धौ प्राप्तायाम् 'नेटि' इति तन्निषेधे गुणे सलोपे सवर्णदीर्घे अगोपीत् इति, इडभावपक्षे 'वदव्रजहलन्तस्याच' इति वृद्धौ अगौप्सीत् इति च सिद्धम्।

झलो झलि। 'संयोगान्तस्य लोपः' इत्यतो लोप इति 'रात्सस्य' इत्यतः सस्येति चानुवर्तते।

अगौप्ताम्। गुप्धातोर्लुङस्तसि अटि तसस्तामादेशे च्लौ च्लेः सिचि अनुबन्धलोपे 'वदव्रजहलन्तस्याचः' इति वृद्धौ 'झलो झलि' इति सलोपे अगौप्ताम् इति सिद्ध्यति।

चिक्षाय। क्षिधातोर्लिटस्तिपो णलादेशेऽनुबन्धलोपे द्वित्वेऽभ्यासत्वे 'हलादिः शेषः' इति लोपे 'कुहोश्चुः' इति चुत्वे 'अचोञ्णिति' इति वृद्धौ आयादेशे चिक्षाय इति सिद्धम्।

चिक्षियतुः। क्षिधातोर्लिटस्तस अतुसादेशे द्वित्वेऽभ्यासत्वे

एकाच इति निषेधे प्राप्ते—। **कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ७।२।१३॥** [1]क्रादिभ्य एव लिट इण्न स्यादन्यस्मादनिटोऽपि स्यात्॥ **अचस्तास्वत्थल्यनिटो नित्यम् ७।२।६१।** [2]उपदेशेऽजन्तो यो धातुस्तासौ नित्यानिट् ततस्थल इण् न॥ **उपदेशेऽत्वतः ७।२।६२॥** [3]उपदेशेऽकारवतस्तासौ नित्यानिटः परस्य थल इण् न स्यात्॥ **ऋतो भारद्वाजस्य ७।२।६३॥** [4]तासौ नित्यानिट ऋदन्तादेव थलो नेट् भारद्वाजस्य मते। तेन अन्यस्य स्यादेव। अत्रमत्र संग्रहः—अजन्तोऽ[5]का-

---

हलादेः शेषे 'कुहोश्चुः' इति चुत्वे 'अचिश्नुधातु' इत्यादिना इयङादेशेऽनुबन्धलोपे रुत्वे विसर्गे च तत्सिद्धिः।

कृसृभृ। 'नेड्वशि कृति' इत्यतो नेडिति अनुवर्तते। क्रादीनामनुदात्तत्वान्निषेधे सिद्धे नियमार्थमिदं सूत्रम्।

अचस्तास्वत्। 'न वृद्भ्यश्चतुर्भ्यः' इत्यतः न इति 'गमेरिट् परस्मैपदेषु' इत्यत इडिति चानुवर्तते। 'एकाच' इति निषेधस्य 'कृसृभृ' इति नियमेन बाधात् इट्प्राप्तौ निषेधार्थमिदम्।

उपदेशे। 'अचस्तास्वत्' इत्यतः तास्वत्थल्यनिटो नित्यमिति 'न वृद्भ्य' इत्यतः नेति 'गमेरिट्' इत्यत इडिति चानुवर्तते।

ऋतः। ऋदन्तस्य अजन्तत्वादेव निषेधे सिद्धे नियमार्थमिदम्।

---

१ कृसृभृवृस्तुद्रुस्रुश्रु इन धातुओं से ही पर लिट् को इट् न हो। इन से भिन्न अनिट् से भी पर लिट् को इट् हो।

२ तास् पर रहते नित्य अनिट् तथा उपदेश काल में अजन्त जो धातु उससे पर थल् को इट् न हो।

३ तास् पर रहते नित्य अनिट् तथा उपदेश काल में अकारवान् जो धातु उससे पर थल् को इट् न हो।

४ तास् पर रहते नित्य अनिट् जो ऋकारान्तधातु उसीसे पर थल् को इट् न हो भारद्वाज के मत में। अर्थात् अन्य के मत में इट् हो।

५ तास पर रहते अनिट् जो अजन्त और अकारवान् धातु वह थल् पर रहते विकल्प से सेट् हो। जो ऋकरान्त धातु तास् पर रहते नित्य अनिट् हो वह थल पर रहते नित्य अनिट् हो। क्रादि से भिन्न धातु लिट् में सेट् हो।

रत्वान्वा यस्तास्यनिट् थलि वेडयम् । ऋदन्त ईदृङ्नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत् ॥ चिक्षयिथ, चिक्षेथ । चिक्षियथुः । चिक्षिय । चिक्षाय, चिक्षय । चिक्षियिव । चिक्षियिम । क्षेता । क्षेष्यति । क्षयतु । अक्षयत् ॥ क्षयेत् । **अकृत्सार्वधातुकयोर्दीर्घः ७ । ४ । २५ ॥** अजन्ताङ्गस्य दीर्घो यादौ प्रत्यये न तु कृत्सार्वधातुकयोः । क्षीयात् ॥ **सिचि वृद्धिः परस्मैपदेषु ७ । २ । १ ॥** इगन्ताङ्गस्य वृद्धिः स्यात् परस्मैपदे सिचि । अक्षैषीत्[१] । अक्षेष्यत् ॥ तप संतापे ॥ १४ ॥ तपति । तताप । तेपतुः ।

नियमफलन्त्वन्यव्यावृत्तिरित्यभिप्रेत्याह **तेनेति** ।

चिक्षयिथ । क्षिधातोर्लिटः सिपि तस्य 'परस्मैपदानाम्' इत्यादिना थलादेशे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्यासत्वे 'हलादिः शेषः' इति लोपे 'कुहोश्चुः' इति चुत्वे 'एकाच उपदेशेऽनुदात्तात्' इति इटो निषेधे प्राप्ते 'ऋतो भारद्वाजस्य' इति नियमात् पाक्षिके इडागमेऽनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इति गुणेऽयादेशे चिक्षयिथ इति इडभावपक्षे गुणे चिक्षेथ इति च सिद्धम् ।

अकृत् । 'अङ्गस्य' इत्यधिक्रियते । 'अयङ् यि क्ङिति' इत्यतः यीति सप्तम्यन्तमनुवर्तते । अङ्गाक्षिप्तप्रत्ययविशेषणात्तदादिविधिः । 'अचश्च' इति परिभाषया अच उपस्थित्या तदन्तविधिः ।

क्षीयात् । क्षिधातोराशीर्लिङस्तिपि 'इतश्च' इतीकारलोपे यासुडागमेऽनुबन्धलोपे 'स्कोः संयोगाद्योरन्ते च' इति सलोपे 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घे क्षीयात् इति सिद्धम् ।

सिचि वृद्धिः । 'अङ्गस्य' इत्यधिक्रियते 'इको गुणवृद्धी' इति परिभाषया इक इत्युपतिष्ठते । तदन्तविधिः ।

अक्षैषीत् । क्षिधातोर्लुङस्तिपि अडागमेऽनुबन्धलोपे इकारलोपे

---

[१] अक्षैष्टाम्, अक्षैषुः । अक्षैषीः, अक्षैष्टम्, अक्षैष्ट । अक्षैषम्, अक्षैष्व, अक्षैष्म ।

तेपुः। तेपिथ। ततप्थ। तेपिव। तेपिम। तप्ता। तप्स्यति। तपतु। अतपत्। तपेत्। तप्यात्। अताप्सीत्। अताप्ताम्। अतप्स्यत्॥ क्रमु पादविक्षेपे॥१९॥ **वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ३।१।७०॥** एभ्यः श्यन्वा कर्त्रर्थ सार्वधातुके परे। पक्षे शप्॥ **क्रमः परस्मैपदेषु ७।३।७८॥** क्रमो दीर्घः परस्मैपदे शिति। क्राम्यति, क्रामति। चक्राम। क्रमिता। क्रमिष्यति। क्राम्यतु, क्रामतु। अक्राम्यत, अक्रामत्। क्राम्येत्,

---

च्लौ च्लेः सिचि 'अस्तिसिचोऽपृक्ते' इति ईटि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ षत्वे तत्सिद्धिः।

तेपतुः। तप्धातोर्लिटस्तसि तस्य अतुसि द्वित्वेऽभ्यासत्वे हलादिः शेषे 'अत एकहल्मध्येऽनादेशादेर्लिटि' इति एत्वेऽभ्यासलोपे च रुत्वे विसर्गे तेपतुरिति सिद्धम्।

तेपिथ। तपो लिटः सिपस्थलि द्वित्वेऽभ्यासकार्ये 'एकाच उपदेशेऽनुदात्तात्' इति इटो निषेधे प्राप्ते 'ऋतो भारद्वाजस्य' इति नियमात्पाक्षिके इटि 'थलि च सेटि' इति एत्वेऽभ्यासलोपे तेपिथ इति इडभावपक्षे ततप्थ इति च सिद्धम्।

अताप्सीत्। तपो लुङस्तिपि अटि इकारलोपे च्लौ च्लेः सिचि ईडागमेऽनुबन्धलोपे 'वदव्रजहलन्तस्याचः' इति वृद्धौ अताप्सीत् इति सिद्धम्।

अताप्ताम्। तपो लुङस्तसस्तामादेशेऽडागमे च्लौ च्लेस्सिजादेशे 'वदव्रज' इति वृद्धौ 'झलो झलि' इति सलोपे तात्सिद्धिः।

वा भ्राश। 'दिवादिभ्यः श्यन्' इत्यतः श्यन् इति 'कर्त्तरि शप्' इत्यतः कर्त्तरीति 'सार्वधातुके यक्' इत्यतः सार्वधातुके इति चानुवर्तते।

क्रमः। 'शमामष्टानां दीर्घः श्यनि' इत्यतो दीर्घ इति 'ष्ठिवुक्लमुचमां शिति' त्यत: शितीति चानुवर्तते।

क्रामेत् । क्रम्यात् । अक्रमीत् । अक्रमिष्यत् ॥ पा पाने ॥ १६ ॥ **पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ७ । ३ । ७८ ॥** पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे । पिबादेशोऽदन्तस्तेन न गुणः । पिबति ॥ **आत औ णलः ७ । १ । ३४ ॥** आदन्ताद्धातोर्णल औकारादेशः स्यात् । पपौ ॥ **आतो लोप इटि च ६ । ४ । ६४ ॥**

क्राम्यति । क्रमधातोर्लटस्तिपि शपं बाधित्वा 'वाभ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' इति पाक्षिके श्यन्प्रत्ययेऽनुबन्धलोपे 'क्रमः परस्मैपदेषु' इति दीर्घे क्राम्यति इति श्यनोऽभावे शपि दीर्घे क्रामति इति च सिद्धम् ।

अक्रमीत् । क्रम्धातोर्लुङस्तिपि अडागमे इकारलोपे च्लौ च्लेः सिचि इटि ईटि 'वदव्रजहलन्तस्याचः' इति प्राप्तवृद्धेः 'नेटि' इति निषेधे 'अतो हलादेर्लघोः' इति प्राप्तवृद्धेः 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्' इति निषेधे 'इट ईटि' इति सलोपे दीर्घे अक्रमीत् इति सिद्धम् ।

पाघ्राध्मा । 'ष्ठिवुक्लमुचमां शिति' इत्यतः शितीत्यनुवर्तते ।

पिबति । पाधातोर्लटस्तिपि शपि 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' इति पा इत्यस्य पिबादेशे तस्य अदन्तत्वात् 'पुगन्तलघूपधस्य च' इति गुणाभावे 'अतो गुणे' इति पररूपे पिबति इति सिद्धम् ।

पपौ । पाधातोर्लिटस्तिपि तस्य 'परस्मैपदानाम्' इति णलादेशेऽनुबन्धलोपे द्वित्वेऽभ्यासत्वे ह्रस्वे 'आत औ णलः' इति णल औकारादेशे 'वृद्धिरेचि' इति वृद्धौ पपौ इति सिद्धम् ।

आतो लोप इटि च । 'आर्धधातुके' इत्यधिक्रियते । 'दीङो युडचि क्ङिति' इत्यतः अचि क्ङिति इत्यनुवर्तते तदादिविधिः ।

[1]अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोरातो लोपः। पपतुः। पपुः। पपिथ। पपाथ। पपथुः। पप। पपौ। पपिव। पपिम। पाता। पास्यति। पिबतु। अपिबत्। पिबेत्॥ **एर्लिङि ६।४।६७**॥ [2]घुसंज्ञकानां मास्थादीनां च एत्वं स्यादार्धधातुके किति लिङि। पेयात्। गातिस्थेति सिचो लुक्। अपात्॥ अपाताम्॥ **आतः ३।४।११०**॥ सिज्लुकि

पपतुः। पाधातोर्लिटस्तासि तसः 'परस्मैपदानाम्' इति अतुसादेशे द्वित्वेऽभ्यासत्वे ह्रस्वे 'आतो लोप इटि च' इति आलोपे रुत्वे विसर्गे तत्सिद्धिः।

पपिथ। पाधातोर्लिटः सिपस्थलि द्वित्वेऽभ्यासत्वे ह्रस्वे 'एकाच' इति इटो निषेधे प्राप्ते 'ऋतो भारद्वाजस्य' इति नियमात्पाक्षिके इटि 'आतो लोप इटि च' इत्यालोपे पपिथ इति इडभावे पपाथ इति च सिद्धम्।

पपिव। पाधातोर्लिटो वसि तस्य वादेशे द्वित्वेऽभ्यासत्वे ह्रस्वे 'एकाच' इत्यादिना इण्निषेधे प्राप्ते क्रादिनियमान्नित्ये इटि आलोपे पपिव इति सिद्धम्। एवं पपिम इति।

एर्लिङि। 'आर्धधातुके' इत्यधिक्रियते। घुमास्थागापाजहातिसामित्यनुवर्तते। 'दीङो युडचि क्ङिति' इत्यतः कितीति चानुवर्तते।

पेयात्। पाधातोराशीर्लिङस्तिपि 'लिङाशिषि' इति तिप आर्धधातुकत्वे इकारलोपे यासुटि 'किदाशिषि' इति यासुटः कित्त्वे 'स्कोः' इति सलोपे 'एर्लिङि' इत्येत्वे पेयात् इति सिद्धम्।

अपात्। पाधातोर्लुङस्तिपि अटि इकारलोपे च्लौ च्लेः सिचि 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सिचो लुकि तत्सिद्धिः।

---

[1] अजादि आर्धधातुक जो कित्ङित् प्रत्यय और इट् उसके पर रहते आकार का लोप हो।

[2] घुसंज्ञक और मा स्था गा पा ओहाक् इन धातुओं के आकारको एकार हो आर्धधातुक कित् लिङ् पर रहते।

आदन्तादेव झेर्जुस् । **उस्यपदान्तात् ६ । १ । ९६ ॥** अपदान्तादकारादुसि परे पररूपमेकादेशः । अपुः । अपास्यत् ॥ ग्लै हर्षक्षये ॥ १७ ॥ ग्लायति ॥ **आदेच उपदेशेऽशिति ६ । १ । ४५ ॥** उपदेशे एजन्तस्य धातोरात्वं न तु शिति । जग्लौ । ग्लाता । ग्लास्यति । ग्लायतु । अग्लायत् । ग्लायेत् ॥ **वाऽन्यस्य संयोगादेः ६ । ४ । ६८ ॥** घुमा[1]स्थादेरन्यस्य संयोगादेर्धातोरात एत्वं वार्धधातुके किति लिङि । ग्लेयात्, ग्लायात् । **यमरमनमातां सक् च ७ । २ । ७३ ॥** एषां सक्

उस्यपदान्तात् । 'एकः पूर्वपरयोः' इत्यधिक्रियते । 'आद्गुणः' इत्यत आदिति 'एङि पररूपम्' इत्यतः पररूपमिति चानुवर्तते ।

अपुः । पाधातोर्लुङो झौ अडागमे 'आतः' इति झेर्जुसादेशेऽनुबन्धलोपे 'उस्यपदान्तात्' इति पररूपे रुत्वे विसर्गे अपुः इति सिद्धम् ।

जग्लौ । ग्लैधातोर्लिटस्तिपो णलि 'आदेच उपदेशेऽशिति' इति आत्वे द्वित्वेऽभ्यासत्वे 'हलादिः शेषः' इति लोपे चुत्वे 'आत औ णलः' इत्यौकारे वृद्धौ जग्लौ इति सिद्धम् ।

वाऽन्यस्य । 'आर्धधातुके' इत्यधिक्रियते । 'एर्लिङि' । इति 'आतो लोपे इटि च' इत्यतः आत इति 'दीङो युडचि क्ङिति' इत्यतः कितीति चानुवर्तते । 'घुमास्थागापाजहातिसां हलि' इति सूत्रस्य प्रकृतत्वात् तेभ्योऽन्यस्येति लभ्यते ।

ग्लेयात् । ग्लैधातोराशीर्लिङस्तिपि इकारलोपे यासुटि 'किदाशिषि' इति यासुटः कित्त्वे 'आदेच उपदेशेऽशिति' इत्यात्वे 'वाऽन्यस्य संयोगादेः' इत्येत्वे 'स्कोः' इति सलोपे ग्लेयात् इति एत्वाभावे ग्लायात् इति च सिद्धम् ।

यमरम । 'इडत्यर्तिव्ययतीनाम्' इत्यतः इडिति 'अञ्जेः सिचि'

---

[1] घुसंज्ञक और मा स्था गा पा ओहाक् इन से भिन्न जो संयोगादि धातु उनके आकार को एकार हो विकल्प से आर्धधातुक कित् लिङ् पर रहते ।

स्यादेभ्यः सिच इट् स्यात्परस्मैपदेषु । अग्लासीत्[१] । अग्लास्यत् । ह्वृ कौटिल्ये ॥ १८ ॥ ह्वरति ॥ **ऋतश्च संयोगादेर्गुणः ७।४।१०** ॥ ऋदन्तस्य[२] संयोगादेरङ्गस्य गुणो लिटि । उपधाया वृद्धिः । जह्वार । जह्वरतुः । जह्वरुः । जह्वर्थ । जह्वरथुः । जह्वर । जह्वार, जह्वर । जह्वरिव । जह्वरिम ।

इत्यतः सिचीति ‘स्तुसुधूञ्भ्यः परस्मैपदेषु’ इत्यतः परस्मैपदेष्विति चानुवर्तते । सिचीत्यस्य षष्ठ्यन्तत्वेन विपरिणामः ।

अग्लासीत् । ग्लैधातोर्लुङस्तिपि इकारलोपे अटि च्लौ च्लेस्सिचि आत्वे ईडागमे ‘यमरमनमातां सक् च’ इति सकि सिच इडागमे च कृतेऽनुबन्धलोपे ‘इट ईटि’ इति सलोपे सवर्णदीर्घे अग्लासीन् इति सिद्धम् ।

ऋतश्च । अङ्गस्येत्यधिक्रियते । ‘दयतेर्दिगि लिटि’ इत्यतो लिटीत्यनुवर्तते ।

जह्वार । ह्वृधातोर्लिटस्तिपो णलि द्वित्वेऽभ्याससंज्ञायाम् ‘उरत्’ इत्यत्वे रपरे ‘हलादिः शेषः’ इति लोपे चुत्वे जश्त्वे ‘अचो ञ्णिति’ इति प्राप्तां वृद्धिं परत्वाद्बाधित्वा ‘ऋतश्च संयोगादेर्गुणः’ इति गुणे रपरे ‘अत उपधायाः’ इति वृद्धौ जह्वार इति साधु ।

जह्वरतुः । ह्वृधातोर्लिटस्तसोऽतुसि द्वित्वेऽभ्यासकार्ये अतुसः कित्त्वाद्गुणाभावे प्राप्ते ‘ऋतश्च संयोगादेर्गुणः’ इति गुणे रपरे रुत्वे विसर्गे तत्सिद्धिः ।

जह्वर्थ । ह्वृधातोर्लिटः सिपस्थलि द्वित्वेऽभ्यासकार्ये क्रादिनियमात्प्राप्तस्य इटः ‘अचस्तास्वत्थल्यनिटो नित्यम्’ इति निषेधे गुणे रपरे तत्सिद्धिः ।

जह्वरिव । ह्वृधातोर्लिटो वसि तस्य वादेशे द्वित्वेऽभ्यासकार्ये क्रादिनियमादिटि गुणे रपरे तत्सिद्धिः ।

---

[१] अग्लासिष्टाम्, अग्लासिषुः । अग्लासीः, अग्लासिष्टम्, अग्लासिष्ट । अग्लासिषम् अग्लासिष्व, अग्लासिष्म ।

[२] ऋकारान्त जो संयोगादि अङ्ग उसको गुण हो लिट् पर रहते ।

१-सकि- ककारइत् अकार उच्चारणार्थः ॥

ह्वर्ता ॥ **ऋद्धनोः स्ये ७ । २ । ७० ॥** ऋतो हन्तेश्च स्यस्येट् । ह्वरिष्यति । ह्वरतु अह्वरत् ह्वरेत् ॥ **गुणोर्तिसंयोगाद्योः ७ । ४ । २९ ॥** अर्तेः[1] संयोगादेर्ऋदन्तस्य च गुणः स्याद्यकि यादावार्धधातुके लिङि च । ह्वर्यात् । अह्वार्षीत्[2] । अह्वरिष्यत् ॥ श्रु श्रवणे ॥ १९ ॥ **श्रुवः शृ च ३ । १ । ७४ ॥** श्रुवः शृ इत्यादेशः स्यात् श्नुप्रत्ययश्च । शृणोति ॥

ऋद्धनोः । 'इडत्यर्त्तिव्ययतीनाम्' इत्यत इडित्यनुवर्तते ।

ह्वरिष्यति । ह्वृधातोर्लृटस्तिपि स्यप्रत्यये आर्धधातुकत्वे 'एकाच उपदेशेऽनुदात्तात्' इतीण्निषेधे प्राप्ते 'ऋद्धनोः स्ये' इतीटि गुणे रपरे षत्वे तत्सिद्धिः ।

गुणोऽर्त्ति । अङ्गस्येत्यधिक्रियते । 'रीङ् ऋतः' इत्यतः ऋत इत्यनुवर्तते । तदन्तविधिः । 'रिङ्शयग्लिङ्क्षु' इत्यतः यक् लिङ् इत्यनुवर्तते । 'अकृत्सार्वधातुकयोः' इत्यतः असार्वधातुक इत्यनुवर्तत । तेनार्धधातुक इति लभ्यते । 'अयङ् यि क्ङिति' इत्यतो यीत्यनुवर्तते । तदादिविधिः ।

ह्वर्यात् । ह्वृधातोराशीर्लिङस्तिपि इकारलोपे यासुटि तस्यार्धधातुकत्वे कित्त्वे च 'स्कोः' इति सलोपे यासुटः कित्त्वाद्गुणाभावे प्राप्ते 'गुणोऽर्त्तिसंयोगाद्योः' इति गुणे रपरे तत्सिद्धिः ।

अह्वार्षीत । ह्वृधातोर्लुङस्तिपि इकारलोपे अटि च्लौ च्लेः सिचि 'अस्तिसिचोऽपृक्ते' इति ईडागमे 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ रपरे षत्वे तत्सिद्धिः ।

श्रुवः । 'स्वादिभ्यः श्नुः' इत्यतः श्नुरित्यनुवर्तते ।

शृणोति । श्रुधातोर्लटस्तिपि शपि प्राप्ते तम्प्रबाध्य 'श्रुवः शृ च' इति श्नुप्रत्यये अनुबन्धलोपे णत्वे श्रुवः शृ इत्यादेशे 'सार्वधातुकार्धधातुकयोः' इति गुणे तत्सिद्धिः ।

---

[1] ऋधातु और संयोगादि जो ऋदन्त धातु उसको गुण हो यक् और यादि आर्धधातुक लिङ् पर रहते ।

[2] अह्वार्ष्टाम्, अह्वार्षुः । अह्वार्षीः, अह्वार्ष्टम् , अह्वार्ष्ट । अह्वार्षम, अह्वार्ष्व, अह्वार्ष्म ।

सार्वधातुकमपित् १ । २ । ४ ॥ अपित्सार्वधातुकं ङिद्वत् । शृणुतः ॥ **हुश्नुवोः सार्वधातुके ६ । ४ । ८७ ॥** हुश्नुवोरनेकाचोऽसंयोगपूर्वस्योवर्णस्य यण् स्यादचि सार्वधातुके । शृण्वन्ति । शृणोषि । शृणुथः । शृणुथ । शृणोमि ॥ **लोपश्चास्यान्यतरस्यां म्वोः ६ । ४ । १०७ ॥** असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा म्वोः परयोः । शृण्वः शृणुवः । शृण्मः, शृणुमः । शुश्राव । शुश्रुवतुः । शुश्रुवुः । शुश्रोथ ।

सार्वधातुकमपित् । 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इत्यतो ङिदित्यनुवर्त्तते ।

शृणुतः । श्रुधातोर्लटस्तसि शपं बाधित्वा 'श्रुवः शृ च' इति श्नुप्रत्यये श्रुवः शृइत्यादेशे च णत्वे 'सार्वधातुकमपित्' इति तसो ङित्त्वाद्गुणाभावे रुत्वे विसर्गे तत्सिद्धिः ।

हुश्नुवोः । 'एरनेकाच' इत्यतः अनेकाचोऽसंयोगपूर्वस्येति 'ओः सुपि' इत्यत ओरिति 'इणो यण्' इत्यतो यणिति 'अचिश्नुधातु' इत्यतः अचीति चानुवर्तते ।

शृण्वन्ति । श्रुधातोर्लटः झिप्रत्यये शपं बाधित्वा 'श्रुवः शृ च' इति श्नुप्रत्यये श्रुवः शृइत्यादेशे णत्वे झस्यान्तादेशे ङित्त्वाद्गुणाभावे 'अचि श्नुधातु' इति प्राप्तमुवङादेशं बाधित्वा 'हुश्नुवोः सार्वधातुके' इति यणि शृण्वन्ति इति सिद्धम् ।

लोपश्च । अत्र 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति सूत्रमनुवर्तते । षष्ठ्यन्तत्वेन विपरिणामः ।

शृण्वः । श्रुधातोर्लटः वस्प्रत्यये शपं बाधित्वा 'श्रुवः शृ च' इति श्नुप्रत्यये श्रुवः शृ इत्यादेशे च 'लोपश्चास्यान्यतरस्यां म्वोः' इति श्नुप्रत्ययोकारस्य पाक्षिके लोपे णत्वे रुत्वे विसर्गे शृण्वः इति लोपाभावे शृणुवः इति च सिद्धम् ।

शुश्राव । श्रुधातोर्लिटस्तिपो णलि द्वित्वेऽभ्याससंज्ञायां 'हलादिः

---

१ हुधातु और श्नुप्रत्ययान्त जो अनेकाच् अङ्ग उसके असंयोगपूर्वक उवर्ण को यण् हो अजादि सार्वधातुक पर रहते ।

शुश्रुवथुः । शुश्रुव । शुश्राव, शुश्रव । शुश्रुव । शुश्रुम । श्रोता । श्रोष्यति । शृणोतु, शृणुतात् शृणुताम् । शृण्वन्तु ॥ **उतश्च प्रत्ययादसंयोगपूर्वात् ६ । ४ । १०६ ॥** असंयोगपूर्वात्प्रत्ययोतो हेर्लुक् । शृणु, शृणुतात् । शृणुतम् । शृणुत । गुणावादेशौ । शृणवानि । शृणवाव । शृणवाम । अशृणोत् । अशृणुताम् । अशृण्वन् । अशृणोः । अशृणुतम् । अशृणुत । अशृणवम् । अशृण्व, अशृणुव । अशृण्म, अशृणुम । शृणुयात् । शृणुयाताम् । शृणुयुः । शृणुयाः । शृणुयातम् । शृणुयात । शृणुयाम् । शृणुयाव । शृणुयाम । श्रूयात् । अश्रौषीत् । अश्रोष्यत् ॥ गम्लृ गतौ ॥ २० ॥ **इषगमियमां छः ७ । ३ । ७७ ॥** एषां छः स्यात् शिति । गच्छति । जगाम ॥

शेषः' इति लोपे 'अचो ञ्णिति' इति वृद्धौ आवादेशे तत्सिद्धिः ।

शुश्रोथ । श्रुवो लिटः सिपस्थलि द्वित्वेऽभ्याससंज्ञायां हलादिः शेषे 'एकाच उपदेशेऽनुदात्तात्' इति इण्निषेधे णत्वे गुणे तत्सिद्धिः ।

उतश्च । 'अतो हेः' इत्यतो हेरिति 'चिणो लुक्' इत्यतो लुगिति चानुवर्तते ।

शृणु । श्रुधातोर्लोटः सिपि शपं बाधित्वा 'श्रुवः शृ च' इति श्नुप्रत्यये श्रुवः शृइत्यादेशे णत्वे सेर्हौ हेर्वैकल्पिके तातङादेशेऽनुबन्धलोपे शृणुतात् इति तातङोऽभावपक्षे तु 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति हेर्लुकि शृणु इति च सिद्धम् ।

शृणवानि । श्रुधातोर्लोटो मिपि शपं बाधित्वा श्नुप्रत्यये श्रुवः शृइत्यादेशे मेर्न्यादेशे 'आडुत्तमस्य पिच्च' इति आडागमेऽनुबन्धलोपे गुणेऽवादेशे तत्सिद्धिः ।

अश्रौषीत् । श्रुधातोर्लुङस्तिपि इकारलोपेऽडागमे च्लौ च्लेः सिचि 'अस्तिसिचोऽपृक्ते' इति इटि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ षत्वे अश्रौषीत् इति सिद्धम् ।

इषगमि । 'इषु' इति उदित्पाठोऽनार्ष इति शेखरः । 'ष्ठिवुक्लमुचमां शिति' इत्यतः शितीत्यनुवर्तते ।

गच्छति । गम्धातोर्लटस्तिपि शपि 'इषगमियमांछः' इति मस्य छादेशे 'छे च' इति तुकि श्चुत्वे गच्छति इति सिद्धम् ।

गमहनजनखनघसां लोपः क्ङित्यनङि ६।४।९८॥ एषामुपधाया लोपोऽजादौ क्ङिति न त्वङि। जग्मतुः। जग्मुः। जगमिथ, जगन्थ। जग्मथुः। जग्म। जगाम, जगम। जग्मिव। जग्मिम। गन्ता। **गमेरिट् परस्मैपदेषु ७।२।५८॥** गमेः परस्य सादेरार्धधातुकस्येट् स्यात् परस्मैपदेषु। गमिष्यति। गच्छतु। अगच्छत्। गच्छेत्। गम्यात्॥ **पुषादिद्युताद्य्लृदितः परस्मैपदेषु ३।१।५५॥** श्यन्विकरणपुषादेर्द्युतादेर्लृदितश्च परस्य च्लेरङ् परस्मैपदेषु। अगमत्। अगमिष्यत्॥

इति परस्मैपदिनः॥

जगाम। गम्धातोर्लिटस्तिपो णलि द्वित्वेऽभ्याससंज्ञायां 'हलादिः शेषः' इति लोपे 'कुहोश्चुः' इति चुत्वे 'अत उपाधायाः' इति वृद्धौ तत्सिद्धिः।

गमहन। 'ऊदुपधाया गोहः' इत्यत उपधाया इति 'अचि श्नुधातु' इत्यतः अचीति चानुवर्तते। तदादिविधिः।

जग्मतुः। गम्धातोर्लिटस्तसः अतुसि द्वित्वे अभ्यासकार्ये 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्युपधालोपे रुत्वे विसर्गे तत्सिद्धिः।

गमेरिट्। 'आर्धधातुकस्येड्वलादेः' इत्यत आर्धधातुकस्येति 'सेऽसिचि कृतचृतछृदतृदनृतः' इत्यतः से इति चानुवर्तते। तदादिविधिः।

गमिष्यति। गम्धातोर्लृटस्तिपि स्यप्रत्यये आर्धधातुकत्वे 'एकाच' इतीण्निषेधे प्राप्ते 'गमेरिट् परस्मैपदेषु' इति इडागमे षत्वे तत्सिद्धिः।

गच्छेत्। गमो विधिलिङस्तिपि इकारलोपे शपि 'इषुगमियमां छः' इति छादेशे तुकि चुत्वे यासुटि 'अतो येयः' इति यास इयादेशे गुणे 'लोपो व्योर्वलि' इति यलोपे तत्सिद्धिः।

पुषादि। 'च्लेः सिच्' इत्यतः च्लेरिति 'अस्यतिवक्तिख्यातिभ्योऽङ्' इत्यतोऽङीति चानुवर्तते।

अगमत्। गमो लुङस्तिपि इकारलोपे अटि च्लौ सिचं बाधित्वा 'पुषादिद्युताद्य्लृदितः परस्मैपदेषु' इति च्लेरङि अनुबन्धलोपे 'गमहन' इति सूत्रे अनङीतिपर्युदासादुपधालोपाभावे अगमत् इति सिद्धम्।

-अनुदात्तङित आत्मनेपदम् ॥१।३।१२॥ एध में अनुदात्त अकार इत् जाता है। तङानावात्मनेपदम् ॥१।४।१००॥

एध वृद्धौ ॥ १ ॥ **टित आत्मनेपदानां टेरे ३।४।७९॥** टितो लस्यात्मनेपदानां टेरेत्वम् । एधते ॥ **आतो ङितः ७।२।८१॥** अतः परस्य ङितामाकारस्य इय् स्यात् । एधेते । एधन्ते ॥ **थासः से ३।४।८०॥** टितो लस्य थासः से स्यात् । एधसे । एधेथे । एधध्वे । अतो गुणे । एधे । एधावहे । एधामहे ॥ **इजादेश्च गुरुमतोऽ-**

अथात्मनेपदिनः ।

टित आत्मनेपदानाम् । अत्र 'लस्य' इत्यधिक्रियते ।

१ **एधते ।** एध्धातोर्लटि तत्स्थाने तप्रत्यये 'कर्त्तरि शप्' इति शपि 'टित आत्मनेपदानां टेरे' इति एत्वे तत्सिद्धिः । अचोऽन्त्यादि टि ॥१।१।६४॥

अतो ङितः । 'अतो येयः' इत्यतः अत इति इय इति चानुवर्तते ।

✓ **एधेते ।** 'एध्धातोर्लटः' आताम् प्रत्यये 'सार्वधातुकमपित्' इति तस्य ङित्त्वे शपि 'आतो ङितः' इत्याकारस्य इयादेशे गुणे यलोपे टेरेत्वे तत्सिद्धिः । अचोऽन्त्यादि टि ॥१।१।६४॥ आद्गुणः

✓ **एधन्ते ।** एधो लटो झप्रत्यये शपि झस्यान्तादेशे 'अतो गुणे' इति पररूपे 'टित आत्मनेपदानां टेरे' इति एत्वे तत्सिद्धिः । झोऽन्तः ॥७।१।३

थासः । अत्र 'लस्य' इत्यधिक्रियते 'टित आत्मनेपदानां टेरे' इत्यतः टित इत्यनुवर्त्तते ।

✓ **एधसे ।** एधो लटः थासि शपि 'थासः से' इति थासः से इत्यादेशे तत्सिद्धिः ।

✓ **एधेथे ।** एधो लट आथाम्प्रत्यये शपि 'आतो ङितः' इति आकारस्य इयादेशे गुणे 'लोपो व्योर्वलि' इति यलोपे 'टित आत्मनेपदानां टेरे' इति टेरेत्वे तत्सिद्धिः ।

✓ **एधे ।** एधो लट इट्प्रत्यये शपि 'टित आत्मनेपदानां टेरे' इति इट एत्वे कृते 'अतो गुणे' इति पररूपे 'एधे' इति सिद्धम् ।

✓ **एधावहे ।** एधो लटो वहिप्रत्यये शपि 'अतो दीर्घो यञि' इति दीर्घे टेरेत्वे तत्सिद्धिः ।

© इध्य के (आम्) [illegible] गुरुसंज्ञा [illegible]
* सूत्र० ३।१।४०॥

नृच्छः ३।१।३६॥ इजादिर्यो[1] धातुर्गुरुमानृच्छत्यन्यस्तत आम् स्याल्लिटि॥ **आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य १।३।६३॥** आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः। आम्प्रकृत्या[2] तुल्यमनुप्रयुज्यमानात् कृञोऽप्यात्मनेपदम्॥ **लिटस्तझयोरेशिरेच् ३।४।८१॥** लिडादेशयोस्तझयोरेश् इरेजेतौ स्तः। एधाञ्चक्रे। एधाञ्चक्राते। एधाञ्चक्रिरे। एधाञ्चकृषे। एधाञ्चक्राथे॥ **इणः षीध्वंलुङ्लिटां धोऽङ्गात् ८।३।७८॥** इणन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य ढः स्यात्। एधाञ्चकृढ्वे। एधाञ्चक्रे। एधाञ्चकृवहे। एधाञ्चकृमहे। एधाम्बभूव।

इजादेश्च। 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इत्यतो धातोरिति 'कास्प्रत्ययादाममन्त्रे लिटि' इत्यत आमिति लिटीति चानुवर्तते।
* परिशिष्ट पृ० [illegible]॥ ३।१।३६ → गुरु-संज्ञा

२।४।८१ **एधाञ्चक्रे।** एधधातोर्लिटि 'इजादेश्च गुरुमतोऽनृच्छः' इत्यामि 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परकृञ्प्रयोगे, परगामिनि क्रियाफले कृञः परस्मैपदे प्राप्ते 'आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य' इति आत्मनेपदत्वात् तप्रत्यये 'लिटस्तझयोरेशिरेच्' इति तस्यैशादेशेऽनुबन्धलोपे 'असंयोगाल्लिट् कित्' इति कित्त्वाद्गुणाभावे द्वित्वात्परत्वाद्यणि प्राप्ते 'द्विर्वचनेऽचि' इति तन्निषेधे द्वित्वेऽभ्यासकार्ये अनुस्वारे परसवर्णे यणि एधाञ्चक्रे इति सिद्धम्। "स्थानिवद्देशेन "कृ" इत्यस्य [illegible] द्वित्वम्

इणः षीध्वम्। 'अपदान्तस्य मूर्धन्यः' इत्यधिक्रियते।

एधाञ्चकृढ्वे। एध्धातोर्लिटि 'इजादेश्च गुरुमतोऽनृच्छः' इत्याम्प्रत्यये 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परकृञोऽनुप्रयोगे लिटो ध्वमि द्वित्वेऽभ्यासकार्ये 'टित आत्मनेपदानां

---

[1] ऋच्छ से भिन्न इजादि जो गुरुमान् धातु उससे आम् प्रत्यय हो लिट् पर रहते।

[2] आम् प्रत्यय हो जिससे उसके तुल्य अनुप्रयुज्यमान कृञ् से भी आत्मनेपद प्रत्यय हो। अर्थात् जिससे आम् प्रत्यय हो उससे यदि आत्मनेपद प्रत्यय होता हो तो अनुप्रयुज्यमान कृञ् से भी आत्मनेपद प्रत्यय हों।॥

एधाञ्चक्रे।
एध् + लिट् (३।२।११५)

*- पूर्ववदिति वर्तते। आम्प्रत्ययवत्पू-
र्वस्यैवेति॥१।३।६३॥ पर महाभाष्य
पृ-३५२-३। और ३६६ देखिये।

एधामास । एधिता । एधितारौ । एधितारः । एधितासे । एधितासाथे ॥ **धि च ८।२।२५॥** धादौ प्रत्यये परे सस्य लोपः । एधिताध्वे । **ह एति ७।४।५२॥** तासस्त्योः सस्य हः स्यादेति परे । एधिताहे । एधितास्वहे । एधितास्महे । एधिष्यते । एधिष्येते । एधिष्यन्ते । एधिष्यसे । एधिष्येथे । एधिष्यध्वे । एधिष्ये । एधिष्यावहे । एधिष्यामहे ॥ **आमेतः ३।४।९०॥** लोट एकारस्याम् स्यात् । एधताम् । एधेताम् । एधन्ताम् ॥ **सवाभ्यां वामौ ३।४।९१॥** सवाभ्यां परस्य लोडेतः

टेरे' इति टेरेत्वे 'इणः षीध्वंलुङ्लिटां धोऽङ्गात्' इति धस्य ढत्वे अनुस्वारे परसवर्णे च कृते तत्सिद्धिः ।

धि च । 'सः स्यार्धधातुके' इत्यतः स इति 'तासस्त्योर्लोपः' इत्यतो लोपे इति चानुवर्तते । 'अङ्गस्य' इत्यस्याधिकारात्प्रत्यय इत्यस्याक्षेपः । तदादिविधिः ।

एधिताध्वे । एध्धातोर्लुटोध्वमि टेरेत्वे तास्प्रत्यये तस्यार्धधातुकत्वादिटि 'धि च' इति तासः सस्य लोपे तत्सिद्धिः ।

ह इति । 'तासस्त्योर्लोपः' इत्यतः तासस्त्योरिति 'सः स्यार्धधातुके' इत्यतः स इति चानुवर्तते ।

एधिताहे । एधो लुट इटि 'टित आत्मनेपदानां टेरे' इति इट एत्वे कृते तास्प्रत्यये तस्यार्धधातुकत्वादिटि 'ह एति' इति सस्य हकारे तत्सिद्धम् ।

आमेतः । 'लोटो लङ्वत्' इत्यतो लोट इत्यनुवर्तते ।

एधताम् । एधधातोर्लोटः तप्रत्यये टेरेत्वे शपि 'आमेतः' इत्यामि तत्सिद्धिः । लोट् च ॥३।३।१६२॥

एधेताम् । एधधातोर्लोट आतामि टेरेत्वे शपि 'सार्वधातुकमपित्' इति ङित्त्वात् 'आतो ङितः' इत्याकारस्य इयादेशे गुणे 'लोपो व्योर्वलि' इति यलोपे 'आमेतः' इति एकारस्य आमि तत्सिद्धिः ।

सवाभ्याम् । 'लोटो लङ्वत्' इत्यतो लोट इति 'आमेतः' इत्यत एत इति चानुवर्तते ।

इटोऽत् ॥३।४।१०६॥ लकारस्य [illegible] प्राप्नोति,
विभक्तौ तुस्माः (१।३।४) इति [illegible] तकारः
तर्हि, मुखसुखार्थं उच्चार्यते । आगम स्फोटो ग्रहणं न
ति, [illegible] ॥ इति काशिका ॥

ऋमाद्वामौ स्तः । एधस्व । एधेथाम् । एधध्वम् ॥ **एत ऐ ३।४।९३॥** लोडुत्तमस्य एत ऐ स्यात् । एधै । एधावहै । एधामहै ॥ आटश्च । ऐधत । ऐधेताम् । ऐधन्त । ऐधथाः । ऐधेथाम् । ऐधध्वम् । ऐधे । ऐधावहि । ऐधामहि ॥ **लिङः सीयुट् ३।४।१०२॥** सलोपः । एधेत । एधेयाताम् ॥ **झस्य रन् ३।४।१०५॥** लिङो झस्य रन् स्यात् । एधेरन् । एधेथाः । एधेयाथाम् । एधेध्वम् ॥ **इटोऽत् ३।४।१०६ ॥** लिङादेशस्य इटोऽत्स्यात् । एधेय । एधेवहि । एधेमहि ॥ **सुट्**

अतो [illegible]
६।३।१

एधस्व । एधो लोटस्थासि शपि 'थासः से' इति थासः से इत्यादेशे आमं बाधित्वा 'सवाभ्यां वामौ' इति एकारस्य वादेशे तत्सिद्धिः ।

एधध्वम् । एधो लोटो ध्वमि टेरेत्वे शपि आमं बाधित्वा 'सवाभ्यां वामौ' इति एकारस्य अमादेशे एधध्वमिति सिद्धम् ।

एत ऐ । 'लोटो लङ्वत्' इत्यतो लोट इति 'आडुत्तमस्य पिच्च' इत्यत उत्तमस्येति चानुवर्त्तते ।

एधै । एधो लोट इटि तस्य एत्वे शपि आमं बाधित्वा 'एत ऐ' इति एकारस्य ऐकारे 'आडुत्तमस्य पिच्च' इति आटि 'आटश्च' इति वृद्धौ 'वृद्धिरेचि' इति वृद्धौ एधै इति सिद्धम् ।

एधावहै । एधधातोर्लोटो वहिप्रत्यये एत्वेशपि आमं बाधित्वा 'एत ऐ' इत्येकारस्य ऐकारे 'आडुत्तमस्य पिच्च' इति आटि सवर्णदीर्घे तत्सिद्धिः ।

ऐधत । एधोर्लङस्तप्रत्यये शपि 'आडजादानाम्' इति आटि वृद्धौ तत्सिद्धिः ।

एधेत । एधधातोर्विधिलिङः तप्रत्यये शपि 'लिङः सीयुट्' इति सीयुटि अनुबन्धलोपे 'लिङः सलोपोऽनतन्त्यस्य' इति सलोपे गुणे 'लोपो व्योर्वलि' इति यलोपे तत्सिद्धिः ।

एधेरन् । एधधातोर्लिङो झप्रत्यये 'झस्य रन्' इति झस्य रनि शपि सीयुटि सलोपे गुणे यलोपे एधेरन् इति सिद्धम् ।

एधेय । एधधातोर्लिङ इटि तस्य 'इटोऽत्' इति अकारे सीयुटि-

@ [illegible] ॥६।१।१००॥ [illegible] इति: तकारेषु उच्चारण
[illegible] । उरण् ॥६।१।१११॥ × सि. कौमुदी. पृ. ३५
रेधे – [illegible] । [illegible]

तिथोः ३।४।१०७॥ लिङस्तथोः सुट् । यलोपः । आर्धधातुकत्वात्सलोपो न । एधिषीष्ट । एधिषीयास्ताम् । एधिषीरन् । एधिषीष्ठाः । एधिषीयास्थाम् । एधिषीध्वम् । एधिषीय । एधिषीवहि । एधिषीमहि ॥ ऐधिष्ट । ऐधिषाताम् ॥ **आत्मनेपदेष्वनतः ७।१।५॥** अनकारात्परस्यात्मनेपदेषु झस्य अदित्यादेशः स्यात् । ऐधिषत । ऐधिष्ठाः । ऐधिषाथाम् । ऐधिढ्वम् । ऐधिषि । ऐधिष्वहि । ऐधिष्महि । ऐधिष्यत । ऐधिष्येताम् । ऐधिष्यन्त । ऐधिष्यथाः । ऐधिष्येथाम् । ऐधिष्यध्वम् । ऐधिष्ये । ऐधिष्यावहि । ऐधिष्यामहि ॥ कमु कान्तौ ॥ २ ॥ **कमेर्णिङ्**

'लिङः सलोपोऽनन्त्यस्य' इति सलोपे गुणे तत्सिद्धिः ।

एधिषीष्ट । एधधातोराशीर्लिङस्तप्रत्यये 'लिङाशिषि' इति तस्यार्धधातुकत्वे 'लिङः सीयुट्' इति सीयुटि आर्धधातुकत्वात्सीयुटः सकारस्य 'लिङः सलोपोऽनन्त्यस्य' इति सलोपाभावे 'सुट्तिथोः' इति सुटि इडागमे 'लोपो व्योर्वलि' इति यलोपे सीयुट्सुटोः सस्य षत्वे तकारस्य ष्टुत्वेन टकारे तत्सिद्धिः ।

एधिषीयास्ताम् । एधधातोराशीर्लिङ आतामि सीयुटि 'सुट्तिथोः' इति सुटि इटि षत्वे तत्सिद्धिः ।

एधिषीरन् । एध आशीर्लिङो झ प्रत्यये झस्य रनि सीयुटि इटि यलोपे षत्वे तत्सिद्धिः ।

ऐधिष्ट । एधधातोर्लुङस्तप्रत्यये च्लौ च्लेः सिचि इटि आदिवृद्धौ षत्वे ष्टुत्वे तत्सिद्धिः ।

आत्मनेपदेषु । 'झोऽन्तः' इत्यतो झ इति 'अदभ्यस्तात्' इत्यतः अदिति चानुवर्तते । आत्मनेपदेष्वितिषष्ठ्यर्थे सप्तमी ।

ऐधिषत । एधधातोर्लुङो झप्रत्यये 'आत्मनेपदेष्वनतः' इति झस्य अत् इत्यादेशे च्लौ च्लेः सिचि इडागमे आटि वृद्धौ षत्वे तत्सिद्धिः ।

ऐधिढ्वम् । एधो लुङो ध्वमि च्लौ च्लेः सिचि इटि आटि वृद्धौ 'धि च' इति सलोपे 'इणः षीध्वंलुङ्लिटां धोऽङ्गात्' इति धस्य ढत्वे तत्सिद्धिः ।

३।१।३०॥ स्वार्थे । ङित्त्वात्तङ् । कामयते ॥ **अयामन्ताल्वाय्येत्न्विष्णुषु ६।४।५५॥** आम् अन्त आलु आय्य इत्नु इष्णु एषु णेरयादेशः स्यात् । कामयाञ्चक्रे । आयादय इति णिङ् वा । चकमे । चकमाते । चकमिरे । चकमिषे । चकमाथे । चकमिध्वे । चकमे । चकमिवहे । चकमिमहे । कामयिता । कामयितासे । कमिता । कामयिष्यते, कमिष्यते । कामयताम् । अकामयत । कामयेत । कामयिषीष्ट ॥ **विभाषेटः ८।३।७९ ॥** इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा ढः । कामयिषीढ्वम् । कामयिषीध्वम् । कमिषीष्ट । कमिषीध्वम् ॥ **णिश्रिद्रुस्रुभ्यः कर्तरि**

कामयते । कम् इत्यस्मात् 'कमेर्णिङ्' इति णिङ्प्रत्ययेऽनुबन्धलोपे उपधावृद्धौ 'सनाद्यन्ता धातवः' इति धातुत्वाल्लटि ङित्त्वादात्मनेपदत्वेन तप्रत्यये शपि गुणेऽयादेशे टेरेत्वे तत्सिद्धिः ।

अयामन्त । 'णेरनिटि' इत्यतो णेरित्यनुवर्तते ।

कामयाञ्चक्रे । कम् इत्यस्माद् 'आयादय आर्धधातुके वा' इति पाक्षिके णिङि उपधावृद्धौ 'सनाद्यन्ता' इति धातुत्वाल्लिटि 'कास्यनेकाच आम्वक्तव्यः', इत्यामि 'सार्वधातुकार्धधातुकयोः' इति प्राप्तगुणं बाधित्वा 'णेरनिटि' इति णिलोपे प्राप्ते 'अयामन्ताल्वाय्येत्न्विष्णुषु' इति णेरयादेशे 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परकृञोऽनुप्रयोगे लिटः तप्रत्यये एशि द्वित्वेऽभ्यासकार्ये यणि तत्सिद्धिः । णिङोऽभावपक्षे लिटस्ते एशि द्वित्वेऽभ्यासकार्ये चकमे इति सिद्ध्यति ।

विभाषेटः । 'इणः षीध्वंलुङ्लिटां धोऽङ्गात्' इति सूत्रमनुवर्तते ।

कामयिषीढ्वम् । कमः 'आयादय' इति पाक्षिके णिङि उपधावृद्धौ धातुत्वाल्लिङो ध्वम्प्रत्यये सीयुटि इटि गुणेऽयादेशे षत्वे यलोपे 'विभाषेटः' इति वैकल्पिके ढत्वे कामयिषीढ्वम् इति ढत्वाभावे कामयिषीध्वमिति णिङभावे कमिषीध्वम् इति च सिद्धम् ।

णिश्रि । 'च्लिलुङि' इत्यतो लुङीति 'च्लेः सिच्' इत्यतः च्लेरिति चानुवर्तते ।

चङ् ३।१।४८॥ ण्यन्तात् श्र्यादिभ्यश्च च्लेश्चङ् स्यात् कर्त्रर्थे लुङि परे । अकामि अ त इति स्थिते—। **णेरनिटि ६।४।५१ ॥** अनिडादावार्धधातुके परे णेर्लोपः स्यात् ॥ **णौ चङ्युपधाया ह्रस्वः ७।४।१ ॥** चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वः स्यात् ॥ **चङि । ६।१।११ ॥** चङि परे अनभ्यासस्य धात्ववयवस्यैकाचः प्रथमस्य द्वे स्तोऽजादेर्द्वितीयस्य ॥ **सन्वल्लघुनि चङ्परेऽनग्लोपे । ७।४।९३ ॥** चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपरः तस्य सनीव कार्यं स्याण्णावग्लोपेऽसति ॥ **सन्यतः ७।४।७९ ॥** अभ्यासस्यात इत् स्यात् सनि ॥ **दीर्घो लघोः ७।४।९४ ॥** लघोरभ्यासस्य दीर्घः स्यात् सन्वद्भावविषये । अचीकमत[2] । णिङभावपक्षे—(कमेश्च्लेश्चङ्

णेरनिटि । 'आर्धधातुके' इत्यधिक्रियते । 'अतो लोपः' इत्यतोलोप इत्यनुवर्तते ।

चङि । 'एकाचो द्वे प्रथमस्य' इति 'अजादेर्द्वितीयस्य' इति धातोरनभ्यासस्य इति चानुवर्तते ।

सन्यतः । 'अत्र लोपोऽभ्यासस्य' इत्यतोऽभ्यासस्येति 'भृञामित्' इत्यत इदिति चानुवर्तते ।

दीर्घो लघोः । 'अत्र लोपोऽभ्यासस्य' इत्यतोऽभ्यासस्येति 'सन्वल्लघुनि चङ् परेऽनग्लोपे' इत्यतोप लघुनि चङ्परेऽनग्लोपे इति चानुवर्तते ।

अचीकमत । कमः 'आयादय' इति पाक्षिके णिङि उपधावृद्धौ धातुत्वाल्लुङस्तत्प्रत्ययेऽटि च्लौ च्लेः सिजादेशं बाधित्वा 'णिश्रिदुश्रुभ्यः कर्त्तरि चङ्' इति च्लेश्चङि अकामि अत इति स्थिते 'णेरनिटि' इति णेर्लोपे 'णौचङ्युपधाया ह्रस्वः' इत्युपधाह्रस्वे 'चङि' इति द्वित्वेऽभ्या-

---

[1] चङ्परक णि पर रहते जो अङ्ग उसका जो लघुपरक अभ्यास उसको सन पर रहते जैसा कार्य होता हो वैसा हो । यदि चङ् पर णि पर रहते अक् का लोप न हुआ हों ।

[2] अचीकमेताम्, अचीकमन्त । अचीकमथाः, अचीकमेथाम्, अचीकमध्वम् । अचीकमे, अचीकमावहि । अचीकमामहि । एवम् अचकमत, अचकमेतामित्यादि ।

वाच्यः) । अचकमत । अकामयिष्यत, अकमिष्यत ॥ अय गतौ ॥ ३ ॥ अयते ॥ **उपसर्गस्यायतौ ८।२।१९** ॥ अयतिपरस्योपसर्गस्य यो रेफस्तस्य लत्वं स्यात् । प्लायते । पलायते ॥ **दयायासश्च ३।१।३७** ॥ दय् अय् आस् एभ्य आम् स्याल्लिटि । अयाञ्चक्रे । अयिता । अयिष्यते । अयताम् । आयत । अयेत । अयिषीष्ट । विभाषेटः । अयिषीढ्वम्, अयिषीध्वम् । आयिष्ट । आयिढ्वम्, आयिध्वम् । आयिष्यते ॥ द्युत दीप्तौ ॥ ४ ॥ द्योतते ॥ **द्युतिस्वाप्योः सम्प्रसारणम् ७।४।६७** ॥ अनयोरभ्यासस्य सम्प्रसारणं स्यात् । दिद्युते ॥

सत्वे हलादिः शेषे चुत्वे 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सन्वद्भावे 'सन्यतः' इति अभ्यासाकारस्य इकारे 'दीर्घो लघोः' इति दीर्घे अचीकमत इति णिङभावपक्षे तु 'कमेश्च्लेश्चङ्वाच्यः' इति चङि द्वित्वेऽभ्यासकार्ये अचकमत इति च सिद्धम् ।

उपसर्गस्य । 'कृपो रो लः' इत्यतो रो ल इत्यनुवर्तते ।

प्लायते । प्रपूर्वादय्धातोर्लटस्तप्रत्यये शपि टेरेत्वे दीर्घे 'उपसर्गस्यायतौ' इत्युपसर्गरेफस्य लत्वे प्लायते इति सिद्धम् । एवं पलायत इत्याद्यपि ।

दयायासश्च । 'कास्प्रत्ययादाममन्त्रे लिटि' इत्यत आमिति लिटीति चानुवर्तते ।

अयाञ्चक्रे । अय्धातोर्लिटि 'दयायासश्च' इति आमि 'आमः' इति लिटो लुकि लिट्परकृञोऽनुप्रयोगे तप्रत्यये एशि द्वित्वेऽभ्यासकार्ये यणि तत्सिद्धिः ।

अयिषीढ्वम् । अय्धातोर्लिङो ध्वम्प्रत्यये सीयुटि इटि षत्वे यलोपे 'विभाषेटः' इति पाक्षिके ढत्वे अयिषीढ्वम्-अयिषीध्वम् इति रूपद्वयं सिद्धम् ।

द्योतते । द्युतधातोर्लटस्तप्रत्यये शपि 'पुगन्त' इति गुणे टेरेत्वे तत्सिद्धिः ।

द्युतिस्वाप्योः । 'अत्र लोपोऽभ्यासस्य' इत्यतोऽभ्यासस्येत्यनुवर्तते ।

दिद्युते । द्युतो लिटस्तप्रत्यये द्वित्वेऽभ्यासत्वे 'द्युतिस्वाप्योः सम्प्रसारणम्' इति सम्प्रसारणे पूर्वरूपे 'हलादिः शेषः' इति लोपे एशि तत्सिद्धिः ।

द्युद्भ्यो लुङि ३।४।९१ ॥ द्युतादिभ्यो लुङः परस्मैपदं वा स्यात् । पुषादीत्यङ् । अद्युतत, अद्योतिष्ट । अद्योतिष्यत ॥ एवम् ॥ श्विता वर्णे ॥ ५ ॥ ञिमिदा स्नेहने ॥ ६ ॥ ञिष्विदा स्नेहनमोचनयोः ॥ ७ ॥ मोहनयोरित्येके । ञिक्ष्विदा चेत्येके ॥ रुचँ दीप्तावभिप्रीतौ च ॥ ८ ॥ घुटँ परिवर्तने ॥ ९ ॥ शुभ दीप्तौ ॥ १० ॥ क्षुभ संचलने ॥ ११ ॥ णभ तुभ हिंसायाम् ॥ १२ ॥ १३ ॥ स्रंसुँ भ्रंसुँ ध्वंसुँ अवस्रंसने ॥ १४ ॥ १५ ॥ १६ ॥ ध्वंसु गतौ च ॥ स्रम्भुं विश्वासे ॥ १७ ॥ वृतु वर्तने ॥ १८ ॥ वर्तते । ववृते । वर्तिता ॥ **वृद्भ्यः स्यसनोः १।३।९२॥** वृतादिभ्यः पञ्चभ्यो वा परस्मैपदं स्यात्स्ये सनि च ॥ **न वृद्भ्यश्चतुर्भ्यः ७।२।५९॥** वृतुवृधुशृधुस्यन्दूभ्यः सकारादेरार्ध-

अद्युतत् । द्युत्धातोर्लुङि 'द्युद्भ्यो लुङि 'इति परस्मैपदत्वाल्लुङस्तिपि इकारलोपे अटि च्लौ 'पुषादि द्युतादिलृदितः परस्मैपदेषु' इति' च्लेरङि ङित्त्वाद्गुणाभावे अद्युतत् इति, परस्मैपदत्वाभावपक्षे तु तप्रत्यये च्लेः सिचि इटि गुणे षत्वे ष्टुत्वे अद्योतिष्टेति च सिद्धम् ।

वृद्भ्यः । 'शेषात्कर्तरि परस्मैपदम्' इत्यतः परस्मैपदमिति 'वाक्यषः' इत्यतो वेति चानुवर्तते ।

न वृद्भ्यः । 'सेऽसिचिकृतचृतछृदतृदनृतः' इत्यतः से इति 'आर्धधातुकस्येड्वलादेः' इत्यत आर्धधातुकस्येडिति 'गमेरिट् परस्मैपदेषु' इत्यतः परस्मैपदेष्विति चानुवर्तते ।

---

१ श्वेतते, शिश्विते. श्वेतिता, श्वेतिष्यते, श्वेतताम्, अश्वेतत, श्वेतेत, श्वेतिषीष्ट, अश्वितत्--अश्वेतिष्ट, अश्वेतिष्यत् । २ मेदते, मिमिदे, मेदिता, मेदिष्यते मेदताम् अमेदत, मेदेत, मेदिषीष्ट, अमिदत्—अमेदिष्ट, । ३ स्वेदते, सिष्विदे, अस्विदत्—अस्वेदिष्ट। ४ क्ष्वेदते, चिक्ष्विदे, अक्ष्विदत्—अक्ष्वेदिष्ट । ५ रोचते, रुरुचे, अरुचत्—अरोचिष्ट । ६ घोटते, जुघुटे, अघुटत्, अघोटिष्ट । ७ स्रंसते, सस्रंसे, अस्रसत्—अस्रंसिष्ट। ८ भ्रंसते, बभ्रंसे, अभ्रसत्–अभ्रंसिष्ट । ९ ध्वंसते, दध्वंसे, अध्वसत्—अध्वंसिष्ट । १० स्रम्भते, सस्रम्भे अस्रभत्— अस्रंभिष्ट ।

धातुकस्येण् न स्यात् तङानयोरभावे । वर्त्स्यति, वर्तिष्यते । वर्तताम् । अवर्तत । वर्तेत । वर्तिषीष्ट । अवर्तिष्ट । अवर्त्स्यत्, अवर्तिष्यत ॥ दद दाने ॥ १९ ॥ ददते ॥ **न शसददवादिगुणानाम् ६।४।१२६** ॥ शसेर्ददेर्वकारादीनां गुणशब्देन विहितो योऽकारस्तस्य एत्वाभ्यासलोपौ न । दददे । दददाते । दददिरे । ददिता । ददिष्यते । ददताम् । अददत । ददेत । ददिषीष्ट । अददिष्ट[1] । अददिष्यत ॥ त्रपूष् लज्जायाम् ॥ २० ॥ त्रपते ॥ **तॄफलभजत्रपश्च ६।४।१२२** ॥ एषामते

वर्त्स्यति । वृत्धातोर्लृटि 'वृद्भ्यः स्यसनोः' इति परस्मैपदत्वात्तिपि स्यप्रत्यये गुणे 'न वृद्भ्यश्चतुर्भ्यः' इतीण्निषेधे वर्त्स्यति इति परस्मैपदत्वाभावे वर्तिष्यते इति च सिद्धम् ।

अवृतत् । वृत् धातोर्लुङि 'द्युद्भ्यो लुङि' इति परस्मैपदत्वात्तिपि इकारलोपे अटि च्लौ सिचं बाधित्वा 'पुषादिद्युताद्लृदितः परस्मैपदेषु' इति च्लेरङि अवृतत् इति, परस्मैपदत्वाभावपक्षे तप्रत्यये च्लेः सिचि इटि गुणे रपरे षत्वे ष्टुत्वे च कृते अवर्तिष्ट इति च सिद्धम ।

न शस । 'अत एकहल्मध्ये' इत्यतः अत इति 'घ्वसोरेद्धावभ्यासलोपश्च' इत्यत एदिति अभ्यासलोपश्चेति चानुवर्तते ।

दददे । दद्धातोर्लिटस्तप्रत्यये तस्य 'लिटस्तझयोरेशिरेच्' इत्येशादेशे द्वित्वे अभ्यासत्वे हलादिः शेषे 'अत एकहल्मध्येऽनादेशादेर्लिटि' इति एत्वाभ्यासलोपयोः प्राप्तौ 'न शसददवादिगुणानाम्' इति तन्निषेधे तत्सिद्धिः ।

अददिष्ट । दद्धातोर्लुङस्तप्रत्ययेऽटि च्लेः सिचि इटि षत्वे ष्टुत्वे तत्सिद्धिः ।

तॄफल । 'अत एकहल्मध्ये' इत्यत अत इति लिटि इति 'घ्वसोरेद्धावभ्यासलोपश्च' इत्यत एदिति अभ्यासलोपश्चेति 'गमहन' इत्यतः क्ङितीति 'थलि च सेटि' इति सूत्रञ्चानुवर्तते ।

---

[1] अददिषाताम्, अददिषत । अददिष्ठाः, अददिषाथाम्, अददिढ्वम् । अददिषि, अददिष्वहि, अददिष्महि ।

एत्वमभ्यासलोपश्च स्यात् किति लिटि सेटि थलि च । त्रेपे । त्रपिता, त्रप्ता । त्रपिष्यते, त्रप्स्यते । त्रपताम् । अत्रपत । त्रपेत । त्रपिषीष्ट, त्रप्सीष्ट । अत्रपिष्ट[1], अत्रप्त । अत्रपिष्यत, अत्रप्स्यत ॥

॥ इत्यात्मनेपदिनः ॥

श्रिञ् सेवायाम् ॥ १॥ श्रयति, श्रयते । शिश्राय[2], शिश्रिये । श्रयितासि, श्रयितासे । श्रयिष्यति, श्रयिष्यते । श्रयतु, श्रयताम् । अश्रयत्, अश्रयत । श्रयेत् , श्रयेत । श्रीयात् , श्रयिषीष्ट । चङ् । अशिश्रियत्[3] । अशिश्रियत[4] । अश्रयिष्यत्, अश्रयिष्यत ॥ भृञ् भरणे ॥ २ ॥ भरति,

त्रेपे । त्रप्धातोर्लिटस्तस्य एशि द्वित्वेऽभ्यासत्वे हलादिः शेषे 'तॄफलभजत्रपश्च' इति एत्वेऽभ्यासलोपे च कृते तत्सिद्धिः ।

त्रपिता । त्रपो लुटस्तप्रत्यये तासि तास आर्धधातुकत्वात् 'स्वरतिसूतिसूयतिधूञूदितो वा' इति पाक्षिके इडागमे तस्य डादेशे डित्वात् टिलोपे त्रपिता इति इडभावे त्रप्ता इति च सिद्धम् ।

॥ इत्यात्मनेपदिनः ॥

शिश्राय । श्रिधातोर्लिटस्तिपोणलि द्वित्वेऽभ्यासत्वे हलादिः शेषे 'अचोञ्णिति' इति वृद्धौ आयादेशे शिश्राय इति आत्मनेपदे तु तप्रत्यये तस्य एशि द्वित्वेऽभ्यासकार्ये 'अचि श्नुधातु' इति इयङि शिश्रिये इति च सिद्धम् ।

अशिश्रियत् । श्रिधातोर्लुङस्तिपि इकारलोपे अटि च्लौ 'णिश्रिद्रु-

---

[1] अत्रपिषाताम्, अत्रपिषत । अत्रपिष्ठाः, अत्रपिषाथाम्, अत्रपिढ्वम् । अत्रपिषि, अत्रपिष्वहि, अत्रपिष्महि । इडभावपक्षे अत्रप्त, अत्रप्साताम्, अत्रप्सत । अत्रप्थाः, अत्रप्साथाम्, अत्रब्ध्वम् । अत्रप्सि, अत्रप्स्वहि, अत्रप्स्महि । [2] शिश्रियतुः, शिश्रियुः । शिश्रयिथ, शिश्रियथुः, शिश्रिय । शिश्राय-शिश्रय, शिश्रियिव, शिश्रियिम । शिश्रिये, शिश्रियाते, शिश्रियिरे । शिश्रियिषे, शिश्रियाथे, शिश्रियिढ्वे—शिश्रियिध्वे । श्रिश्रिये, श्रियिवहे, शिश्रियिमहे । [3] अशिश्रियताम्, अशिश्रियन् इत्यादि । [4] अशिश्रियेताम्, अशिश्रियन्त इत्यादि ।

भरते । बभार । बभ्रतुः । बभ्रुः । बभर्थ । बभृव । बभृम । बभ्रे[1] । बभृषे । भर्तासि, भर्तासे । भरिष्यति, भरिष्यते । भरतु, भरताम् । अभरत्, अभरत । भरेत्, भरेत ॥ **रिङ् शयग्लिङ्क्षु ७।४।२८** ॥ शे यकि यादार्धधातुके लिङि च ऋतो रिङ् आदेशः स्यात् । रीङि प्रकृते रिङ्विधानसामर्थ्याद्दीर्घो न । भ्रियात् ॥ **उश्च १।२।१२** ॥ ऋवर्णात्परो झलादी लिङ्सिचौ कितौ स्तस्ताङि । भृषीष्ट । भृषीयास्ताम् । अभार्षीत् ॥ **ह्रस्वादङ्गात्**

स्रुभ्यः कर्त्तरि चङ्' इति च्लेश्चङि 'चङि' इति द्वित्वेऽभ्यासत्वे हलादेः शेषे 'अचि श्नु' इतीयङि अशिश्रियत् इति आत्मनेपदे तु तप्रत्यये पूर्वोक्तकार्ये अशिश्रियत इति च सिद्धम् ।

बभार । भृधातोर्लिटस्तिपो णलि द्वित्वेऽभ्यासत्वे 'उरत्' इत्यत्वे रपरे हलादेः शेषे 'अभ्यासे चर्च' इति जश्त्वे 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरे 'अतउपधायाः' इति वृद्धौ बभार इति आत्मनेपदे तु तप्रत्यये तस्य एशि द्वित्वेऽभ्यासकार्ये यणि बभ्रे इति च सिद्धम् ।

बभर्थ । भृधातोर्लिटः सिपस्थलि द्वित्वेऽभ्यासकार्ये 'एकाच उपदेशेऽनुदात्तात्' इतीण्निषेधे गुणे रपरे तत्सिद्धिः ।

रिङ् शयग्लिङ्क्षु । 'अयङ् यि क्ङिति' इत्यतो यीत्यनुवर्तते । तदादिविधिः । 'अकृत्सार्वधातुकयोः' इति 'रीङ् ऋतः' इत्यतः ऋत इति चानुवर्तते ।

भ्रियात् । भृधातोराशीर्लिङस्तिपि इकारलोपे आर्धधातुकत्वे यासुटि 'स्कोः' इति सलोपे 'रिङ्शयग्लिङ्क्षु' इति रिङादेशे 'रीङ् ऋतः' इत्यतः रीङित्यनुवृत्त्यैव सिद्धे रिङ्विधानसामर्थ्यात् 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घाभावे भ्रियात् इति सिद्धम् । पृ २२३

उश्च । 'इको झल्' इत्यतो झलिति 'लिङ्सिचावात्मनेपदेषु' इति चानुवर्तते ।

भृषीष्ट । भृधातोराशीर्लिङस्तप्रत्यये आर्धधातुकत्वे सीयुटि 'सुट्तिथोः' इति सुटि अनुबन्धलोपे यलोपे 'उश्च' इति कित्त्वाद्गुणाभावे षत्वे ष्टुत्वे तत्सिद्धिः ।

---

[1] बभ्राते, बभ्रिरे । बभृषे बभ्राथे बभृढ्वे । बभ्रे बभृवहे बभृमहे ।

८।२।२७ ॥ सिचो लोपो झलि । अभृत । अभृषाताम् । अभरिष्यत्, अभरिष्यत ॥ हृञ् हरणे ॥ ३ ॥ हरति, हरते । जहार[1] । जहर्थ । जह्रिव । जह्रिम । जह्रे । जह्रषे । हर्तासि, हर्तासे हरिष्यति, हरिष्यते । हरतु, हरताम् । अहरत्, अहरत । हरेत्, हरेत । ह्रियात् । हृषीष्ट । हृषीयास्ताम् । अहार्षीत्, अहृत । अहरिष्यत्, अहरिष्यत ॥ धृञ् धारणे ॥ ४ ॥ धरति, धरते ॥ णीञ् प्रापणे ॥ ५ ॥ नयति[2], नयते ॥ डुपचष् पाके ॥ ६ ॥ पचति, पचते । पपाच[3] । पेचिथ, पपक्थ । पेचे पक्तासि,

अभार्षीत् । भृधातोर्लुङ्तिपि इकारलोपे अटि च्लौ च्लेः सिचि ईटि 'सिचिवृद्धिः प्ररस्मैपदेषु' इति वृद्धौ रपरे षत्वे तत्सिद्धिः ।

ह्रस्वादङ्गात् । 'रात्सस्य' इत्यतः सस्येति 'संयोगान्तस्य लोपः' इत्यतो लोप इति 'झलो झलि' इत्यतो झलीति चानुवर्तते । अत्र सिच इति भाष्यम् ।

अभृत । भृधातोर्लुङस्तप्रत्ययेऽटि च्लेः सिचि 'उश्च' इति कित्त्वे 'ह्रस्वादङ्गात्' इति सलोपे कित्त्वाद्गुणाभावे तत्सिद्धिः ।

पेचिथ । पच्धातोर्लिटः सिपस्थलि द्वित्वेऽभ्यासत्वे हलादिः शेषे

---

१ जह्रतुः जह्रुः । जहर्थ जह्रथुः जह्र । जहार-जहर जह्रिव जह्रिम । जह्रे जह्राते जह्रिरे । जह्रिषे जह्राथे जह्रिढ्वे-जह्रिध्वे । जह्रे जह्रिवहे जह्रिमहे ।

२ निनाय निन्यतुः निन्युः । निनयिथ-निनेथ, निन्यथुः निन्य । निनाय—निनय निन्यिव निन्यिम । निन्ये निन्याते निन्यिरे । निन्यिषे निन्याथे निन्यिढ्वे—निन्यिध्वे । निन्ये निन्यिवहे निन्यिमहे । नेता । नेष्यति-नेष्यते । नयतु-नयताम् । अनयत्-अनयत । नयेत्-नयेत । नीयात्-नेषीष्ट । अनैषीत्-अनेष्ट । अनेष्यत्, अनेष्यत ।

३ पेचतुः पेचुः । पेचिथ—पपक्थ पेचथुः पेच । पपाच-पपच पेचिव पेचिम । पेचे पेचाते पेचिरे । पेचिषे पेचाथे पेचिध्वे । पेचे पेचिवहे पेचिमहे । पक्ष्यति-पक्ष्यते पचतु-पचताम् । अपचत्—अपचत । पचेत्—पचेत । पच्यात् पक्षीष्ट । अपाक्षीत् अपाक्ताम्, अपाक्षुः । अपाक्षीः अपाक्तम्, अपाक्त । अपाक्षम् अपाक्ष्व अपाक्ष्म । अपक्त अपक्षाताम् अपक्षत । अपक्थाः अपक्षाथाम् अपग्ध्वम् । अपक्षि अपक्ष्वहि अपक्ष्महि ।

पक्तासे ॥ भज सेवायाम् ॥ ७ ॥ भजति, भजते । बभाज, भेजे । भक्तासि, भक्तासे । भक्ष्यति, भक्ष्यते । अभाक्षीत् । अभक्त । अभक्षाताम् ॥ यज देवपूजासङ्गतिकरणदानेषु ॥ ८ ॥ यजति, यजते ॥ **लिट्यभ्यासस्योभयेषाम्** ६।१।२७ ॥ वच्यादीनां ग्रह्यादीनां चाभ्यासस्य सम्प्रसारणं लिटि । इयाज ॥ **वचिस्वपियजादीनां किति** ६।१।१५ ॥ वचिस्वप्योर्यजादीनां च संप्रसारणं स्यात् किति । ईजतुः । ईजुः । इयजिथ, इयष्ठ । ईजे । यष्टा ।

भारद्वाजनियमात् पाक्षिके इटि 'थलि च सेटि' इति एत्वाभ्यासलोपयोः पेचिथ इति इडभावे कुत्वे पपक्थ इति च सिद्धम् ।

पेचे । पचो लिटस्तस्य एशि द्वित्वेऽभ्यासकार्ये 'अत एकहल्मध्ये' इति एत्वाभ्यासलोपयोः तत्सिद्धिः ।

पक्षीष्ट । पच्धातोराशीर्लिङस्तप्रत्यये सीयुटि 'चोः कुः' इति कुत्वे यलोपे सुटि षत्वे ष्टुत्वे पक्षीष्टेति सिद्धम् ।

लिट्य । 'ष्यङः सम्प्रसारणम्' इत्यतः सम्प्रसारणमित्यनुवर्तते । उभयेषामित्यनेन 'वचिस्वपि' 'ग्रहिज्या' इति सूत्रोक्तानां ग्रहणम् ।

इयाज । यज्धातोर्लिटस्तिपो णलि द्वित्वेऽभ्यासत्वे हलादिः शेषे 'लिट्यभ्यासस्योभयेषाम्' इति सम्प्रसारणे पूर्वरूपे उपधावृद्धौ तत्सिद्धिः ।

ईजतुः । यज्धातोर्लिटस्तसः अतुसि द्वित्वं बाधित्वा परत्वात्पूर्वं 'वचिस्वपियजादीनां किति' इति सम्प्रसारणे पूर्वरूपे ततः 'पुनः प्रसङ्गविज्ञानात्सिद्धम्' इति न्यायात् द्वित्वे सवर्णदीर्घे रुत्वे विसर्गे ईजतुरिति सिद्धम् ।

---

१ यजिर्वपिर्वहिश्चैव वसिर्वेञ् व्येञ् इत्यपि । ह्वेञ्वदी श्वयतिश्चेति यजाद्याः स्युरिमे नव । यज् देवपूजा० १ डुवप् बीजसन्ताने २ वह प्रापणे ३ वस निवासे ४ वेञ् तन्तुसन्ताने ५ व्येञ् संवरणे ६ ह्वेञ् स्पर्धायां शब्दे च ७ वद व्यक्तायां वाचि ८ टुओश्वि गतिवृद्धयोः ९ यजादि हैं ।

⊙ षस्य ढस्य [illegible] पर॥

अराक्षीत्

षढोः कः सि ॥ यक्ष्यति, यक्ष्यते । इज्यात्, यक्षीष्ट । अयाक्षीत्, अयष्ट ॥
वह प्रापणे ॥ ९ ॥ वहति, वहते । उवाह । ऊहतुः । ऊहुः । उवहिथ ॥

इयजिथ । यज्धातोर्लिटः सिपस्थलि द्वित्वे 'लिट्यभ्यासस्योभयेषाम्' इति सम्प्रसारणे पूर्वरूपे भारद्वाजनियमात्पाक्षिके इटि इयजिथ इति इडभावपक्षे 'व्रश्च' इति षत्वे ष्टुत्वे इयष्ठ इति च सिद्धम् ।

ईजे । यजोलिटस्तस्य एशि 'असंयोगाल्लिट् कित' इति कित्वात् 'वचिस्वपियजादीनां किति' इति सम्प्रसारणे द्वित्वे दीर्घे तत्सिद्धिः ।

यक्ष्यति । यजो लृटस्तिपि स्ये 'व्रश्च' इति षत्वे 'षढोः कः सि' इति षकारस्य ककारे षत्वे तत्सिद्धिः ।

इज्यात् । यज्धातोराशीर्लिङस्तिपि इकारलोपे यासुटि 'किदाशिषि' इति यासुटः कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणे तत्सिद्धिः ।

यक्षीष्ट । यजो लिङस्तप्रत्यये सीयुटि यलोपे जस्य षत्वे तस्य ककारे सुटि षत्वे ष्टुत्वे तत्सिद्धिः ।

अयाक्षीत् । यज्धातोर्लुङस्तिपि इकारलोये अटि च्लेः सिचि इटि 'वदव्रज' इति वृद्धौ 'व्रश्च' इति जस्य षत्वे 'षढोः कः सि' इति षस्य कत्वे षत्वे तत्सिद्धिः ।

उवाह । वहो लिटस्तिपो णलि द्वित्वे हलादेः शेषे 'लिट्यभ्यासस्योभयेषाम्' इति सम्प्रसारणे पूर्वरूपे उपधावृद्धौ तत्सिद्धिः ।

ऊहतुः । वहो लिटस्तसोऽतुसि परत्वाद् 'वचिस्वपि' इति सम्प्रसारणे पूर्वरूपे ततो द्वित्वे दीर्घे रुत्वविसर्गयोस्तत्सिद्धिः ।

उवहिथ । वहो लिटः सिपस्थलि द्वित्वेऽभ्यासकार्ये सम्प्रसारणे पूर्वरूपे भारद्वाजनियमात्पाक्षिके इटि उवहिथ इति, इडभावपक्षे तु उवह् थ इति स्थिते 'होढः' इति हस्य ढत्वे 'झषस्तथोर्धोऽधः' इति थस्य धत्वे ष्टुत्वे 'ढो ढे लोपः' इति ढलोपे 'सहिवहोरोदवर्णस्य' इति ओत्वे उवोढ इति च सिद्धम् ।

---

[1] अभार्ष्टाम्, अभार्षुः । इत्यादि । अभृत, अभृषाताम्, अभृषत । अभृथाः, अभृषाथाम्, अभृढ्वम् । अभृषि, अभृष्वहि, अभृष्महि ।

झषस्तथोर्धोऽधः ८।२।४८॥ झषः परयोस्तथोर्धः स्यान्न तु दधातेः ॥ **ढो ढे लोपः ८।३।१३। सहिवहोरोदवर्णस्य ६।३।११२॥** अनयोरवर्णस्य ओत्स्यात् ढलोपे । उवोढ । ऊहे । वोढा । वक्ष्यति । अवाक्षीत् । अवोढाम् । अवाक्षुः । अवाक्षीः । अवोढम् । अवोढ । अवाक्षम् । अवाक्ष्व । अवाक्ष्म । अवोढ । अवक्षाताम् । अवक्षत । अवोढाः । अवक्षाथाम् अवोढ्वम् । अवक्षि । अवक्ष्वहि । अवक्ष्महि ॥

इति भ्वादयः ॥ १ ॥

अथादादयः ।

अद भक्षणे ॥ १ ॥ **आदिप्रभृतिभ्यः शपः २।४।७२॥** लुक् स्यात् । अत्ति । अत्तः । अदन्ति । अत्सि अत्थः । अत्थ । अद्मि । अद्वः । अद्मः ॥ **लिट्यन्यतरस्याम् २।४।४०॥** अदो घस्लृ वा स्याल्लिटि । जघास । उपधालोपः ॥ **शासिवसिघसीनां च ८।३।६०॥**

वोढा । वहधातोर्लुटस्तासि डादेशे टिलोपे हस्य ढत्वे तस्य धत्वे ष्टुत्वे ढलोपे 'सहिवहोरोदवर्णस्य' इति ओत्वे तत्सिद्धिः ।

वक्ष्यति । वहेर्लृटस्तिपि स्ये हस्य ढत्वे 'षढोः कः सि' इति ढस्य कत्वे षत्वे तत्सिद्धिः ।

अवाक्षीत् । वहो लुङस्तिपि इलोपेऽटि च्लेः सिचि ईटि 'वदव्रज' इति वृद्धौ हस्य ढत्वे तस्य कत्वे षत्वे तत्सिद्धिः ।

अवोढाम् । वहो लुङस्तसस्तामि अटि च्लेः सिचि 'झलो झलि' इति सलोपे हस्य ढत्वे तस्य धत्वे ष्टुत्वे ढलोपे 'सहिवहोरोदवर्णस्य' इति ओत्वे तत्सिद्धिः ।

॥ इति भ्वादयः ॥

अत्ति । अदो लटस्तिपि शपि 'आदिप्रभृतिभ्यः शपः' इति शपो लुकि चर्त्वे तत्सिद्धिः । खरि च ॥ ८।४।५५॥

जघास । अदो लिटि 'लिट्यन्यतरस्याम्' इति पाक्षिके घस्ला-

CC0. In Public Domain. Digitization by eGangotri

७) सार्वधातुकमपित् (१।२।४) ... योगात् लिट् - कित् (१।२।५) इति लिटः किद्भावः । ४- स्कोः संयोगाद्योरन्ते च (८।२।२९)

पृ. ७८८

इण्कुभ्यां परस्यैषां सस्य षः स्यात् । घस्य चर्त्वम् । जक्षतुः जक्षुः । जघसिथ । जक्षथुः । जक्ष । जघास, जघस । जक्षिव । जक्षिम । आद । आदतुः आदुः । **इडत्त्यर्तिव्ययतीनाम् ७।२।६६॥** अद् ऋ व्येञ् एभ्यस्थलो नित्यमिट् स्यात् । आदिथ । अत्ता । अत्स्यति । अत्तु । अत्तात् । अत्ताम् । अदन्तु ॥ **हुझल्भ्यो हेर्धिः ६।४।१०१॥** होर्झलन्तेभ्यश्च हेर्धिः स्यात् । अद्धि । अत्तात् अत्तम् । अत्त । अदानि । अदाव । अदाम ॥ **अदः सर्वेषाम् ७।३।१००॥** अदः परस्यापृक्तसार्वधातुकस्य अट् स्यात्सर्वमतेन । आदत् । आत्ताम् । आदन् । आदः । आत्तम् । आत्त । आदम् । आद्व । आद्म । अद्यात् । अद्याताम् अद्युः । अद्यात् । अद्यास्ताम् । अद्यासुः ॥ **लुङ्सनोर्घस्लृ २।४।३७॥** अदो घस्लृ स्याल्लुङि सनि च । लृदित्त्वादङ् । अघसत् । आत्स्यत् ॥ हन हिंसागत्योः ॥ २ ॥ हन्ति ॥

लुट् लृट् लोट्

सेर्ह्यपिच्च ॥३।४।८७॥

मेर्नुः ॥३।४।८९॥ उस्यपदान्तात् ॥६।१।९६॥

लिङाशिषि

देशेऽनुबन्धलोपे तिपो णलि द्वित्वेऽभ्यासत्वे हलादेः शेषे चुत्वे जश्त्वे उपधावृद्धौ तत्सिद्धिः । कुहोश्चुः अभ्यासे चर्च

जक्षतुः । अदो लिटि घस्लादेशे तस अतुसि द्वित्वेऽभ्यासकार्ये जश्त्वे 'गमहन' इत्युपधालोपे चर्त्वे 'शासिवसिघसीनां च' इति षत्वे तत्सिद्धिः ।

जघसिथ । अदो लिटि पाक्षिके घस्लादेशे सिपस्थलि द्वित्वे हलादेः शेषे चुत्वे जश्त्वे तासि घसोऽभावात् थलि क्रादिनियमान्नित्ये इटि जघसिथ इति, घस्लादेशाभावपक्षे द्वित्वे 'अत आदेः' इति दीर्घे सवर्णदीर्घे 'इडत्त्यर्तिव्ययतीनाम्' इति इटि आदिथेति च सिद्धम् ।

अद्धि । अद्धातोर्लोटः सिपो हौ शपो लुकि 'हुझल्भ्योहेर्धिः' इति हेर्धौ तत्सिद्धिः । सेर्ह्यपिच्च ॥३।४।८७॥

आदत् । अद्धातोर्लङस्तिपि इकारलोपे शपो लुकि आटि वृद्धौ 'अदः सर्वेषाम्' इत्यादि तत्सिद्धिः । च्लेरङ्, अनादेशे, अतो गुणे

अघसताम् । अघसन् अघस अ

अघसत् । अदो लुङि 'लुङ्सनोर्घस्लृ' इति घस्लादेशे तिपि इलोपेऽटि च्लौ 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इति च्लेरङि तत्सिद्धिः । ३।१।५५

जघास - जक्षतुः - जक्षुः । आद आदतुः आदुः ।
जघसिथ - जक्षथुः जक्ष । आदिथ आदथुः आद ।
जघास / जघस - जक्षिव - जक्षिम । आद आदिव आदिम ।

यासुट् परस्मैपदेषूदात्तो ङिच्च ॥३।४।१०३॥ यासुट् ।

[illegible] स दोनों सकारों का लोप [illegible] सुट: सत्य
लोपः। पदान्ताच्च सुट: सकारलोपः॥
उञि - अभ्यासा [illegible] अभ्यास में आता दीर्घ
[illegible] (७।३।१०१) से दीर्घ हो॥

अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ६।४।३७॥ [1]अनुनासिकान्तानामेषां वनतेश्च लोपः स्याज्झलादौ किति ङिति च परे। यमिरमिनमिगमिहनिमन्यतयोऽनुदात्तोपदेशाः। तनु षणु क्षणु क्षिणु ऋणु तृणु घृणु वनु मनु तनोत्यादयः। हतः। घ्नन्ति। हंसि। हथः। हथ। हन्मि। हन्वः। हन्मः। जघान। जघ्नतुः। जघ्नुः॥ **अभ्यासाच्च ७।३।५५॥** अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात्। जघनिथ, जघन्थ। जघ्नथुः। जघ्न। जघान, जघन। जघ्निव। जघ्निम। हन्ता। हनिष्यति॥ हन्तु, हतात्। हताम्। घ्नन्तु॥ **हन्तेर्जः ६।४।३६॥** हौ परे॥ **असिद्धवदत्राभात् ६।४।२२॥** इत[2] ऊर्ध्वमापादसमाप्तेरा-

३।४।११६॥
३।४।१०४॥

हतः। हन् धातोर्लटस्तसि शपो लुकि 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' इति नलोपे रुत्वे विसर्गे तत्सिद्धिः।

घ्नन्ति। हन्धातोर्लटो झौ झस्यान्तादेशे 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्युपधालोपे 'हो हन्ते र्ञ्णिन्नेषु' इति कुत्वे तत्सिद्धिः।

जघान। हनो लिटस्तिपो णलि द्वित्वेऽभ्यासत्वे हलादेः शेषे चुत्वे जश्त्वे उपधावृद्धौ 'अभ्यासाच्च' इत्यस्यापेक्षया शीघ्रोपस्थितिकरत्वरूपान्तरङ्गत्वात् 'हो हन्ते र्ञ्णिन्नेषु' इति कुत्वे तत्सिद्धिः।

जघनिथ। हनो लिटः सिपस्थलि द्वित्वेऽभ्यासकार्ये भरद्वाजनियमात्पाक्षिके इटि ञ्णित्प्रत्ययपरत्वाभावान्नकारपरत्वाभावाच्च 'हो हन्तेः' इत्यस्याप्राप्त्या 'अभ्यासाच्च' इति कुत्वे जघनिथ इति इडभावे जघन्थ इति च सिद्धम्।

जघ्निव। हनो लिटो वसोवादेशे द्वित्वेऽभ्यासकार्ये जहन् व इति स्थिते क्रादिनियमादिटि 'गमहन' इत्युपधालोपे 'हो हन्तेः' इति कुत्वे तत्सिद्धिः।

---

[1] अनुनासिकान्त जो अनुदात्तोपदेश और तनोत्यादि और वन धातु उसका लोप हो झलादि कित् ङित् प्रत्यय पर रहते। [2] इस सूत्र से लेकर पादसमाप्तिपर्यन्त आभीय है। समानाश्रय आभीय कर्त्तव्य में कृत आभीय असिद्ध होता है।

भीयम्, समानाश्रये तस्मिन्कर्तव्ये तदसिद्धम् । इति जस्यासिद्धत्वान्न हेर्लुक् । जहि, हतात् । हतम् । हत । हनानि । हनाव । हनाम । अहन् । अहताम् । अघ्नन् । अहन् । अहतम् । अहत । अहनम् । अहन्व । अहन्म ॥ हन्यात् । हन्याताम् । हन्युः ॥ **आर्धधातुके २।४।३५॥** इत्यधिकृत्य ॥ **हनो वध लिङि २।४।४२॥ लुङि च । २।४।४३॥** वधादेशोऽदन्तः । आर्धधातुके इति विषयसप्तमी, तेन आर्धधातुकोपदेशे अकारान्तत्वादतो लोपः । वध्यात् । वध्यास्ताम् । आदेशस्यानेकाच्त्वादेकाच इतीड्निषेधाभावादिट् । अतो हलादेरिति वृद्धौ प्राप्तायाम्—॥ **अचः परस्मिन् पूर्वविधौ ॥ १।१।५७॥** परनिमित्तोऽजादेशः स्थानिवत्, स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये ॥ इत्यल्लोपस्य स्थानिवत्त्वेनोपधात्वाभावान्न वृद्धिः ॥ अवधीत् । अहनिष्यत् ॥ यु मिश्रणामिश्रणयोः ॥ ३ ॥ **उतो वृद्धिर्लुकि हलि ७।३।८९॥** लुग्विषये उतो वृद्धिः पिति हलादौ सार्व-

---

जहि । हनो लोटः सिपो हौ 'हन्तेर्जः' इति जादेशे 'असिद्धवदत्राभात्' इति जस्यासिद्धत्वाद् 'अतो हेः' इति हेर्लुकोऽभावे तत्सिद्धिः ।

अहन् । हनो लङस्तिपि इकारलोपे अटि शपो लुकि 'हल्ङ्याब्भ्यः' इति तलोपे 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति परिभाषया 'अहन्' इति सूत्रे प्रतिपदोक्तस्यैव अहन् इत्यस्य ग्रहणात् अत्र रुत्वाभावे तत्सिद्धिः ।

वध्यात् । हन्धातोराशीर्लिङि 'हनो वध लिङि' इति हनो वधादेशे लिङस्तिपि इलोपे आर्धधातुकत्वे यासुटि 'स्कोः' इति सलोपे आर्धधातुकोपदेशे वधादेशस्यादन्तत्वाद् 'अतो लोपः' इत्यल्लोपे तत्सिद्धिः ।

अवधीत् । हनो लुङि वधादेशे लुङस्तिपि इलोपे अटि च्लेः सिचि वधादेशस्यानेकाच्त्वाद् 'एकाच उपदेशे' इति निषेधाभावादिटि ईटि अल्लोपे 'अचः परस्मिन् पूर्वविधौ' इति अल्लोपस्य स्थानिवत्वाद् 'अतो हलादेर्लघोः' इति वृद्ध्यभावे सलोपे सवर्णदीर्घे तत्सिद्धिः ।

धातुके नत्वभ्यस्तस्य । यौति । युतः । युवन्ति । यौषि । युथः । युथ । यौमि । युवः । युमः । युयाव[1] । यविता । यविष्यति । यौतु । युतात्[2] । अयौत् । अयुताम् । अयुवन्[3] । युयात् । इह उतो वृद्धिर्न भाष्ये पिच्च ङिन्न, ङिच्च पिन्नेति व्याख्यानात् । युयाताम् । युयुः । यूयात् । यूयास्ताम् । यूयासुः । अयावीत् । अयविष्यत् ॥ या प्रापणे ॥ ४ ॥ याति । यातः । यान्ति । ययौ । याता । यास्यति । यातु । अयात् । अयाताम् ॥ **लङः शाकटायनस्यैव ३।४।१११॥** आदन्तात्परस्य लङो झेर्जुस् वा स्यात् । अयुः, अयान्, यायात्, यायाताम्, यायुः । यायात्, यायास्ताम्, यायासुः ।

यौति । युधातोर्लटस्तिपि शपो लुकि 'उतो वृद्धिर्लुकि हलि' इति वृद्धौ तत्सिद्धिः ।

अयुवन् । युधातोर्लङो झौ शपो लुकि झस्यान्तादेशे इलोपेऽटि 'अचि श्नुधातु' इति उवङि तकारस्य संयोगान्तलोपे तत्सिद्धिः ।

युयात् । युधातोर्लिङस्तिपि शपो लुकि इलोपे यासुटि 'लिङः सलोपोऽनन्त्यस्य' इति सलोपे भाष्ये पिच्च ङिन्न ङिच्च पिन्न इति व्याख्यानात् यदागमपरिभाषया यासुटः पित्त्वाभावेन उतो वृद्ध्यभावे तत्सिद्धिः ।

ययौ । याधातोर्लिटस्तिपो णलि द्वित्वेऽभ्यासह्रस्वे 'आत औ णलः' इति णल औकारादेशे वृद्धौ तत्सिद्धिः ।

अयुः । याधातोर्लङो झौ शपो लुकि अटि 'लङः शाकटायनस्यैव' इति पाक्षिके झेर्जुसादेशे 'उस्यपदान्तात्' इति पररूपे रुत्वे विसर्गे अयुः इति, जुसोऽभावपक्षे झस्यान्तादेशे इलोपे तलोपे अयान् इति च सिद्धम् ।

---

[1] युयुवतुः युयुवुः । युयविथ युयुवथुः युयुव । युयाव-युयव युयुविव युयुविम ।
[2] युताम् युवन्तु । युहि युतात्, युतम्, युत । यवानि यवाव, यवाम ।
[3] अयौः अयुतम् अयुत । अयवम्, अयुव, अयुम ।

अयासीत् । अयास्यत् ॥ वा[1] गतिगन्धनयोः ॥ ५ ॥ भा[2] दीप्तौ ॥ ६ ॥ ष्णा[3] शौचे ॥ ७ ॥ श्रा[4] पाके ॥ ८ ॥ द्रा[5] कुत्सायां गतौ ॥ ९ ॥ प्सा[6] भक्षणे ॥ १० ॥ रा[7] दाने ॥ ११ ॥ ला[8] आदाने ॥ १२ ॥ दाप्[9] लवने ॥ १३ ॥ पा[10] रक्षणे ॥ १४ ॥ ख्या[11] प्रकथने ॥ १५ ॥ अयं सार्वधातुके एव प्रयोक्तव्यः ॥ विद ज्ञाने ॥ १६ ॥ **विदो लटो वा ३।४।८३॥** वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षे, वेत्ति । वित्तः । विदन्ति ॥ **उषविदजागृभ्योऽन्यतरस्याम् ३।१।३८॥** एभ्यो लिटि आम्वा स्यात् । विदेरदन्तत्वप्रतिज्ञानादामि न गुणः । विदाञ्चकार, विवेद[12] । वेदिता ।

वेद । विद् धातोर्लटस्तिपि शपोलुकि 'विदो लटो वा' इति पाक्षिके तिपो णलि गुणे वेद इति, णलोऽभावे गुणे चर्त्वे वेत्ति इति च सिद्धम् ।

विदाञ्चकार । विदो लिटि 'उषविदजागृभ्योऽन्यतरस्याम्' इत्यामि विद इत्यदन्तत्वनिपातनाल्लघूपधगुणाभावे लिटो लुकि लिट्परकृञोऽनु-

---

[1] वाति, ववौ, वाता, वास्यति, वातु, अवात्, वायात् वायाताम् वायुः, वायात् वायास्ताम् । अवासीत्, अवास्यत् ।
[2] भाति, बभौ भाता भास्यति, भातु, अभात्, भायात्, भायात् । अभासीत्, अभास्यत् ।
[3] स्नाति, सस्नौ, स्नाता, स्नास्यति, स्नातु अस्नात्, स्नायात्, स्नायात्-स्नेयात्, स्नासीन्, अस्नास्यत् ।
[4] श्राति, शश्रौ, श्राता, श्रास्यति, श्रातु, अश्रात्, श्रायात्, श्रायात्-श्रेयात्, अश्रासीत्, अश्रास्यत् ।
[5] द्राति, दद्रौ द्राता, द्रास्यति, द्रातु, अद्रात्, द्रायात, द्रायात्-द्रेयात् अद्रासीत्, अद्रास्यत् ।
[6] प्साति पप्सौ, प्साता, प्सास्यति, प्सातु, अप्सात्, प्सायात्, प्सायात्-प्सेयात्, प्सासीत्, प्सास्यत् ।
[7] राति, ररौ, राता, रास्यति, रातु, अरात्, रायात्, रायात्, अरासीत्, अरास्यत् ।
[8] लाति, ललौ लाता लास्यति, लातु, अलात्, लायात्, लायात्, अलासीत्, अलास्यत् ।
[9] दाति, ददौ, दाता, दास्यति, दातु, अदात्, दायात्, दायात्, अदासीत्, अदास्यत् ।
[10] पाति, पपौ, पाता, पास्यति, पातु, अपात्, पायात्, पायात्, अपासीत्, अपास्यत् ।
[11] ख्याति, ख्यातु, अख्यात्, ख्यायात् ।
[12] विविदतुः, विविदुः । विवेदिथ, विविदथुः, विविद । विवेद, विविदिव, विविदिम ।

वेदिष्यति ॥ **विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ३।१।३१॥** वेत्तेर्लोटि आम्, गुणाभावो, लोटो लुक्, लोडन्तकरोत्यनुप्रयोगश्च वा निपात्यते । पुरुषवचने न विवक्षिते ॥ **तनादिकृञ्भ्य उः ३।१।७९॥** तनादेः कृञश्च उः प्रत्ययः स्यात् । शपोऽपवादः । गुणौ । विदाङ्करोतु ॥ **अत उत्सार्वधातुके ६।४।११०॥** उप्रत्ययान्तस्य कृञोऽत उत्सार्वधातुके क्ङिति । विदाङ्कुरुतात् । विदाङ्कुरुताम् । विदाङ्कुर्वन्तु । विदाङ्कुरु । विदाङ्करवाणि[1] । अवेत् । अवित्ताम् । अविदुः ॥ **दश्च ८।२।७५॥** धातोर्दस्य पदान्तस्य सिपि परे रुर्वा । अवेः, अवेत्[2] । विद्यात् । विद्याताम् । विद्युः । विद्यात् । विद्यास्ताम् । अवेदीत् । अवेदिष्यत् ॥ अस भुवि ॥ १७ ॥ अस्ति ॥ **श्नसोरल्लोपः ६।४।१११॥** श्नस्यास्तेश्चातो लोपः सार्वधातुके क्ङिति । स्तः । सन्ति । असि । स्थः । स्थ । अस्मि । स्वः । स्मः ॥

प्रयोगे तिपो णलि द्वित्वे 'उरत्' इत्यत्वे रपरे हलादेः शेषे चुत्वे गुणे रपरे उपधावृद्धौ अनुस्वारे परसवर्णे तत्सिद्धिः । आमोऽभावपक्षे द्वित्वेऽभ्यासकार्ये गुणे विवेद इति सिद्ध्यति ।

विदाङ्करोतु । विदो लोटि 'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' इति निपातनात् विद आमि गुणाभावे लोटो लुकि लोडन्तकृञोऽनुप्रयोगे च लोटस्तिपि शपं बाधित्वा 'तनादिकृञ्भ्य उः' इति उ प्रत्यये गुणे रपरे उत्वे अनुस्वारे परसवर्णे तातङि 'अत उत्सार्वधातुके' इति ककारोत्तराकारस्य उत्वे विदाङ्कुरुतात् इति तातङभावे गुणे विदाङ्करोतु इति आमोऽभावपक्षे तातङि वित्तात् इति पक्षे वेत्तु इति च सिद्धम् ।

अवेः । विदो लङस्सिपि इलोपेऽटि शपो लुकि गुणे 'हल्ङ्याब्भ्यः' इति सलोपे 'दश्च' इति रुत्वे विसर्गे तत्सिद्धिः ।

स्तः । असधातोर्लटस्तसि शपो लुकि 'सार्वधातुकमपित्' इति

---

[1] वेत्तु-वित्तात्, वित्ताम्, विदन्तु । विद्धि-वित्तात्, वित्तम्, वित्त । वेदानि, वेदाव, वेदाव, वेदाम । [2] अवित्तम्, अवित्त । अवेदम्, अविद्व, अविद्म ।

उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ८।३।८७॥ उपसर्गेणः प्रादुसश्चास्तेः सस्य षो यकारेऽचि च परे। निष्यात्। प्रनिषन्ति। प्रादुःषन्ति। यच्परः किम्-अभिस्तः॥ **अस्तेर्भूः २।४।५२॥** आर्धधातुके। बभूव। भविता। भविष्यति। अस्तु, स्तात्। स्ताम्। सन्तु॥ **घ्वसोरेद्धावभ्यासलोपश्च ६।४।११९॥** घोरस्तेश्च एत्वं स्याद्धौ परे अभ्यासलोपश्च। एत्वस्यासिद्धत्वाद्धेर्धिः। श्नसोरित्यल्लोपः। तातङ्पक्षे एत्वं न। परेण तातङा बाधात्। एधि, स्तात्। स्तम्। स्त। असानि। असाव। असाम॥ आसीत्। आस्ताम्। आसन्॥ स्यात्। स्याताम्। स्युः॥ भूयात्। अभूत्। अभविष्यत्॥ इण् गतौ॥ १८॥ एति। इतः॥ **इणो यण् ६।४।८१॥** अजादौ प्रत्यये परे। यन्ति॥ **अभ्यासस्यासवर्णे ६।४।७८॥**

एति

ङित्वात् 'श्नसोरल्लोपः' इति अल्लोपे रुत्वे विसर्गे तत्सिद्धिः।

निष्यात्। निपूर्वादस्धातोर्लिङस्तिपि इलोपे यासुटि सलोपे अल्लोपे 'उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' इति षत्वे तत्सिद्धिः।

बभूव। अस्धातोर्लिटस्तिपो णलि आर्धधातुकत्वात् 'अस्तेर्भूः' इति भ्वादेशे वुकि द्वित्वेऽभ्यासकार्ये तत्सिद्धिः।

एधि। अस्धातोर्लोटः सिपो हौ 'घ्वसोरेद्धावभ्यासलोपश्च' इति सस्य एत्वे एत्वस्यासिद्धत्वाद् 'हुझल्भ्यो हेर्धिः' इति हेर्धौ 'श्नसोरल्लोपः' इत्यल्लोपे तत्सिद्धिः। तातङ्पक्षे परेण तातङा बाधादेत्वाभावे स्तात् इति सिद्ध्यति।

आसीत्। असो लङस्तिपि इलोपे आटि वृद्धौ शपो लुकि "अस्तिसिचोऽपृक्ते' इति ईटि तत्सिद्धिः।

यन्ति। इधातोर्लटो झौ शपो लुकि झस्यान्तादेशे इयङादेशं बाधित्वा 'इणो यण्' इति यणि तत्सिद्धिः।

---

१ उपसर्ग सम्बन्धी इण् और प्रादुस् से पर अस् धातु के स को ष हो यकार और अच् पर रहते। २ घुसंज्ञक और अस् धातु को एकार हो और अभ्यास का लोप हो हि पर रहते।

कोठी
वाराणसी-5

अभ्यासस्य इवर्णोवर्णयोरियङुवङौ स्तोऽनवर्णेऽचि । इयाय ॥ **दीर्घ इणः किति ७।४।६९॥** इणोऽभ्यासस्य दीर्घः स्यात् किति लिटि । ईयतुः । ईयुः । इययिथ[1], इयेथ । एता । एष्यति । एतु[2] । ऐत् । ऐताम् । आयन्[3] । इयात् ॥ **एतेर्लिङि ७।४।२४॥** उपसर्गात्परस्य इणोऽगो ह्रस्व आर्धधातुके किति लिङि । निरियात् । उभयत आश्रयणे नान्तादिवत् । अभीयात् ।

इयाय । इणो लिटस्तिपो णलि द्वित्वेऽभ्यासत्वे 'अचोञ्णिति' इति वृद्धौ आयादेशे 'अभ्यासस्यासवर्णे' इतीयङि तत्सिद्धिः ।

ईयतुः । इणो लिटस्तसोऽतुसि द्वित्वेऽभ्यासत्वे इ इ अतुसिति स्थिते 'इणो यण्' इति यणि 'दीर्घ इणः किति' इति दीर्घे रुत्वे विसर्गे तत्सिद्धिः ।

इययिथ । इणो लिटः सिपस्थलि द्वित्वे भारद्वाजनियमात्पाक्षिके इटि गुणेऽयादेशे 'अभ्यासस्यासवर्णे' इति इयङि इययिथ इति इडभाव पक्षे तु गुणे इयङि इयेथ इति च सिद्धम् ।

ऐत् । इणो लङस्तिप इलोपे इकारस्य गुणे आटि वृद्धौ तत्सिद्धिः ।

आयन् । इणो लङो झौ झस्यान्तादेशे इकारलोपे 'इणो यण्' इति यणि तस्याभीयत्वेनासिद्धत्वादाटि तत्सिद्धिः ।

निरियात् । निर्पूर्वाद् इण्धातोराशीर्लिङस्तिप इकारलोपे यासुटि आर्धधातुकत्वे कित्त्वे सलोपे 'अकृत्सार्वधातुकयोर्दीर्घः' इतिदीर्घे 'एतेर्लिङि' इति ह्रस्वे तत्सिद्धिः ।

अभीयात् । अभिपूर्वादिणोलिङस्तिपइकारलोपे यासुटि सलोपे 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घे सवर्णदीर्घे 'उभयत आश्रयणे नान्तादिवत्' इति परिभाषया 'अन्तादिवच्च' इतिसूत्राप्रवृत्त्या उपसर्गात्परस्य इणोऽभावेन ह्रस्वाभावे तत्सिद्धिः ।

---

[1] ईयथुः, ईय । इयाय-इयय, ईयिव, ईयिम । [2] इतात्, इताम्, यन्तु । इहि-इतात्, इतम्, इत । अयानि, अयाव, अयाम । [3] ऐः, ऐतम्, ऐत । आयम्, ऐव, ऐम ।

लिटस्तझयोरेशिरेच् ॥ [illegible] : इरेच्
असंयोगाल्लिट् कित् (१।२।५) इति कित्वाद् गुणाभा

ऽणः किम्—समेयात् ॥ **इणो गा लुङि** २।४।४५॥ गातिस्थेति सिचो लुक् । अगात् । ऐष्यत् ॥ शीङ् स्वप्ने ॥ १९ ॥ **शीङः सार्वधातुके गुणः** ७।४।२१॥ क्ङिति चेत्यस्यापवादः । शेते । शयाते ॥ **शीङो रुट्** ७।१।६॥ शीङः परस्य झादेशस्यातो रुडागमः स्यात् । शेरते । शेषे । शयाथे । शेध्वे । शये । शेवहे । शेमहे । शिश्ये । शिश्याते । शिश्यिरे । ७।४।५२ पृ. २५८ शयिता । शयिष्यते । शेताम् । शयाताम् । अशेत । अशयाताम् । अशेरत । शयीत । शयीयाताम् । शयीरन् । शयिषीष्ट । अशयिष्ट । अशयिष्यत ॥

शयिता । लुटि शयिता →

नाके पृ: २५८ १।८५ तप: ५१ आदे: २५ पृ: २०८

समेयात् । सम् आपूर्वादिणोलिङस्तिपण्कारलोपे यासुटि सलोपे 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घे गुणे तात्सद्धिः । 'एतेर्लिङि' इति सूत्रे 'केऽणः' इत्यतोऽण इत्यस्य सम्बन्धाभावे समेयादित्यत्र ह्रस्वः स्यादतस्तत्सम्बन्ध आवश्यकः ।

अगात् । इणो लुङ 'इणो गा लुङि' इति गादेशे तिपि इलोपेऽटि च्लेः सिचि 'गातिस्था' इति सिचो लुकि तत्सिद्धिः ।

शेते । शीङो लटस्तप्रत्यये शपो लुकि 'सार्वधातुकमपित्' इति तप्रत्ययस्य ङित्त्वात् 'क्ङिति च' इति गुणनिषेधेप्राप्ते 'शीङः सार्वधातुके गुणः' इति गुणे तत्सिद्धिः । टित आत्मनेपदानां टेरे ३।४।७९

शेरते । शीङो लटो झप्रत्यये शपो लुकि 'शीङः सार्वधातुके गुणः' इति गुणे 'आत्मनेपदेष्वनतः' इति झस्यातादेशे टेरेत्वे 'शीङो रुट्' इति रुटि तत्सिद्धिः । ७।१।५॥

शयोन । शीङो लिङस्तप्रत्यये शपोलुकि 'शीङः सार्वधातुके गुणः' इति गुणे सीयुटि सलोपेऽयादेशे यलोपे तत्सिद्धिः ।

~~इणः षीध्वंलुङ्लिटां धोऽङ्गात् ८।३।७८॥~~ स्थाने ॥

आर्ध: ७।२।१० लिट् च (३।४।११५) इति आर्धधातुकत्वात्

१ शिश्यिषे शिश्याथे शिश्यिढ्वे-शिश्यिध्वे । शिश्ये, शिश्यिवहे, शिश्यिमहे । २ शेरताम् । शेष्व. शयाथाम्. शेध्वम् । शयै, शयावहै, शयामहै । ३ अशेथाः, अशयाथाम्, अशेध्वम्, अशयि, अशेवहि, अशेमहि । ४ अशयिषाताम्, अशयिषत । अशयिष्ठाः, अशयिषाथाम्, अशयिढ्वम्-अशयिध्वम् । अशयिषि, अशयिष्वहि, अशयिष्महि ।

आर्धधातुकस्येड् वलादेः (७।२।३५) इति इडागमः ।

CC0. In Public Domain, Digitizaqtion by eGangotri

इङ् अध्ययने ॥ २० ॥ इङिकावध्युपसर्गतो न व्यभिचरतः । अधीते ॥ अधीयाते । अधीयते[1] ॥ **गाङ् लिटि २।४।४९॥** इङो गाङ् स्याल्लिटि । अधिजगे । अधिजगाते । अधिजगिरे[2] । अध्येता । अध्येष्यते । अधीताम् । अधीयाताम् । अधीयताम् । अधीष्व । अधीयाथाम् । अधीध्वम् । अध्ययै । अध्ययावहै । अध्ययामहै । अध्यैत । अध्यैयाताम् । अध्यैयत । अध्यैथाः । अध्यैयाथाम् । अध्यैध्वम् । अध्यैयि । अध्यैवहि । अध्यैमहि । अधीयीत । अधीयीयाताम् । अधीयीरन्[3] । अध्येषीष्ट[4] ॥ **विभाषा लुङ्लृङोः । २।४।५०॥** इङो गाङ् वा स्यात् लुङ्लृङोः ॥ **गाङ्कुटादिभ्योऽञ्णिन्ङित्**

अधिजगे । अधिपूर्वादिङो लिटि 'गाङ् लिटि' इति इङोगाङादेशेऽनुबन्धलोपे लिटस्तस्यैशि द्वित्वेऽभ्यासत्वे ह्रस्वे चुत्वे 'आतो लोप इटि च' इत्यालोपे तत्सिद्धिः ।

अध्ययै । अधिपूर्वादिङोलोट इट एत्वे 'आडुत्तमस्य पिच्च' इत्याटि वृद्धौ अधि इ ऐ इति स्थिते गुणे अयादेशे यणि तत्सिद्धिः ।

अध्ययावहै । अधिपूर्वादिङो लोटो वहिप्रत्यये शपोलुकि टेरेत्वे एकारस्य ऐकारे आटि गुणे अयादेशे यणि तत्सिद्धिः ।

अध्यैत । अधिपूर्वादिङो लङस्तप्रत्यये शपो लुकि आटि वृद्धौ यणि तत्सिद्धिः ।

अध्यैयाताम् । अधिपूर्वादिङोलङ आतामि शपोलुकि परत्वादियङि तत आटि वृद्धौ यणि तत्सिद्धिः ।

अधीयीत । अधिपूर्वादिङो लिङस्तप्रत्यये शपोलुकि सीयुटि सुटि सलोपे यलोपे इयङि सवर्णदीर्घे तत्सिद्धिः ।

---

[1] अधीषे. अधीयाथे, अधीध्वे । अधीये, अधीवहे, अधीमहे । [2] अधिजगिषे, अधिजगाथे, अधिजगिध्वे । अधिजगे, अधिजगिवहे, अधिजगिमहे ।

[3] अधीयीथा; अधीयीयाथाम्, अधीयीध्वम् । अधीयीय, अधीयीवहि अधीमहि ।

[4] अध्येषीयास्ताम्, अध्येषीरन् । अध्येषीष्ठाः, अध्येषीयास्थाम्, अध्येषीढ्वम् । अध्येषीय, अध्येषीवहि, अध्येषीमहि ।

१।२।१॥ गाङादेशात्कुटादिभ्यश्च परेऽञ्णितः प्रत्यया ङितः स्युः। **घुमास्थागापाजहातिसां हलि ६।४।६६॥** एषामात ईत्स्याद्धलादौ क्ङित्यार्धधातुके। अध्यगीष्ट[1], अध्यैष्ट[2]। अध्यगीष्यत, अध्यैष्यत॥ **दुह प्रपूरणे॥ २१॥** दोग्धि। दुग्धः। दुहन्ति। धोक्षि। दुग्धे। दुहाते। दुहते। धुक्षे। दुहाथे। धुग्ध्वे। दुहे। दुह्वहे। दुह्महे। दुदोह, दुदुहे। दोग्धासि, दोग्धासे। धोक्ष्यति, धोक्ष्यते। दोग्धु, दुग्धात्। दुग्धाम्। दुहन्तु। दुग्धि, दुग्धात्। दुग्धम्। दुग्ध। दोहानि। दोहाव। दोहाम। दुग्धाम्। दुहाताम्। दुहताम्। धुक्ष्व। दुहाथाम्। धुग्ध्वम्। दोहै। दोहावहै।

अध्यगीष्ट। अधिपूर्वादिङो लुङस्तप्रत्यये 'विभाषा लुङ्लृङोः' इति गाङादेशेऽटि च्लेः सिचि 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इति सिचो ङित्त्वे 'घुमास्थागापाजहातिसां हलि' इति ईत्वे यणि षत्वे ष्टुत्वे अध्यगीष्ट इति, गाङोऽभावे आटि वृद्धौ पूर्वोक्तकार्ये अध्यैष्टेति च सिद्धम्।

दोग्धि। दुहोलटस्तिपि शपोलुकि 'दादेर्धातोर्घः' इति हस्य घत्वे 'झषस्तथोर्धोऽधः' इति तकारस्य धकारे घस्य जश्त्वेन गकारे गुणे तत्सिद्धिः।

धोक्षि। दुहो लटः सिपि शपो लुकि गुणे हस्य घत्वे 'एकाचो बशो भष्' इति दस्य भष्भावेन धकारे घस्य चर्त्वे षत्वे तत्सिद्धिः।

धोक्ष्यति। दुहोलृटस्तिपि स्ये गुणे घत्वे भष्भावे चर्त्वे षत्वे तत्सिद्धिः।

दुग्धि। दुहोलोटः सिपो हौ हस्य घत्वे 'हुझल्भ्यो हेर्धिः' इति हेर्धौ जश्त्वे तत्सिद्धिः।

धुक्ष्व। दुहो लोटस्थासः से आदेशे शपोलुकि घत्वे भष्भावे चर्त्वे षत्वे 'सवाभ्यां वामौ' इति एकारस्य वादेशे तत्सिद्धिः।

---

[1] अध्यगीषाताम्, अध्यगीषत, अध्यगीष्ठाः, अध्यगीषाथाम्, अध्यगीढ्वम्। अध्यगीषि, अध्यगीष्वहि, अध्यगीष्महि। [2] अध्यैषाताम्, अध्यैषत। अध्यैष्ठाः, अध्यैषाथाम्, अध्यैढ्वम्। अध्यैषि, अध्यैष्वहि, अध्यैष्महि।

दोहामहे। अधोक्। अदुग्धाम्। अदुह्नन्[1]। अदोहम्[2]। अदुग्व। अदुह्नाताम्। अदुहत[3] अधुग्ध्वम्। दुह्यात्, दुहीत॥ **लिङ्सिचावात्मनेपदेषु १।२।११॥** इक्[4]समीपाद्धलः परौ झलादी लिङ्सिचौ कितौ स्तस्तङि। धुक्षीष्ट॥ **शल इगुपधादनिटः क्सः ३।१।४५॥** इगुपधो[5] यः शलन्तस्तस्मादनिटश्च्लेः क्सादेशः स्यात्। अधुक्षत्॥ **लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ७।३।७३॥** एषां क्सस्य लुग्वा स्याद्दन्त्ये तङि। अदुग्ध, अधुक्षत॥ **क्सस्याचि ७।३।७२॥** अजादौ तङि क्सस्य लोपः। अलोऽन्त्यस्येतिलोपः। अधुक्षाताम्। अधुक्षन्त। अदुग्धाः। अदुक्षथाः। अधुक्षाथाम्। अधुग्ध्वम्, अधुक्षध्वम्। अधुक्षि। अदुह्वहि, अधुक्षावहि।

अधोक्। दुहोलङस्तिपि इकारलोपे शपोलुकि अटि गुणे 'हल्ङ्याब्भ्यः' इति तलोपे हस्य घत्वे भष्भावे जश्त्वे चर्त्वे तत्सिद्धिः।

अदुग्ध। दुहोलङस्तप्रत्यये शपोलुकि अटि हस्य घत्वे तस्य धत्वे जश्त्वे तत्सिद्धिः।

धुक्षीष्ट। दुह आशीर्लिङस्तप्रत्यये 'लिङ्सिचावात्मनेपदेषु' इति तस्य कित्त्वाद्गुणाभावे सीयुटि सुटि यलोपे हस्य घत्वे भष्भावे चर्त्वे षत्वे तत्सिद्धिः।

अधुक्षत्। दुहोलुङस्तिपि इकारलोपेऽटि च्लौ 'शलइगुपधादनिटः क्सः' इति च्लेः क्सादेशेऽनुबन्धलोपे घत्वे भष्भावे चर्त्वे षत्वे तत्सिद्धिः।

अदुग्ध। दुहोलुङस्तप्रत्ययेऽटि च्लौ 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशे 'लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये' इति क्सस्य लुकि घत्वे धत्वे जशत्वे अदुग्ध इति लुगभावपक्षे अधुक्षत इति च सिद्धम्।

---

१ अधोक्, अदुग्धम् अदुग्ध। २ अदुह्व, अदुह्म।

३ अदुग्धाः अदुहाथाम् अधुग्ध्वम्। अदुहि अदुह्वहि अदुह्महि।

४ इक् समीप जो हल उससे पर जो झलादि लिङ् सिच् वह कित् हो आत्मनेपद में।

५ इक् उपधा हो जिसकी ऐसे शलन्त से पर अनिट् च्लि को क्स आदेश हो।

अधुक्षामहि । अधोक्ष्यत ॥ एवम्—दिह उपचये[1] ॥ २२ ॥ लिह आस्वादने ॥ २३ ॥ लेढि । लीढः । लिहन्ति । लेक्षि । लीढे । लिहाते । लिहते । लिक्षे । लिहाथे । लीढ्वे । लिलेह, लिलिहे । लेढासि, लेढासे । लेक्ष्यति, लेक्ष्यते । लेढु । लीढाम् । लिहन्तु । लीढि । लेहानि । लीढाम्[2] । अलेट्, अलेड्[3] । अलिक्षत्, अलीढ, अलिक्षत[4] । अलेक्ष्यत्, अलेक्ष्यत ॥ ब्रूञ्

अधुक्षाताम् । दुहोलुङ आताम्यटि च्लेः क्सादेशे 'अलोऽन्त्यस्य' इति परिभाषया'क्सस्याचि' इति सकारोत्तराकारस्यलोपे घत्वे भष्भावे चर्त्वे षत्वे तत्सिद्धिः ।

अदुग्धाः । दुहोलुङस्थासि अटि च्लेः क्सादेशे 'लुग्वा दुह' इति क्सस्य लुकि घत्वे थस्य धत्वे जश्त्वे रुत्वविसर्गयोः अदुग्धाःइति लुगभावे हस्य घत्वे भष्भावे चर्त्वे षत्वे अधुक्षथाः इति च सिद्धम् ।

लेढि । लिहोलटस्तिपि शपोलुकि गुणे होढः' इति हस्य ढत्वे 'झषस्तथोर्धोऽधः' इति तस्य धत्वे ष्टुत्वे 'ढो ढे लोपः' इति ढलोपे तत्सिद्धिः ।

लेक्षि । लिहोलटः सिपिशपोलुकि गुणे हस्य ढत्वे 'षढोः कः सि इति ढस्य कत्वे षत्वे तसिद्धिः ।

अलीढ । लिहोलुङस्तप्रत्ययेऽटि च्लेः क्सादेशे 'लुग्वा दुह' इति सस्य लुकि हस्य ढत्वे तस्य धत्वे ष्टुत्वे ढलोपे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घे अलीढ इति, लुगभावे ढत्वे 'षढोःकः सि' इति ढस्य कत्वे षत्वे अलिक्षत इति च सिद्धम् ।

---

[1] उपचयो वृद्धिः । देग्धि, दिग्धे । दिदेह, दिदिहे । देग्धासि, देग्धासे । धेक्ष्यति । धेक्ष्यते । देग्धु, दिग्धाम् । अधेक्. अदिग्ध । दिह्यात्, दिहीत । दिह्यात् , धिक्षीष्ट । अधिक्षत्, अदिग्ध-अधिक्षत । अधेक्ष्यत् अधेक्ष्यत । [2] लिहाताम्, लिहताम् । लिक्ष्व, लिहाथाम्, लीढ्वम् । लेहै, लेहावहै, लेहामहै । [3] अलीढाम्, अलिहन् । अलेट्, अलीढम्, अलीढ । अलेहम्, अलिह्व, अलिह्म । अलीढ, अलिहाताम्, अलिहत । अलीढाः, अलिहाथाम्, अलीढ्वम् । अलिहि, अलिह्वहि, अलिह्महि । [4] अलिक्षाताम्, अलिक्षन्त । अलीढाः,अलिक्षथाः, अलिक्षाथाम्, अलीढ्वम्-अलिक्षध्वम् । अलिक्षि, अलिह्वहि-अलिक्षावहि, अलिक्षामहि ।

व्यक्तायां वाचि ॥२४॥ **ब्रुवः पञ्चानामादित आहो ब्रुवः ३।४।८४॥** ब्रुवो लटस्तिबादीनां पञ्चानां णलादयः पञ्च वा स्युर्ब्रुवश्चाहादेशः। आह। आहतुः। आहुः॥ **आहस्थः ८।२।३५॥** झलि परे हस्य थः स्यात्। चर्त्वम्। आत्थ आहथुः॥ **ब्रुव ईट् ७।३।९३॥** ब्रुवः परस्य हलादेः पित ईट् स्यात्। ब्रवीति। ब्रूतः। ब्रुवन्ति। ब्रूते। ब्रुवाते। ब्रुवते॥ **ब्रुवो वचिः २।४।५३॥** आर्धधातुके। उवाच। ऊचतुः। ऊचुः। उवचिथ, उवक्थ। ऊचे। वक्तासि, वक्तासे। वक्ष्यति, वक्ष्यते। ब्रवीतु, ब्रूतात्। ब्रुवन्तु। ब्रूहि। ब्रवाणि। ब्रूताम्। ब्रवै [1]अब्रवीत्, अब्रूत। ब्रूयात्,

आह। ब्रूधातोर्लटस्तिपि शपो लुकि 'ब्रुवः पञ्चानामादित आहो ब्रुवः' इति तिपो णलि ब्रुव आहादेशे च आह इति, पक्षे 'ब्रुव ईट्' इति ईटि गुणेऽवादेशे ब्रवीति इति च सिद्धम्।

आत्थ। ब्रुवो लटः सिपि शपो लुकि 'ब्रुवः पञ्चानाम्' इति सिपस्थलि ब्रुव आहादेशे च 'आहस्थः' हस्य थकारे तस्य चर्त्वे आत्थ इति पक्षे ईटि गुणेऽवादेशे षत्वे ब्रवीषि इति च सिद्धम्।

उवाच। ब्रुवो लिटस्तिपो णलि तस्यार्धधातुकत्वात् 'ब्रुवो वचिः' इति ब्रुवो वचादेशे द्वित्वेऽभ्यासत्वे हलादेः शेषे 'लिट्यभ्यासस्योभयेषाम्' इति सम्प्रसारणे पूर्वरूपे 'अत उपधायाः' इत्युपधावृद्धौ तत्सिद्धिः।

ऊचतुः। ब्रुवो लिटस्तस अतुसि तस्य कित्त्वात् 'वचिस्वपियजादीनां किति' इति सम्प्रसारणे ततो द्वित्वे हलादेः शेषे सवर्णदीर्घे रुत्वे विसर्गे तत्सिद्धिः।

उवचिथ। ब्रुवो लिटः सिपस्थलि द्वित्वे हलादिशेषे 'लिट्यभ्यासस्योभयेषाम्' इति' सम्प्रसारणे पूर्वरूपे भारद्वाजनियमाद्वेटि उवचिथेति पक्षे कुत्वे उवक्थेति च सिद्धम्।

ब्रवै। ब्रुवो लोट इट एत्वे तस्य ऐकारे आटिवृद्धौ आटः पित्त्वेन ङित्त्वाभावाद् गुणेऽवादेशे तत्सिद्धिः।

---

[1] अब्रूताम्, अब्रुवन्। अब्रवीः, अब्रूतम्, अब्रूत। अब्रवम्, अब्रूव, अब्रूम।

ब्रुवीत । उच्यात्, वक्षीष्ट ॥ **अस्यतिवक्तिख्यातिभ्योऽङ् ३।१।२२॥** एभ्यश्च्लेरङ् स्यात् ॥ **वच उम् ७।४।२०** ॥ आङि परे । अवोचत्, अवोचत । अवक्ष्यत्, अवक्ष्यत । (ग०) (चर्करीतं च) । चर्करीतमिति यङ्लुगन्तस्य संज्ञा, तददादौ बोध्यम् ॥ ऊर्णुञ् आच्छादने ॥ २९ ॥ **ऊर्णोतेर्विभाषा ७।३।९०॥** वा वृद्धिः स्याद्धलादौ पिति सार्वधातुके । ऊर्णौति, ऊर्णोति । ऊर्णुतः । ऊर्णुवन्ति । ऊर्णुते । ऊर्णुवाते । ऊर्णुवते । (ऊर्णोतेराम्नेति वाच्यम्) ॥ **न न्द्राः संयोगादयः ६।१।३** ॥ अचः पराः संयोगादयो नदरा द्विर्न भवन्ति । नुशब्दस्य द्वित्वम् । ऊर्णुनाव । ऊर्णुनुवतुः । ऊर्णुनुवुतुः । ऊर्णुनुवुः ॥ **विभाषोर्णोः १।२।३॥** इडादिप्रत्ययो वा ङित्स्यात् । ऊर्णुनुविथ-ऊर्णुनविथ । ऊर्णुविता, ऊर्णविता । ऊर्णुविष्यति, ऊर्णविष्यति । ऊर्णौतु, ऊर्णोतु । ऊर्णवानि । ऊर्णवै ॥ **गुणोऽपृक्ते ७।३।९१** ॥ ऊर्णोतेर्गुणोऽपृक्ते हलादौ पिति सार्वधातुके । वृद्ध्यपवादः ।

अवोचत् । ब्रुवो लुङस्तिप इकारलोपेऽटि च्लौ 'ब्रुवो वचिः' इति वचादेशे 'अस्यतिवक्तिख्यातिभ्योऽङ्' इति च्लेरङि 'वच उम्' इत्युमागमे गुणे तत्सिद्धिः ।

ऊर्णौति । ऊर्णुधातोर्लटस्तिपि शपो लुकि 'ऊर्णोतेर्विभाषा' इति पाक्षिकवृद्धौ ऊर्णौति इति वृद्ध्यभावपक्षे गुणे ऊर्णोति इति च सिद्धम् ।

ऊर्णुनाव । ऊर्णुधातोर्लिटस्तिपो णलि 'ऊर्णोतेराम्नेति वाच्यम्' इत्याम्निषेधे 'नन्द्राः संयोगादयः' इति रेफद्वित्वनिषेधे द्वित्वे कर्त्तव्ये णत्वस्यासिद्धत्वात् नुशब्दस्य द्वित्वेऽभ्यासत्वे 'रषाभ्याम्' इति पूर्वनकारस्य णत्वे वृद्धौ आवादेशे तत्सिद्धिः ।

ऊर्णुनुविथ । ऊर्णुधातोर्लिटः सिपस्थलि आम्निषेधे रेफदित्वनिषेधे णत्वस्यासिद्धत्वान्नुशब्दस्य द्वित्वे इटि 'विभाषोर्णोः' इति थलोङित्वाद् गुणाभावे उवङि ऊर्णुनुविथेति ङित्त्वाभावे गुणेऽवादेश ऊर्णुनविथेति च सिद्धम् ।

लङि

और्णोत् । और्णोः । ऊर्णुयात् । ऊर्णुयाः । ऊर्णुवीत । ऊर्णूयात् । ऊर्णुविषीष्ट, ऊर्णविषीष्ट ॥ **ऊर्णोतेर्विभाषा ७।२।६** ॥ इडादौ सिचि वा वृद्धिः परस्मैपदे परे । पक्षे गुणः । और्णावीत्, और्णुवीत्, और्णवीत् । और्णाविष्टाम्, और्णुविष्टाम्, और्णविष्टाम् । और्णुविष्ट, और्णविष्ट । और्णुविष्यत्, और्णविष्यत्; और्णुविष्यत; और्णविष्यत ।

॥ इत्यदादयः ॥ २ ॥

दानादानयोः

अथ जुहोत्यादयः ।

हु दानादयोः ॥ १ ॥ **जुहोत्यादिभ्यः श्लुः २।४।७५**॥ शपः श्लुः स्यात् ॥ **श्लौ ६।१।१०** ॥ धातोर्द्वे स्तः । जुहोति ।

लङि **और्णोत्** । ऊर्णुधातोर्लङस्तिप इकारलोपे शपो लुक्याटि वृद्धौ वृद्धिं बाधित्वा 'गुणोऽपृक्ते' इति गुणे तत्सिद्धिः ।

ऊर्णुविषीष्ट । ऊर्णुधातोराशीर्लिङस्तप्रत्यये सीयुटि सुटि यलोपे इटि 'विभाषोर्णोः' इति ङित्त्वादूगुणाभावे उवङि षत्वे ष्टुत्वे ऊर्णुविषीष्टेति ङित्त्वाभावपक्षे गुणेऽवादेशे ऊर्णविषीष्टेति च सिद्धम् ।

लुङि **और्णुवीत्** । ऊर्णुधातोर्लुङस्तिप इकारलोपे आटि वृद्धौ च्लेः सिचि इटि ईटि 'विभाषोर्णोः' इति ङित्त्वादूगुणाभावे उवङि सलोपे दीर्घे और्णुवीत् इति, ङित्त्वाभावपक्षे गुणं बाधित्वा 'ऊर्णोतेर्विभाषा' इति वृद्धावावादेशे और्णावीत् इति, वृद्ध्यभावपक्षे गुणेऽवादेशे और्णवीत् इति च सिद्धम् ।

और्णुविष्ट । ऊर्णुधातोर्लुङ आत्मनेपदे तप्रत्यये आटि वृद्धौ च्लेः सिचि इटि 'विभाषोर्णोः' इति ङित्त्वाद् गुणाभावे उवङि षत्वे ष्टुत्वे और्णुविष्ट इति, पक्षे गुणेऽवादेशे और्णविष्टेति च सिद्धम ।

॥ इत्यदादयः ॥

जुहोति । हुधातोर्लटस्तिपि शपि 'जुहोत्यादिभ्यः श्लुः' इति शपः श्लौ 'श्लौ' इति द्वित्वेऽभ्यासत्वे चुत्वे जश्त्वे गुणे जुहोति इति सिद्धम् ।

जुहुतः ॥ **अदभ्यस्तात् ७।१।४** ॥ झस्यात्स्यात् । हुश्नुवोरिति यण् । जुह्वति ॥ **भीह्रीभृहुवां श्लुवच्च ३।१।३९** ॥ एभ्यो[1] लिटि आम् वा स्यादामि श्लाविव कार्यं च । जुहवाञ्चकार, जुहाव[2] । होता । होष्यति । जुहोतु, जुहुतात् । जुहुताम् । जुह्वतु । जुहुधि । जुहवानि । अजुहोत् । अजुहुताम् ॥ **जुसि च ॥ ७।३।८३** ॥ इगन्ताङ्गस्य गुणोऽजादौ जुसि । अजुहवुः[3] । जुहुयात् । हूयात् । अहौषीत्[4] । अहोष्यत् ॥

जुह्वति । हुधातोर्लटो झौ शपः श्लौ द्वित्वेऽभ्यासत्वे चुत्वे जश्त्वे 'अदभ्यस्तात्' इति झस्य अत् इत्यादेशे 'अचिश्नु' इति प्राप्तमुवङं बाधित्वा 'हुश्नुवोः सार्वधातुके' इति यणि तत्सिद्धिः ।

जुहवाञ्चकार । हुधातोर्लिटि 'भीह्रीभृहुवां श्लुवच्च' इति पाक्षिके आमि श्लुवद्भावे च तेन द्वित्वेऽभ्यासत्वे चुत्वेन झकारे 'अभ्यासे चर्च' इति जश्त्वेन जकारे गुणेऽवादेशे 'आमः' इति लिटो लुकि लिट्परकृञोऽनुप्रयोगे लिटस्तिपो णलि द्वित्वे 'उरत्' इत्यत्वे रपरे हलादिशेषे चुत्वे गुणे रपरे उपधावृद्धौ अनुस्वारे परसवर्णे तत्सिद्धिः । आमोऽभावपक्षे लिटस्तिपो णलि द्वित्वेऽभ्यासकार्ये वृद्धौ आवादेशे जुहाव इति सिद्ध्यति ।

जुहुधि । हुधातोर्लोटः सिपो हौ शपः श्लौ द्वित्वे चुत्वे जश्त्वे 'हुझल्भ्यो हेर्धिः' इति हेर्धौ तत्सिद्धिः ।

जुहवानि । हुधातोर्लोटो मिपि शपः श्लौ द्वित्वे चुत्वे जश्त्वे मेर्न्यादेशे आटि 'हुश्नुवोः' इति यणं बाधित्वा परत्वाद्गुणेऽवादेशे तत्सिद्धिः ।

अजुहवुः । हुधातोर्लङो झौ शपः श्लौ द्वित्वे चुत्वे जश्त्वे 'सिजभ्यस्तविदिभ्यश्च' इति झेर्जुसि 'हुश्नुवोः' इति यणं बाधित्वा परत्वात् 'जुसि च' इति गुणेऽवादेशे रुत्वे विसर्गे तत्सिद्धिः ।

---

[1] भी, ह्री, भृ, हु इनसे आम् प्रत्यय हो विकल्प से लिट् पर रहते और श्लुके सदृश आम् प्रत्यय पर रहते कार्य हो। [2] जुहुवतुः, जुहुवुः । जुहविथ-जुहोथ, जुहुवथुः, जुहुव । जुहाव-जुहव, जुहुविव, जुहुविव । [3] अजुहोः, अजुहुतम्, अजुहुत । अजुहवम्, अजुहुव, अजुहुम । [4] अहौष्टाम्, इत्यादि ।

ञिभी भये ॥ २ ॥ बिभेति ॥ **भियोऽन्यतरस्याम् ६।४।११५** ॥ इकारो वा स्याद्धलादौ क्ङिति सार्वधातुके । बिभितः, बिभीतः । बिभ्यति । बिभयाञ्चकार, बिभाय । भेता । भेष्यति । बिभेतु, बिभितात्, बिभीतात्[1] । अबिभेत्[2] । बिभियात्, बिभीयात् । भीयात् । अभैषीत् । अभेष्यत् ॥ ह्री लज्जायाम् ॥ ३ ॥ जिह्रेति । जिह्रीतः । जिह्रियति । जिह्रयाञ्चकार, जिह्राय । ह्रेता । ह्रेष्यति । जिह्रेतु । अजिह्रेत् । जिह्रीयात् । ह्रीयात् । अह्रैषीत् । अह्रेष्यत् ॥ पॄ पालनपूरणयोः ॥ ४ ॥ **अर्तिपिपर्त्योश्च ७।४।७७** ॥ अभ्यासस्य इकारोऽन्तादेशः स्यात् श्लौ । पिपर्ति ॥ **उदोष्ठ्यपूर्वस्य ७।१।१०२** ॥ अङ्गावयवौष्ठ्यपूर्वो[3] य

बिभेति । भियो लटस्तिपि शपः श्लौ द्वित्वे जश्त्वे गुणे तत्सिद्धिः ।

बिभितः । भियो लटस्तसि शपः श्लौ द्वित्वे जश्त्वे 'भियोऽन्यतरस्याम्' इति पाक्षिके इकारे रुत्वविसर्गयोः बिभितः इति पक्षे बिभीत इति च सिद्धम् ।

बिभ्यति । भियो लटो झौ शपः श्लौ द्वित्वे जश्त्वे 'अदभ्यस्तात' इति झस्याति 'एरनेकाच' इति यणि तत्सिद्धिः ।

बिभयाञ्चकार । भियो लिटि 'भीह्रीभृहुवां श्लुवच्च' इत्यामि श्लुवद्भावे च तेन द्वित्वेऽभ्यासकार्ये गुणे उपधावृद्धौ अनुस्वारे परसवर्णे तत्सिद्धिः । पक्षे द्वित्वादिके बिभाय इति च सिद्धम् ।

पिपर्ति । पॄधातोर्लटस्तिपि शपः श्लौ द्वित्वे 'अर्तिपिपर्त्योश्च' इति अभ्यासऋकारस्य इकारे 'उदोष्ठ्यपूर्वस्य' इत्युत्त्वं बाधित्वा परत्वाद्गुणे रपरे तत्सिद्धिः ।

---

[1] बिभिताम्-बिभीताम्, बिभ्यतु । बिभिहि-बिभीहि-बिभितात्-बिभीतात्, बिभितम्-बिभीतम्, बिभित-बिभीत । बिभयानि, बिभयाव, बिभयाम । [2] अबिभिताम्-अबिभीताम्, अबिभयुः । अबिभेः, अबिभितम्-अबिभीतम्, अबिभित-अबिभीत । अबिभयम्, अबिभिव-अबिभीव, अबिभिम-अबिभीम । [3] अङ्ग का अवयव ओष्ठस्थानिकवर्ण पूर्व हो जिससे ऐसा जो ॠ तदन्त अङ्ग को उकार हो ।

ऋत् तदन्तस्याङ्गस्य उत् स्यात् ॥ **हलि च ८।२।७७** ॥ रेफवान्तस्य धातोरुपधाया इको दीर्घो हलि। पिपूर्तः। पिपुरति। पपार ॥ **शॄदॄप्रां ह्रस्वो वा ७।४।१२** ॥ एषां लिटि ह्रस्वो वा स्यात्। पप्रतुः ॥ **ऋच्छत्यॄताम् ७।३।११** । तौदादिक[1]ऋच्छेर्ऋधातोर्ॠतां च गुणो लिटि। पपरतुः। पपरुः ॥ **वॄतो वा ७।२।३८** ॥ वृङ्वृञ्भ्यामॄदन्ताच्चेटो दीर्घो वा स्यान्न तु लिटि। परीता, परिता। परीष्यति, परिष्यति। पिपर्तु। अपिपः। अपिपूर्ताम्। अपिपरुः। पिपूर्यात्। पूर्यात्। अपारीत्। **सिचि च परस्मैपदेषु ७।२।४०** ॥ अत्र

पिपूर्त्तः। पॄधातोर्लटस्तसि शपः श्लौ द्वित्वेऽभ्यासत्वे 'अर्त्तिपिपर्त्योश्च' इति इत्वे 'उदोष्ठ्यपूर्वस्य इति ऋकारस्य उत्वे रपरे 'हलि च' इत्युपधादीर्घे रुत्वे विसर्गे तत्सिद्धिः।

पप्रतुः। पॄधातोर्लिटस्तस अतुसि द्वित्वे 'उरत्' इत्यत्वे रपरे हलादिशेषे 'ऋच्छत्यॄताम्' इति गुणं बाधित्वा 'शॄदॄप्रां ह्रस्वो वा' इति पाक्षिके ह्रस्वे यणि रुत्वे विसर्गे पप्रतुरिति, ह्रस्वाभावे 'ऋच्छत्यॄताम्' इति गुणे रपरे पपरतुरिति च सिद्धम्।

परिता। पॄधातोर्लुटस्तिपि तसि इटि गुणे रपरे तिपो डादेशे डित्त्वाट्टिलोपे 'वॄतो वा' पाक्षिके दीर्घे परीता इति, पक्षे परिता इति च सिद्धम्।

अपिपः। पॄधातोर्लङस्तिप इकारलोपेऽटि शपः श्लौ द्वित्वे 'अर्तिपिपर्त्योश्च' इति इत्वे गुणे रपरे 'हल्ङ्याब्भ्यः' इति तलोपे विसर्गे तत्सिद्धिः।

पिपूर्यात्। पॄधातोर्विधिलिङस्तिप इकारलोपे शपः श्लौ द्वित्वे अभ्यासस्य इत्त्वे यासुटि सलोपे 'उदोष्ठ्यपूर्वस्य' इत्युत्वे रपरे 'हलि च' इति दीर्घे तत्सिद्धिः।

---

[1] तुदादिगणपठित ऋच्छधातु और ऋधातु ॠकारान्त धातु को गुण हो लिट् पर रहते।

इटो न दीर्घः। अपारिष्टाम्। अपरीष्यत्, अपरिष्यत्॥ ओहाक् त्यागे॥ ९॥ जहाति॥ **जहातेश्च ६।४।११६॥** इद्वा स्याद्धलादौ क्ङिति सार्वधातुके। जहितः॥ **ई[1] हल्यघोः ६।४।११३॥** श्नाभ्यस्तयोरात ईत् स्यात् सार्वधातुके क्ङिति हलादौ, न तु घोः। जहीतः॥ **श्नाभ्यस्तयोरातः ६।४।११२॥** अनयोरातो लोपः क्ङिति सर्वधातुके। जहति। जहौ[3]। हाता। हास्यति। जहातु, जहितात्, जहीतात्॥ **आ च हौ ६।४।११७॥** जहातेर्हौ परे आ स्याच्चादिदीतौ। जहाहि, जहिहि, जहीहि[4]। अजहात्[5]। अजहुः॥ **लोपो यि**

अपारिष्टाम्। पृधातोर्लुङस्तसस्तामि अटि च्लेः सिचि इटि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ रपरे षत्वे ष्टुत्वे 'वृतो वा' इति प्राप्तदीर्घस्य 'सिचि च परस्मैपदेषु' इति निषेधे तत्सिद्धिः।

जहितः। हाधातोर्लटस्तासि शपः श्लौ द्वित्वेऽभ्यासत्वे ह्रस्वे चुत्वे जश्त्वे 'जहातेश्च' इति इत्त्वे रुत्वे विसर्गे जहितः इति, इत्त्वाभावे 'ईहल्यघोः' इति ईत्वे जहीतः इति च सिद्धम्।

जहति। हाधातोर्लटो झौ शपः श्लौद्वित्वेऽभ्यासकार्ये 'अदभ्यस्तात्' इति झस्याति 'श्नाभ्यस्तयोरातः' इत्यालोपे तत्सिद्धिः।

जहौ। हाधातोर्लिटस्तिपो णलि द्वित्वेऽभ्यासकार्ये 'आत औ णलः' इति णल औकारे वृद्धौ तत्सिद्धिः।

जहाहि। हाधातोर्लोटः सिपो हौ शपः श्लौ द्वित्वे ह्रस्वे चुत्वे जश्त्वे

---

[1] श्नाप्रत्यय और अभ्यस्तसंज्ञक धातु के आकार को ईकार हो हलादि कित् ङित् सार्वधातुक पर रहते और घुसंज्ञक धातु के आकार को ईकार न हो। [2] जहासि, जहिथः-जहीथः, जहिथ-जहीथ। जहामि, जहिवः-जहीवः, जहिमः जहीमः। [3] जहतुः जहुः। जहिथ-जहाथ, जहथुः, जह। जह, जहिव, जहिम। [4] जहिताम् जहीताम्, जहतु। जहितात्-जहीतात्, जहितम्-जहीतम्, जहित-जहीत। जहानि, जहाव, जहाम। [5] अजहिताम् अजहीताम्, अजहुः। अजहाः, अजहितम्-अजहीतम्, अजहित-अजहीत। अजहाम्, अजहिव-अजहीव, अजहिम अजहीम।

६।४।११८ ।। जहातेरालोपो यादौ सार्वधातुके । जह्यात् । एर्लिङि । हेयात् । अहासीत्[1] । अहास्यत् ।। माङ् माने शब्दे च ।। ६ ।।

भृञामित् ७।४।७६ ।। भृञ् माङ् ओहाङ् एषां त्रयाणामभ्यासस्य इत्स्यात् श्लौ । मिमीते । मिमाते । मिमते[2] । ममे[3] । माता । मास्यते । मिमीताम्[4] । अमिमीत[5] । मिमीत । मासीष्ट । अमास्त[6] । अमास्यत ।

'आ च हौ' इत्यात्वे जहाहि इति । इत्वे जहिहि इति, ईत्वे जहीहि इति च सिद्धम् ।

जह्यात् । हाधातोर्लिङस्तिपि इकारलोपे शपः श्लौ द्वित्वेऽभ्यासकार्ये यासुटि सलोपे 'लोपो यि' इत्यालोपे तत्सिद्धिः ।

हेयात् । हाधातोराशीर्लिङस्तिप इकारलोपे यासुटि 'स्कोः' इति सलोपे 'एर्लिङि' इति एत्वे तत्सिद्धिः ।

अहासीत् । हाधातोर्लुङस्तिप इकारलोपेऽटि च्लेः सिचि ईटि 'यमरमनमातां सक् च' इति सकि सिच इटि सलोपे दीर्घे तत्सिद्धिः ।

मिमीते । माधातोर्लटस्तप्रत्यये टेरेत्वे शपः श्लौ द्वित्वे ह्रस्वे 'भृञामित्' इति इत्वे तस्य ङित्त्वात् 'ई हल्यघोः' इति ईत्वे तत्सिद्धिः ।

मिमाते । माधातोर्लट आतामि टेरेत्वे शपः श्लौ द्वित्वेऽभ्यासह्रस्वे 'भृञामित्' इति इत्वे 'श्नाभ्यस्तयोरातः, इत्यालोपे तत्सिद्धिः ।

मिमते । माधातोर्लटो झप्रत्यये टेरेत्वे शपः श्लौ द्वित्वे ह्रस्वे 'भृञामित्' इति इत्वे 'अदभ्यस्तात्' इति झस्याति 'श्नाभ्यस्तयोरातः, इत्यालोपे तत्सिद्धिः ।

ममे । माधातोर्लिटस्तस्य एशि द्वित्वेऽभ्यासकार्ये आलोपे तत्सिद्धिः ।

---

[1] अहासिष्टाम् इत्यादि । [2] मिमीषे, मिमाथे, मिमीध्वे । मिमे, मिमीवहे, मिमीमहे । [3] ममाते, ममिरे ममिषे, ममाथे, ममिध्वे । ममे, ममिवहे, ममिमहे । [4] मिमाताम् मिमताम् । मिमीष्व मिमाथाम् मिमीध्वम् । मिमै मिमावहै मिमामहै । [5] अमिमाताम्, अमिमत अमिमीथाः अमिमाथाम् अमिमीध्वम् । अमिमि अमिमीवहि अमिमीमहि । [6] अमासाताम् अमासत । अमास्थाः अमासाथाम् अमाध्वम् । अमासि अमास्वहि अमास्महि ।

ओहाङ् गतौ ॥ ७ ॥ जिहीते । जिहाते । जिहते । जहे । हाता । हास्यते । जिहीताम् । अजिहीत । जिहीत । हासीष्ट । अहास्त । अहास्यत ॥ डुभृञ् धारणपोषणयोः ॥ ८ ॥ बिभर्ति । बिभृतः । बिभ्रति । बिभृते । बिभ्राते । बिभ्रते । बिभराञ्चकार, बभार । बभर्थ । बभृव । बिभराञ्चक्रे, बभ्रे[1] । भर्तासि, भर्तासे । भरिष्यति, भरिष्यते । बिभर्तु[2] । बिभराणि । बिभृताम् । अबिभः[3] । अबिभृताम् । अबिभरुः । अबिभृत[4] । बिभृयात्, बिभ्रीत । भ्रियात्, भृषीष्ट । अभार्षीत्[5], अभृत[6] । अभरिष्यत्, अभरिष्यत ॥ डुदाञ् दाने ॥ ९ ॥ ददाति । दत्तः । ददति[7] । दत्ते । ददाते । ददते[8] ।

जिहीते । हाङोलटस्तप्रत्यये टेरेत्वे शपः श्लौ द्वित्वे ह्रस्वे चुत्वे जश्त्वे 'भृञामित्' इति इत्वे 'ई हल्यघोः' इति ईत्वे तत्सिद्धिः ।

बिभर्त्ति । भृञोलटस्तिपि शपः श्लौ द्वित्वेऽभ्यासकार्ये 'भृञामित्' इति इत्वे गुणे रपरे तत्सिद्धिः ।

बिभराञ्चकार । भृञो लिटि 'भीह्रीभृहुवां श्लुवच्च' इति आमि श्लुवद्भावे तेन द्वित्वेऽभ्यासकाय 'भृञामित्' इति इत्वे गुणे रपरे लिटो लुकि लिट्परकृञोऽनुप्रयोगे लिटस्तिपो णलि द्वित्वेऽभ्यासकार्ये गुणे रपरे उपधावृद्धौ अनुस्वारे परसवर्णे तत्सिद्धिः ।

दत्तः । दाधातोर्लटस्तसि शपःश्लौ द्वित्वेऽभ्यासह्रस्वे तसो ङित्त्वात् 'श्नाभ्यस्तयोरातः' इत्यालोपे चर्त्वे रुत्वे विसर्गे तत्सिद्धिः ।

---

[1] बभ्राते बभ्रिरे । बभृषे बभ्राथे बभृढ्वे । बभ्रे बभृवहे बभृमहे । [2] बिभृतात् बिभृताम् बिभ्रतु । बिभृहि-बिभृतात् बिभृतम् बिभृत । बिभराणि बिभराव बिभराम । [3] अबिभः अबिभृतम, अबिभृत । अबिभरम् । अबिभृव अबिभृम । [4] अबिभ्राताम्, अबिभ्रत । अबिभृथाः अबिभ्राथाम् अबिभृध्वम् । अबिभ्रि अबिभृवहि अबिभृमहि । [5] अभार्ष्टाम् इत्यादि । [6] अभृषाताम् अभृषत । अभृथाः अभृषाथाम् अभृढ्वम् । अभृषि अभृष्वहि अभृष्महि । [7] ददासि दत्थः दत्थ । ददामि दद्वः दद्मः । [8] दत्से ददाथे दद्ध्वे । ददे दद्वहे दद्महे ।

ददौ,[1] ददे[2] । दातासि, दातासे । दास्यति, दास्यते । ददातु[3] ॥ **दाधाघ्वदाप् १।१।२०** ॥ दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युर्दाप्दैपौ विना । घ्वसोरित्येत्त्वम् । देहि । दत्तम् । अददात्[4], अदत्त[5] । दद्यात्, ददीत । देयात्, दासीष्ट । अदात् । अदाताम् । अदुः ॥ **स्थाघ्वोरिच्च १।२।१७** ॥ अनयोरिदन्तादेशः[6], सिच्च कित्स्यादात्मनेपदे । अदित[7] । अदास्यत्, अदास्यत ॥

देहि । दाधातोर्लोटः सिपो हौ 'दाधाघ्वदाप्' इति घुसंज्ञायाम् शपः श्लौ द्वित्वेऽभ्यासह्रस्वे 'घ्वसोरेद्धावभ्यासलोपश्च' इत्येत्वाभ्यासलोपयोस्तत्सिद्धिः ।

अदत्त । दाधातोर्लङस्तप्रत्यये शपः श्लौ द्वित्वेऽभ्यासह्रस्वे 'श्नाभ्यस्तयोरातः' इत्यालोपे चर्त्वे तत्सिद्धिः ।

अदात् । दाधातोर्लुङस्तिप इलोपेऽटि च्लेः सिचि 'दाधाघ्वदाप्' इति घुत्वात् 'गातिस्था' इति सिचो लुकि तत्सिद्धिः ।

अदुः । दाधातोर्लुङो झौ अटि च्लेः सिचो लुकि 'आतः' इति झेर्जुसि 'उस्यपदान्तात्' इति पररूपे रुत्वे विसर्गे तत्सिद्धिः ।

अदित । दाधातोर्लुङस्तप्रत्ययेऽटि च्लेः सिचि 'दाधाघ्वदाप्' इति घुत्वात् 'स्थाघ्वोरिच्च' इति इत्वे सिचः कित्त्वे च कित्त्वाद्गुणाभावे 'ह्रस्वादङ्गात्' इति सिचो लोपे तत्सिद्धिः ।

---

[1] ददिथ-ददाथ। [2] ददाते ददिरे इत्यादि । [3] दत्तात् दत्ताम् ददतु । देहि-दत्तात् दत्तम् दत्त । ददानि ददाव ददाम । दत्ताम् ददाताम् ददताम् । दत्स्व ददाथाम् दद्ध्वम् । ददै ददावहै ददामहै । [4] अदत्ताम् अददुः । अददाः अदत्तम्, अदत्त । अददाम् अदद्व अदद्म । [5] अददाताम् अददत । अदत्थाः अददाथाम् अदद्ध्वम् । अददि अदद्वहि अदद्महि । [6] स्था और घुसंज्ञक धातु को इकार अन्तादेश हो और इनसे पर सिच् प्रत्यय कित् हो । [7] अदिषाताम् । अदिषत । अदिथाः अदिषाथाम् अदिढ्वम् । अदिषि अदिष्वहि अदिष्महि ।

डुधाञ् धारणपोषणयोः ॥ १० ॥ दधाति ॥ **दधस्तथोश्च ८।२।३८॥** द्विरुक्तस्य[1] झषन्तस्य धाञो बशो भष् स्यात्तथोः स्ध्वोश्च परतः । धत्तः । दधति । दधासि । धत्थः । धत्थ । धत्ते । दधाते । दधते । धत्से । धद्ध्वे । ध्वसोरेद्धावभ्यासलोपश्च । धेहि । अदधात्, अधत्त । दध्यात्, दधीत । धेयात्, धासीष्ट । अधात्, अधित । अधास्यत्, अधास्यत ॥ णिजिर् शौचपोषणयोः ॥ ११ ॥ (वा.) इर इत्संज्ञा वाच्या ॥ **णिजां त्रयाणां गुणः श्लौ ७।४।७५ ॥** णिज्विज्विषामभ्यासस्य गुणः स्यात् श्लौ । नेनेक्ति । नेनिक्तः । नेनिजति[2] । नेनिक्ते[3] । निनेजे[4], निनिजे[5] । नेक्ता । नेक्ष्यति, नेक्ष्यते । नेनेक्तु[6] । नेनिग्धि ॥ **नाभ्यस्त-**

धत्तः । धाधातोर्लटस्तसि शपः श्लौ द्वित्वेऽभ्यासह्रस्वे 'श्नाभ्यस्तयोरातः' इत्यालोपे 'दधस्तथोश्च' इति भष्भावे चर्त्वे रुत्वे विसर्गे तत्सिद्धिः ।

नेनेक्ति । णिजिर् इत्यस्य 'इर इत्संज्ञा वाच्या' इति इर इत्संज्ञायां लोपे 'णोनः' इति नत्वे धातुत्वाल्लटस्तिपि शपः श्लौ द्वित्वे हलादिशेषे 'निजां त्रयाणां गुणः श्लौ' इत्यभ्यासगुणे 'पुगन्तलघूपधस्य च' इति गुणे कुत्वे चर्त्वे तत्सिद्धिः ।

नेनिजति । इरित्संज्ञकणिजो णस्य नत्वे धातुत्वाल्लटो झौ शपः श्लौ द्वित्वेऽभ्यासकार्ये झस्याति 'निजां त्रयाणाम्' इत्यभ्यासगुणे झेर्ङित्वाल्लघूपधगुणाभावे तत्सिद्धिः ।

नेनिग्धि । णिजो णस्य नत्वे लोटः सिपो हौ शपः श्लौ द्वित्वेऽभ्यासकार्ये 'णिजाम्' इत्यभ्यासगुणे हेर्धौ कुत्वे तत्सिद्धिः ।

---

[1] कृतद्वित्व झषन्त धा धातु सम्बन्धी वश् को भष् हो त, थ, स, ध्व पर रहते । [2] नेनेक्षि नेनिक्थः नेनिक्थ । नेनेज्मि नेनिज्वः नेनिज्मः । [3] नेनिजाते नेनिजते । नेनिक्षे नेनिजाथे नेनिग्ध्वे । नेनिजे नेनिज्वहे नेनिज्महे । [4] निनिजतुः निनिजुः निनेजिथ निनिजथुः निनिज । निनेज निनिजिव निनिजिम । [5] निनिजाते निनिजिरे निनिजिषे निनिजाथे निनिजिध्वे । निनिजे निनिजिवहे निनिजिमहे । [6] नेनिक्तात् नेनिक्ताम् नेनिजतु । नेनिग्धि-नेनिक्तात् नेनिक्तम् नेनिक्त । नेनिजानि नेनिजाव नेनिजाम ।

स्याचि पिति सार्वधातुके ७।३।८७ ॥ लघूपधगुणो न स्यात् । नेनिजानि । नेनिक्ताम्[1] । अनेनेक् । अनेनिक्ताम् । अनेनिजुः[2] । अनेनिजम् । अनेनिक्त[3] । नेनिज्यात् । नेनिजीत । निज्यात्, निक्षीष्ट ॥ **इरितो वा ३।१।५७ ॥** इरितो धातोश्च्लेरङ् वा परस्मैपदेषु । अनिजत्, अनैक्षीत्[4], अनिक्त[5] । अनेक्ष्यत्, अनेक्ष्यत ॥

॥ इति जुहोत्यादयः ॥

अथ दिवादयः ।

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु ॥ १ ॥ **दिवादिभ्यः श्यन् ३।१।६९ ॥** शपोऽपवादः । हलि चेति दीर्घः ।

नेनिजानि । णिजो णस्य नत्वे लोटो मेर्नौ शपः श्लौ द्वित्वेऽभ्यासकार्य आटि 'निजाम्' इत्यभ्यासगुणे आटः पित्वाल्लघूपधगुणे प्राप्ते 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति तन्निषेधे तत्सिद्धिः ।

अनिजत् । णिजो णस्य नत्वे लुङस्तिप इकारलोपेऽटि च्लौ 'इरितो वा' इति च्लेरङि ङित्त्वाद्गुणाभावे तत्सिद्धिः । पक्षे च्लेः सिचि ईटि 'वदव्रज' इति वृद्धौ जस्य कुत्वे चर्त्वे षत्वे तत्सिद्धिः ।

॥ इति जुहोत्यादयः ॥

---

१ नेनिजाताम् नेनिजताम् नेनिक्ष्व नेनिजाथाम् नेनिग्ध्वम् । नेनिजै, नेनिजावहै, नेनिजामहै । २ अनेनेक् अनेनिक्तम् अनेनिक्त । अनेनिजम्, अनेनिज्व, अनेनिज्म । ३ अनेनिजाताम्, अनेनिजत । अनेनिक्थाः अनेनिजाथाम् अनेनिग्ध्वम् । अनेनिजि अनेनिज्वहि अनेनिज्महि । ४ अनैक्ताम् अनैक्षुः । अनैक्षीः, अनैक्तम्, अनैक्त । अनैक्षम् अनैक्ष्व अनैक्ष्म । ५ अनिजाताम् इत्यादि ।

दीव्यति। दिदेव[1]। देविता। देविष्यति। दीव्यतु। अदीव्यत्। दीव्येत्। दीव्यात्। अदेवीत्[2]। अदेविष्यत्॥ एवम्—षिवु[3] तन्तुसन्ताने ॥ २ ॥ नृती गात्रविक्षेपे ॥ ३ ॥ नृत्यति। ननर्त[4]। नर्तिता॥ **सेऽसिचि कृतचृतछृदतृदनृतः ७।२।५७** ॥ एभ्यः परस्य सिज्भिन्नस्य सादेरार्धधातुकस्येड्वा। नर्तिष्यति, नर्त्स्यति। नृत्यतु। अनृत्यत्। नृत्येत्। नृत्यात्। अनर्तीत्[5]। अनर्तिष्यत्, अनर्त्स्यत्॥ त्रसी उद्वेगे ॥ ४ ॥ वा भ्राशेति श्यन्वा। त्रस्यति, त्रसति तत्रास॥ **वा जॄभ्रमुत्रसाम् ६।४।१२४** ॥ एषां किति लिटि सेटि थलि च

दीव्यति। दिव्धातोर्लटस्तिपि शपं बाधित्वा 'दिवादिभ्यः श्यन्' इति श्यन्प्रत्यये अनुबन्धलोपे 'सार्वधातुकमपित्' इति ङित्त्वाद्गुणाभावे 'हलि च' इति दीर्घे तत्सिद्धिः।

दिदेव। दिवो लिटस्तिपो णलि द्वित्वे हलादिशेषे 'पुगन्त' इतिगुणे तत्सिद्धिः।

अदेवीत्। दिवो लुङस्तिप इकारलोपेऽटि च्लेः सिचि इटि ईटि सलोपे दीर्घे गुणे तत्सिद्धिः।

ननर्त्त। नृत्धातोर्लिटस्तिपो णलि द्वित्वे 'उरत्' इत्यत्वे रपरे हलादिशेषे गुणे रपरे तत्सिद्धिः।

नर्तिष्यति। नृतो लृटस्तिपि स्यप्रत्यये तस्यार्धधातुकत्वे 'सेऽसिचि कृतचृतछृदतृदनृतः' इतीटि गुणे रपरे षत्वे नर्त्तिष्यति इति, इडभावे नर्त्स्यति इति च सिद्ध्यति।

अनर्तीत्। नृतो लुङस्तिप इकारलोपेऽटि च्लेः सिचि इटि ईटि सलोपे गुणे रपरे सवर्णदीर्घे तत्सिद्धिः।

---

[1] दिदिवतुः, दिदिवुः। दिदेविथ, दिदिवथुः, दिदिव। दिदेव, दिदिविव, दिदिविम।
[2] अदेविष्टाम्, अदेविषुः इत्यादि।
[3] सीव्यति। सिषेव। सेविता। सेविष्यति। सीव्यतु। असीव्यत्। सीव्येत्। सीव्यात्। असेवीत्। असेविष्यत्।
[4] ननृततुः। ननृतुः। ननर्त्तिथ, ननृतथुः, ननृत। ननर्त, ननृतिव, ननृतिम।
[5] अनर्त्तिष्टाम् इत्यादि।

एत्वाभ्यासलोपौ वा । त्रेसतुः, तत्रसतुः[1] । त्रेसिथ, तत्रसिथ । त्रसिता ॥ शो तनूकरणे ॥ ५ ॥ **ओतः श्यनि ७।३।७१** ॥ लोपः स्यात् । श्यति । श्यतः । श्यन्ति । शशौ । शशतुः । शाता । शास्यति ॥ **विभाषाघ्राधेट्शाच्छासः २।४।७८** ॥ एभ्यस्[2]सिचो लुग्वा स्यात् परस्मैपदे परे । अशात् । अशाताम् । अशुः ॥ इट्सकौ । अशासीत् । अशासिष्टाम् ॥ छो छेदने ॥ ६ ॥ छ्यति[3] ॥ षोऽन्तकर्मणि ॥ ७ ॥ स्यति । ससौ[4] ॥ दोऽवखण्डने ॥ ८ ॥ द्यति । ददौ[5] । देयात् । अदात् ॥ व्यध ताडने ॥ ९ ॥ **ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चति-**

त्रेसतुः । त्रस्धातोर्लिटस्तस अतुसि द्वित्वे हलादिशेषे अतुसः कित्त्वाद् 'वा जॄभ्रमुत्रसाम्' इति पाक्षिके एत्वेऽभ्यासलोपे रुत्वे विसर्गे त्रेसतुरिति, एत्वाभावपक्षे तत्रसतुरिति च सिद्धम् ।

श्यति । शोधातोर्लटस्तिपि शपं बाधित्वा 'दिवादिभ्यः श्यन्' इति श्यनि 'ओतः श्यनि' इत्योकारलोपे तत्सिद्धिः ।

शशौ । शोधातोर्लिटस्तिपो णलि 'आदेच उपदेशेऽशिति' इति आत्वे द्वित्वेऽभ्यासह्रस्वे 'आत औ णलः' इति णल औकारे वृद्धौ तत्सिद्धिः ।

अशात् । शोधातोर्लुङस्तिप इकारलोपेऽटि 'आदेच' इत्यात्वे च्लेः सिचि 'विभाषा घ्राधेट्शाच्छासः' इति पाक्षिके सिचो लुकि अशात् इति, सिज्लुगभावपक्षे ईटि 'यमरमनमातां सक् च' इति सकि सिच इटि 'इट ईटि' इतिसलोपे सवर्णदीर्घे अशासीत् इति च सिद्धम् ।

---

[1] त्रेसुः तत्रसुः । त्रेसिथ-तत्रसिथ, त्रेसथुः-तत्रसथुः, त्रेस-तत्रस । तत्रास-तत्रस, त्रेसिव-तत्रसिव, त्रेसिम-तत्रसिम । [2] घ्रा गन्धोपादाने, धेट् पाने, शो तनूकरणे, छो छेदने, षो अन्तकर्माण इन धातु से पर सिच् का लुक् हो विकल्प से परस्मैपदप्रत्यय पर रहते । [3] चच्छौ छाता छास्यति छयतु अच्छयत् छयेत् छायात् अच्छात् अच्छासीत् अच्छास्यत् । [4] साता सास्यति स्यतु अस्यत् स्येत् सेयात् असात्-असासीत् असास्यत् । [5] दाता दास्यति द्यतु अद्यत् द्येत् देयात् अदात् अदास्यत् ।

पृच्छतिभृज्जतीनां ङिति च ६।१।१६ ॥ एषां सम्प्रसारणं स्यात्किति ङिति च । विध्यति । विव्याध । विविधतुः । विविधुः । विव्यधिथ, विव्यद्ध । व्यद्धा । व्यत्स्यति । विध्येत । विध्यात् । अव्यात्सीत् ॥ पुष् पुष्टौ ॥ १० ॥ पुष्यति । पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति । पुषादीत्यङ् । अपुषत ॥ शुष् शोषणे ॥ ११ ॥ शुष्यति । शुशोष । अशुषत् । णश् अदर्शने ॥ १२ ॥ नश्यति ॥ ननाश । नेशतुः ॥ **रधादिभ्यश्च ७।२।४५ ॥** रध् नश् तृप् दृप् द्रुह् मुह् ष्णुह् ष्णिह् एभ्यो वलाद्यार्धधातुकस्य वेट् स्यात् । नेशिथ ॥ **मस्जिनशोर्झलि**

विध्यति । व्यध्धातोर्लटस्तिपि शपं बाधित्त्वा श्यनि तस्य 'सार्वधातुकमपित्' इतिङित्त्वे 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' इति सम्प्रसारणे पूर्वरूपे तत्सिद्धिः ।

विव्याध । व्यधो लिटस्तिपो णलि द्वित्वे 'लिट्यभ्यासस्योभयेषाम्' इति सम्प्रसारणे पूर्वरूपे हलादिशेषे उपधावृद्धौ तत्सिद्धिः ।

विविधतुः । व्यधो लिटस्तस अतुसि तस्य कित्त्वात् 'ग्रहिज्या' इति सम्प्रसारणे पूर्वरूपे द्वित्वे हलादिशेषे रुत्वे विसर्गे तत्सिद्धिः ।

विव्यधिथ । व्यधो लिटः सिपस्थलि द्वित्वे अभ्याससम्प्रसारणे पूर्वरूपे हलादिशेषे भारद्वाजनियमात्पाक्षिके इटि विव्यधिथेति, इडभावे तु 'झषस्तथोर्धोऽधः' इति थस्य धत्वे जश्त्वे विव्यद्धेति च सिद्धम् ।

अव्यात्सीत् । व्यधो लुङस्तिप इकारलोपेऽटि च्लेः सिचि ईटि 'वदव्रजहलन्तस्याचः' इति वृद्धौ धस्य चर्त्वेन तकारे तत्सिद्धिः ।

नेशिथ । णश्धातोर्णस्य नत्वे लिटः सिपस्थलि द्वित्वे हलादिशेषे 'रधादिभ्यश्च' इति वेटि 'थलि च सेटि' इति एत्वेऽभ्यासलोपे च नेशिथेति, इडभावपक्षे 'मस्जिनशोर्झलि' इति नुम्यनुस्वारे 'व्रश्च' इतिषत्वे ष्टुत्वे ननंष्ठेति च सिद्धम् ।

---

[1] अव्याद्धाम् अव्यात्सुः । अव्यात्सीः अव्याद्धम् अव्याद्ध । अव्यात्सम् अव्यात्स्व अव्यात्स्म ।

७।१।६० ॥ नुम् स्यात् । ननंष्ठ । नेशिव, नेश्व । नेशिम, नेश्म । नशिता, नंष्टा । नशिष्यति, नङ्क्ष्यति । नश्यतु । अनश्यत् । नश्येत् नश्यात् । अनशत् ॥ षूङ् प्राणिप्रसवे ॥ १३ ॥ सूयते । सुषुवे । क्रादि-नियमादिट् । सुषुविषे । सुषुविवहे । सुषुविमहे । सविता, सोता ॥ दूङ् परितापे ॥ १४ ॥ दूयते[1] ॥ दीङ् क्षये ॥ १५ ॥ दीयते ॥ **दीङो युडचि क्ङिति ६।४।६३** ॥ दीङः परस्याजादेः क्ङित आर्धधातुकस्य युट् । (वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ) । दिदीये ॥ **मीनातिमिनोतिदीङां ल्यपि च ६।१।५०** ॥ एषामात्वं[2] स्याल्ल्यपि चादशित्येज्निमित्ते । दाता । दास्यति । (स्थाघ्वोरित्त्वे दीङः प्रतिषेधः) । अदास्त[3] ॥ डीङ् विहायसा गतौ ॥ १६ ॥ डीयते । डिड्ये ।

नशिष्यति । णशो णस्य नत्वे लृटस्तिपि स्यप्रत्यये तस्यार्धधातुकत्वाद् 'रधादिभ्यश्च' इति वेटि नशिष्यति इति इडभावपक्षे 'मस्जिनशोर्झलि' इति नुम्यनुस्वारे 'व्रश्च' इति शस्य षत्वे 'षढोः कः सि' षस्य कत्वे षत्वे परसवर्णे नङ्क्ष्यतीति च सिद्धम् ।

अनशत् । णशो णस्य नत्वे लङस्तिप इलोपेऽटि च्लौ 'पुषादि' इति च्लेरङि तत्सिद्धिः ।

दिदीये । दीङो लिटस्तस्य एशि द्वित्वेऽभ्यासह्रस्वे 'दीङो युडचि क्ङिति' इति युटि तस्यासिद्धत्वाद् 'एरनेकाच' इति यणि प्राप्ते 'वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ' इति युटः सिद्धत्त्वाद्यणोऽभावे तत्सिद्धिः ।

दाता । दीङो लुटस्तप्रत्यये 'मीनातिमिनोतिदीङां ल्यपि च' इत्यात्वे तासि तिपो डादेशे डित्वाट्टिलोपे तत्सिद्धिः ।

प-पयस्प **अदास्त** । दीङो लुङस्तप्रत्यये 'मीनाति' इत्यात्वे च्लेः सिचि 'दाधाघ्वदाप्' इति घुत्वात् 'स्थाघ्वोरिच्च' इतीत्वे प्राप्ते 'स्थाघ्वोरित्वे दीङः प्रतिषेधः' इति तन्निषेधे तत्सिद्धिः ।

---

[1] दुदुवे दविता दविष्यते दूयताम् अदूयत दूयेत दविषीष्ट अदविष्ट अदविष्यत ।

[2] डुमिञ् प्रक्षेपणे, मीञ हिंसायाम्, दीङ् क्षये इन धातुको आत्व हो ल्यप् और शित् प्रत्यय से भिन्न एच्निमित्तक प्रत्यय पर रहते ।

[3] अदासाताम् अदासत इत्यादि ।

डयिता[1] ॥ पीङ् पाने ॥ १७ ॥ पीयते[2] । पेता । अपेष्ट । माङ् माने ॥ १८ ॥ मायते । ममे ॥ जनी प्रादुर्भावे ॥ १९ ॥ **ज्ञाजनोर्जा** ७।३।७९ ॥ अनयोर्जादेशः स्याच्छिति परे जायते । जज्ञे । जनिता । जनिष्यते ॥ **दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्** ३।१।६१ ॥ एभ्यश्च्लेश्चिण् वा स्यादेकवचने तशब्दे परे ॥ **चिणो लुक्** ६।४।१०४ ॥ चिणः परस्य लुक् स्यात् ॥ **जनिवध्योश्च** ७।३।३५ ॥ अनयोरुपधाया वृद्धिर्न स्याच्चिणि ञ्णिति कृति च । अजनि, अजनिष्ट[4] ॥ दीपी दीप्तौ ॥ २० ॥ दीप्यते । दिदीपे । अदीपि, अदीपिष्ट ॥ पद गतौ ॥ २१ ॥ पद्यते । पेदे । पत्ता । पत्सीष्ट ॥ **चिण् ते पदः** ३।१।६० ॥ पदेश्च्लेश्चिण् स्यात्तशब्दे परे । अपादि । अपत्साताम् । अपत्सत ॥ विद सत्तायाम् ॥ २२ ॥ विद्यते[5] । वेत्ता । अवित्त ॥ बुध

जायते । जन्धातोर्लटस्तप्रत्यये टेरेत्वे 'दिवादिभ्यः श्यन्' इति शपं बाधित्वा श्यनि 'ज्ञाजनोर्जा' इति जनो जादेशे तत्सिद्धिः ।

जज्ञे । जनो लिटस्तस्य एशि द्वित्वे हलादिशेषे तस्य कित्त्वात् 'गमहन' इत्युपधालोपे श्चुत्वे तत्सिद्धिः ।

अजनि । जनो लुङस्तप्रत्ययेऽटि च्लौ 'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्' इति च्लेश्चिणि 'चिणो लुक्' इति तस्य लुकि उपधावृद्धौ प्राप्तायाम् 'जनिवध्योश्च' इति तन्निषेधे तत्सिद्धिः । चिणोऽभावपक्षे च्लेस्सिचि इटि षत्वे ष्टुत्वे अजनिष्टेति सिध्यति ।

अपादि । पदो लुङस्तप्रत्ययेऽटि च्लौ 'चिण् ते पदः' इति च्ले-

---

[1] डयिष्यते डीयताम्, अडीयत डीयेत डयिषीष्ट अडयिष्ट अडयिष्यत । [2] पिप्ये, पेता, पेष्यते, पीयताम्, अपीयत, पीयेत, पेषीष्ट, अपेष्ट, अपेष्यत । [3] माता मास्यते मायताम् अमायत मायेत मासीष्ट अमास्त अमास्यत । [4] अजनिषाताम् इति । [5] विविदे वेत्ता वेत्स्यते विद्यताम्, अविद्यत विद्येत वित्सीष्ट अवित्त अवेत्स्यत ।

अवगमने ॥ २३ ॥ बुध्यते[1] । बोद्धा । भोत्स्यते । भुत्सीष्ट । अबोधि, अबुद्ध । अभुत्साताम् ॥ युध संप्रहारे ॥ २४ ॥ युध्यते । युयुधे । योद्धा[2] । अयुद्ध ॥ सृज विसर्गे ॥ २५ ॥ सृज्यते । ससृजे । ससृजिषे[3] ॥ **सृजिदृशोर्झल्यमकिति ६।१।५८** ॥ अनयोरमागमः स्याज्झलादावकिति । स्रष्टा । स्रक्ष्यति । सृक्षीष्ट[5] । असृष्ट । असृक्षाताम् ॥ मृष तितिक्षायाम् ॥ २६ ॥ मृष्यति, मृष्यते । ममर्ष । ममर्षिथ । ममृषिषे । मर्षितासि । मर्षिष्यति, मर्षिष्यते ॥ णह बन्धने ॥ २७ ॥ नह्यति, नह्यते । ननाह । नेहिथ, ननद्ध ।

ञ्चिणि 'चिणो लुक्' इति तस्य लुकि उपधावृद्धौ तत्सिद्धिः ।

भोत्स्यते । बुधधातोर्लृटस्तप्रत्यये टेरेत्वे स्यप्रत्यये लघूपधगुणे 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति भष्भावे चर्त्वे तत्सिद्धिः ।

अबोधि । बुधो लुङस्तप्रत्ययेऽटि च्लौ 'दीपजन' इति पाक्षिके च्लेश्चिणि लघूपधगुणे तस्य लुकि अबोधि इति, चिणोऽभावपक्षे च्लेः सिचि 'झलो झलि' इति सलोपे तस्य धकारे जश्त्वे अबुद्ध इति च सिद्धम् ।

स्रष्टा । सृज्धातोर्लुटस्तिपि तासि डादेशे टिलोपे 'सृजिदृशोर्झल्यमकिति' इत्यमि यणि 'व्रश्च' इति षत्वे ष्टुत्वे तत्सिद्धिः ।

नेहिथ । णह्धातोर्णस्य नत्वे लिटः सिपस्थलि द्वित्वे हलादिशेषे भारद्वाजनियमाद्वेटि 'थलि च सेटि' इत्येत्वाभ्यासलोपयोः नेहिथेति, इडभावपक्षे 'नहो धः' इति हस्य धकारे 'झषस्तथोर्धोऽधः' इति थस्य धकारे जश्त्वे ननद्ध इति च सिद्धम् ।

---

[1] बुबुधे बोद्धा भोत्स्यते बुध्यताम् अबुध्यत बुध्येत भुत्सीष्ट, अबोधि अबुद्ध, अभुत्साताम् । अभोत्स्यत । [2] युत्सीष्ट अयुद्ध अयुत्साताम् अयुत्सत अयुत्थाः अयोत्स्यत । [3] क्रादिनियमान्नित्यमिट् । [4] सृज विसर्गे, दृशिर प्रेक्षणे इन धातु को अम् आगम हो कित्भिन्न झलादिप्रत्यय पर रहते । [5] लिङ्सिचावात्मनेपदेषु, इति कित्वाद् अम्गुणयोरभावः ।

नेहे । नद्धा । नत्स्यति । अनात्सीत्[1], अनद्ध[2] ॥

इति दिवादयः ॥ ४ ॥

* * *

अथ स्वादयः ॥

षुञ् अभिषवे[3] ॥ १ ॥ **स्वादिभ्यः श्नुः ३।१।७३** ॥ शपोऽपवादः । सुनोति । सुनुतः । हुश्नुवोरिति यण् । सुन्वन्ति । सुन्वः, सुनुवः । सुनुते । सुन्वाते । सुन्वते । सुन्वहे, सुनुवहे । सुषाव[4], सुषुवे[5] । सोता । सुनु । सुनवानि, सुनवै । सुनुयात्[6] । सूयात्[7] ॥ **स्तुसुधूञ्भ्यः परस्मै-**

अनात्सीत् । नहो लङस्तिप इलोपेऽटि च्लेः सिचि इदि 'वदव्रज' इति वृद्धौ हस्य धत्वे चर्त्वे तत्सिद्धिः । क्ङिति च (१।१।५) इति नैव गुणाभावः 'सार्वधातुकमपि (१।२।४) इत्य नेन श्नुप्रत्य यस्य ङि त्संज्ञा

॥ इति दिवादयः ॥

सुनोति । षुधातोः षस्य 'धात्वादेः षः सः' इति सत्वे शपं बाधित्वा 'स्वादिभ्यः श्नुः' इति श्नुप्रत्ययेऽनुबन्धलोपे 'श्नुप्रत्ययस्य ङित्त्वात्सुनोतेर्गुणाभावे नोर्गुणे तत्सिद्धिः ।

सुन्वः । सुधातोर्लटो वसि श्नुप्रत्यये 'लोपश्चास्यान्यतरस्यां म्वोः' इति पाक्षिके उकारलोपे रुत्व विसर्गे सुन्वः सुनुवः इति रूपद्वयं सिद्ध्यति ।

सुनवानि । सुधातोर्लोटो मेर्नौ श्नुप्रत्यये आटि गुणेऽवादेशे तत्सिद्धिः ।

सुनवै । सुधातोर्लोट इट एत्वे ऐत्वे श्नुप्रत्यये आटि वृद्धौ गुणेऽवादेशे तत्सिद्धिः ।

---

[1] अनाद्धाम् अनात्सुः । अनात्सीः अनाद्धम् अनाद्ध । अनात्सम् अनात्स्व अनात्स्म । [2] अनत्साताम् अनत्सत । अनद्धाः अनत्साथाम् अनद्ध्वम् । अनत्सि अनत्स्वहि अनत्स्महि । [3] अभिषवः स्नपनं स्नानं पीडनं सुरासन्धानं च । [4] सुषविथ सुषोथ सुषुविव सुषुविम । [5] सुषुविढ्वे सुषुविध्वे । लङ् । असुनोत् असुनुताम्, असुन्वन् । असुनोः असुनुतम् असुनुत । असुनवम् असुन्व असुनुव, असुन्म असुनुम । असुनुत असुन्वाताम् असुन्वत । असुनुथाः । असुन्वहि-असुनुवहि । [6] सुन्वीत सुन्वीयाताम् । [7] सोषीष्ट सोषीयास्ताम् । सोषीढ्वम् ।

पदेषु ७।२।७२॥ एभ्यस्सिच इट् स्यात्परस्मैपदेषु । असावीत्, असोष्ट[1] ॥ चिञ् चयने ॥ २ ॥ चिनोति, चिनुते ॥ **विभाषा चेः ७।३।५८॥** अभ्यासात्परस्य कुत्वं वा स्यात्सनि लिटि च । चिकाय, चिचाय; चिक्ये, चिच्ये[2] । अचैषीत्[3], अचेष्ट[4] ॥ स्तृञ् आच्छादने ॥ ३ ॥ स्तृणोति, स्तृणुते ॥ **शर्पूर्वाः खयः ७।४।६१॥** अभ्यासस्य शर्पूर्वाः खयः शिष्यन्तेऽन्ये हलो लुप्यन्ते । तस्तार[5] । तस्तरतुः । तस्तरे[6] । गुणोर्तीति गुणः । स्तर्यात् ॥ **ऋतश्च संयोगादेः ७।२।४३॥** ऋदन्तात्संयोगादेः परयोर्लिङ्सिचोरिड्वा स्यात्तङि । स्तरिषीष्ट, स्तृषीष्ट । अस्तरिष्ट[7], अस्तृत[8] ॥

असावीत् । सुधातोर्लुङस्तिप इकारलोपेऽटि च्लेः सिचि 'स्तुसुधूञ्भ्यः परस्मैपदेषु' इति इटि ईटि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ सलोपे तत्सिद्धिः ।

चिकाय । चिधातोर्लिटस्तिपो णलि द्वित्वे वृद्धौ आयादेशे 'विभाषा चेः' इति पाक्षिके कुत्वे चिकाय इति पक्षे चिचाय इति च सिद्धम् ।

तस्तार । स्तृधातोर्लिटस्तिपो णलि द्वित्वे 'उरत्' इत्यत्वे रपरे 'शर्पूर्वाः खयः' इत्यभ्यासतकारस्य शेषे गुणे रपरे उपधावृद्धौ तत्सिद्धिः ।

स्तरिषीष्ट । स्तृधातोराशीर्लिङस्तप्रत्यये सीयुटि यलोपे सुटि 'ऋतश्च संयोगादेः' इति वेटि गुणे रपरे षत्वे ष्टुत्वे स्तरिषीष्ट इति, इडभावपक्षे 'उश्च' इति कित्त्वाद्गुणाभावे स्तृषीष्टेति च सिद्धम् ।

अस्तरिष्ट । स्तृधातोर्लुङस्तप्रत्ययेऽटि च्लेः सिचि 'ऋतश्चसंयोगादेः' इति वेटि गुणे रपरे षत्वे ष्टुत्वे अस्तरिष्टेति, इडभावे 'ह्रस्वादङ्गात्' इति सिचो लोपे तत्सिद्धिः ।

---

[1] असोषाताम् असोषत । असोष्ठाः असोषाथाम् असोढ्वम् । असोषि असोष्वहि असोष्महि ।
[2] चेता । चेष्यति चेष्यते । चिनोतु—चिनुताम् । अचिनोत् अचिनुत । चिनुयात् चिन्वीत । चीयात् चेषीष्ट ।
[3] अचैष्टाम् ।
[4] अचेषाताम् इत्यादि ।
[5] तस्तर्थ । तस्तरिषे,
[6] तस्तरिढ्वे तस्तरिध्वे । स्तर्ता स्तरिष्यति—स्तरिष्यते स्तृणोतु स्तृणु स्तृणवानि । स्तृणुताम्, स्तृणुष्व, स्तृणवै । अस्तृणोत्-अस्तृणुत । स्तृणुयात्-स्तृण्वीत । अस्तार्षीत् अस्तार्ष्टाम् ।
[7] अस्तरिषाताम् ।
[8] अस्तृषाताम् ।

धूञ् कम्पने ॥ ४ ॥ धुनोति, धुनुते । दुधाव । स्वरतीति वेट् । दुधविथ, दुधोथ ॥ **श्र्युकः क्किति ७ । २ । ११ ॥** श्रिञ एकाच उगन्ताच्च गित्कितोरिण् न । परमपि स्वरत्यादिविकल्पं बाधित्वा पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादनेन निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् दुधुविव । दुधुवे[1] । अधावीत्, अधविष्ट, अधोष्ट । अधविष्यत्, अधोष्यत् । अधविष्यताम्, अधोष्यताम् । अधविष्यत, अधोष्यत ॥

इति स्वादयः ॥ ९ ॥

दुधविथ । धूञो लिटः सिपस्थलि द्वित्वेऽभ्यासह्रस्वे जश्त्वे 'स्वरतिसूतिसूयतिधूञूदितो वा' इति वेटि गुणेऽवादेशे दुधविथेति पक्षे दुधोथेति च सिद्धम् ।

दुधुविव । धूञो लिटो वसो वादेशे द्वित्वेऽभ्यासह्रस्वे जश्त्वे परमपि 'स्वरतिसूति' इति इड्विकल्पं बाधित्वा पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात् 'श्र्युकः किति' इति इण्निषेधे प्राप्ते क्रादिनियमान्नित्यमिटि उवङि तत्सिद्धिः ।

अधावीत् । धूञो लुङस्तिप इकारलोपेऽटि च्लेस्सिचि 'स्वरति' इति इड्विकल्पं बाधित्वा 'स्तुसुधूञ्भ्यः परस्मैपदेषु' इति नित्ये इटि ईटि सलोपे 'सिचिवृद्धिः परस्मैपदेषु' इति वृद्धौ आवादेशे सवर्णदीर्घे तत्सिद्धिः ।

अधविष्ट । धूञोलुङस्तप्रत्ययेऽटि च्लेः सिचि 'स्वरतिसूतिसूयति धूञूदितो वा' इति वेटि गुणेऽवादेशे अधविष्टेति, इडभावे अधोष्टेति च सिद्धम् ।

॥ इति स्वादयः ॥

---

[1] धविता-धोता । धविष्यति-धोष्यति, धविष्यते, धोष्यते । धुनोतु-धुनुताम् । अधुनोत्-अधुनुत । धुनुयात्-धुन्वीत् धूयात्-धविषीष्ट-धोषीष्ट ।

अथ तुदादयः ।

तुद व्यथने ॥ १ ॥ **तुदादिभ्यः शः ३।१।७७॥** शपोऽपवादः। तुदति, तुदते । तुतोद । तुतोदिथ । तुतुदे । तोत्ता[1] । अतौत्सीत्[2], अतुत्त[3] ॥ णुद प्रेरणे ॥ २ ॥ नुदति, नुदते नुनोद । नोत्ता । भ्रस्ज पाके ॥ ३ ॥ ग्रहिज्येति सम्प्रसारणम् । सस्य श्चुत्वेन शः । शस्य जश्त्वेन जः । भृज्जते ॥ **भ्रस्जो रोपधयोरमन्यतरस्याम् ६।४।४७॥** भ्रस्जे रेफस्योपधायाश्च स्थाने रमागमो वा स्यादार्धधातुके । मित्त्वादन्त्यादचः परः । स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः । बभर्ज । बभर्जतुः । बभर्जिथ,

तुदति । तुदो लटस्तिपि शपं बाधित्वा 'तुदादिभ्यःशः' इति शप्रत्यये 'सार्वधातुकमपित्' इति तस्य ङित्त्वद्गुणाभावे तत्सिद्धिः ।

अतौत्सीत् । तुदो लुङस्तिप इकारलोपेऽटे च्लेः सिचि ईटि 'वदव्रजहलन्तस्याचः' इति वृद्धौ चर्त्वे तत्सिद्धिः ।

अतुत्त । तुदो लुङस्तप्रत्ययेऽटि च्लेः सिचि 'झलो झलि' इति सलोपे चर्त्वे तत्सिद्धिः ।

भृज्जति । भ्रस्ज्धातोर्लटस्तिपि शप्रत्यये तस्य ङित्त्वात् 'ग्रहिज्या' इति सम्प्रसारणे पूर्वरूपे सस्य श्चुत्वेन शकारे तस्य जश्त्वेन जकारे तत्सिद्धिः ।

बभर्ज । भ्रस्जो लिटस्तिपो णलि 'भ्रस्जो रोपधयोरमन्यतरस्याम्' इति रेफसकारयोः स्थाने मित्त्वादन्त्यादचः परे रमि द्वित्वे हलादिशेषे जश्त्वे बभर्जेति, रमोऽभावपक्षे द्वित्वे 'लिट्यभ्यासस्योभयेषाम्' इति सम्प्रसारणे पूर्वरूपे 'उरत्' इत्यत्वे रपरे हलादिशेषे जश्त्वे तस्य श्चुत्वेन शकारे तस्य जश्त्वेन जकारे बभ्रज्जेति च सिद्धम् ।

बभर्जिथ । भ्रस्जो लिटः सिपस्थलि 'भ्रस्जो रोपधयोरमन्यतरस्याम्' इति पाक्षिके रमि द्वित्वे हलादिशेषे जश्त्वे भारद्वाजनियमाद्वेटि

---

[1] तोत्स्यति-तोत्स्यते । तुदतु-तुदताम् । तुदेत्-तुदेत । तुद्यात्-तुत्सीष्ट ।
[2] अतौत्ताम् अतौत्सुः । [3] अतुत्साताम् अतुत्सत ।

बभर्ष्ठ । बभ्रज्ज । बभ्रज्जतुः । बभ्रज्जिथ । स्कोरिति सलोपः । व्रश्चेति षः । बभ्रष्ठ । बभर्ज्जे, बभ्रज्ज । भर्ष्टा, भ्रष्टा । भर्क्ष्यति, भ्रक्ष्यति । (क्ङिति रमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन) । भृज्ज्यात् । भृज्ज्यास्ताम् । भृज्ज्यासुः । भर्क्षीष्ट, भ्रक्षीष्ट । अभार्क्षीत्[1], अभ्राक्षीत्[2] । अभर्ष्ट[3] ॥ अभ्रष्ट[4]॥ कृष विलेखने ॥ ४ ॥ कृषति, कृषते । चकर्ष, चकृषे ॥ **अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ६।१।५९ ॥** उपदेशेऽनुदात्तो य ऋदुपध-

---

बभर्जिथेति, इडभावपक्षे 'व्रश्च' इति षत्वे ष्टुत्वे बभर्ष्ठेति. रमोऽभावे द्वित्वे सम्प्रसारणे पूर्वरूपे 'उरत्' इत्यत्वे रपरे हलादिशेषे जश्त्वे वेटि सस्य श्चुत्वेन शकारे तस्य जश्त्वेन जकारे बभ्रज्जिथेति, इड्रमोरभावे 'स्कोः' इति सलोपे षत्वे ष्टुत्वे बभ्रष्ठेति च सिद्धम् ।

भर्ष्टा । भ्रस्जो लुटस्तिपि तासि डादेशे टिलोपे 'भ्रस्जो रोपधयोः' इति रमि 'व्रश्च' इति षत्वे ष्टुत्वे भर्ष्टेति, रमोऽभावे 'स्कोः' इति सलोपे षत्वे ष्टुत्वे भ्रष्टा इति च सिद्धम् ।

भर्क्ष्यति । भ्रस्जो लृटस्तिपि स्ये रमि जस्य षत्वे षस्य कत्वे षत्वे भर्क्ष्यति इति, रमोऽभावे सलोपे षत्वादिके भ्रक्ष्यति इति च सिद्धम् ।

भृज्ज्यात् । भ्रस्ज्धातोराशीर्लिङस्तिप इकारलोपे यासुटः कित्त्वे 'स्कोः' इति, सलोपे 'क्ङिति रमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन' इति रमं बाधित्वा सम्प्रसारणे पूर्वरूपे सस्य श्चुत्वेन शकारे तस्य जश्त्वेन जकारे तत्सिद्धिः ।

अभार्क्षीत् । भ्रस्जो लुङस्तिप इकारलोपेऽटि च्लेः सिचि ईटि 'भ्रस्जो रोपधयोः' इति पाक्षिके रमि 'वदव्रज' इति वृद्धौ 'व्रश्च' इति जस्य षत्वे षस्य कत्वे षत्वे अभार्क्षीत्, इति रमभावे सलोपे षत्वादिके अभ्राक्षीदिति च सिद्धम् ।

---

[1] अभार्ष्टाम् अभार्क्षुः । अभार्क्षीः अभार्ष्टम् अभार्ष्ट । अभार्क्षम् अभार्क्ष्व अभार्क्ष्म । [2] अभ्राष्टाम् इत्यादि । [3] अभर्क्षाताम् अभर्क्षत । अभर्ष्ठाः अभर्क्षाथाम् अभर्ड्ढ्वम् । अभर्क्षि अभर्क्ष्वहि अभर्क्ष्महि । [4] अभ्रक्षाताम् इत्यादि ।

स्तस्याम्वा स्याज्झलादावकिति। क्रष्टा, कर्ष्टा[1]। कृक्षीष्ट। (स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः)। अक्राक्षीत्[2], अकार्क्षीत्[3], अकृक्षत्[4]। अकृष्ट। अकृक्षाताम्। अकृक्षत[5]। अकृक्षन्त[6]॥ मिल संगमे ॥ ५ ॥ मिलति, मिलते। मिमेल। मेलिता। अमेलीत्॥ मुच्लृ मोचने॥ ६ ॥ **शे मुचादीनाम् ७।१।५९॥** मुच्लिप्विद्लुप्सिच्कृत्खिद्पिशां नुम् स्यात्। मुञ्चति, मुञ्चते[7]। मोक्ता। मुच्यात्। मुक्षीष्ट। अमुचत, अमुक्त।

क्रष्टा। कृषो लुटस्तिपि तासि तिपो डादेशे डित्वाट्टिलोपे 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इति पाक्षिकेऽमि यणि ष्टुत्वे क्रष्टेति, अमोऽभावे गुणे कर्ष्टा इति च सिद्धम्।

अक्राक्षीत्। कृषो लुङस्तिप इकारलोपेऽटि च्लौ 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशं बाधित्वा 'स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः' इति पाक्षिके च्लेः सिचि ईटि 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इत्यमि यणि 'वदव्रज' इति वृद्धौ षस्य कत्वे षत्वे अक्राक्षीदिति, अमोऽभावपक्षे वृद्धौ रपरे अकार्क्षीदिति, सिचोऽभावे च्लेः क्सादेशे षस्य कत्वे षत्वे अकृक्षदिति च सिद्धम्।

अकृष्ट। कृषो लुङस्तप्रत्ययेऽटि 'स्पृशमृश' इति पाक्षिके च्लेः सिचि 'लिङ्सिचावात्मनेपदेषु' इति सिचः कित्त्वादमृगुणयोरभावे 'झलो झलि' इति सलोपे अकृष्टेति, सिजभावपक्षे 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशे 'षढोः कः सि' इति षस्य कत्वे सस्य षत्वे अकृक्षत इति च सिद्धम्।

मुञ्चति। मुचो लटस्तिपि शप्रत्यये 'शे मुचादीनाम्' इति नुमागमे नस्यानुस्वार परसवर्णे तत्सिद्धिः।

---

[1] कर्क्ष्यति-क्रक्ष्यति, कर्क्ष्यते-क्रक्ष्यते। कृषतु-कृषताम्। अकृषत्-अकृषत। कृषेत्-कृषेत। कृष्यात् कृक्षीष्ट। [2] अकार्ष्टाम् अकार्क्षुः। [3] अक्राष्टाम् अक्राक्षुः। [4] अकृक्षताम् अकृक्षन्। [5] अकृष्ठाः अकृक्षाथाम् अकृड्ढ्वम्। अकृक्षि अकृक्ष्वहि अकृक्ष्महि। [6] अकृक्षत अकृक्षाताम् अकृक्षन्त। अकृक्षथाः अकृक्षाथाम् अकृक्षध्वम्। अकृक्षे अकृक्षावहि अकृक्षामहि। अकर्क्ष्यत्-अक्रक्ष्यत्, अकर्क्ष्यत-अक्रक्ष्यत। [7] मुमोच मुमोचिथ मुमुचिव। मुमुचे। मोक्ष्यति-मोक्ष्यते। मुञ्चतु-मुञ्चताम् अमुञ्चत्-अमुञ्चत। मुञ्चेत्-मुञ्चेत।

अमुक्षातोम् ॥ लुप्लृ छेदने ॥ ७ ॥ लुम्पति, लुम्पते । लोप्ता । अलुपत्, अलुप्त ॥ विद्लृ लाभे ॥ ८ ॥ विन्दति, विन्दते । विवेद, विविदे । व्याघ्रभूतिमते सेट् । वेदिता । भाष्यमतेऽनिट् । परिवेत्ता ॥ षिच क्षरणे ॥ ९ ॥ सिञ्चति, सिञ्चते ॥ **लिपिसिचिह्वश्च ३ । १ । ५३॥** एभ्यश्च्लेरङ् स्यात् । असिचत् ॥ **आत्मनेपदेष्वन्यतरस्याम् ३।१। ५४ ॥** लिपिसिचिह्वः परस्य च्लेरङ् वा । असिचत, असिक्त ॥ लिप उपदेहे ॥ १० ॥ उपदेहो वृद्धिः । लिम्पति, लिम्पते । लेप्ता । अलिपत्, अलिपत, अलिप्त ॥

इत्युभयपादिनः ।

* * *

कृती छेदने ॥ ११ ॥ कृन्तति । चकर्त । कर्तिता । कर्तिष्यति, कर्त्स्यति । अकर्तीत् ॥ खिद परिघाते ॥ १२ ॥ खिन्दति । चिखेद । खेत्ता ॥ पिश अवयवे ॥ १३ ॥ पिंशति[2] । पेशिता ॥ ओव्रश्चू छेदने

अमुचत् । मुचो लुङस्तिप इकारलोपेऽटि च्लौ 'पुषादिद्युतादि' इति च्लेरङि तत्सिद्धिः ।

असिचत् । षिचः षस्य सकारे लुङस्तिप इकारलोपेऽटि 'लिपिसिचिह्वश्च' इति च्लेरङि तस्य ङित्त्वाद्गुणाभावे तत्सिद्धिः ।

असिचत । सिचो लुङस्तप्रत्ययेऽटि च्लौ 'आत्मनेपदेष्वन्यतरस्याम्' इति पाक्षिके च्लेरङि असिचत इति, च्लेरङोऽभावे सिचि 'झलो झलि' इति सलोपे चस्य कुत्वे असिक्तेति च सिद्धम् ।

कर्तिष्यति । कृत्धातोर्लृटस्तिपि स्यप्रत्यये 'सेऽसिचि कृतचृतच्छृदतृदनृतः' इति वेटि गुणे रपरे षत्वे कर्तिष्यति इति, इडभावे कर्त्स्यतीति च सिद्धम् ।

---

[1] अमोक्ष्यत्-अमोक्ष्यत । [2] पिपेश पिपेशिथ पिपिशिव । पेशिष्यति पिंशतु अपिंशत् पिंशेत् पिश्यात् अपेशीत् अपेशिष्यत् ।

॥ १४ ॥ वृश्चति । वव्रश्च । वव्रश्चिथ, वव्रष्ठ । व्रश्चिता, व्रष्टा । व्रश्चिष्यति, व्रक्ष्यति । वृश्च्यात् । अव्रश्चीत्, अव्राक्षीत् ॥ व्यच व्याजीकरणे ॥ १५ ॥ विचति । विव्याच । विविचतुः । व्यचिता । व्यचिष्यति ।

वृश्चति । व्रश्च्धातोर्लटस्तिपि शप्रत्यये तस्य ङित्त्वाद् 'ग्रहिज्या' इति सम्प्रसारणे तत्सिद्धिः ।

वव्रश्च । व्रश्च्धातोर्लिटस्तिपो णलि द्वित्वेऽभ्यासत्वे 'लिट्यभ्यासस्योभयेषाम्' इति सम्प्रसारणे पूर्वरूपे 'उरत्' इत्यत्वे रपरे 'अचः परस्मिन् पूर्वविधौ' इति अत्त्वस्य स्थानिवत्त्वात् 'न सम्प्रसारणे सम्प्रसारणम्' इति वकारस्य सम्प्रसारणनिषेधे हलादिशेषे तत्सिद्धिः ।

वव्रश्चिथ । व्रश्च्धातोर्लिटः सिपस्थलि द्वित्वेऽभ्यासस्य सम्प्रसारणे पूर्वरूपे 'उरत्' इत्यत्वे तस्य स्थानिवत्त्वात् वस्य सम्प्रसारणनिषेधे हलादिशेषे 'स्वरतिसूति' इति वेटि वव्रश्चिथेति, इडभावपक्षे श्चुत्वस्यासिद्धत्वात् 'स्कोः' इति सलोपे 'व्रश्च' इति षत्वे ष्टुत्वे वव्रष्ठ इति च सिद्धम् ।

अव्रश्चीत् । व्रश्चो लुङस्तिप इलोपेऽटि च्लेः सिचि ऊदित्वाद्वेटि ईटि सलोपे 'वदव्रज' इति वृद्धेः 'नेटि' इति निषेधे दीर्घे अव्रश्चीदिति, इडभावे वृद्धौ 'स्कोः' इति सलोपे 'व्रश्च' इति षत्वे षस्य कत्वे षत्वे अव्राक्षीदिति च सिद्धम् ।

विचति । व्यचोलटस्तिपि शप्रत्यये 'ग्रहिज्या' इति सम्प्रसारणे पूर्वरूपे तत्सिद्धिः ।

विव्याच । व्यचो लिटस्तिपो णलि द्वित्वे 'लिट्यभ्यासस्य' इति सम्प्रसारणे पूर्वरूपे उपधावृद्धौ तत्सिद्धिः ।

विविचतुः । व्यचो लिटस्तस्य अतुसि तस्य कित्वात् 'ग्रहिज्या' इति सम्प्रसारणे पूर्वरूपे द्वित्वे हलादिशेषे रुत्वे विसर्गे तत्सिद्धिः ।

विच्यात् । अव्यचीत्, अव्याचीत् । व्यचेः कुटादित्वमनसीति तु नेह प्रवर्तते, अनसीति पर्युदासेन कृन्मात्रविषयत्वात् ॥ उछि उञ्छे ॥ १६ ॥ उञ्छति[1] । 'उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम् ।' इति यादवः ॥ ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु ॥ १७ ॥ ऋच्छति । ऋच्छत्यृतामिति गुणः । द्विहल्ग्रहणस्याऽनेकहलुपलक्षणत्वान्नुट् । आनर्च्छ । आनर्च्छतुः । ऋच्छिता[2] ॥ उज्झ उत्सर्गे ॥ १८ ॥ उज्झति ॥ लुभ विमोहने ॥ १९ ॥ लुभति ॥ **तीषसहलुभरुषरिषः ७।२।४८ ॥** इच्छत्यादेः परस्य तादेरार्धधातुकस्येड्वा स्यात् । लोभिता, लोब्धा । लोभिष्यति ॥ तृप तृम्फ तृप्तौ ॥ २० ॥ २१ ॥ तृपति । ततर्प । तर्पिता । अतर्पीत् । तृम्फति ।

अव्याचीत् । व्यचो लुङस्तिप इकारलोपेऽटि च्लेस्सिचि इटि ईटि अनसीति पर्युदासेन कृन्मात्रविषयत्वात् 'व्यचेः कुटादित्वमनसि' इत्यस्याप्रवृत्त्या 'अतो हलादेर्लघोः' इति पाक्षिकवृद्धौ सलोपे सवर्णदीर्घे अव्याचीत् अव्यचीत् इति रूपद्वयं सिद्धम् ।

आनर्च्छ । ऋच्छधातोर्लिटस्तिपोणलि द्वित्वे उरत् 'इत्यत्वे' रपरे हलादिशेषे 'अतआदेः' इति दीर्घे 'ऋच्छत्यृताम्' इति गुणे रपरे द्विहल्ग्रहणस्यनेकहलुपलक्षणत्वात् 'तस्मान्नुड् द्विहलः' इति नुटि तत्सिद्धिः ।

लोभिता । लुभो लुटस्तिपि तासि 'तीषसहलुभरुषरिषः' इति वेटि गुणे तिपो डादेशे डित्त्वाट्टिलोपे लोभितेति, इडभावपक्षे तकारस्य धकारे जश्त्वे लोब्धेति च सिद्धम् ।

तृम्फति । तृम्फधातोर्लटस्तिपि शप्रत्यये 'अनिदिताम' इति नलोपे 'शे तृम्फादीनां नुम्वाच्यः' इति नुम्यनुस्वारे परसवर्णे तत्सिद्धिः ।

---

[1] उञ्छाञ्चकार उञ्छिता उञ्छिष्यति उञ्छतु औञ्छत् उञ्छेत् उञ्छ्यात् औञ्छीत् औञ्छिष्यत् । [2] ऋच्छिष्यति ऋच्छतु आर्च्छत् ऋच्छेत् ऋच्छ्यात् आर्च्छीत् आर्च्छिष्यत् ।

(शे तृम्फादीनां नुम् वाच्यः) । आदिशब्दः प्रकारे, तेन येऽत्र नकारानुषक्तास्ते तृम्फादयः । ततृम्फ । तृफ्यात् । मृड पृड सुखने ॥ २२ ॥ २३ ॥ मृडति[1] । पृडति ॥ शुन गतौ ॥ २४ ॥ शुनति ॥ इषु इच्छायाम् ॥ २५ ॥ इच्छति[2] । एषिता, एष्टा । एषिष्यति[3] । इष्यात् । ऐषीत् ॥ कुट कौटिल्ये ॥ २६ ॥ गाङ्कुटादीति ङित्त्वम् । चुकुटिथ । चुकोट, चुकुट । कुटिता ॥ पुट संश्लेषणे ॥ २७ ॥ पुटति । पुटिता ॥ स्फुट विकसने ॥ २८ ॥ स्फुटति । स्फुटिता ॥ स्फुर स्फुल संचलने ॥ २९ ॥ ३० ॥ स्फुरति । स्फुलति ॥ **स्फुरतिस्फुलत्योर्निर्निविभ्यः ८।३।७६** ॥ षत्वं वा स्यात् । निःष्फुरति, निःस्फुरति ॥ णू स्तवने ॥ ३१ ॥ परिणूतगुणोदयः । नुवति । नुनाव । नुविता ॥ टुमस्जो शुद्धौ ॥ ३२ ॥ मज्जति । ममज्ज । ममज्जिथ । मस्जिनशोरिति नुम् । (मस्जेरन्त्यात्पूर्वो नुम्वाच्यः) । संयोगादिलोपः । ममङ्क्थ ।

चुकुटिथ । कुटधातोर्लिटः सिपस्थलि द्वित्वे हलादिशेषे चुत्वे 'आर्धधातुकस्येड्वलादेः' इतीटि 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इति ङित्वाद्गुणाभावे तत्सिद्धिः ।

निःष्फुरति । निर्पूर्वात्स्फुरधातोर्लटस्तिपि शप्रत्यये 'स्फुरतिस्फुलत्योर्निर्निविभ्यः' इति सस्य षत्वे विसर्गे तत्सिद्धिः ।

ममज्जिथ । मस्जधातोर्लिटः सिपस्थलि द्वित्वे हलादिशेषे भारद्वाजनियमाद्वेटि सस्य श्चुत्वेन शकारे तस्य जश्त्वेन जकारे ममज्जिथेति, इडभावपक्षे 'मस्जेरन्त्यात्पूर्वो नुम्वाच्यः' इति वार्तिकबलात् 'मस्जिनशोर्झलि' इति सकारात्परे नुमि 'स्कोः' इति सलोपे जस्य कुत्वेन गकारे तस्य चर्त्वेन ककारे नस्यानुस्वारे परसवर्णे ममङ्क्थेति च सिद्धम् ।

---

[1] ममर्ड मर्डिता मर्डिष्यति मृडतु अमृडत् मृडेत् मृड्यात् अमर्डीत् अमर्डिष्यत् । [2] इयेष ईषतुः ईषुः । इयेषिथ ईषथुः ईष । इयेष ईषिव ईषिम । [3] इच्छतु । ऐच्छत् । इच्छेत् ।

भङ्क्ता । मङ्क्ष्यति । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः ॥ रुजो भङ्गे ॥ ३३ ॥ रुजति । रोक्ता । रोक्ष्यति । अरौक्षीत्[2] ॥ भुजो[3] कौटिल्ये ॥ ३४ ॥ रुजिवत् ॥ विश प्रवेशने ॥ ३५ ॥ विशति[4] ॥ मृशँ आमर्शने ॥ ३६ ॥ आमर्शनं स्पर्शः ॥ अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ॥ अम्राक्षीत्, अमार्क्षीत्, अमृक्षत् ॥ षद्लृ विशरणगत्यवसादनेषु ॥ ३७ ॥ सीदतीत्यादि[6] । शद्लृ शातने ॥ ३८ ॥ **शदेश्शितः १।३।६० ॥**

अमाङ्क्षीत् । मस्जो लुङस्तिप इकारलोपेऽटि च्लेः सिचि ईटि 'मस्जेरन्त्यात्पूर्वो नुम्वाच्यः' इति वार्तिकबलात् 'मस्जिनशोर्झलि' इति सकारात्परे नुमि 'स्कोः' इति सलोपे 'वदव्रज' इति वृद्धौ जस्य कुत्वेन गकारे तस्य चर्त्वेन ककारे नस्यानुस्वारे परसवर्णे षत्वे तत्सिद्धिः ।

अम्राक्षीत् । मृशो लुङस्तिप इकारलोपेऽटि क्सादेशं बाधित्वा 'स्पृशमृशकषतृपदृपां च्लेः सिज्वा वाच्यः' इति पाक्षिके सिचि ईटि 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इत्यमि यणि 'वदव्रज' इति वृद्धौ 'व्रश्च' इति षत्वे तस्य कत्वे सस्य षत्वे अम्राक्षीदिति, अमोऽभावपक्षे अमृश् स ईत् इति स्थिते वृद्धौ रपरे षत्वादिके अमार्क्षीदिति, सिजभावपक्षे 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशे शस्य षत्वे तस्य कत्वे सस्य षत्वे अमृक्षदिति च सिद्धम् ।

सीदनि । षदः षस्य सकारे लटस्तिपि शे 'पाघ्राध्मा' इति सदः सीदादेशे तत्सिद्धिः ।

---

[1] रुरोज रुरुजतुः रुरोजिथ, रुरुजिव । [2] अरौक्ताम् अरौक्षुः । [3] भुजति, बुभोज, बुभोजिथ बुभुजिव । भोक्ता भोक्ष्यति । भुजतु. अभुजत्, भुजेत्, भुज्यात्, अभौक्षीत् अभौक्ताम्, अभोक्ष्यत् । [4] विवेश विविशिव विविशिम । वेष्टा. वेक्ष्यति, विशतु, अविशत्. विशेत्, विश्यात्, अविक्षत्, अवेक्ष्यत् । [5] मृशति, ममर्श, ममर्शिथ, ममृशिव । मर्ष्टा-म्रष्टा मर्क्ष्यति, म्रक्ष्यति । अमार्क्षीत, अमार्ष्टाम् । अम्राक्षीत्, अम्राष्टाम् । अमृक्षत् । [6] सीदति । ससाद, सेदिथ-ससत्थ । सत्ता, सत्स्यति, सीदतु,असीदत्, सीदेत्, सद्यात्, असदत् असत्स्यत् ।

शिद्भाविनोऽस्मात्तङानौ स्तः। शीयते। शीयताम्। अशीयत। शीयेत। शशाद। शत्ता। शत्स्यति। अशदत्। अशत्स्यत्॥ कॄ विक्षेपे॥ ३९॥ **ॠत इद्धातोः ७।१।१००**॥ ॠदन्तस्य धातोरङ्गस्य इत्स्यात्॥ किरति। चकार। चकरतुः। चकरुः। करीता, करिता। कीर्यात्॥ **किरतौ लवने ६।१।१४०**॥ उपात्किरतेः सुट् छेदने। उपस्किरति। (अडभ्यासव्यवायेऽपि सुट् कात् पूर्व इति वक्तव्यम्।) उपास्किरत्। उपचस्कार॥ **हिंसायां प्रतेश्च ६।१।१४१**॥ उपात्प्रतेश्च किरतेः सुट् स्यात् हिंसायाम्। उपस्किरति। प्रतिस्किरति॥ गॄ निगरणे॥ ४०॥ **अचि विभाषा ८।२।२१**॥ गिरते रेफस्य लो

शीयते। शदो लटि ‘शदेश्शितः’ इति लटस्तप्रत्यये टेरेत्वे शप्रत्यये ‘पाघ्राध्मा’ इति शदः शीयादेशे तत्सिद्धिः।

अशदत्। शदो लुङस्तिप इकारलोपेऽटि ‘पुषादि’ इति च्लेरङि तत्सिद्धिः।

किरति। कॄधातोर्लटस्तिपि शप्रत्यये ‘ॠत इद्धातोः’ इति इत्वे रपरे तत्सिद्धिः।

करीता। कॄधातोर्लुटस्तिपि तासि इटि गुणे रपरे डादेशे टिलोपे ‘वॄतो वा’ इति दीर्घे करीता करिता इति च सिद्धम्।

कीर्यात्। कॄधातोर्लिङस्तिप इकारलोपे यासुटि सलोपे ‘ॠत इद्धातोः’ इतीत्वे रपरे ‘हलि च’ इति दीर्घे तत्सिद्धिः।

उपस्किरति। उपपूर्वात्कॄधातोर्लटस्तिपिशप्रत्यये इत्वे रपरे ‘किरतौ लवने’ इति सुटि तत्सिद्धिः।

उपास्किरत्। उपपूर्वात्कॄधातोर्लङस्तिप इकारलोपे अटि शप्रत्यये ‘ॠत इद्धातोः’ इति इत्वे रपरे ‘सुट्कात्पूर्व इति वक्तव्यम्’ इति बलाद् ‘अडभ्यासव्यावायेऽपि’ इति ककारात्पूर्वं सुटि दीर्घे तत्सिद्धिः।

---

२ शित् प्रत्यय होनेवाला हो जिससे ऐसे शद् धातुसे तङ् और आन प्रत्यय हों।

वाऽजादौ-प्रत्यये । गिरति, गिलति । जगार, जगाल । जगरिथ, जगालिथ । गरीता, गरिता, गलीता, गलिता ॥ प्रच्छ ज्ञीप्सायाम् ॥ ४१ ॥ ग्रहिज्येति सम्प्रसारणम् । पृच्छति । पप्रच्छ । पप्रच्छतुः । पप्रच्छुः । प्रष्टा । प्रक्ष्यति । अप्राक्षीत् ॥ मृङ् प्राणत्यागे ॥ ४२ ॥ **म्रियतेर्लुङ्लिङोश्च** १।३।६१॥ लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्र । रिङ् । इयङ् । म्रियते । ममार । मर्ता । मारिष्यति । मृषीष्ट । अमृन ॥ पृङ्

गिलति । गृधातोर्लटस्तिपि शप्रत्यये 'ऋत इद्धातोः इतीत्वे रपरे 'अचि विभाषा' इति पाक्षिके रेफस्य लत्वे गिलति गिरति इति रूपद्वयं सिद्धम् ।

पृच्छति । प्रच्छधातोर्लटस्तिपि शप्रत्यये 'ग्रहिज्या' इति सम्प्रसारणे पूर्वरूपे तत्सिद्धिः ।

प्रपच्छ । प्रच्छो लिटस्तिपो णलि द्वित्वे 'लिट्यभ्यासस्योभयेषाम्' इत्यभ्याससम्प्रसारणे पूर्वरूपे अत्त्वे रपरे हलादिशेषे तत्सिद्धिः ।

प्रष्टा । प्रच्छो लुटस्तिपि तासि डादेशे टिलोपे 'व्रश्च' इति च्छस्य षत्वे ष्टुत्वे तत्सिद्धिः ।

अप्राक्षीत् । प्रच्छो लुङस्तिप इलोपेऽटि च्लेः सिचि ईटि 'वदव्रज' इति वृद्धौ 'व्रश्च' इति च्छस्य षत्वे षस्य ककारे सस्य षत्वे तत्सिद्धिः ।

म्रियते । मृधातोर्लटि 'म्रियतेर्लुङ्लिङोश्च' इत्यात्मनेपदत्वाल्लटस्तप्रत्यये शप्रत्यये 'रिङ् शयग्लिङ्क्षु' इति ऋकारस्य रिङि इयङि टेरेत्वे तत्सिद्धिः ।

मृषोष्ट । मृधातोराशीर्लिङस्तप्रत्यये सीयुटि यलोपे सुटि 'उश्च' इति कित्त्वाद्गुणाभावे षत्वे ष्टुत्वे तत्सिद्धिः ।

अमृत । मृङो लुङस्तेऽटि च्लेः सिचि 'ह्रस्वादङ्गात्' इति सलोपे तत्सिद्धिः ।

---

१ लुङ् लिङ् और शित् प्रत्यय के प्रकृतिभूत मृङ्धातु से तङ् प्रत्यय हो अन्यत्र न हो अर्थात् लट् लोट् लङ् दोनों लिङ् लुङ् इन्हीं लकारों में मृङ् से आत्मनेपद प्रत्यय होता है दूसरे लकारों में नहीं होता है ।

व्यायामे ॥ ४३ ॥ प्रायेणायं व्याङ्पूर्वः । व्याप्रियते । व्यापप्रे । व्यापप्राते । व्याप्रिष्यते । व्यापृत । व्यापृषाताम् । जुषी प्रीतिसेवनयोः ॥ ४४ ॥ जुषते । जुजुषे[1] ॥ ओविजी भयचलनयोः ॥ ४५ ॥ प्रायेण उत्पूर्वः । उद्विजते[2] ॥ **विज इट्** १।२।२ ॥ विजः पर इडादिप्रत्ययो ङिद्वत् । उद्विजिता ॥

इति तुदादयः ॥ ६ ॥

अथ रुधादयः ।

रुधिर् आवरणे ॥ १ ॥ **रुधादिभ्यः श्नम्** ३ । १ ७८ ॥ शपोऽपवादः ॥ रुणद्धि । श्नसोरल्लोपः । रुन्धः । रुन्धान्ति । रुणत्सि । रुन्धः । रुन्ध । रुणध्मि । रुन्ध्वः । रुन्ध्मः । रुन्धे । रुन्धाते । रुन्धते । रुन्त्से । रुन्धाथे । रुन्ध्वे । रुन्धे । रुन्ध्वहे । रुन्ध्महे । रुरोध[3], रुरुधे । रोद्धामि, रोद्धासे । रोत्स्यति, रोत्स्यते । रुणद्धु, रुन्धात् । रुन्धाम् ।

उद्विजिता । उत्पूर्वाद्विजधातोर्लुटस्तप्रत्यये तासि इटि डादेशे टिलोपे 'विज इट्' इति ङित्त्वाद्गुणाभावे तत्सिद्धिः ।

॥ इति तुदादयः ॥

रुणद्धि । रुधधातोर्लटस्तिपि नित्यत्वाल्लघूपधगुणं बाधित्वा 'रुधादिभ्यः श्नम्' इति श्नम्यनुबन्धलोपे 'झषस्तथोर्धोऽधः' इति तस्य धकारे जश्त्वे णत्वे तत्सिद्धिः ।

रुन्ध । रुधो लटस्तसि श्नमि 'श्नसोरल्लोपः' इत्यल्लोपे णत्वस्यासिद्धत्वादनुस्वारे परसवर्णे तस्यासिद्धत्वाण्णत्वाभावे तस्य धकारे 'झरो झरि सवर्णे' इति धलोपे रुत्वे विसर्गे रुन्धः इति धलोपाभावे जश्त्वे रुन्द्धः इति च सिद्धम् ।

---

[1] जुजुषिषे जोषिता जोषिष्यते जुषताम् अजुषत् जुषेत् जोषिषीष्ट अजोषिष्ट अजोषिषाताम् अजोषिष्यत । [2] उद्विविजे उद्विविजिषे उद्विजिष्यते उद्विजताम् उदविजत उद्विजेत उद्विजिषीष्ट उदविजिष्यत । [3] रुरोधिथ, रुरुधिव ।

रुन्धन्तु । रुन्धि । रुणधानि । रुणधाव । रुणधाम । रुन्धाम् । रुन्धाताम् । रुन्धताम् । रुन्त्स्व । रुणधै । रुणधावहै । रुणधामहै । अरुणन्, अरुणद् । अरुन्धाम् । अरुन्धन् । अरुणः, अरुणन्, अरुणद्[1] । अरुन्ध । अरुन्धाताम् । अरुन्धत । अरुन्धाः । रुन्ध्यात् । रुन्धीत । रुध्यात्, रुत्सीष्ट । अरुधन्, अरौत्सीत्[2] । अरुद्ध । अरुत्साताम् । अरुत्सत[3] । अरोत्स्यत्, अरोत्स्यत ॥ भिदिर्[4]

रुन्धि । रुधो लोटः सिपो हौ श्नमि 'श्नसोरल्लोपः' इत्यल्लोपेऽनुस्वारे परसवर्णे 'हुझल्भ्यो हेर्धिः' इति हेर्धौ 'झरो झरि सवर्णे' इति पाक्षिके धलोपे रुन्धि इति सिद्धम् ।

अरुणन् । रुधो लङस्तिप इकारलोपेऽटि श्नमि णत्वे 'हल्ङ्याब्भ्यः' इति सलोपे धस्य जश्त्वेन दकारे तस्य चर्त्वे तत्सिद्धिः ।

अरुणः । रुधो लङः सिप इलोपेऽटि श्नमि णत्वे 'हल्ङ्याब्भ्यः' इति सलोपे धस्य जश्त्वेन दकारे 'दश्च' इति पाक्षिके दस्य रुत्वे रस्य विसर्गे अरुणः इति पक्षे चर्त्वे अरुणत् इति च साधु ।

अरुधत् । रुधो लुङस्तिप इलोपेऽटि च्लौ 'इरितोवा' इति च्लेरङि अरुधदिति । अङोऽभावपक्षे च्लेः सिचि ईटि 'वदव्रज' इति वृद्धौ धस्य चर्त्वे अरौत्सीदिति च सिद्धम् ।

---

[1] अरुन्धम् अरुन्ध अरुणधम् अरुन्ध्व अरुन्ध्म । [2] अरुद्धाम् अरौत्सुः अरौत्सीः अरौद्धम् अरौद्ध अरौत्सम् अरौत्स्व अरौत्स्म । [3] अरुद्धाः अरुत्साथाम् अरुद्ध्वम् अरुत्सि अरुत्स्वहि अरुत्स्महि । [4] भिनत्ति भिन्तः भिन्दन्ति भिनत्सि भिन्थः भिन्थ भिनद्मि भिन्द्वः भिन्द्मः । भिन्ते भिन्दाते । भिन्त्से । बिभेद बिभेदिथ बिभिदिव । बिभिदे । भेत्ता, भेत्स्यति, भेत्स्यते । भिनत्तु-भिन्तात् भिन्ताम् भिन्दन्तु भिन्धि-भिन्तात् भिन्तम् भिन्त भिनदानि भिनदाव भिनदाम । भिन्ताम् भिन्त्स्व भिनदै । अभिनत् अभिन्ताम् अभिन्दन् अभिनः–अभिनत् अभिन्तम् अभिन्त अभिनदम् अभिन्द्व अभिन्द्म । अभिन्त अभिन्दाताम् अभिन्दत अभिन्थाः अभिन्दाथाम् अभिन्द्ध्वम् अभिन्दि अभिन्द्वहि अभिन्द्महि । भिन्द्यात् भिन्दीत भिद्यात् भित्सीष्ट । अभिदत् अभैत्सीत् अभैत्ताम् अभैत्सुः अभैत्सीः अभैत्तम् अभैत्त अभैत्सम् अभैत्स्व अभैत्स्म । अभित्त अभित्साताम् अभित्सत अभित्थाः अभित्साथाम् अभिद्ध्वम् अभित्सि अभित्स्वहि अभित्स्महि । अभेत्स्यत् अभेत्स्यत् अभेत्स्यत ।

विदारणे ॥ २ ॥ छिदिर् द्वैधीकरणे ॥ ३ ॥ युजिर् योगे ॥ ४ ॥ रिचिर् विरेचने ॥ ५ ॥ रिणक्ति, रिङ्क्ते। रिरेच। रेक्ता। रेक्ष्यति। अरिणक्। अरिचत् अरैक्षीत्, अरिक्त ॥ विचिर् पृथग्भावे ॥ ६ ॥ विनक्ति, विङ्क्ते ॥ क्षुदिर् संपेषणे ॥ ७ ॥ क्षुणत्ति, क्षुन्ते। क्षोत्ता। अक्षुदत्, अक्षौत्सीत्, अक्षुत्त। उच्छृदिर् दीप्तिदेवनयोः ॥ ८ ॥ छृणत्ति, छृन्ते। चच्छर्द। से सिचीति वेट्। चच्छृदिषे, चच्छृत्से। छर्दिता। छर्दिष्यति, छर्त्स्यति। अच्छृदत्, अच्छर्दीत् ॥ उतृदिर् हिंसानादरयोः ॥ ९ ॥ तृणत्ति, तृन्ते ॥ कृती वेष्टने ॥ १० ॥ कृणत्ति ॥ तृह हिसि हिंसायाम् ॥ ११ ॥ १२ ॥ **तृणह इम् ७।३।९२॥** तृहः श्नमि कृते इमागमो हलादौ पिति सार्वधातुके। तृणेढि। तृण्ढः। ततर्ह[५]।

अरुद्ध। रुधो लुङस्तप्रत्ययेऽटि च्लेः सिचि 'झलो झलि' इति सलोपे धत्वे जश्त्वे तात्सिद्धिः।

तृणेढि। तृह्धातोर्लटस्तिपि श्नमि णत्वे 'तृणह इम्' इति इमागमे गुणे हस्य ढत्वे तकारस्य धकारे ष्टुत्वे 'ढो ढे लोपः' इति ढलोपे तत्सिद्धिः।

तृण्ढः। तृहो लटस्तसि श्नम्यल्लोपे हस्य ढत्वे तस्य धत्वे ष्टुत्वे ढलोपे

---

१ छिनत्ति छिन्ते चिच्छेद चिच्छिदे छेत्ता छेत्स्यति छेत्स्यते। छिनत्तु छिन्धि छिनदानि छिन्ताम् छिन्त्स्व छिनदै। अच्छिनत् अच्छिन्त। छिन्द्यात् छिन्दीत्। छिद्यात् छित्सीष्ट। अच्छिदत् अच्छैत्सीत्। अच्छित्त अच्छेत्स्यत् अच्छेत्स्यत।

२ युनक्ति युङ्क्तः युञ्जन्ति युनक्षि युङ्क्थः युङ्क्थ युनज्मि युञ्ज्वः युञ्ज्मः। युङ्क्ते युङ्क्षे। युयोज युयोजिथ युयुजिव युयुजे योक्ता योक्ष्यति योक्ष्यते युनक्तु युङ्ग्धि युनजानि। युङ्क्ताम् युङ्क्ष्व युनजै। अयुनक् अयुङ्क्ताम् अयुञ्जन् अयुनक् अयुङ्क्तम् अयुङ्क्त अयुनजम् अयुञ्ज्व अयुञ्ज्म। अयुङ्क्त अयुञ्जाताम् अयुञ्जत अयुङ्क्थाः अयुञ्जाथाम् अयुङ्ग्ध्वम् अयुञ्जि। युञ्ज्यात युञ्जीत। युज्यात् युक्षीष्ट अयुजन् अयौक्षीत् अयौक्ताम्। अयुक्त अयुक्षाताम् अयुक्थाः अयुग्ध्वम्।

३ ततर्द ततृदे ततृदिषे-ततृत्से। तर्दिता। तर्दिष्यति तर्त्स्यति, तर्दिष्यते-तर्त्स्यते। तृणत्तु तृन्धि तृणदानि तृन्ताम् तृन्त्स्व तृणदै। अतृणत् अतृन्त तृन्द्यात् तृन्दीत् तृद्यात् तर्दिषीष्ट—तृत्सीष्ट अतृदत्-अतर्दीत्। अतर्दिष्ट अतर्दिषाताम्। अतृत्त अतृत्साताम्।

४ तृंहन्ति तृणेक्षि तृण्ढः तृण्ढ तृणेह्मि तृंह्वः तृंह्मः। ५ ततृहतुः ततर्हिथ ततृहिव।

तर्हिता[1] । अतृणेट्[2] ॥ **श्नान्नलोपः ६।४।२३॥** श्नमः परस्य नस्य लोपः स्यात् । हिनस्ति । जिहिंस । हिंसिता । **तिप्यनस्तेः ८।२।७३॥** पदान्तस्य सस्य दः स्यात्तिपि न त्वस्तेः । ससजुषोरुरित्यस्यापवादः । अहिनत्, अहिनद् । अहिंस्ताम् । अहिंसन् ॥ **सिपि धातो रुर्वा ॥ ८।२।७४॥** पदान्तस्य धातोः सस्य रुः, पक्षे दः ॥ अहिनः, अहिनत्, अहिनद् ॥ उन्दी क्लेदने ॥ १३ ॥ उनत्ति । उन्तः । उन्दन्ति । उन्दाञ्चकार । औनत् । औन्ताम् । औन्दन् । औनः, औनत्, औनद् ।

नकारस्यानुस्वारे परसवर्णे रुत्वे विसर्गे तत्सिद्धिः ।

हिनस्ति । हिस्धातोरिदित्त्वाद् 'इदितो नुम् धातोः' इति नुमि लटस्तिपि श्नमि 'श्नान्नलोपः' इति नलोपे तत्सिद्धिः ।

अहिनत् । हिस् धातोरिदित्त्वान्नुमि लङस्तिप इकारलोपेऽटि श्नमि 'श्नान्नलोपः' इति नलोपे 'हल्ङ्याब्भ्यः' इति तलोपे 'ससजुषोरुः' इति रुत्वं बाधित्वा 'तिप्यनस्तेः' इति सकारस्य दकारे चर्त्वे तत्सिद्धिः ।

अहिनः । हिसो नुमि लङः सिप इलोपे अटि श्नमि नलोपे हल्ङ्यादिलोपे 'सिपि धातो रुर्वा' इति पाक्षिके रुत्वे विसर्गे अहिनः इति, अत्र वाशब्दस्य समुच्चयार्थकत्वाद् 'वसुस्रंसु' इति दस्यानुवृत्त्या रुत्वाभावपक्षे सस्य दत्वे चर्त्वे अहिनदिति च सिद्धम ।

उनत्ति । उन्दधातोर्लटस्तिपि श्नमि 'श्नान्नलोपः' इति नलोपे चर्त्वे तत्सिद्धिः ।

औनः । उन्दो लङः सिप इकारलोपे आटि वृद्धौ श्नमि नलोपे हल्ङ्यादिलोपे 'दश्च' इति पाक्षिके रुत्वे विसर्गे औनः इति पक्षे चर्त्वे औनद् इति च सिद्धम् ।

---

[1] तृणेढु–तृण्ढात् तृण्ढाम् तृंहन्तु तृण्ढि-तृण्ढात् तृण्ढम् तृण्ढ तृणहानि तृणहाव तृणहाम । [2] अतृण्ढाम् अतृंहन् अतृणेट् अतृण्ढम् अतृण्ढ अतृणहम् अतृंह्व अतृंह्म । तृंह्यात् तृह्यात् अतर्हीत् अतर्हिष्यत् ।

औनदम् ॥ अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु ॥ १४ ॥ अनक्ति । अङ्क्तः । अञ्जन्ति । आनञ्ज । आनञ्जिथ, आनङ्क्थ । अञ्जिता, अङ्क्ता । अङ्ग्धि । अनजानि । आनक्[1] ॥ **अञ्जेः सिचि ७।२।७१॥** अञ्जेः सिचो नित्यमिट् स्यात् । आञ्जीत् ॥ तञ्चू संकोचने ॥ १५ ॥ तनक्ति[2] । तञ्चिता, तङ्क्ता[3] ॥ ओविजी भयचलनयोः ॥ १६ ॥ विनक्ति । विङ्क्तः । विज इडिति ङित्त्वम् । विविजिथ । विजिता । अविनक् । अविजीत् ॥ शिष्लृ विशेषणे ॥ १७ ॥ शिनष्टि । शिंष्टः । शिंषन्ति । शिनक्षि ।

अङ्क्तः । अञ्जो लटस्तसि श्नमि नलोपेऽल्लोपे जस्य कुत्वेन गकारे तस्य चर्त्वेन ककारेऽनुस्वारे परसवर्णे तत्सिद्धिः ।

आनञ्जिथ । अञ्जो लिटः सिपस्थलि द्वित्वे हलादिशेषे 'अत आदेः' इति दीर्घे 'तस्मान्नुड् द्विहलः' इति नुटि 'स्वरति' इति वेटि आनञ्जिथेति इडभावे जस्य कुत्वेन गकारे तस्य चर्त्वेन ककारे निमित्तापायात् ञकारनिवृत्तावनुस्वारे परसवर्णे आनङ्क्थ इति च सिद्धम् ।

अङ्ग्धि । अञ्जो लोटः सिपो हौ श्नमि हेर्धौ 'श्नान्नलोपः' इति नलोपे 'श्नसोरल्लोपः' इत्यल्लोपे जस्य कुत्वेन गकारे नस्यानुस्वारे परसवर्णे तत्सिद्धिः ।

आनक् । अञ्जो लङस्तिप इकारलोपे श्नमि आटि वृद्धौ 'श्नान्नलोपः' इति नलोपे हल्ङ्यादिलोपे कुत्वे चर्त्वे तत्सिद्धिः ।

आञ्जीत् । अञ्जो लुङस्तिप इलोपे आटिवृद्धौ च्लेः सिचि 'स्वरति' इति विकल्पं बाधित्वा 'अञ्जेः सिचि' इति नित्यमिटि ईटि सलोपे दीर्घे तत्सिद्धिः ।

शिंष्टः । शिषो लटस्तसि श्नम्यल्लोपेऽनुस्वारे ष्टुत्वे रुत्वे विसर्गे तत्सिद्धिः ।

---

[1] आङ्क्ताम् आञ्जन् आनक् आङ्क्तम् आङ्क्त आनजम् आञ्ज्व आञ्ज्म ।

[2] तङ्क्तः तञ्चन्ति तनक्षि तङ्क्थः तङ्क्थ तनच्मि तञ्च्वः तञ्च्मः । ततञ्च ततञ्चिथ ततङ्क्थ ततञ्चिव ।

[3] तञ्चिष्यति-तङ्क्ष्यति । तनक्तु तङ्ग्धि तनचानि । अतनक् अतङ्क्ताम् अतञ्चन् अतनक् अतनचम् अतञ्च्व । तञ्च्यात् तच्यात् । अतञ्चीत्-अताङ्क्षीत् अतङ्क्ष्यत् ।

शिशेष । शिशेषिथ । शेष्टा । शेक्ष्यति । हेर्धिः । शिण्ड्ढि । शिनषाणि । अशिनट्[1] । शिंष्यात् । शिष्यात् । अशिषत् ॥ एवम्—पिष्लृ संचूर्णने ॥ ॥ १८ ॥ भञ्जो आमर्दने ॥ १९ ॥ श्नान्नलोपः । भनक्ति । बभञ्जिथ, बभङ्क्थ । भङ्क्ता । भङ्ग्धि । अभाङ्क्षीत् ॥ भुज पालनाभ्यवहारयोः ॥ २० ॥ भुनक्ति । भोक्ता । भोक्ष्यति । अभुनक् ॥ **भुजोऽनवने** १।३।६६॥ तङानौ स्तः । ओदनं भुङ्क्ते । अनवने किम् । महीं भुनक्ति ॥ ञिइन्धी दीप्तौ ॥ २१ ॥ इन्द्धे । इन्धाते । इन्धते । इन्त्से । इन्ध्वे । इन्धाञ्चक्रे । इन्धिता । इन्धाम् । इन्धाताम् । इनधै । ऐन्ध । ऐन्धाताम् । ऐन्धाः ॥ विद विचारणे ॥ २२ ॥ विन्ते । वेत्ता ॥

॥ इति रुधादयः ॥ ७ ॥

शिण्ड्ढ । शिषो लोटः सिपो हौ श्नम्यल्लोपे 'हुझल्भ्यो हेर्धिः' इति हेर्धौ षस्य 'झलां जश् झशि' इति जश्त्वेन डकारे ष्टुत्वेन धकारस्य ढकारे 'झरो झरि सवर्णे' इति पाक्षिके डलोपेऽनुस्वारे परसवर्णे शिण्ढीति पक्षे शिण्ड्ढीति च सिद्धम् ।

अशिनट् । शिषो लङस्तिप इलोपेऽटि श्नमि हल्ङ्यादिलोपे ढस्य जश्त्वेन डकारे तस्य चर्त्वे तत्सिद्धिः ।

अशिषत् । शिषो लुङस्तिप इकारलोपेऽटि 'पुषादि' इति च्लेरङि तत्सिद्धिः ।

भुङ्क्ते । भुजो लटः 'भुजोऽनवने' इति तप्रत्यये श्नमि टेरेत्वे 'श्नसोरल्लोपः' इत्यल्लोपे कुत्वे चर्त्वेऽनुस्वारे परसवर्णे तत्सिद्धिः ।

इन्धे । इन्धधातोर्लटस्तप्रत्यये टेरेत्वे श्नमि 'श्नान्नलोपः' इति नलोपे 'श्नसोरल्लोपः' इत्यल्लोपे 'झषस्तथोः' इति तस्य धत्वे 'झरो झरि इति पाक्षिके धलोपे इन्धे इन्द्धे इति रूपद्वय साधु ।

इनधै । इन्धो लोट इट एत्वे श्नमि नलोपे 'एत ऐ' इति ऐत्वे आटिवृद्धौ तत्सिद्धिः ।

इति रुधादयः ।

---

[1] अशिंष्टाम् अशिंषन् अशिनट् अशिंष्टम् अशिंष्ट अशिनषम् अशिंष्व अशिंष्म ।

अथ तनादयः।

३

तनु विस्तारे ॥ १ ॥ **तनादिकृञ्भ्य उः** ६।१।७९॥ शपोऽपवादः। तनोति[१], तनुते[२]। ततान[३], तेने। तनितासि, तनितासे। तनिष्यति, तनिष्यते। तनोतु[४]। तनुताम्[५]। अतनोत्[६], अतनुत[७]। तनुयात्, तन्वीत। तन्यात्, तनिषीष्ट। अतानीत्, अतनीत् ॥ **तनादिभ्यस्तथासोः** २।४।७९॥ तनादेः सिचो वा लुक् स्यात्तथासोः ॥ अतत, अतनिष्ट[८]। अतथाः, अतनिष्ठाः। अतनिष्यत्, अतनिष्यत ॥ षणु दाने ॥ २ ॥ सनोति, सनुते ॥ **ये विभाषा** ६।४।४३॥ जनसनखनामात्वं वा यादौ क्ङिति। सायात्, सन्यात् ॥ **जनसनखनां सञ्झलोः**

तनोति। तन्धातोर्लटस्तिपि शपं बाधित्वा 'तनादिकृञ्भ्य उः' इति उप्रत्यये तस्य गुणे तत्सिद्धिः।

अतानीत्। तनो लुङस्तिप्रत्ययेऽटि इकारलोपे च्लेः सिचि इटि ईटि 'अतो हलादेर्लघोः' इति वृद्धौ सलोपे सवर्णदीर्घे अतानीदिति वृद्ध्यभावपक्षे अतनीदिति च सिद्धम्।

अतत। तनो लुङस्तप्रत्ययेऽटि च्लेः सिचि 'तनादिभ्यस्तथासोः' इति सिचः पाक्षिके लुकि 'अनुदात्तोपदेश' इति नलोपे अतत इति लुगभावे इटि षत्वे ष्टुत्वे अतनिष्टेति च सिद्धम्।

सायात्। षणः पस्य सत्वे निमित्तापायात् नैमित्तिकस्य णत्वस्यापि निवृत्तौ आशीर्लिङस्तिप इकारलोपे यासुटि 'स्कोः' इति सलोपे 'ये विभाषा' इति पाक्षिक आत्वे सवर्णदीर्घे सायात् इति सन्यादिति च सिद्धम्।

---

[१] तन्वन्ति तन्वः-तनुवः तन्मः-तनुमः।
[२] तन्वाते तन्वते तन्वे तन्वहे-तनुवहे।
[३] तेनिथ तेनिव।
[४] तनु तनवानि।
[५] तन्वाताम् तन्वताम् तनुष्व तनवै।
[६] अतनुताम् अतन्वन् अतनोः अतनुतम् अतनुत अतनवम् अतन्व-अतनुव अतन्म अतनुम।
[७] अतन्वाताम् अतन्वत अतन्वि अतन्वहि-अतनुवहि।
[८] अतनिषाताम् अतनिषत अतनिध्वम्।

६।४।४२॥ एषामाकारोऽन्तादेशः स्यात् सनि झलादौ क्ङिति । असात, असनिष्ट । असाथाः, असानिष्ठाः ॥ क्षणु हिंसायाम् ॥ ३ ॥ क्षणोति, क्षणुते ॥ ह्म्यन्तेति न वृद्धिः ॥ अक्षणीत्, अक्षत, अक्षणिष्ट । अक्षथाः, अक्षणिष्ठाः ॥ क्षिणु च ॥ ४ ॥ उप्रत्यये लघूपधस्य गुणो वा । क्षेणोति, क्षिणोति । क्षेणिता । अक्षेणीत्, आक्षित, अक्षेणिष्ट ॥ तृणु अदने ॥ ५ ॥ तृणोति, तर्णोति; तृणुते, तर्णुते[1] ॥ डुकृञ् करणे ॥ ६ ॥ करोति ॥ अत उत्सार्वधातुके ॥ कुरुतः ॥ **न भकुर्छुराम् ८।२।७९॥** भस्य कुर्छुरोरुपधाया न दीर्घः । कुर्वन्ति ॥ **नित्यं करोतेः ॥ ६।४।१०८ ॥** करोतेः प्रत्ययोकारस्य नित्यं लोपो म्वोः परयोः । कुर्वः । कुर्मः । कुरुते । चकार, चक्रे । कर्तासि, कर्तासे । करिष्यति, करिष्यते । करोतु । कुरुताम् । अकरोत् । अकुरुत ॥ **ये च ६।४।१०९ ॥** कृञ

असात । सनो लुङस्तप्रत्ययेऽटि च्लेः सिचि 'तनादिभ्यस्तथासोः' इति पाक्षिके सिचो लुकि 'जनसनखनां सञ्झलोः' इत्यात्वे दीर्घे असात इति लुगभावे इटि षत्वे ष्टुत्वे असनिष्टेति च सिद्धम् ।

कुरुतः । कृधातोर्लटस्तसि 'तनादिकृञ्भ्य उः' इत्युप्रत्यये गुणे रपरे 'अत उत्सार्वधातुके' इत्युत्वे रुत्वे विसर्गे तत्सिद्धिः ।

कुर्वन्ति । कृञो लटो झौ उप्रत्यये गुणे रपरे 'अत उत्सार्वधातुके' इत्युत्वे झस्यान्तादेशे यणि 'हलि च' इति दीर्घे प्राप्ते 'न भकुर्छुराम्' इति तन्निषेधे तत्सिद्धिः ।

कुर्वः । कृञो लटो वसि उंप्रत्यये गुणे रपरे उत्वे 'लोपश्चास्यान्यतरस्यांम्वोः' इति विकल्पं बाधित्वा 'नित्यं करोतेः' इतिनित्ये प्रत्ययोकारस्य लोपे रुत्वे विसर्गे तत्सिद्धिः ।

---

[1] ततर्ण ततृणे तर्णिता तर्णिष्यति तर्णिष्यते । तर्णोतु-तृणोतु तर्णुहि-तृणु । गुणपक्षे संयोगपूर्वत्वादुकारस्य 'उतश्च प्रत्ययात्' इति हेर्लुग्न भवति । तर्णुताम्-तृणुताम् । अतर्णोत्-अतृणोत् अतर्णुत-अतृणुत । तृणुयात्-तर्णुयात् तर्ण्वीत-तृण्वीत तृण्यात् तर्णिषीष्ट । अतृत-अतर्णिष्ट । अतर्णीत् ।

उलोपो यादौ प्रत्यये परे । कुर्यात्, कुर्वीत । क्रियात्, कृषीष्ट । अकार्षीत्, अकृत । अकारिष्यत्, अकारिष्यत ॥ **सम्परिभ्यां करोतौ भूषणे** ६।१।१३७ ॥ **समवाये च** ६।१।१३८ ॥ सम्पारिपूर्वस्य करोतेः सुट् स्याद्भूषणे सङ्घाते चार्थे । संस्करोति । अलङ्करोतीत्यर्थः । संस्कुर्वन्ति । सङ्घीभवन्तीत्यर्थः । सम्पूर्वस्य क्वचिदभूषणेऽपि सुट् । संस्कृतं भक्षा इति ज्ञापकात् ॥ **उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च** ६।१।१३९ ॥ उपात्कृञः सुट् स्यादेष्वर्थेषु चात्प्रागुक्तयोरर्थयोः । प्रतियत्नो गुणाधानम् । विकृतमेव वैकृतं विकारः । वाक्याध्याहार आकाङ्क्षितैकदेशपूरणम् । उपस्कृता कन्या उपस्कृता ब्राह्मणाः । एधोदकस्योपस्कुरुते । उपस्कृतं भुङ्क्ते । उपस्कृतं ब्रूते ॥ वनु याचने ॥७॥ वनुते । ववने[1] ॥ मनु अवबोधने ॥ ८ ॥ मनुते । मेने । मनिता । मनिष्यते । मनुताम् । अमनुत । मन्वीत । मनिषीष्ट । अमत, अमनिष्ट । अमनिष्यत ॥

॥ इति तनादयः ॥ ८ ॥

कुर्यात् । कृञो लिङस्तिप इकारलोपे उप्रत्यये गुणे रपरे यासुटि सलोपे उत्वे 'ये च' इति उप्रत्ययस्य लोपे 'न भकुर्छुराम्' इति निषेधाद्दीर्घाभावे तत्सिद्धिः ।

संस्करोति । सम्पूर्वात्कृञो लटस्तिपि उप्रत्यये गुणे रपरे गुणे 'सम्परिभ्यां करोतौ भूषणे' इति 'समवाये च' इति वा सुटि सस्य रुत्वेऽनुनासिके विसर्गे सत्वे तत्सिद्धिः ।

उपस्कृता कन्या । उपपूर्वात्कृञः क्तप्रत्यये टापि 'उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च' इति सुटि तत्सिद्धिः ।

अमत । मनो लुङस्तप्रत्ययेऽटि च्लेः सिचि 'तनादिभ्यस्तथासोः' इति पाक्षिके सिचो लुकि 'अनुदात्तोपदेश' इति नलोपे अमत इति लुगभावे इटि षत्वे ष्टुत्वे अमनिष्टेति च सिद्धम ।

इति तनादयः ।

---

[1] वनिता वनिष्यते वनुताम् अवनुत वन्वीत वनिषीष्ट अवत-अवनिष्ट । अवनिष्यत ।

अथ क्र्यादयः ।

डुक्रीञ् द्रव्यविनिमये ॥ १ ॥ **क्र्यादिभ्यः श्ना ३।१।८१॥** शपोऽपवादः । क्रीणाति । ई हल्यघोः । क्रीणीतः । श्नाभ्यस्तयोरातः । क्रीणन्ति । क्रीणासि । क्रीणिथः । क्रीणीथ । क्रीणामि । क्रीणीवः । क्रीणीमः । क्रीणीते । क्रीणाते । क्रीणते । क्रीणीषे । क्रीणाथे । क्रीणीध्वे । क्रीणे । क्रीणीवहे । क्रीणीमहे । चिक्राय । चिक्रियतुः । चिक्रियुः । चिक्रयिथ, चिक्रेथ । चिक्रिये । क्रेता । क्रेष्यति, क्रेष्यते । क्रीणातु, क्रीणीतात्[1] । क्रीणीताम्[2] । अक्रीणात्[3], अक्रीणीत[4] । क्रीणीयात्, क्रीणीत । क्रीयात्, क्रेषीष्ट । अक्रैषीत्, अक्रेष्ट । अक्रेष्यत, अक्रेष्यत ॥ प्रीञ् तर्पणे कान्तौ च ॥ २ ॥ प्रीणाति, प्रीणीते ॥ श्रीञ् पाके ॥ ३ ॥ श्रीणाति, श्रीणीते ॥ मीञ् हिंसायाम् ॥ ४ ॥ **हिनुमीना ८।४।१५ ॥** उपसर्गस्थान्निमित्तात्परस्यैतयोर्नस्य णः स्यात् । प्रमीणाति, प्रमीणीते । मीना-

---

क्रीणाति । क्रीधातोर्लटस्तिपि शपं बाधित्वा 'क्र्यादिभ्यः श्ना' इति श्नाप्रत्यये णत्वे तत्सिद्धिः ।

क्रीणीतः । क्रीधातोर्लटस्तसि श्नाप्रत्यये 'ई हल्यघोः' इति ईत्वे णत्वे रुत्वे विसर्गे तत्सिद्धिः ।

क्रीणन्ति । क्रीधातोर्लटो झौ झस्यान्तादेशे श्नाप्रत्यये णत्वे 'श्नाभ्यस्तयोरातः' इत्यालोपे तत्सिद्धिः ।

चिक्रयिथ । क्रीञो लिटस्तिपस्थलि द्वित्वे ह्रस्वे चुत्वे भारद्वाजनियमाद्वेटि गुणेऽयादेशे चिक्रयिथेति इडभावपक्षे चिक्रेथेति च सिद्धम् ।

प्रमीणीते । प्रपूर्वात् मीधातोर्लटस्तप्रत्यये टेरेत्वे श्नाप्रत्यये 'ई हल्यघोः' इति ईत्वे 'हिनुमीना' इति णत्वे तत्सिद्धिः ।

---

[1] क्रीणीहि क्रीणानि । [2] क्रीणाताम् क्रीणीष्व क्रीणै क्रीणावहै । [3] अक्रीणीताम् अक्रीणन् अक्रीणाः अक्रीणीतम् अक्रीणीत अक्रीणाम् अक्रीणीव अक्रीणीम । [4] अक्रीणाताम् अक्रीणत अक्रीणीथाः अक्रीणाथाम् अक्रीणीध्वम् अक्रीणि अक्रीणीवहि अक्रीणीमहि ।

तीत्यात्त्वम् । ममौ । मिम्यतुः । ममिथ, ममाथ । मिम्ये । माता । मास्यति । मीयात्, मासीष्ट । अमासीत् । अमासिष्टाम् । अमास्त ॥ षिञ् बन्धने ॥ ५ ॥ सिनाति, सिनीते । सिषाय, सिष्ये । सेता ॥ स्कुञ्[1] आप्लवने ॥ ६ ॥ **[2]स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च ३।१।८२॥** चात् श्ना । स्कुनोति, स्कुनाति । स्कुनुते, स्कुनीते । चुस्काव, चुस्कुवे । स्कोता । अस्कौषीत्, अस्कोष्ट ॥ स्तन्भ्वादयश्चत्वारः सौत्राः । सर्वे रोधनार्थाः परस्मैपदिनः ॥ **हलः श्नः शानज्झौ ३।१।८३ ॥** हलः परस्य श्नः शानजादेशः स्याद्धौ परे । स्तभान ॥ **जॄ[3]स्तन्भुम्रुचुम्लुचु-**

ममौ । मीञो लिटस्तिपो णलि 'मीनातिमिनोतिदीङां ल्यपि च' इति आत्वे द्वित्वेऽभ्यासह्रस्वे 'आत औ णलः' इति णल औकारे वृद्धौ तत्सिद्धिः ।

स्कुनोति । स्कुधातोर्लटस्तिपि शपं बाधित्वा 'स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च' इति श्नुप्रत्यये तस्य ङित्त्वाद्धातोर्गुणाभावे प्रत्ययोकारस्य गुणे स्कुनोति इति चकारात् श्नाप्रत्यये स्कुनातीति च सिद्धम् ।

चुस्काव । स्कुधातोर्लिटस्तिपो णलि द्वित्वेऽभ्यासत्वे 'शर्पूर्वाः खयः' इति 'अभ्यासककारस्य शेषे चुत्वे वृद्धौ आवादेशे तत्सिद्धिः ।

स्तभान । स्तम्भ्धातोर्लोटः सिपो हौ श्नाप्रत्यये तस्य ङित्त्वाद्

---

[1] स्कुनातु स्कुनीहि स्कुनानि । स्कुनीताम् स्कुनीष्व स्कुनै । स्कुनोतु स्कुनु स्कुनवानि स्कुनुताम् स्कुनुष्व स्कुनवै। अस्कुनात् अस्कुनीताम् अस्कुनन् । अस्कुनीत अस्कुनाताम् । अस्कुनोत् अस्कुनुताम् अस्कुन्वन् । अस्कुनुत अस्कुन्वाताम् । स्कुनीयात् स्कुनीत । स्कुनुयात् स्कुन्वीत । स्कूयात् स्कोषीष्ट । [2] स्तम्भ स्तुम्भ स्कम्भ स्कुम्भ स्कुञ् इन धातुओं से श्ना और श्नु प्रत्यय हो । स्तभ्नाति स्तभ्नोति स्तभ्नुवन्ति तस्तम्भ तस्तभे । स्तम्भिता । स्तम्भिष्यति स्तम्भिष्यते । स्तभ्नातु स्तभ्नानि । स्तभ्नोतु स्तभ्नुहि स्तभ्नवानि । स्तभ्नीताम् स्तभ्नीष्व स्तभ्नै । स्तभ्नुताम् स्तभ्नुष्व स्तभ्नवै । अस्तभ्नोत् अस्तभ्नुत । अस्तभ्नात् अस्तभ्नीत । स्तभ्नीयात् स्तभ्नीत । स्तभ्नुयात् स्तभ्न्वीत । स्तभ्यात् स्तम्भिषीष्ट । [3] जॄष् वयोहानौ, स्तम्भ, म्रुचु म्लुचु गतौ, ग्रुचु ग्लुचु स्तेयकरणे, ग्लुञ्चु गतौ, टुओश्वि गतिवृद्ध्योः, इन से पर च्लि को अङ् हो विकल्प से ।

ग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च ३।१।५८ ॥ च्लेरङ् वा स्यात् ॥ **स्तन्भेः ८।३।६७** ॥ स्तन्भेः सौत्रस्य सस्य षः स्यात् । व्यष्टभत् । अस्तम्भीत् ॥ युञ् बन्धने ॥ ७ ॥ युनाति, युनीते । योता ॥ क्नूञ् शब्दे ॥ ८ क्नूनाति क्नूनीते[1] । क्नविता[2] ॥ दॄञ् हिंसायाम् ॥ १० ॥ दृणाति, दृणीते ॥ द्रॄञ् हींसायाम् ॥ १० ॥ द्रूणाति । द्रूणीते ॥ पूञ् पवने ॥ ११ ॥ **प्वादीनां ह्रस्वः ७।३।८०** ॥ पूञ् लूञ् स्तॄञ् कॄञ् वॄञ्[3] धूञ् शॄ पॄ वॄ भॄ मॄ दॄ जॄ झॄ धॄ नॄ कॄ ॠ गॄ ज्या री ली व्ली प्लीनां चतुर्विंशतेः शिति ह्रस्वः । पुनाति, । पुनीते । पविता ॥ लूञ् छेदने ॥ १२ ॥ लुनाति, लुनीते ॥ स्तॄञ् आच्छादने ॥ १३ ॥ स्तृणाति । शर्पूर्वाः खयः । तस्तार । तस्तरतुः । तस्तरे । स्तरीता, स्तरिता । स्तृणीयात्, स्तृणीत ।

'अनिदिताम्' इति नलोपे 'हलः श्नः शानज्झौ' इति श्नः शानजादेशेऽनुबन्धलोपे हेर्लुकि तत्सिद्धिः ।

व्यष्टभत् । विपूर्वात्स्तम्भधातोर्लुङस्तिप इकारलोपेऽटि च्लौ 'जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च' इति च्लेरङि 'अनिदिताम् इति नलोपे यणि 'स्तन्भेः' इति सस्य षत्वे ष्टुत्वे व्यष्टभीदिति अङोऽभावपक्षे च्लेः सिचि इटि ईटि सलोपे सवर्णदीर्घे अस्तम्भदिति च सिद्धम् ।

पुनाति । पूञोलटस्तिपि श्नाप्रत्यये 'प्वादीनां ह्रस्वः' इति ह्रस्वे तत्सिद्धिः ।

तस्तरतुः । स्तॄधातोर्लिटस्तस अतुसि 'उरत्' इत्यत्वे रपरे 'शर्पूर्वाः खयः' इत्यभ्यासतकारस्य शेषे 'ऋच्छत्यॄताम्' इति गुणे रपरे रुत्वे विसर्गे तत्सिद्धिः ।

---

[1] चुक्नाव चुक्नुवे । [2] क्नविष्यति क्नविष्यते । क्नूनातु क्नूनीताम् । अक्नूनात् अक्नूनीत । क्नूनीयात् क्नूनीत । क्नूयात् क्नविषीष्ट । अक्नावीत अक्नविष्ट ।

[3] पूञ् पवने, लूञ् छेदने, स्तॄञ् आच्छादने, कॄञ् हिंसायाम् वॄञ् वरणे, धूञ् कम्पने, शॄ हिंसायाम्, पॄ पालनपूरणयोः, वॄ वरणे, भॄ भर्त्सने, मॄ हिंसायाम्, दॄ विदारणे, जॄ झॄ धॄ वयोहानौ, नॄ नये, कॄ हिंसायाम्, ॠ गतौ, गॄ शब्दे, ज्या वयोहानौ, री गतिरेषणयोः, ली श्लेषणे, व्ली वरणे, प्ली गतौ ।

स्तीर्यात् ॥ **लिङ्सिचोरात्मनेपदेषु ७।२।४२॥** वृङ्वृञ्भ्यामॄदन्ताच्च परयोर्लिङ्सिचोरिड्वा स्यात्तङि ॥ **न लिङि ७।२।३९॥** वॄत इटो लिङि न दीर्घः । स्तरिषीष्ट । उश्चेत्यनेन कित्त्वम् । स्तीर्षीष्ट । सिचि च परस्मैपदेषु । अस्तारीत् । अस्तारिष्टाम् । अस्तारिषुः । अस्तरीष्ट, अस्तरिष्ट, अस्तीर्ष्ट ॥ कॄञ् हिंसायाम् ॥ १४ ॥ कृणाति, कृणीते । चकार, चकरे ॥ वॄञ् वरणे ॥ १९ ॥ वृणाति, वृणीते । ववार, ववरे । वरिता, वरीता । उदोष्ठ्येत्युत्त्वम् । वूर्यात् । वरिषीष्ट, वूर्षीष्ट । अवारीत् । अवारिष्टाम् ।

स्तीर्यात् । स्तॄञो लिङस्तिप इलोपे यासुटि सलोपे 'ॠत इद्धातोः' इति इत्वे रपरे 'हलि च' इति दीर्घे तत्सिद्धिः ।

स्तरिषीष्ट । स्तॄधातोर्लिङस्तप्रत्यये सीयुटि यलोपे सुटि 'लिङ्सिचोरात्मनेपदेषु' इति वेटि गुणे रपरे 'वॄतो वा' इति दीर्घे प्राप्ते 'न लिङि' इति तन्निषेधे षत्वे ष्टुत्वे स्तरिषीष्ट इति इडभावपक्षे 'उश्च' इति कित्त्वाद्गुणाभावे इत्वे रपरे 'हलि च' इति दीर्घे स्तीर्षीष्टेति च सिद्धम् ।

अस्तारिष्टाम् । स्तॄधातोर्लुङस्तसस्तामि अटि च्लेः सिचि इटि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ रपरे षत्वे ष्टुत्वे 'वॄतो वा' इति प्राप्तदीर्घस्य 'सिचि च परस्मैपदेषु' इति निषेधे तत्सिद्धिः ।

अस्तरीष्ट । स्तॄधातोर्लुङस्तप्रत्ययेऽटि च्लेः सिचि 'लिङ्सिचोरात्मनेपदेषु' इति वेटि गुणे रपरे षत्वे ष्टुत्वे 'वॄतो वा' इति दीर्घे अस्तरीष्टेति दीर्घाभावे अस्तरिष्टेति इडभावे 'उश्च' इति कित्त्वाद्गुणाभावे 'ॠत इद्धातोः' इति इत्वे रपरे 'हलि च' इति दीर्घे षत्वे ष्टुत्वे अस्तीर्ष्टेति च सिद्धम् ।

वरिषीष्ट । वॄञो लिङस्ते सीयुटि सलोपे सुटि 'लिङ्सिचोरात्मनेपदेषु' इति वेटि गुणे रपरे षत्वे ष्टुत्वे 'न लिङि' इति दीर्घनिषेधे वरिषीष्टेति इडभावपक्षे 'उदोष्ठ्यपूर्वस्य' इति उत्वे रपरे दीर्घे षत्वे ष्टुत्वे वूर्षीष्टेति च सिद्धम् ।

अवारिष्ट, अवरीष्ट, अवूर्ष्ट ।। धूञ् कम्पने ।। १६ ।। धुनाति, धुनीते । धविता, धोता । अधावीत् । अधाविष्ट, अधोष्ट ।। ग्रह उपादाने ।। १७ ।। गृह्णाति, गृह्णीते । जग्राह, जगृहे ।। **ग्रहोऽलिटि दीर्घः ७।२।३७।।** एकाचो ग्रहेर्विहितस्येटो दीर्घो न तु लिटि । ग्रहीता । गृह्णातु ।। हलः श्नः शानज्झौ ।। गृहाण । गृह्यात्, ग्रहीषीष्ट ।। ह्म्यन्तेति न वृद्धिः । अग्रहीत् । अग्रहीष्टाम् । अग्रहीष्ट । अग्रहीषाताम् ।। कुष निष्कर्षे ।।१८।। कुष्णाति । कोषिता ।। अश भोजने ।।१९।। अश्नाति । आश । अशिता । आशिष्यति । अश्नातु । अशान ।। मुष स्तेये ।।२०।। मोषिता । मुषाण ।। ज्ञा अवबो-

---

गृह्णाति । ग्रहो लिटस्तिपि श्नाप्रत्यये 'ग्रहिज्या' इति सम्प्रसारणे णत्वे तत्सिद्धिः ।

जग्राह । ग्रहो लिटस्तिपो णलि द्वित्वे 'लिट्यभ्यासस्योभयेषाम्' इत्यभ्याससम्प्रसारणे पूर्वरूपे 'उरत्' इत्यत्वे रपरे हलादिशेषे चुत्वे उपधावृद्धौ तत्सिद्धिः ।

जगृहे । ग्रहो लिटस्तस्य एशि 'ग्रहिज्या' इति सम्प्रसारणे पूर्वरूपेऽत्वे रपरे हलादिशेषे चुत्वे तत्सिद्धिः ।

ग्रहीता । ग्रहो लुटस्तिपि तासि इटि तिपो डादेशे टिलोपे 'ग्रहोऽलिटि दीर्घः' इति दीर्घे तत्सिद्धिः ।

गृहाण । ग्रहो लोटः सिपो हौ श्नाप्रत्यये 'ग्रहिज्या' इति सम्प्रसारणे पूर्वरूपे 'हलः श्नः शानज्झौ' इति श्नः शानजादेशेऽनुबन्धलोपे हेर्लुकि तत्सिद्धिः ।

अग्रहीत् । ग्रहो लुङस्तिप इलोपेऽटि च्लेः सिचि इटि ईटि 'वदव्रज' इति वृद्धेः 'नेटि' इति निषेधे 'अतो हलादेर्लघोः' इति प्राप्तवृद्धेः 'ह्म्यन्तक्षण' इति निषेधे 'ग्रहोऽलिटि दीर्घः' इति इटो दीर्घे स्थानिवद्भा-

धेने ॥२१॥ जज्ञौ । वृङ् संभक्तौ ॥२२॥ वृणीते । वव्रृषे । वव्रृढ्वे । वरिता, वरीता । अवरीष्ट, अवरिष्ट, अवृत ॥

॥ इति क्र्यादयः ॥ ९ ॥

अथ चुरादयः ।

चुर स्तेये ॥ १ ॥ **सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ३।१।२५॥** एभ्यो णिच् स्यात् । चूर्णान्तेभ्यः 'प्रातिपदिकाद्धात्वर्थे' इत्येव सिद्धे तेषामिह ग्रहणं प्रपञ्चार्थम् । चुरादिभ्यस्तु स्वार्थे । पुगन्तेति गुणः । सनाद्यन्ता इति धातुत्वम् । तिप्शबादि । गुणायादेशौ । चोरयति ॥ **णिचश्च १।३।७४॥** णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले । चोरयते । चोरयामास । चोरयिता । चोर्यात्, चोरयिषीष्ट । णिश्रीति चङ् । णौ चङीति ह्रस्वः । चङीति द्वित्वम् ।

वादित्वमाश्रित्य 'इट ईटि' इति सलोपे सवर्णदीर्घे तत्सिद्धिः ।

॥ इति क्र्यादयः ॥

* * *

चोरयति । चुर् इत्यस्मात् 'सत्यापपाश' इति णिच्यनुबन्धलोपे लघूपधगुणे 'सनाद्यन्ता धातवः' इति धातुत्वाल्लटस्तिपि शपि गुणायादेशयोः चोरयति इति 'णिचश्च' इत्यात्मनेपदपक्षे तप्रत्यये टेरेत्वे शपि गुणायादेशयोश्चोरयते इति ।

चोर्यात् । चुर् इत्यस्मात् 'सत्यापपाश' इति णिचि लघूपधगुणे

---

१ जानाति । २ जज्ञिथ-जज्ञाथ जज्ञिव ज्ञाता ज्ञास्यति, जानातु-जानीतात् जानीहि जानानि, अजानात् अजानीताम् अजानाम्, ज्ञायात्-ज्ञेयात् अज्ञासीत् अज्ञास्यत् ।

३ सत्याप पाश रूप वीणा तूल श्लोक सेना लोम त्वच वर्म वर्ण चूर्ण इन से और चुरादिगण में पठित धातु से णिच् प्रत्यय हो स्वार्थ में ।

हलादिः शेषः। दीर्घो लघोरित्यभ्यासस्य दीर्घः। अचूचुरत्, अचूचुरत॥ कथ वाक्यप्रबन्धे ॥२॥ अल्लोपः॥ अचः परस्मिन्पूर्वविधौ॥ इति स्थानिवत्त्वान्नोपधावृद्धिः। कथयति। अग्लोपित्वाद्दीर्घसन्वद्भावौ न। अचकथत्॥ गण संख्याने ॥ ३ ॥ गणयति ॥ **ई च गणः ७।४।९७॥** गणयतेरभ्यासस्य ई स्याच्चङ्परे णौ चादत्। अजीगणत्, अजगणत्॥

॥ इति चुरादयः ॥ १० ॥

* * *

'सनाद्यन्ता' इति धातुत्वाल्लिङस्तिप इकारलोपे यासुटि सलोपे आर्धधातुकत्वात् 'णेरनिटि' इति णेर्लोपे चोर्यादिति।

अचूचुरत्। चुर् इत्यस्मात् 'सत्यापपाश' इति णिचि गुणे 'सनाद्यन्ता' इति धातुत्वाल्लुङस्तिप इकारलोपेऽटि च्लौ 'णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्' इति च्लेश्चङि 'णेरनिटि' इति णेर्लोपे 'णौ चङ्युपधाया ह्रस्वः' इत्युपधाह्रस्वे 'चङि' इति द्वित्वे हलादिशेषे 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सन्वद्भावे 'दीर्घो लघोः' इत्यभ्यासदीर्घे तत्सिद्धिः।

कथयति। कथ इत्यस्माण्णिचि तस्यार्धधातुकत्वात् 'अतो लोपः' इत्यल्लोपे उपधावृद्धौ प्राप्तायाम् 'अचः परस्मिन्पूर्वविधौ' इत्यल्लोपस्य स्थानिवद्भावात्तदभावे धातुत्वाल्लटस्तिपि शपि गुणायादेशयोस्तत्सिद्धिः।

अचकथत्। कथ इत्यस्माण्णिचि अल्लोपे तस्य स्थानिवद्भावाद्वृद्ध्यभावे धातुत्वाल्लुङस्तिप इलोपेऽटि च्लेश्चङि द्वित्वे हलादिशेषे चुत्वेऽग्लोपित्वात्सन्वद्भावाभावेन दीर्घाभावे तत्सिद्धिः। → अतो लोपः ॥६।४।४।

इत्यनेन

अजीगणत्। गण इत्यस्मात् णिचि अल्लोपे तस्य स्थानिवत्त्वाद् वृद्ध्यभावे लुङस्तिप इकारलोपेऽटि च्लेश्चङि द्वित्वे हलादिशेषे चुत्वे अग्लोपित्वाद्दीर्घसन्वद्भावयोरभावे 'ई च गणः' इति ईत्वे अजीगणदिति पक्षे अजगणदिति।

॥ इति चुरादयः ॥

* * *

गणधातु के अभ्यास को ई और अ हो चङ्पर णि पर रहते।

⊙ भुओ – [illegible]
ग । परिशिष्ट-पृ. ८२३।

स्वतन्त्रः कर्ता १।४।५४॥ क्रियायां[1] स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् ॥ **तत्प्रयोजको हेतुश्च १।४।५५॥** कर्तुः[2] प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात् ॥ **हेतुमति च ३।१।२६॥** प्रयोजक[3]व्यापारे प्रेषणादौ वाच्ये धातोर्णिच् स्यात् । भवन्तं प्रेरयति भावयति । भावयते ॥ **ओः पुयण्ज्यपरे ७।४।८०॥** सनि[4] परे यदङ्गं तदवयवाभ्यासोकारस्य इत्स्यात् पवर्गयण्जकारेष्ववर्णपरेषु परतः । अबीभवत् ॥ ष्ठा गतिनिवृत्तौ ॥ **अर्ति-**[5]

भावयति । भू इत्यस्मात् 'हेतुमति च' इति णिच्प्रत्ययेऽनुबन्धलोपे 'अचोऽञ्णिति' इति वृद्धौ आवादेशे 'सनाद्यन्ता धातवः' इति धातुत्वाल्लटस्तिपि शपि गुणेऽयादेशे तत्सिद्धिः ।

⊙**अबीभवत्** । भूइत्यस्मात् णिचि 'णिच्यच आदेशो न द्वित्वे कर्त्तव्ये' इति निषेधात्पूर्वं वृद्ध्यभावे धातुत्वाल्लुङस्तिप इकारलोपेऽटि

---

१ क्रिया की सिद्धि में स्वातन्त्र्येण-प्राधान्येन विवक्षित अर्थ को कर्तृ संज्ञा होती है । २ कर्ता के प्रयोजक-प्रेरक को हेतुसंज्ञा और कर्तृ संज्ञा होती है । ३ प्रेषणादि (आज्ञा प्रार्थना अनुमति) रूप प्रयोजकव्यापार वाच्यत्वेन विवक्षित रहते धातु से णिच् प्रत्यय होता है । ४ सन् पर रहते जो अङ्ग उसका अवयव जो अभ्यास उकार उसको इकार हो अवर्ण पर हो जिससे ऐसे पवर्ग यण् जकार पर रहते । ५ ऋ गतिप्रापणयोः, ऋ गतौ, ह्री लज्जायाम्, व्ली वरणे, री गतिरेषणयोः, रीङ् श्रवणे' क्नूयी शब्दे उन्दे च, क्ष्मायी विधूनने, इनको और आकारान्तधातु को पुक् हो णि पर रहते ।

जिस अर्थ में प्रत्यय होता है वह अर्थ उक्त होता है, उससे भिन्न अनुक्त है । जैसे कर्त्ता अर्थ में यदि प्रत्यय हो तो कर्त्ता उक्त होता है उससे भिन्न कर्म्मादि अनुक्त हैं । उक्त कर्त्ताकर्मादि में प्रथमा विभक्ति होती है अनुक्त कर्ता में तृतीया होती है अनुक्त कर्म में द्वितीया होती है । ण्यन्त में प्रयोज्य और प्रयोजक दो कर्त्ता होते हैं प्रयोजक कर्त्ता में णिच् प्रत्यय होता है इससे प्रयोजक उक्त होता है उसमें प्रथमा विभक्ति होती है । प्रयोज्य अनुक्त हुआ उसमें सबजगह (सकर्मकधातु और अकर्मकधातु दोनों स्थलों में) तृतीया प्राप्त होती है । परन्तु **गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्त्ता स णौ'** इससूत्रसे गत्यर्थक बुद्ध्यर्थक भक्षणार्थक शब्दकर्मक अकर्मक धातु के प्रयोज्य कर्त्ता को णिच्प्रत्ययस्थल में कर्मसंज्ञा होती है । जिस अर्थ में प्रत्यय हो उसके अधीन क्रिया होती है । अर्थात् यदि युष्मद् अस्मद् शब्द से भिन्न प्रयोजककर्त्ता हो तो प्रथम पुरुष होता है । युष्मद् प्रयोजककर्त्ता हो तो मध्यम पुरुष होता है । अस्मद् प्रयोजककर्त्ता हो तो उत्तम पुरुष होता है ।

प्रथमा
विभक्ति

ह्व्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ ७।३।३६॥ स्थापयति ॥

चलौ 'णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्' इति च्लेश्चङि णिलोपे 'चङि' इति द्वित्वे प्रत्ययलक्षणत्वाद् वृद्धौ आवादेशे 'णौ चङ्युपधाया ह्रस्वः' इत्युपधाह्रस्वे जश्त्वे 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सन्वद्भावे 'ओः पुयण्ज्यपरे' इति अभ्यासोकारस्य इत्वे 'दीर्घो लघोः' इति दीर्घे तत्सिद्धिः ।

इसमें भी एकवचन कर्त्ता हो तो एकवचन क्रिया, द्विवचनकर्त्ता हो तो द्विवचन क्रिया, बहुवचनकर्त्ता हो तो बहुवचन क्रिया होती है । उदाहरण—देवदत्तः भवति यज्ञदत्तः प्रेरयति इस अर्थ में यज्ञदत्तः देवदत्तं भावयति, यह प्रयोग होता है । देवदत्तो भवति यज्ञदत्तौ प्रेरयतः, यहां यज्ञदत्तौ देवदत्तं भावयतः, यह होता है । देवदत्तो भवति यज्ञदत्ताः प्रेरयन्ति, यहां यज्ञदत्ताः देवदत्तं भावयन्ति । देवदत्तो भवति त्वं प्रेरयसि, इति त्वं देवदत्तं भावयसि, देवदत्तो भवति युवां प्रेरयथः, इति युवां देवदत्तं भावयथः, देवदत्तो भवति यूयं प्रेरयथ, इति यूयम् देवदत्तम्भावयथ, देवदत्तो भवति अहम्प्रेरयामि, इतिं अहं देवदत्तम्भावयामि, देवदत्तो भवति आवाम्प्रेरयावः, इति आवां देवदत्तम्भावयावः देवदत्तो भवति वयम्प्रेरयामः, इत्ति वयं देवदत्तम्भावयामः । इन स्थलों में प्रयोजक कर्त्ता के अधीन ही क्रियायें हुईं । यदि प्रयोजककर्त्ता का दूसरा प्रयोजक होजाय तो प्रधान प्रयोजक के अधीन ही क्रिया होगी और प्रधान प्रयोजक के उक्त होने से उसमें प्रथमा होगी, अप्रधान प्रयोजक के अनुक्त होने से उसमें तृतीया ही विभक्ति होगी । उदाहरण—देवदत्तो भवति यज्ञदत्तः प्रेरयति प्रेरयन्तं यज्ञदत्तं विष्णुमित्रः प्रेरयति, इति विष्णुमित्रो यज्ञदत्तेन देवदत्तं भावयति, यहां प्रधानप्रयोजक के आधीन क्रिया हुई । इसी तरह अन्यवचनों में भी समझना । युष्मद्शब्द प्रधानप्रयोजक कर्त्ता रहने पर ही यहां मध्यम पुरुष होगा और अस्मद्शब्द-प्रधान प्रयोजक कर्त्ता रहने पर ही उत्तमपुरुष होगा यह पूरा ध्यान रहना चाहिये । गत्याद्यर्थक से भिन्न सकर्मकधातुस्थल में प्रयोजककर्त्ता उक्त होने से उसमें प्रथमा प्रयोज्यकर्त्ता अनुक्त होने से उसमें तृतीया विभक्ति होगी । देवदत्तस्तण्डुलं पचति यज्ञदत्तः प्रेरयति, यहां यज्ञदत्तो देवदत्तेन तण्डुलं पांचयति यह होगा । यहां पर भी प्रयोजक का दूसरा प्रयोजक रहने पर प्रधानप्रयोजक में प्रथमा अप्रधानप्रयोजक कर्त्ता और प्रयोज्य कर्ता दोनों में तृतीया होगी । जैसे देवदत्तस्तण्डुलं पचति यज्ञदत्तः प्रेरयति प्रेरयन्तं यज्ञदत्तं विष्णुमित्रः प्रेरयति । यहां पर विष्णुमित्रो यज्ञदत्तेन देवदत्तेन तण्डुलं पाचयति यह होगा । विशेष विवरण विस्तारभयसे नहीं लिखा जा रहा है । पूर्वोक्तरीति से सब धातुओं के सब लकारों में विचार लेना चाहिये ।

तिष्ठतेरित् ७।४।५॥ उपधाया इदादेशः स्याच्चङ्परे णौ। अतिष्ठिपत्। वट चेष्टायाम्॥ **मितां ह्रस्वः ६।४।९२॥** णौ घटादीनां ज्ञपादीनां चोपधाया ह्रस्वः। घटयति॥ ज्ञप ज्ञाने ज्ञापने च॥ ज्ञपयति। अजिज्ञपत्॥

इति ण्यन्तप्रक्रिया॥ १॥

''उपधा पवर्ति'' ६।१।४८ सू [illegible]
पृ २४
[illegible]

स्थापयति। ष्ठा इत्यत्र 'धात्वादेः षः सः' इति षस्य सत्वे ष्टुत्वनिवृत्तौ स्था इत्यस्माण्णिच्यनुबन्धलोपे 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ' इति पुगागमे धातुत्वाल्लटस्तिपि शपि गुणेऽयादेशे तत्सिद्धिः।

अतिष्ठिपत्। स्थाइत्यस्मात् णिचि 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ' इति पुकि धातुत्वाल्लुङस्तिप इकारलोपेऽटि च्लेश्चङि 'णिच्यच आदेशो न द्वित्वे कार्ये' इति निषेधात् इत्वापेक्षया पूर्वं द्वित्वेऽभ्यासत्वे 'शर्पूर्वाः खयः' इति सलोपेऽभ्यासह्रस्वे चर्त्वे उपधाह्रस्वे णिलोपे सन्वद्भावे 'सन्यत' इतीत्वे षत्वे ष्टुत्वे 'तिष्ठतेरित्' इतीत्वे तत्सिद्धिः।

अत्र केचित्। ओणृ अपनयने इत्यत्र ऋदित्करणाल्लिङ्गात् 'उपधाकार्यं द्वित्वात्प्रबलम्' इति कल्पनया पूर्वं 'तिष्ठतेरित्' इतीत्वं ततो द्वित्वम् इति तन्न समीचीनम् उक्तकल्पनाया उपधाकार्यमात्रविषयकत्वम्। ओः पुयण्ज्यपरे इति वक्तव्ये पुयण्जीतिवचनाल्लिङ्गात् 'णिच्यच आदेशो न' इति कल्पनायास्तु यत्र द्विरुक्तावभ्यासोत्तरखण्डस्याद्योऽच् प्रक्रियायां परिनिष्ठिते रूपे वा अवर्णो लभ्यते तन्मात्रविषयकत्वम् इति विशेषेणानेन सामान्यस्य तस्य बाधात् इति शम्।

घटयति। घट इत्यस्माण्णिचि 'अत उपधायाः' इति उपधावृद्धौ घटादेर्मित्त्वात् 'मितां ह्रस्वः' इति ह्रस्वे धातुत्वाल्लटस्तिपि शपि गुणेऽयादेशे तत्सिद्धिः।

अजिज्ञपत्। ज्ञपइत्यस्मात् णिचि धातुत्वाल्लुङस्तिप इकारलोपेऽटि च्लेश्चङि द्वित्वेऽभ्यासकार्ये उपधावृद्धौ ह्रस्वे णिलोपे सन्वद्भावे 'सन्यतः' इतीत्वे तत्सिद्धिः।

⑦ पिपठिषा + तिप्

इति ण्यन्तप्राक्रिया।

पिपठिष + शप् + ति।
पिपठिष + अ + ति
√पिपठिषति।

अथ सन्नन्तप्रक्रिया ।

धातोः कर्मणः समानकर्तृकादिच्छायां वा ३।१।७ ॥ इषिकर्मण इषिणैककर्तृकाद्धातोः सन्प्रत्ययो वा स्यादिच्छायाम् ॥ पठ व्यक्तायां वाचि ॥ **सन्यङोः ६।१।९॥** सन्नन्तस्य यङन्तस्य धातोरनभ्यासस्य प्रथमस्यैकाचो द्वे स्तोऽजादेस्तु द्वितीयस्य । सन्यतः । पठितुमिच्छति पिपठिषति । कर्मणः किम्—गमनेनेच्छति । समानकर्तृकात्किम्—शिष्याः पठन्त्वितीच्छति गुरुः । वा ग्रहणाद्वाक्यमपि ॥ लुङ्सनोर्घस्लृ ॥ **सः स्यार्धधातुके ७।४।४९॥** सस्य तः स्यात्सादावार्धधातुके । अत्तुमिच्छति जिघत्सति । एकाच इति नेट् ॥ **अज्झनगमां सनि ६।४।१६॥** अजन्तानां हन्ते-

आर्धधातुकस्येड्० ॥७।२।३५॥

पिपठिषति । पठ् इत्यस्मात् 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति सन्प्रत्यये इटि 'सन्यङोः' इति द्वित्वेऽभ्यासत्वे हलादिशेषे 'सन्यतः' इतीत्वे षत्वे 'सनाद्यन्ता धातवः' इति धातुत्वाल्लटि तिपि शपि पररूपे तत्सिद्धिः । अतो गुणे ॥

जिघत्सति । अद् इत्यस्माद् 'धातोः कर्मणः' इति सन्प्रत्यये 'लुङ्सनोर्घस्लृ' इत्यदो घस्लादेशेऽनुबन्धलोपे 'एकाच उपदेशेऽनुदात्तात्' इतीटो निषेधे द्वित्वेऽभ्यासकार्ये 'सन्यतः' इतीत्वे 'सः स्यार्धधातुके' इति सस्य तकारे धातुत्वाल्लडादिकार्ये तत्सिद्धिः ।

---

१ इष्धातु का जो कर्म तद्बोधक और इष्धातु के समानकर्तृक अर्थात् इष्धातु का जो कर्ता वही कर्ता हो जिसका ऐसे धातु से इच्छा अर्थ में सन् प्रत्यय होता है विकल्पसे । जैसे 'देवदत्तः पठितुमिच्छति पिपठिषति' यहां पर इष्धातु का कर्त्ता देवदत्त है वही पठधातु का भी (पठितुम् इसका) कर्त्ता है और इष्धातुका पठधातु (पठितुम् यह) कर्म भी है इसलिये पठधातुसे सन् प्रत्यय हुआ । २ पिपठिषाञ्चकार पिपठिषिता पिपठिषिष्यति पिपठिषतु अपिपठिषत् पिपठिषेत् पिपठिष्यात् अपिपठिषीत् अपिपठिषिष्यत् । ३ अजन्त धातु, हन्धातु और इण् इक् इङ् इनके स्थान में आदेश जो गम् इन सबको दीर्घ होता है झलादि सन् पर रहते ।

१- पठ + सन् ।
२१
पठ + इट् + सन्
पठ + पठ + इट् + सन् ।

प + पठ + इ + स
पि + पठ + इ + स
पि + पठिस
पिपठिष + लट्

रजादेशगमेश्च दीर्घो झलादौ सनि ॥ **इको झल् १।२।९॥** इगन्ताज्झलादिः सन् कित्स्यात् ॥ ऋत इद्धातोः ॥ कर्तुमिच्छति चिकीर्षति ॥ **सनि-ग्रहगुहोश्च ७।२।१२॥** ग्रहेर्गुहेरुगन्ताच्च सन इण् न स्यात् । बुभूषति ॥

॥ इति सन्नन्तप्रक्रिया ॥ २ ॥

अथ यङन्तप्रक्रिया ।

22

धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ३।१।२२॥ पौनःपुन्ये[1] भृशार्थे च द्योत्ये धातोरेकाचो हलादेर्यङ् स्यात् ॥ **गुणो यङ्लुकोः ७।४।८२॥** अभ्यासस्य गुणो यङि यङ्लुकि च । ङिदन्तत्वादात्मनेपदम् । पुनःपुनरतिशयेन वा भवति बोभूयते । बोभूयाञ्चक्रे । अबोभूयिष्ट ॥

चिकीर्षति । कृधातोः सनि 'एकाच उपदेशेऽनुदात्तात्' इतीण्निषेधे 'अज्झनगमां सनि' इति दीर्घे 'इको झल्' इति कित्त्वाद्गुणाभावे 'ऋत इद्धातोः' इति इत्त्वे रपरे द्वित्वेऽभ्यासकार्ये 'हलि च' इति दीर्घे षत्वे धातुत्वाल्लडादिकार्ये तत्सिद्धिः ।

बुभूषति । भूधातोः सनि 'इको झल्' इति कित्त्वाद्गुणाभावे 'सनि ग्रहगुहोश्च' इतीण्निषेधे द्वित्वे ह्रस्वे षत्वे धातुत्वाल्लटस्तिपि शपि पररूपे तत्सिद्धिः । अतो गुणे

इति सन्नन्ताः ॥

* * *

बोभूयते । भूधातोः 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इति यङ्प्रत्यये 'सन्यङोः' इति द्वित्वे 'गुणो यङ्लुकोः' इत्यभ्यासगुणे जश्त्वे बोभूय् इत्यस्य 'सनाद्यन्ता धातवः' इति धातुत्वाल्लटि ङित्त्वादात्मनेपदे तप्रत्यये शपि पररूपे टेरेत्वे तत्सिद्धिः ।

अबोभूयिष्ट । भूइत्यस्माद् यङि द्वित्वेऽभ्यासगुणे जश्त्वे बोभूय

---

[1] पौनःपुन्य-बारम्बार और भृश-अत्यन्त अर्थ द्योत्य रहते एकाच् हलादि धातु से यङ् प्रत्यय हो ।

नित्यं कौटिल्ये गतौ ३।१।२३॥ गत्यर्थात्कौटिल्य एव यङ् स्यान्न तु क्रियासमभिहारे ॥ **दीर्घोऽकितः ७।४।८३॥** अकितोऽभ्यासस्य दीर्घो यङ्यङ्लुकोः । कुटिलं व्रजति वाव्रज्यते ॥ **यस्य हलः ६।४।४९॥** यस्येति संघातग्रहणम् । हलः परस्य यशब्दस्य लोप आर्धधातुके । आदेः परस्य । अतो लोपः । वाव्रजाञ्चक्रे । वाव्रजिता ॥ **रीगृदुपधस्य च ७।४।९०॥** ऋदुपधस्य धातोरभ्यासस्य रीगागमो यङ्यङ्लुकोः । वरीवृत्यते । वरीवृताञ्चक्रे । वरीवर्तिता ॥ **क्षुभ्नादिषु च ८।४।३९॥** णत्वं न । नरीनृत्यते जरीगृह्यते ॥

इति यङन्तप्रक्रिया ॥ ३ ॥

इत्यस्य धातुत्वाल्लुङस्तप्रत्ययेऽटि च्लेःसिचि इटि 'अतो लोपः' इत्यल्लोपे षत्वे ष्टुत्वे तत्सिद्धिः ।

वाव्रज्यते । व्रज्धातोः 'नित्यं कौटिल्ये गतौ' इति यङि द्वित्वेऽभ्यासकार्ये 'दीर्घोऽकितः' इत्यभ्यासदीर्घे धातुत्वाल्लडादिकार्ये तत्सिद्धिः ।

वाव्रजाञ्चक्रे । व्रज्धातोर्यङि द्वित्वेऽभ्यासकार्ये 'दीर्घोऽकितः' इत्यभ्यासदीर्घे धातुत्वाल्लिटि अनेकाच्त्वादाम्प्रत्यये 'आदेः परस्य' इति सूत्रबलात् 'यस्य हलः' इति यलोपे 'अतो लोपः' इत्यल्लोपे 'आमः' इति लिटो लुकि लिट्परकृञोऽनुप्रयोगे तप्रत्यये तस्य एशि द्वित्वेऽभ्यासकार्ये तत्सिद्धिः ।

वरीवृत्यते । वृत्धातोर्यङि द्वित्वे 'उरत्' इत्यत्त्वे रपरे हलादिशेषे 'रीगृदुपधस्य च' इति अभ्यासस्य रीगागमे वरीवृत्य इत्यस्य धातुत्वाल्लडादिके तत्सिद्धिः ।

नरीनृत्यते । नृत्धातोर्यङि द्वित्वेऽभ्यासकार्ये रीगागमे धातुत्वाल्लटस्तप्रत्यये एशि शपि पररूपे 'क्षुभ्नादिषु च' इति णत्वनिषेधे तत्सिद्धिः ।

इति यङन्तप्रक्रिया ॥

⑦ दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्ते ॥ अ०॥७।४।६

अथ यङ्लुक्प्रक्रिया।

यङोऽचि च २।४।७४॥ यङोऽचि प्रत्यये लुक् स्यात्, चकारात्तं विनापि क्वचित्। अनैमित्तिकोऽयमन्तरङ्गत्वादादौ भवति। ततः प्रत्ययलक्षणेन यङन्तत्वाद्द्वित्वम्। अभ्यासकार्यम्। धातुत्वाल्लडादयः। शेषात्कर्तरीति परस्मैपदम्। चर्करीतं चेत्यदादौ पाठाच्छपो लुक्॥ **यङो वा ७।३।९४॥** यङ्लुगन्तात्परस्य हलादेः पितः सार्वधातुकस्येड्वा स्यात्। अ०।७।४।६५।७ भूसुवोरिति गुणनिषेधो यङ्लुकि भाषायां न। 'बोभूतु तेतिक्ते' इति छन्दसि निपातनात्। बोभवीति, बोभोति। बोभूतः। अदभ्यस्तात्। बोभुवति। बोभवाञ्चकार, बोभवामास। बोभविता। बोभविष्यति। बोभवीतु, बोभोतु, बोभूतात्। बोभूताम्। बोभुवतु। बोभूहि। बोभवानि। अबोभवीत्, अबोभोत्, अबोभूताम्। अबोभवुः। बोभूयात्। बोभूयाताम्। बोभूयुः। बोभूयात्। बोभूयास्ताम्। बोभूयासुः। गातिस्थेति सिचो लुक्। यङो वेतीट्पक्षे गुणं बाधित्वा नित्यत्वाद्वुक्। अबोभूवीत्, अबोभोत्।

बोभवीति। भूधातोर्यङि 'यङोऽचि च' इति द्वित्वापेक्षया आदौ यङो लुकि ततः प्रत्ययलक्षणेन यङन्तत्वाद् द्वित्वेऽभ्यासगुणे जश्त्वे धातुत्वाल्लटस्तिपि शपि 'चर्करीतं च' इति यङ्लुगन्तस्य अदादौ पाठाच्छपो लुकि बोभू ति इति स्थिते 'यङो वा' इति पाक्षिक ईडागमे बोभूतु-
अ०॥७।४।६५॥ तेतिक्ते इति छन्दसि निपातनात् 'भूसुवोस्तिङि' इति गुणनिषेधस्य यङ्लुकि भाषायामप्रवृत्त्या गुणेऽवादेशे तत्सिद्धिः। ईडभावपक्षे गुणे बोभोति इति सिद्ध्यति। सार्वधातुकगुणे

बोभुवति। भूइत्यस्माद् यङि यङो लुकि प्रत्ययलक्षणेन यङन्तत्वाद् द्वित्वेऽभ्यासगुणे जश्त्वे धातुत्वाल्लटो झौ 'अदभ्यस्तात्' इति झस्याति उवङि तत्सिद्धिः।

अबोभूवीत्। भूधातोर्यङि यङो लुकि प्रत्ययलक्षणेन यङन्तत्वात्

अबोभूताम्। अबोभूवुः। अबोभविष्यत्।

इति यङ्लुक्प्रक्रिया ॥ ४ ॥

अथ नामधातवः।

'अर्थवदधातु०' (१।२।४५) पर [illegible] द्रष्टव्य पृ-१०

सुप आत्मनः क्यच् ३।१।८॥ इषिकर्मण एषितुः संबन्धिनः सुबन्तादिच्छायामर्थे क्यच् प्रत्ययो वा स्यात्॥ **सुपो धातुप्रातिपदिकयोः** २ **२।४।७१॥** एतयोरवयवस्य सुपो लुक्॥ **क्यचि च ७।४।३३॥** अवर्णस्य ईः। आत्मनः पुत्रमिच्छति पुत्रीयति॥ **नः क्ये १।४।१५॥** क्यचि क्यङि च नान्तमेव पदं नान्यत्। नलोपः। राजीयति। नान्तमेवेति

द्वित्वेऽभ्यासगुणे जश्त्वे धातुत्वाल्लुङस्तिप इकारलोपेऽटि 'यङो वा' इति पाक्षिके ईटि गुणं बाधित्वा नित्यत्वाद् वुकि अबोभूवीत् इति, ईडभावपक्षे गुणे अबोभोत् इति च सिद्धम्।

इति यङ्लुगन्ताः।

पुत्रीयति। पुत्रमिच्छतीतिविग्रहे पुत्रअम् इति सुबन्तात् 'सुप आत्मनः क्यच्' इति क्यच् प्रत्ययेऽनुबन्धलोपे 'सनाद्यन्ता धातवः' इति पुत्रअम् य इत्यस्य धातुसंज्ञायाम् 'सुपो धातुप्रातिपदिकयोः' इति अमो लुकि 'क्यचि च' इति अकारस्य ईत्वे धातुत्वाल्लटस्तिपि शपि पररूपे तत्सिद्धिः।

राजीयति। द्वितीयान्त राजन्शब्दात् इच्छायामर्थे क्यचि धातुत्वात् सुपो लुकि 'नः क्ये' इति राजन्–इत्यस्य पदत्वात् 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे 'क्यचि च' इतीत्वे लडादिकार्ये तत्सिद्धिः।

---

[१] इष्धातु का कर्मभूत और एषिता अर्थात् 'इच्छा करनेवाला' का सम्बन्धी जो अर्थ तद्वाचकत्वेन विवक्षित सुबन्त से इच्छा अर्थ में क्यच् प्रत्यय होता है विकल्प से। जैसे—देवदत्तः आत्मनः पुत्रमिच्छति पुत्रीयति यहांपर पुत्र इष्धातु का कर्म है और इच्छा करनेवाले देवदत्त का सम्बन्धी भी है तद्वाचकत्वेन विवक्षित पुत्रअम् इस सुबन्त से क्यच् प्रत्यय हुआ।

किम्—वाच्यति । हलि च । गीर्यति । पूर्यति । धातोरित्येव । नेह- दिवमिच्छति दिव्यति ॥ **क्यस्य विभाषा ६।४।५०॥** हलः परयोः क्यच्क्यङोर्लोपो वार्धधातुके । आदेः परस्य । अतो लोपः । तस्य स्थानिवत्त्वाल्लघूपधगुणो न । समिधिता, समिध्यिता ॥ **काम्यच्च ३।१।९॥** उक्तविषये काम्यच् स्यात् । पुत्रमात्मन इच्छति पुत्रकाम्यति । पुत्रकाम्यिता । **उपमानादाचारे ३।१।१०॥** उपमानात्कर्मणः सुबन्तादाचारेऽर्थे क्यच् । पुत्रमिवाचरति पुत्रीयति छात्रम् । विष्णूयति द्विजम् ॥ (सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः) । अतो गुणे । कृष्णइवाचरति कृष्णति । स्व इवाचरति स्वति । सस्वौ ॥ **अनुनासिकस्य क्विझलोः क्ङिति ६।४।१५॥**

वाच्यति । द्वितीयान्तवाच्शब्दात् क्याचि धातुत्वात्सुपो लुकि 'नः क्ये' इति नियमाद् वाच् इत्यस्य पदत्वाभावात्कुत्वाभावे लडादिकार्ये तत्सिद्धिः ।

समिधिता । समिधमिच्छतीतिविग्रहे अमन्तसमिध्शब्दात्क्याचि धातुत्त्वात्सुपो लुकि 'नः क्ये' इति नियमात्पदत्वाभावेन जश्त्वाभावे लुटस्तिबादिकार्ये समिध्य ता इति स्थिते इटि 'आदेः परस्य' इति सहकारेण 'क्यस्य विभाषा' इति यलोपेऽल्लोपे तस्य स्थानिवत्त्वाल्लघूपधगुणाभावे तात्सिद्धिः ।

पुत्रकाम्यति । अमन्तपुत्रशब्दात् 'काम्यच्च' इति काम्याचि धातुत्वात्सुपो लुकि लडादिकार्ये तात्सिद्धिः ।

पुत्रीयति छात्रम् । पुत्रमिवाचरतीतिविग्रहे पुत्रशब्दादमन्तात् 'उपमानादाचारे' इति क्यचि धातुत्वात्सुपो लुकि 'क्यचि च' इतीत्वे लडादिके तत्सिद्धिः ।

कृष्णति । कृष्णइवाचरतीतिविग्रहे कृष्णशब्दात् 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' इति क्विपि तल्लोपे धातुत्वाल्लटस्तिपि शपि 'अतो गुणे' इति पररूपे तात्सिद्धिः ।

सस्वौ । स्व इवाचचारेतिविग्रहे स्वशब्दात् 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' इति क्विपि तल्लोपे धातुत्वाल्लिटस्तिपो णलि द्वित्वे

अनुनासिकान्तस्योपधाया दीर्घः स्यात्क्वौ झलादौ च क्ङिति । इदमिवाचरति इदामति । राजेव राजानति । पन्था इव पथीनाति ॥ **कष्टाय क्रमणे ३।१।१४॥** चतुर्थ्यन्तात्कष्टशब्दादुत्साहेऽर्थे क्यङ् स्यात् । कष्टाय क्रमते कष्टायते । पापं कर्तुमुत्सहत इत्यर्थः ॥ **शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ३।१।१७॥** एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात् । शब्दं करोति शब्दायते ॥ (ग) तत्करोति तदाचष्टे । इति णिच् । (ग) प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च । प्रातिपदिकाद्धात्वर्थे णिच् स्यात्, इष्ठे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुब्लुग्यणादिपरलोपप्रस्थस्फाद्यादेशभसंज्ञास्तद्वण्णावपि स्युः । इत्यल्लोपः । घटं करोत्याचष्टे वा घटयति ॥

इति नामधातवः ॥ ९ ॥

* * *

हलादिशेषे सस्य अ इति स्थिते 'अचो ञ्णिति' इति वृद्धौ 'आत औ णलः' इति णल औकारे 'वृद्धिरेचि' इति वृद्धौ तत्सिद्धिः ।

इदामति । इदम्शब्दात् क्विपि तल्लोपे धातुत्वाल्लटस्तिपि शपि 'अनुनासिकस्य क्विझलोः क्ङिति' इति दीर्घे तत्सिद्धिः ।

कष्टायते । कष्टाय क्रमते इति विग्रहे चतुर्थ्यन्तकष्टशब्दात् क्यङि धातुत्वात्प्रातिपदिकत्वेन सुपो लुकि ङित्त्वादात्मनेपदे लटस्तप्रत्यये टेरेत्वे शपि पररूपे 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घे तत्सिद्धिः ।

शब्दायते । शब्दं करोतीति विग्रहे अमन्तशब्दशब्दात् 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' इति क्यङि धातुत्वादमो लुकि ङित्त्वाल्लटस्तप्रत्यये टेरेत्वे शपि पररूपे दीर्घे तत्सिद्धिः ।

घटयति । घटं करोति आचष्टे वा इति विग्रहे घटशब्दात् 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इति णिचि इष्ठवद्भावाट्टिलोपे च तस्य स्थानिवद्भावादुपधावृद्ध्यभावे धातुत्वाल्लटस्तिपि शपि गुणेऽयादेशे तत्सिद्धिः ।

इति नामधातवः ॥

* * *

अथ कण्ड्वादयः ।

कण्ड्वादिभ्यो यक् ३।१।२७॥ एभ्यो धातुभ्यो नित्यं यक् स्यात्स्वार्थे । कण्डूञ् गात्रविघर्षणे ॥ १ ॥ कण्डूयति । कण्डूयत इत्यादि ॥

इति कण्ड्वादयः ॥ ६ ॥

◆

अथ पदव्यवस्था ।

आत्मनेपदप्रक्रिया

कर्तरि कर्मव्यतिहारे १ । ३ । १४ ॥ क्रियाविनिमये[१] द्योत्ये कर्तर्यात्मनेपदम् । व्यतिलुनीते । अन्यस्य योग्यं लवनं करोतीत्यर्थः ॥ **न गतिहिंसार्थेभ्यः १।३।१५॥** व्यतिगच्छन्ति । व्यतिघ्नन्ति ॥ **नेर्विशः १।३।१७॥** निविशते ॥ **परिव्यवेभ्यः क्रियः १।३।१८॥** परिक्रीणीते । विक्रीणीते । अवक्रीणीते ॥ **विपराभ्यां जेः १।३।१९॥** विजयते । पराजयते ॥ **समवप्रविभ्यः स्थः १।३।२२ ॥** संतिष्ठते । अवतिष्ठते । प्रतिष्ठते । वितिष्ठते ॥

व्यतिलुनीते । वि अतिपूर्वात् लूञ् धातोर्ञित्वादात्मनेपदे परस्मैपदे च प्राप्ते 'कर्तरि कर्मव्यतिहारे' इत्यात्मनेपदत्वाल्लटस्तप्रत्ययादिके तत्सिद्धिः । **अन्यस्येति ।** शूद्रस्य योग्यं सस्यादिलवनं ब्राह्मणः करोतीत्यर्थः ।

व्यतिगच्छन्ति । व्यतिपूर्वाद्गमधातोः क्रियाविनिमयेऽर्थे 'कर्त्तरि कर्मव्यतिहारे' इति आत्मनेपदत्वे प्राप्ते 'न गतिहिंसार्थेभ्यः' इति तन्निषेधे लटस्तिबादिके तत्सिद्धिः ।

---

[१] क्रिया का विनिमय अर्थात् 'अन्य से करने योग्य क्रिया का अन्य से करना' द्योत्य रहते कर्ता अर्थ में धातु से आत्मनेपदसंज्ञक प्रत्यय होता है ।

अपह्नवे ज्ञः १।३।४४॥ शतमपजानीते। अपलपतीत्यर्थः ॥ **अकर्मकाच्च**[1] **१।३।४५॥** सर्पिषो जानीते । सर्पिषोपायेन प्रवर्तत इत्यर्थः ॥ **उदश्चरः सकर्मकात् १।३।५३॥** धर्ममुच्चरते । उल्लङ्घ्य गच्छतीत्यर्थः ॥ **समस्तृतीयायुक्तात् १।३।५४॥** रथेन सञ्चरते ॥ **दाणश्च सा चेच्चतुर्थ्यर्थे १।३।५५॥** सम्पूर्वाद्दाणस्तृतीयान्तेन युक्तादुक्तं स्यात् तृतीया चेच्चतुर्थ्यर्थे । दास्या संयच्छते कामी ॥ **पूर्ववत्सनः १।३।६२॥** सनः[2] पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात् । एदिधिषते ॥ **हलन्ताच्च १।२।१०॥** इक्समीपाद्धलः परो झलादिः सन् कित् । निविविक्षते॥ **गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः १।३।३२॥** गन्धनं सूचनम् । उत्कुरुते । सूचयतीत्यर्थः । अवक्षेपणं भर्त्सनम् । श्येनो वर्तिकामुत्कुरुते । भर्त्सयतीत्यर्थः । हरिमुपकुरुते । सेवत इत्यर्थः । परदारान्प्रकुरुते । तेषु सहसा प्रवर्तते । एधोदकस्योपस्कुरुते । गुणमाधत्ते । कथाः प्रकुरुते । कथयतीत्यर्थः । शतं प्रकुरुते । धर्मार्थं विनि-

दास्या संयच्छते कामी । 'अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया' इति वार्तिकेन दास्या इत्यत्र चतुर्थ्यर्थे तृतीया ततश्च दास्या इति तृतीयान्तयुक्तात्सम्पूर्वाद्दाण्धातोर्लटि 'दाणश्च सा चेच्चतुर्थ्यर्थे' इत्यात्मनेपदत्वात्तप्रत्यये 'पाघ्राध्मा' इति दाणो यच्छादेशादिकार्ये तत्सिद्धिः

एदिधिषते । एध्धातोः सनि इटि द्वित्वे षत्वे जश्त्वे धातुत्वाल्लटि 'पूर्ववत्सनः' इत्यात्मनेपदत्वाल्लटस्तप्रत्यये शपि पररूपे तत्सिद्धिः ।

निविविक्षते । निपूर्वाद्विश्धातोः सनि 'हलन्ताच्च' इति सनः

---

[1] अकर्मक ज्ञाधातु से आत्मनेपद होता है-। धातोरर्थान्तरे वृत्ते धात्वर्थेनोपसङ्ग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥ धातु का दूसरा अर्थ होने से, कर्म का धातु के अर्थ में सङ्गृहीत होने से, कर्म की प्रसिद्धि से, कर्म की अविवक्षा से, इन चार कारणों से सकर्मक भी धातु अकर्मक होता है । [2] सन् से पूर्व जो धातु उसके तुल्य सन्नन्त से भी आत्मनेपद होता है। अर्थात् जिस धातु से सन् प्रत्यय किया हो उस धातु से यदि आत्मनेपद होता हो तो उस धातु से सन्नन्त भी आत्मनेपद हो ।

CC0. In Public Domain. Digitization by eGangotri

① भाववाच्य में कर्ता [illegible] तृतीयान्त होता है
र कर्म नहीं होता तथा क्रिया सदैव प्रथम पुरुष की एक
वचन ३२० [illegible] ही होती

युङ्क्ते । एषु किम्—कटं करोति ॥ भुजोऽनवने ॥ ओदनं भुङ्क्ते । अनवने किम्—महीं भुनक्ति ॥ ८ ॥

इत्यात्मनेपदप्रक्रिया ॥

* * *

अथ परस्मैपदप्रक्रिया ।

अनुपराभ्यां कृञः १।३।७९॥ कर्तृगे च फले गन्धनादौ च परस्मैपदं स्यात् । अनुकरोति । पराकरोति ॥ **अभिप्रत्यतिभ्यः क्षिपः १।३।८०॥** क्षिप प्रेरणे । स्वरितेत् । अभिक्षिपति॥ **प्राद्वहः १।३।८१॥** प्रवहति ॥ **परेर्मृषः १।३।८२॥** परिमृषति । परिमृष्यति ॥ **व्याङ्परिभ्यो रमः १।३।८३॥** रमु क्रीडायाम् ॥ विरमति ॥ **उपाच्च १।३।८४॥** यज्ञदत्तमुपरमति । उपरमयतीत्यर्थः । अन्तर्भावितण्यर्थोऽयम् ॥

इति परस्मैपदप्रक्रिया ॥

इति पदव्यवस्था ॥ ७ ॥

* * *

अथ भावकर्मप्रक्रिया ।

भाविकर्मणोः[1] १।३।१३॥ लस्यात्मनेपदम् ॥ **सार्वधातुके यक् ३।१।६७॥** धातोर्यक् भावकर्मवाचिनि सार्वधातुके । भावः क्रिया ।

कित्वाद्गुणाभावे द्वित्वेऽभ्यासकार्ये 'व्रश्च' इति शस्य षत्वे षस्य कत्वे षत्वे धातुत्वाल्लटि' 'पूर्ववत्सनः' इत्यात्मनेपदत्वाल्लटस्तप्रत्ययादिके तत्सिद्धिः ।

इत्यात्मनेपदप्रक्रिया ॥

* * *

---

[1] भाव क्रिया को कहते हैं। उसका भावार्थक लकार से अनुवाद होता है। कर्ता में लकार करने पर तिङ् और युष्मद् अस्मद् शब्द कर्तारूप एक अर्थ के वाचक होते हैं तो मध्यम और उत्तम पुरुष धातु से होता है। भाव में लकार करने पर तिङ के साथ युष्मद् अस्मद् एकार्थवाचक नहीं होते इससे मध्यम उत्तम पुरुष नहीं होता किन्तु प्रथमपुरुष ही होता है। तिङर्थं क्रिया के द्रव्यरूप न होने से द्वित्व बहुत्व सङ्ख्या की प्रतीति नहीं होती अतः द्विवचन बहुवचन नहीं होते किन्तु स्वाभाविक एकवचन ही होता है।

① "रूपचन्द्रिका" / ले. पं. रामचन्द्र झा / पृ. ६२०

CC0. In Public Domain, Digitization by eGangotri

भाव - लटि - भूयते | लिटि - बभूवे | लुटि - भाविता-भविता | लृटि - भाविष्यते-भविष्यते | लोटि - भूयताम् | लङि - अभूयत | लिङि - भूयेत

सा च भावार्थकलकारेणानूद्यते । युष्मदस्मद्भ्यां सामानाधिकरण्याभावात्प्रथमः पुरुषः । तिङ्वाच्यक्रियाया अद्रव्यरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि किं त्वेकवचनमेवोत्सर्गतः । त्वया मया अन्यैश्च भूयते । बभूवे ॥

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ६।४।६२॥ उपदेशे योऽच् तदन्तानां हनादीनां च चिणीवाङ्गकार्यं वा स्यात्स्यादिषु भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च । चिण्वद्भावपक्षेऽयमिट् । चिण्वद्भावाद् वृद्धिः । भाविता, भविता । भाविष्यते, भविष्यते । भूयताम् । अभूयत । भाविषीष्ट, भविषीष्ट ॥ **चिण् भावकर्मणोः ३।१।६६॥** च्लेश्चिण् स्याद्भावकर्मवाचिनि तशब्दे परे । अभावि, अभाविष्यत । अकर्मकोऽप्युपसर्गवशात्सकर्मकः । अनुभूयते रूपाख्याने

भूयते । भूधातोर्भावे लटि 'भावकर्मणोः' इत्यात्मनेपदत्वात्तप्रत्यये टेरेत्वे 'सार्वधातुके यक्' इति यकि तत्सिद्धिः ।

भाविता । भूधातोर्भावे लुटि 'भावकर्मणोः' इत्यात्मनेपदत्वाल्लुटस्तप्रत्यये तासि डादेशे टिलोपे 'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च' इति चिण्वद्भावे इटि च चिण्वद्भावाद् वृद्धौ आवादेशे भावितेति, चिण्वदभावे इटि गुणे भवितेति च सिद्धम् ।

अभावि । भूधातोर्भावे लुङि आत्मनेपदे तप्रत्ययेऽटि च्लौ 'चिण् भावकर्मणोः' इति च्लेश्चिणि वृद्धौ आवादेशे 'चिणो लुक्' इति तस्य लुकि तत्सिद्धिः ।

भू धातु अकर्मक है उससे भाव में प्रत्यय होता है । अनुक्त होने से कर्ता में तृतीया होती है । जैसे देवदत्तो भवति इस अर्थ में देवदत्तेन भूयते यह होता है । त्वं भवसि इति त्वया भूयते । अहं भवामि इति मया भूयते ।

१ अकर्मक भी धातु उपसर्गवश सकर्मक होता है । अनुपूर्वक भूधातु अनुभवार्थक होने से सकर्मक हुआ । अत एव उससे कर्म में प्रत्यय होता है । कर्म उक्त होने से उसमें प्रथमा कर्त्ता अनुक्त होने से उसमें तृतीया होती है । युष्मद् कर्म रहने पर

आख्यातिक - पृ. २४८ | आशीर्लिङि - भाविषीष्ट - भविषीष्ट | लुङि - अभावि | लृङि - अभाविष्यत ||

र्मणि

आनन्दश्चैत्रेण त्वया मया च। अनुभूयेते । अनुभूयन्ते । त्वमनुभूयसे । अहमनुभूये । अन्वभावि । अन्वभाविषाताम्, अन्वभविषाताम् । णिलोपः । भाव्यते । भावयाञ्चक्रे, भावयाम्बभूव, भावयामासे । चिण्वदिट् । आभीय-

---

भाव्यते । भूधातोर्णिचि वृद्ध्यावादेशयोः भावि इत्यस्य धातुत्वात्कर्मणि लटस्तप्रत्यये टेरेत्वे 'सार्वधातुके यक्' इति यकि 'णेरनिटि' इति णिलोपे तत्सिद्धिः ।

भावयाञ्चक्रे । भावि इत्यस्माल्लिटि आमि णिलोपं बाधित्वा 'अयामन्ताल्वाय्येत्न्विष्णुषु' इति णेरयादेशे लिटो लुकि लिट्परकृञोऽनुप्रयोगे लिटस्तस्य एशि द्वित्वेऽभ्यासकार्येऽनुस्वारेपरसवर्णे यणि तत्सिद्धिः।

मध्यमपुरुष, अस्मद् कर्म रहने पर उत्तमपुरुष, इनसे भिन्न कर्म रहने पर प्रथमपुरुष होता है । कर्म के एकवचन रहने पर एकवचन द्विवचन रहने पर द्विवचन वहुवचन रहने पर वहुवचन क्रिया होती हैं । जैसे—चैत्रः आनन्दमनुभवति इति चैत्रेण आनन्दः अनुभूयते । चैत्रः आनन्दौ अनुभवति इति चैत्रेण आनन्दौ अनुभूयेते । चैत्रः आनन्दान् अनुभवति इति चैत्रेण आनन्दाः अनुभूयन्ते । चैत्रस्त्वामनुभवति इति चैत्रेण त्वमनुभूयसे । चैत्रो युवामनुभवति इति चैत्रेण युवामनुभूयेथे । चैत्रो युष्माननुभवति इति चैत्रेण यूयमनुभूयध्वे । चैत्रो मामनुभवति इति चैत्रेण अहमनुभूये । चैत्रः आवामनुभवति इति चैत्रेण आवामनुभूयावहे । चैत्रोऽस्माननुभवति इति चैत्रेण वयमनुभूयामहे इति । इसी प्रकार अन्य लकार में भी विचारना चाहिये । १ अकर्मक भी धातु णिच्प्रत्ययान्त होने पर सकर्मक होता है । उससे कर्म में प्रत्यय होता है । कर्म के अनुसार ही क्रिया होती हैं । जैसे—देवदत्तो भवति यज्ञदत्तः प्रेरयति यज्ञदत्तो देवदत्तं भावयति इति यज्ञदत्तेन देवदत्तो भाव्यते । यज्ञदत्तो देवदत्तौ भावयति इति यज्ञदत्तेन देवदत्तौ भाव्येते । यज्ञदत्तो देवदत्तान्भावयति इति यज्ञदत्तेन देवदत्ताः भाव्यन्ते । यज्ञदत्तस्त्वां भावयति इति यज्ञदत्तेन त्वं भाव्यसे । यज्ञदत्तो युवां भावयति इति यज्ञदत्तेन युवां भाव्येथे । यज्ञदत्तो युष्मान् भावयति इति यज्ञदत्तेन यूयं भाव्यध्वे । यज्ञदत्तो मां भावयति इति यज्ञदत्तेन अहं भाव्ये । यज्ञदत्तः आवाम्भावयति इति यज्ञदत्तेनावाम्भाव्यावहे । यज्ञदत्तोऽस्मान् भावयति इति यज्ञदत्तेन वयं भाव्यामहे ।

त्वेनासिद्धत्वाण्णिलोपः । भाविता, भावयिता । भाविष्यते, भावयिष्यते । अभाव्यत । भाव्येत । भाविषीष्ट, भावयिषीष्ट । अभावि । अभाविषाताम्, अभावयिषाताम् ॥ बुभूष्यते । बुभूषाञ्चक्रे । बुभूषिता । बुभूषिष्यते ॥ बोभूय्यते, बोभूयते ॥ अकृत्सार्वधातुकयोर्दीर्घः । स्तूयते[1] विष्णुः । स्ताविता, स्तोता । स्ताविष्यते, स्तोष्यते । अस्तावि । अस्ताविषाताम्, अस्तोषाताम् ॥ ऋ गतौ ॥ गुणोर्तीति गुणः । अर्यते ॥ स्मृ स्मरणे । स्मर्यते । सस्मरे । उपदेशग्रहणाच्चिण्वदिट् । आरिता, अर्ता । स्मारिता, स्मर्ता । अनिदितामिति नलोपः ।

भाविता । भावि इत्यस्माल्लुटस्तप्रत्यये तासि 'स्यसिच्' इत्यादिना चिण्वद्भावे इटि च कृते तस्याभीयत्वेनासिद्धत्वाण्णिलोपे डादेशे टिलोपे भावितेति, चिण्वद्भावाभावपक्षे 'आर्धधातुकस्येड्वलादेः' इतीटि गुणेऽयादेशे भावयितेति च सिद्धम् ।

बुभूष्यते । भूधातोः सनि द्वित्वे षत्वे जश्त्वे धातुत्वाल्लटस्तप्रत्यये टेरेत्वे यकि अल्लोपे तत्सिद्धिः ।

बोभूय्यते । भूधातोर्यङि द्वित्वे जश्त्वे 'गुणो यङ्लुकोः' इत्यभ्यासगुणे बोभूय इत्यस्य धातुत्वाल्लडादौ 'सार्वधातुके यक्' इति यकि 'अतोलोपः' इत्यल्लोपे तत्सिद्धिः ।

स्तूयते । ष्टु इत्यत्र षस्य सत्वे ष्टुत्वनिवृत्तौ स्तु इत्यस्माल्लटस्तप्रत्यये यकि 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घे तत्सिद्धिः ।

स्ताविता । स्तु इत्यस्माल्लुटस्तप्रत्यये तासि 'स्यसिच्' इति चिण्वद्भावे इटि चिण्वद्भावाद् वृद्धौ डादेशे टिलोपे स्तावितेति, चिण्वदभावपक्षे गुणे स्तोतेति ।

अर्यते । ऋधातोर्लटस्तप्रत्यये एत्वे यकि 'गुणोर्त्तिसंयोगाद्योः' इति गुणे रपरे तत्सिद्धिः ।

सस्मरे । स्मृधातोर्लिटस्तस्यैशि द्वित्वे 'उरत्' इत्यत्वे रपरे 'शर्पूर्वाः खयः' इत्यभ्याससकारस्य शेषे गुणे रपरे तत्सिद्धिः ।

आरिता । ऋधातोर्लुटस्तप्रत्यये तासि 'स्यसिच्' इति चिण्वदिटि

---

[1] देवदत्तो विष्णुं स्तौति इति देवदत्तेन विष्णुः स्तूयते ।

स्रस्यते । इदितस्तु नन्द्यते । संप्रसारणम् । इज्यते ॥ **तनोतेर्यकि, ६।४।४४॥** आकारोन्तादेशो वा स्यात् । तायते, तन्यते ॥ **तपोऽनुतापे च ३।१।६५॥** तपश्च्लेश्चिण् न स्यात् कर्मकर्तर्यनुतापे च । अन्वतप्त पापेन । घुमास्थेतीत्वम् । दीयते । धीयते । ददे ॥ **आतो युक् चिण्कृतोः ७।३।३३॥** आदन्तानां युगागमः स्याच्चिणि ञ्णिति कृति च दायिता दाता । दायिषीष्ट, दासीष्ट । अदायि । अदायिषाताम् । भज्यते ॥

चिण्वद्भावाद् वृद्धौ रपरे आरितेति, चिण्वदिडभावपक्षे गुणे अर्तेति ।

स्रस्यते । स्रंस्धातोर्लटस्तप्रत्यये एत्वे यकि 'अनिदिताम्' इति नलोपे तत्सिद्धिः ।

नन्द्यते । नदो लटस्तप्रत्यये एत्वे यकि 'इदितोनुम् धातोः' इति नुम् ।

इज्यते । यजो लटस्ते एत्वे यकि 'वचिस्वपियजादीनां किति' इति सम्प्रसारणम् ।

तायते । तन्धातोर्लटस्तप्रत्यये एत्वे यकि 'तनोतेर्यकि' इत्यात्वे दीर्घे तायते इति पक्षे तन्यते इति ।

अन्वतप्त । अनुपूर्वात्तपो लुङस्तप्रत्ययेऽटि यणि च्लौ 'चिण् भावकर्मणोः' इति च्लेश्चिणि प्राप्ते 'तपोऽनुतापे च' इति तन्निषेधे च्लेः सिचि 'झलो झलि' इति सलोपः ।

दीयते । दाधातोर्लटस्तप्रत्यये एत्वे यकि 'घुमास्थागापाजहातिसां हलि' इतीत्वम् ।

दायिता । दाधातोर्लुटस्तप्रत्यये तासि 'स्यसिच्' इति चिण्वदिटि 'आतो युक् चिण्कृतोः' इति युकि डादेशे टिलोपे दायितेति चिण्वदिटोऽभावपक्षे दातेति ।

अदायि । दाधातोर्लुङस्तप्रत्ययेऽटि च्लेश्चिणि आतोयुक् चिण्कृतोः' इति युकि तलोपः ।

भञ्जेश्च चिणि ६।४।३३॥ नलोपो वा स्यात् । अभाजि, अभञ्जि ॥ लभ्यते ॥ **विभाषा चिण्णमुलोः ७।१।६९॥** लभेर्नुनागमो वा स्यात् । अलम्भि, अलाभि ॥

इति भावकर्मप्रक्रिया ॥ ८ ॥ (पृ. २८३

औणादि ॥ [illegible]

अथ कर्मकर्तृप्रक्रिया ① पृ. ३५८

[1] यदा कर्मैव कर्तृत्वेन विवक्षितं तदा सकर्मकाणामप्यकर्मकत्वात्कर्तरि भावे च लकारः ॥ **कर्मवत्कर्मणा तुल्यक्रियः ३।१।८७॥** [2] कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत्स्यात् । कार्यातिदेशोऽयम् । तेन

अभाजि । भञ्ज्धातोर्लुङ्स्तप्रत्ययेऽटि च्लेश्चिणि 'चिणो लुक्' इति तस्य लुकि 'भञ्जेश्च चिणि' इति पाक्षिकनलोपे उपधावृद्धौ अभाजि इति, नलोपाभावे अभञ्जीति ।

अलम्भि । लभो लुङ्स्तप्रत्ययेऽटि च्लेश्चिणि तलुकि 'विभाषा चिण्णमुलोः' इति नुमि अनुस्वारे परसवर्णे च अलम्भीति, नुमोऽभावे उपधावृद्धौ अलाभीति ।

① फल और व्यापार धातु के अर्थ होते हैं। व्यापार का आश्रय कर्ता और फल का आश्रय कर्म होता है। जिसका फल और व्यापार भिन्न-भिन्न आश्रय में हो उसे सकर्मक और जिसका फल और व्यापार एक ही आश्रय में हो उसे अकर्मक .x.

इति भावकर्मप्रक्रिया ॥

---

[1] जब कर्म को ही कर्तृत्वेन विवक्षा की जाय तब सकर्मक भी धातु अकर्मक होजाते हैं । उनसे भाव और कर्ता में लकार होता है । भाव में लकार होने पर अनुक्त होने से कर्ता में तृतीया, कर्ता में लकार होनेपर उक्त होने से कर्ता में प्रथमा होती है ।

[2] कर्मस्था क्रिया के तुल्य है क्रिया जिसकी ऐसा कर्ता कर्मवत् होता है । इससे यगादि होते हैं । जहां पर कर्म में क्रियाकृत विलक्षणता दीख पड़े वहां कर्मस्था क्रिया होती है । जैसे पके चावल में

.x. कहते हैं॥ रूपचन्द्रिका॥ पृ. ६२८

यगात्मनेपदचिण्चिण्वदिटः स्युः । पच्यते फलम् । भिद्यते काष्ठम् । अपाचि अभेदि । भावे । भिद्यते काष्ठेन ॥

॥ इति कर्मकर्तृप्रक्रिया ॥ ९ ॥

* * *

अथ लकारार्थप्रक्रिया ।

अभिज्ञावचने लृट् ३।२।११२ ॥ स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट् । लङोऽपवादः ॥ वस निवासे ॥ स्मरसि कृष्ण गोकुले वत्स्यामः । एवं बुध्यसे, चेतयसे इत्यादिप्रयोगेऽपि ॥ **न यदि ३।२।११३** ॥ यद्योगे उक्तं न । अभिजानासि कृष्ण यद्वने अभुञ्ज्महि ॥

पच्यते फलम् । देवदत्तः फलम्पचतीत्यत्र देवदत्तस्य कर्तृत्वेनाविवक्षायां फलरूपस्य कर्मण एव कर्तृत्वेन विवक्षायां पच्धातोरकर्मकत्वात्कर्त्तरि लटि लटा कर्त्तुरुक्तत्वात् प्रथमायाम् 'कर्मवत्कर्मणा तुल्यक्रियः' इति फलस्य कर्त्तुः कर्मवद्भावात् 'भावकर्मणोः' इति आत्मनेपदे लटस्तप्रत्यये एत्वे 'सार्वधातुके यक्' इति यकि तत्सिद्धिः ।

भिद्यते काष्ठेन । काष्ठरूपस्य कर्मणः कर्तृत्वविवक्षया भावे लट आत्मनेपदे तप्रत्यये टेरेत्वे यकि काष्ठस्य कर्त्तुरनुक्तत्वात्तत्र तृतीया ।

इति कर्मकर्तृप्रक्रिया ॥

* * *

स्मरसीति । स्मरसीत्युपपदाद् वस्धातोर्भूतानद्यतने लङि प्राप्ते तं वाधित्वा 'अभिज्ञावचने लृट्' इति लृटि तत्स्थाने मस्प्रत्यये स्ये 'सः स्यार्धधातुके' इति सस्य तकारे 'अतो दीर्घो यञि' इति दीर्घे रुत्वे विसर्गे तत्सिद्धिः ।

अभीति । अभिजानासीत्युपपदाद् भुज्धातोः 'अभिज्ञावचने लृट्' इति लृटि प्राप्ते तस्य 'न यदि' इति निषेधाल्लुङादयः ।

...ग्रन्थालय, भरतनिधि, करौंदी वाराणसी-5

लट् स्मे ३।२।११८॥ लिटोऽपवादः । यजतिस्म युधिष्ठिरः ॥ **वर्तमानसामीप्ये वर्तमानवद्वा ३।३।१३१॥** वर्तमाने ये प्रत्यया उक्तास्ते वर्तमानसामीप्ये भूते भविष्यति च वा स्युः । कदा आगतोऽसि । अयमागच्छामि, अयमागमं वा । कदा गमिष्यसि । एष गच्छामि, गमिष्यामि वा ॥ **हेतुहेतुमतोर्लिङ् ३।३।१५६॥** वा स्यात् । कृष्णं नमेच्चेत्सुखं यायात् । कृष्णं नंस्यति चेत्सुखं यास्यति । (भविष्यत्येवेष्यते)। नेह । हन्तीति पलायते ॥ विधिनिमन्त्रणेति लिङ् । विधिः—प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्तनम् । यजेत ॥ निमन्त्रणं—नियोगकरणम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम् । इह भुञ्जीत ॥ आमन्त्रणं—कामचाराऽनुज्ञा । इहासीत ॥ अधीष्टं—सत्कारपूर्वको व्यापारः । पुत्रमध्यापयेद्भवान् ॥ संप्रश्नः—संप्रधारणम् । किं भो वेदमधीयीय उत तर्कम् ॥ प्रार्थनं-याच्ञा । भो भोजनं लभेय । एवं लोट् ॥ इति लकारार्थप्रक्रिया ॥ १० ॥

इति तिङन्तं समाप्तम् ॥

* * *

यजतिस्म । स्मोपपदाद् यज्धातोर्लिटं बाधित्वा 'लट् स्मे' इति लट् ।

अयमिति । कदा आगतोऽसि इति प्रश्ने अयमागच्छामीत्युत्तरम् । अत्र गम्धातोर्भूते लुङि प्राप्ते वर्तमानसामीप्यात्तं बाधित्वा 'वर्त्तमानसामीप्ये वर्तमानवद्वा' इति वर्तमानवद्भावात् लटि ततोमिबादयः । लटोऽभावपक्षे लुङि अयम् आगममिति ।

एषेति । कदा गमिष्यसीति प्रश्ने एष गच्छामीत्युत्तरम् । अत्र गम्धातोः भविष्यति लृटि प्राप्ते तं बाधित्वा वर्तमानसामीप्यात् 'वर्तमानसामीप्ये वर्तमानवद्वा' इति वर्तमानवद्भावाल्लटो मिबादयः ।

कृष्णमिति । अत्र कृष्णप्रणामः सुखहेतुरिति हेतुहेतुमद्भावसत्त्वात् नम्धातोः याधातोश्च लृटं बाधित्वा 'हेतुहेतुमतो लिङ्' इति लिङि तिबादयः ।

इति लकारार्थप्रक्रिया ॥

* * *

अथ कृदन्तकृत्यप्रक्रिया ।

धातोः ३।१।९१॥ आतृतीयाध्यायसमाप्तेर्ये प्रत्ययास्ते धातोः परे स्युः । कृदतिङिति कृत्संज्ञा ॥ **वासरूपोऽस्त्रियाम् ३।१।९४॥** अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य वाधको वा स्यात् स्त्र्यधिकारोक्तं विना ॥ **कृत्याः ३।१।९५॥** ण्वुल्तृचावित्यतः प्राक् कृत्यसंज्ञाः स्युः ॥ **कर्तरि कृत् ३।४।६७॥** कृत्प्रत्ययः कर्तरि स्यात्। इति प्राप्ते । **तयोरेव कृत्यक्तखलर्थाः ३।४।७०॥** एते भावकर्मणोरेव स्युः ॥ **तव्यत्तव्यानीयरः ३।१।९६॥** धातोरेते प्रत्ययाः स्युः । एधितव्यम्, एधनीयं त्वया । भावे औत्सर्गिकमेकवचनं क्लीवत्वं च। चेतव्यश्चयनीयो वा धर्मस्त्वया (वा०) केलिमर उपसंख्यानम् । पचेलिमा माषाः । पक्तव्या इत्यर्थः । भिदेलिमाः सरलाः । भेत्तव्या इत्यर्थः । कर्मणि प्रत्ययः ॥ **कृत्यल्युटो बहुलम् ३।३।९८॥** क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ॥ विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥ १ ॥ स्नात्यनेनेति स्नानीयं चूर्णम् । दीयतेऽस्मै दानीयो विप्रः ॥ **अचो यत् ३।१।९७॥**

एधितव्यम् । एध्धातोः 'कर्तरि कृत्' इतिसूत्रं वाधित्वा 'तयोरेव कृत्यक्तखलर्थाः' इतिनियमाद्भावे 'तव्यत्तव्यानीयरः' इति तव्यत्प्रत्यये इटि प्रातिपदिककार्यम् । अत्र कर्त्तुरनुक्तत्वात्तृतीया ।

चेतव्यः । त्वया धर्मश्चीयताम् इति विग्रहे चिधातोः कर्मणि 'तव्यत्तव्यानीयरः' इति तव्यप्रत्यये प्रातिपदिककार्यम् । अत्र धर्मरूपकर्मण उक्तत्वात्तत्र प्रथमा त्वमितिकर्त्तुरनुक्तत्वात्तत्र तृतीया ।

भिदेलिमाः । भिद्धातोः 'केलिमर उपसंख्यानम्' इति कर्मणि केलिमरप्रत्ययेऽनुबन्धलोपे प्रातिपदिककार्यम् ।

स्नानीयम् । स्नात्यनेनेतिविग्रहे स्नाधातोः 'कृत्यल्युटो वहुलम्' इति करणे अनीयरप्रत्यये प्रातिपदिककार्यम् ।

दानीयः । दीयतेऽस्मै इतिविग्रहे दाधातोः 'कृत्यल्युटो वहुलम्' इति सम्प्रदाने अनीयरप्रत्ययेप्रातिपदिककार्ये तत्सिद्धिः ।

अजन्ताद्धातोर्यत् स्यात् । चेयम् ॥ **ईद्यति ६।४।६५॥** यति परे आत ईत्स्यात् । देयम्[1] । ग्लेयम्[2] ॥ **पोरदुपधात् ३।१।९८॥** पवर्गान्तादुदुपधाद्यत्स्यात् । ण्यतोऽपवादः । शप्यम्[3] । लभ्यम्[4] ॥ **एतिस्तुशास्वृदृजुषः[5] क्यप् ३।१।१०९॥** एभ्यः क्यप् स्यात् ॥ **ह्रस्वस्य पिति कृति तुक् ६।१।७१॥** इत्यः[6] । स्तुत्यः[7] ॥ शासु अनुशिष्टौ ॥ **शास इदङ्हलोः ६।४।३४॥** शास उपधाया इत्स्यादङि हलादौ क्ङिति । शिष्यः[8] । वृत्यः[9] । आदृत्यः[10] । जुष्यः[11] ॥ **मृजेर्विभाषा ३।१।११३॥** मृजेः क्यब्वा । मृज्यः[12] ॥ **ऋहलोर्ण्यत् ३।१।१२४॥** ऋवर्णान्ताद्धल-

---

चेयम् । चेतुं योग्यमिति विग्रहे चिधातोः 'अचो यत्' इति यत् प्रत्यये लघूपधगुणे प्रातिपदिककार्यम् । पुगन्तलघूपधस्य च

देयम् । दाधातोः 'अचो यत्' इति यत्प्रत्यये, 'ईद्यति' इति आकारस्य ईकारे लघूपधगुणे प्रातिपदिककार्यम् । ~~सार्वधातुकार्धधातुकयोः~~ (७।३।८६) इति गुणे।

[illegible]

शप्यम् । शप्धातोः 'ऋहलोर्ण्यत्' इति ण्यतं बाधित्वा 'पोरदुपधात्' इतियत्प्रत्यये प्रातिपदिकत्वात्स्वाद्युत्पत्तिः

इत्यः । इण्धातोः 'एतिस्तुशास्वृदृजुषः क्यप्' इति क्यप्प्रत्ययेऽनुबन्धलोपे 'ह्रस्वस्य पिति कृति तुक्' इति तुगागमे कित्त्वाद् गुणाभावे प्रातिपदिककार्यम् ।

शिष्यः । शास्धातोः 'एतिस्तुशास्वृदृजुषः क्यप्' इति क्यप्यनुबन्धलोपे 'शास इदङ्हलोः' इत्युपधाया इत्वे 'शासिवसिघसीनां च' इति षत्वे प्रातिपदिककार्यम् ।

मृज्यः । मृज्धातोः 'मृजेर्विभाषा' इति क्यपि प्रातिपदिककार्यम् ।

---

१ दातुं योग्यमिति विग्रहः । २ ग्लातुं योग्यम् । ३ शप्तुं योग्यम् । शप आक्रोशे । ४ लब्धुं योग्यम् । ५ इण् गतौ, ष्टुञ् स्तुतौ, शासु अनुशिष्टौ, वृञ् वरणे, दृङ् आदरे, जुषी प्रीतिसेवनयोः । ६ एतुं योग्यः । ७ स्तोतुं योग्यः । ८ शासितुं योग्यः । ९ वरितुं योग्यः । १० आदर्तुं योग्यः । ११ जोषितुं योग्यः । १२ मार्जितुं योग्यः ।

न्ताच्च धातोर्ण्यत् । कार्यम्[1] । हार्यम्[2] । धार्यम्[3] ॥ **चजोः कु घिण्ण्यतोः** ७।३।५२॥ चजोः कुत्वं स्यात् घिति ण्यति च परे ॥ **मृजेर्वृद्धिः** ७।२।११४॥ मृजेरिको वृद्धिः सार्वधातुकार्धधातुकयोः । मार्ग्यः ॥ **भोज्यं[4] भक्ष्ये** ७।३।६९॥ भोग्यमन्यत् ॥

इति कृदन्तकृत्यप्रक्रिया ॥

* * *

अथ पूर्वकृदन्तम् ।

पृ.३८८ **ण्वुल्तृचौ** ३ ७।१।१३३॥ धातोरेतौ स्तः कर्तरि कृदिति कर्त्रर्थे ॥ **युवोरनाकौ** ७।१।१॥ यु वु एतयोरनाकौ स्तः । कारकः । कर्ता ॥

कार्यम् । कृधातोः 'ऋहलोर्ण्यत्' इति ण्यति वृद्धौ रपरे प्रातिपदिककार्यम् ।

मार्ग्यः । मृज्धातोः क्यपोऽभावपक्षे 'ऋहलोर्ण्यत्' इति ण्यत्प्रत्ययेऽनुबन्धलोपे 'चजोः कु घिण्ण्यतोः' इति जकारस्य कुत्वेन गकारे 'मृजेर्वृद्धिः' इति वृद्धौ रपरे प्रातिपदिककार्ये तत्सिद्धिः ।

भोग्यम् । भुज्धातोर्ण्यति लघूपधगुणे 'भोज्यं भक्ष्ये' इति भक्ष्येऽर्थे निपातनात्कुत्वाभावे भोज्यमिति भक्ष्यभिन्नेऽर्थे 'चजोः' इति कुत्वे भोग्यमिति ।

इति कृत्यप्रक्रिया ।

* * *

कारकः । करोतीति विग्रहे कृधातोः 'ण्वुल्तृचौ' इति कर्तरि अर्थे ण्वुल्प्रत्ययेऽनुबन्धलोपे 'युवोरनाकौ' इति वु इत्यस्य अक इत्यादेशे 'अचो ञ्णिति' इति वृद्धौ रपरे प्रातिपादिककार्ये तत्सिद्धिः ।

कर्ता । कृधातोः 'ण्वुल्तृचौ' इति तृचि गुणे रपरे निष्पन्नकर्तृ इत्यस्य कृदन्तत्वात्प्रातिपदिकत्वेन सौ 'ऋदुशनस्' इत्यनङि 'अप्तृन्' इति दीर्घे सुलोपे नलोपः ।

---

[1] कर्तुं योग्यम् । [2] हर्तुं योग्यम् । [3] धर्तुं योग्यम् । [4] भोक्तुं योग्यम् ।

CC0. In Public Domain, Digitization by eGangotri

गद्यपाठः – पृ. २८ १ सन्त्र (३।३।५६)

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ३।१।१३४॥ नन्द्यादेर्ल्युः, ग्रह्यादेर्णिनिः, पचादेरच् स्यात् । नन्दयतीति[१] नन्दनः । जनमर्दयतीति[२] जनार्दनः । लवणः[३] । ग्राही[४] । स्थायी[५] । मन्त्री[६] । पचः[७] । पचादिराकृतिगणः ॥ णिनि

इगुपधज्ञाप्रीकिरः कः ३।१।१३५ ॥ एभ्यः कः स्यात् ।

"अजोपि सर्वधातु अण्" (३।१।१३४)

नन्दनः । नन्दयतीतिविग्रहे 'नद्धातोरिदित्त्वान्नुमि णिच्प्रत्यये इति आध ार्तिकम् नन्दि इत्यस्मात् 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इतिल्युप्रत्ययेऽनुबन्धलोपे 'युवोरनाकौ' इति योरनादेशे णिलोपे प्रातिपदिककार्यम् ।

जनार्दनः । जनमर्दयतीति विग्रहे अर्दधातोर्णिचि 'नन्दिग्रहि' इति ल्युप्रत्यये योरनादेशे णिलोपे प्रातिपदिकत्वात्सौ 'कर्तृकर्मणाः कृति' इति जनमितिकर्मणि षष्ठीविभक्तौ षष्ठीसमासे समासत्वात्प्रातिपदिकत्वेन सुपो लुकि 'एकदेशविकृतमनन्यवत्' इति प्रातिपदिकत्वात्स्वाद्युत्पत्तिः ।

लवणः । लुनातीतिविग्रहे लूधातोः 'नन्दिग्रहि' इति ल्युप्रत्यये योरनादेशे निपातनात् णत्वं प्रातिपदिककार्यम् ।

ग्राही । ग्रह्धातोर्णिनिप्रत्ययेऽनुबन्धलोपे उपधावृद्धौ प्रातिपदिककार्यम् । गृह्णातीति ग्राही ।

मन्त्री । मत्रधातोरिदित्त्वान्नुमि णिचि णिनिप्रत्यये णिलोपे प्रातिपदिककार्यम् ।

स्थायी । ष्ठाइत्यत्र षस्य सत्वे स्था इत्यस्माण्णिनिप्रत्यये 'आतो युक् चिण्कृतोः' इति युकि प्रातिपदिकत्वात्स्वादिः ।

पचः । पचतीति विग्रहे पच्धातोः 'नन्दिग्रहि' इत्यचि प्रातिपदिकत्वम् ।

---

[१] टुनदि समृद्धौ । [२] अर्द हिंसायाम् । [३] लूञ् छेदने । [४] ग्रह उपादाने । [५] ष्ठा गतिनिवृत्तौ । [६] मन्त्रि गुप्तपरिभाषणे । [७] डुपचष् पाके ।

बुधः[1] । कृशः[2] । ज्ञः[3] । प्रियः[4] । किरः[5] ॥ **आतश्चोपसर्गे ३।१।१३६** ॥ उपसर्गे उपपदे आदन्ताद्धातोः कः स्यात् । प्रज्ञः । सुग्लः[6] ॥ **गेहे कः ३।१।१३४** ॥ गेहे कर्तरि ग्रहेः कः स्यात् ॥ गृहम्[7] ॥ **कर्मण्यण् ३।२।१** ॥ कर्मण्युपपदे धातोरण् प्रत्ययः स्यात् । कुम्भं करोतीति कुम्भकारः ॥ **आतोऽनुपसर्गे कः ३।२।२** ॥ आदन्ताद्धातोरनुपसर्गात्कर्मण्युपपदे कः स्यात् ।

“इगुपधज्ञाप्रीकिरः कः”

प्रियः । प्रीणातीतिविग्रहे प्रीधातोः ‘आतोऽनुपसर्गे कः’ इति कप्रत्यये इयङि सुः ।

किरः । किरतीतिविग्रहे कॄधातोः के ‘ॠत इद्धातोः’ इतीत्वे रपरत्वम् ।

प्रज्ञः । प्रपूर्वात् ज्ञाधातोः ‘आतश्चोपसर्गे’ इति कप्रत्यये ‘आतो लोप इटि च’ इत्याकारलोपे स्वादिः ।

सुग्लः । सुपूर्वाद् ग्लैधातोः के ‘आदेच उपदेशेऽशिति’ इत्यात्वे आलोपः ।

गृहम् । गृह्णाति धान्यादिकमिति विग्रहे ग्रह्धातोः के ‘ग्रहिज्या’ इति सम्प्रसारणम् ।

कुम्भकारः । कुम्भं करोतीतिविग्रहे ‘तत्रोपपदं सप्तमीस्थम्’ इति कुम्भशब्दस्योपपदसंज्ञा तथा च कुम्भमित्युपपदात् कृधातोः ‘कर्मण्यण्’ इत्यणि वृद्धौ रपरे ‘कर्तृकर्मणोः कृति’ इति कुम्भमिति कर्मणि षष्ठ्यां ‘गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेः’ इति परिभाषया कारशब्दात्सुबुत्पत्तेः पूर्वमेव कुम्भ अस् कार इत्यलौकिके विग्रहे ‘उपपदमतिङ्’ इति समासत्वात्प्रातिपदिकत्वेन सुपो लुकि एकदेशविकृतस्यानन्यत्वात्प्रातिपदिकत्वेन सौ तत्सिद्धिः ।

२।३।६५

---

[1] बुध्यते इति विग्रहः । बुध अवगमने । [2] कृश्यतीति कृशः । कृश तनूकरणे । [3] जानातीति ज्ञः । ज्ञा अवबोधने । [4] प्रीञ् तर्पणे कान्तौ च । [5] कॄ विक्षेपे । [6] सुष्ठु ग्लायतीति । ग्लै हर्षक्षये । [7] ग्रह उपादाने ।

अणोऽपवादः । आतो लोप इटि च । गोदः । धनदः । कम्बलदः । अनुपसर्गे किम्—गोसन्दायः । (ग.) मूलविभुजादिभ्यः कः । मूलानि विभुजति[1] मूलविभुजो रथः । आकृतिगणोयम् । महीध्रः । कुध्रः[2] ॥ **चरेष्टः ३।२।१६** ॥ अधिकरणे उपपदे । कुरुचरः ॥ **भिक्षासेनादायेषु च ३।२।१७** ॥ भिक्षाचरः । सेनाचरः । आदायेति ल्यबन्तम् । आदायचरः ॥ **कृञो हेतुताच्छील्यानुलोम्येषु ३।२।२०** ॥ एषु द्योत्येषु करोतेष्टः स्यात् ॥ **अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ८।३।४६** ॥ आदुत्तरस्यानव्ययस्य विसर्गस्य समासे नित्यं सादेशः करोत्यादिषु परेषु । यशस्करी विद्या । श्राद्धंकरः[3] । वचनंकरः[4] ॥

गोदः । गां ददातीतिविग्रहे गामित्युपपदात् दाधातोः 'आतोऽनुपसर्गे कः' इति कप्रत्यये आलोपे कर्मणि षष्ठी ततः पूर्ववत्समासः ३।२।६५॥

गोसन्दायः । गामित्युपपदात्सम्पूर्वाद् दाधातोः 'कर्मण्यण्' इत्यणि 'आतो युक् चिण्कृतोः' इति युकि कर्मणि षष्ठी ततः पूर्ववत्समासः । अनुपसर्गग्रहणाभावेऽत्रापि कप्रत्यये गोसन्दः इति स्यादतस्तदावश्यकम् ।

महीध्रः । महीं धरतीति विग्रहे महीमित्युपपदाद् धृधातोः के कर्मणि षष्ठी ततः समासादि ।

कुरुचरः । कुरुषु चरतीति विग्रहे 'चरेष्टः' इति टप्रत्यये उपपदसमासे प्रातिपदिककार्यम् ।

भिक्षाचरः । भिक्षां चरतीति विग्रहे 'भिक्षासेनादायेषु च' चर इति टप्रत्यये 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठ्याम् भिक्षा अस् कार इति विग्रहे 'उपपदमतिङ्' इतिसमासे प्रातिपदिककार्यम् ।

यशस्करीविद्या । विद्याया यशोहेतुत्वात् यशः करोतीतिविग्रहे कृधातोः 'कृञो हेतु' इति टप्रत्यये गुणे रपरे कर्मणि षष्ठ्यां यशस् अस्

---

[1] भुजो कौटिल्ये । [2] कुं धरतीति । धृञ् धारणे । [3] श्राद्धं करोति तच्छीलः । [4] वचनं करोतीति ।

एजेः खश् ३।२।२८ ॥ ण्यन्तादेजेः खश् स्यात् ॥ **अरुर्द्विषदजन्तस्य मुम् ६।३।६७** ॥ अरुषो द्विषतोऽजन्तस्य च मुमागमः स्यात्खिदन्ते परे न त्वव्ययस्य । शित्त्वाच्छबादिः । जनमेजयतीति[1] जनमेजयः ॥ **प्रियवशे वदः खच् ३।२।३८** ॥ प्रियंवदः । वशंवदः[2] ॥ **अन्येभ्योपि दृश्यन्ते ३।२।७५** ॥ मानिन् क्वनिप् वनिप् विच् एते प्रत्यया धातोः स्युः ॥ **नेड्वशि कृति ७।२।८** ॥ वशादेः कृत इण् न स्यात् ॥ शॄ हिंसायाम् ॥ सुशर्मा । प्रातरित्वा[3] ॥ **विड्वनोरनुनासिकस्याऽऽत् ६।४।४१** ॥ अनुनासिकस्याऽऽत्स्यात् । विजायत[4] इति विजावा ॥ ओणृ अपनयने ॥ अवावा । विच् ॥ रुष रिष

कर इति विग्रहे उपपदसमासे सुपो लुकि रुत्वे विसर्गे 'अतः कृकमि' इति सत्वे टित्त्वात्' टिड्ढाणञ्' इति ङीबादि ।

जनमेजयः । जनमेजयतीतिविग्रहे ण्यान्तादेज्धातोः 'एजेः खश्' इति खश्प्रत्ययेऽनुबन्धलोपे शित्त्वात् शपि गुणेऽयादेशे पररूपे कर्मषष्ठ्यां जन अस् एजय इति विग्रहे सुबुत्पत्तेः पूर्वमुपपदसमासे सुपो लुकि जन एजय इति स्थिते 'अरुर्द्विषदजन्तस्य मुम्' इति मुमि स्वादयः ।

प्रियंवदः । प्रियं वदतीतिविग्रहे वदधातोः 'प्रियवशे' इति खचि कर्मषष्ठ्यामुपपदसमासे सुपो लुकि मुम् ।

सुशर्मा । सुष्ठु शृणातीतिविग्रहे सुपूर्वात् शॄधातोः 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन्प्रत्ययेऽनुबन्धलोपे गुणे रपरे प्रातिपदिकत्वात्सौ दीर्घे सुलोपे नलोपः ।

प्रातरित्वा । प्रातः एतीतिविग्रहे इणः क्वनिपि 'ह्रस्वस्य पिति कृति तुक्' इति तुकि प्रातिपदिककार्यम् ।

विजावा । विपूर्वाज्जनधातोर्वनिपि 'विड्वनोः' इत्यात्वे दीर्घे विजावन्शब्दात्सौ दीर्घे सुलोपे नलोपः ।

अवावा । ओण्धातोर्वनिपि 'विड्वनोः' इति णस्यात्वे अवादेशे अवावन् शब्दात्सौ दीर्घे सुलोपे नलोपः ।

---

[1] एजृ कम्पने । [2] वशं वदति । [3] इण् गतौ । [4] जनी प्रादुर्भावे ।

CC0. In Public Domain. Digitization by eGangotri

इ-यत्नेन [illegible] [illegible] पद ।

हिंसायाम् ॥ रोट् । रेट् । सुगण् ॥ **क्विप् च ३।२।७६** ॥ अयमपि दृश्यते । उखास्रत् । पर्णध्वत्[1] । वाहभ्रट्[2] ॥ **सुप्यजातौ णिनिस्ताच्छील्ये ३।२।७८** ॥ अजात्यर्थे सुपि धातोर्णिनिस्ताच्छील्ये द्योत्ये । उष्णभोजी[3] ॥ **मनः ३।२।८२** ॥ सुपि मन्यतेर्णिनिः स्यात् । दर्शनीयमानी[4] ॥ **आत्ममाने खश्च ३।२।८३** ॥ स्वकर्मके मनने वर्त्तमानान्मन्यतेः सुपि खश् स्यात् चाण्णिनिः । पण्डितमात्मानं मन्यते पण्डितंमन्यः । पण्डितमानी ॥ **खित्यनव्ययस्य ६।३।६६** ॥

रोट् । रुष्धातोर्विच्यनुबन्धलोपे 'वेरपृक्तस्य' इति वलोपे लघूपधगुणे जश्त्वचर्त्वे ।

सुगण् । सुष्ठु गणयतीतिविग्रहे सुपूर्वाद् गणेर्विचि णिलोपे विचो लोपः ।

वेरपृक्तस्य ॥ ६।१।६७

उखास्रत् । उखायाः स्रंसत इतिविग्रहे स्रंसधातोः क्विपि तल्लोपे 'अनिदिताम्' इति नलोपे प्रातिपदिकत्वात्सौ पञ्चमीसमासत्वात्सुपोलुकि एकदेशविकृतस्यानन्यत्वात्सौ तस्य लोपे 'वसुस्रंसु' इति दत्वे चर्त्वम् ।

उष्णभोजी । उष्णं भुङ्क्ते तच्छील इति विग्रहे उष्णोपपदात् भुजधातोः 'सुप्यजातौ' इति णिनिप्रत्यये लघूपधगुणे कर्मणि षष्ठ्यामुपपदसामासे प्रातिपदिककार्यम् ।

दर्शनीयमानी । दर्शनीयं मन्यते इति विग्रहे दर्शनीयोपपदात् मनधातोः 'मनः' इति णिनिप्रत्यये कर्मणि षष्ठ्यामुपपदसमासः ।

पण्डितम्मन्यः । पण्डितमात्मानं मन्यते इति विग्रहे पण्डितोपपदान्मन्धातोः 'आत्ममाने खश्च' इति खशि शित्त्वात् शपं बाधित्वा 'दिवादिभ्यः श्यन्' इति श्यनि पररूपे कर्मषष्ठ्यामुपपदसमासे प्रातिपदिककार्ये पण्डितम्मन्य इति, णिनिप्रत्यये तु पण्डितमानीति ।

---

[1] पर्णाद् ध्वंसते इति । [2] वाहाद् भ्रश्यति । भ्रंशु अधः पतने दिवादिः । [3] भुज पालनाभ्यवहारयोः । [4] मन ज्ञाने ।

⑦ आमुख साधुता निष्ठा [illegible] लिङ्

प्रत्यै लोते । लिट् यह अनद्यतन भूत विषयक है

नि छा

खिदन्ते परे पूर्वपदस्य ह्रस्वः । ततो मुम् । कालिम्मन्या ॥ **करणे यजः ३।२।८५** ॥ करणे उपपदे भूतार्थे यजेर्णिनिः कर्तरि । सोमेनेष्टवान् सोमयाजी । अग्निष्टोमयाजी ॥ **दृशेः क्वनिप् ३।२।९४** ॥ कर्मणि भूते । पारं दृष्टवान् पारदृश्वा ॥ **राजनि युधिकृञः ३।२।९५** ॥ क्वनिप्स्यात् । युधिरन्तर्भावितण्यर्थः । राजानं योधितवान् राजयुध्वा । राजकृत्वा ॥ **सहे च ३।२।९६** ॥ कर्मणीति निवृत्तम् । सह योधितवान् सहयुध्वा । सहकृत्वा ॥ **सप्तम्यां जनेर्डः ३।२।९७** ॥ **तत्पुरुषे कृति बहुलम् ६।३।१४** ॥ ङेरलुक् । सरसिजम्, सरोजम् ॥ **उपसर्गे च संज्ञायाम् ३।२।९९** ॥ प्रजा स्यात्संततौ जने ॥ **क्तक्तवतू निष्ठा १।१।२६** ॥ एतौ निष्ठासंज्ञौ स्तः ॥ ⑦ **निष्ठा ३।२।१०२** ॥ भूतार्थवृत्तेर्धातोर्निष्ठा स्यात् । तत्र तयोरेवेति

क्यों नहीं लगता

कालिम्मन्या । कालीमात्मानं मन्यत इति विग्रहे खशि श्यनि पररूपे उपपदसमासे 'स्त्रियाः पुंवद्भाषित' इति पुंवद्भावं बाधित्वा परत्वात् 'खित्यनव्ययस्य' इति ह्रस्वे 'अरुर्द्विषद' इति मुमि टाबादि ।

सोमयाजी । सोमोपपदाद् यजधातोर्णिनिप्रत्यये उपधावृद्धौ उपपदसमासः ।

पारदृश्वा । पारोपपदाद् दृश्धातोः क्वनिप्प्रत्यये कर्मषष्ठ्यामुपपदसमासः ।

राजयुध्वा । राजन्शब्दोपपदात् युधधातोः क्वनिपि कर्मषष्ठ्यामुपपदसमासः ।

सरसिजम् । सरसि जातमिति विग्रहे सप्तम्यन्तसरस्शब्दोपपदाज्जन्धातोः 'सप्तम्यां जनेर्डः' इति डप्रत्यये डित्त्वाट्टिलोपे उपपदसमासत्वात्सप्तम्या लुकि प्राप्ते 'तत्पुरुषे कृति बहुलम्' इति तन्निषेधे सरसिजमिति, लुकि तु रुत्वे उत्वे गुणे सरोजमिति ।

प्रजा । प्रपूर्वाज्जनः 'उपसर्गे च संज्ञायाम्' इति डप्रत्यये टिलोपे समासे टाप् ।

---

१ यज देवपूजा । २ दृशिर् प्रेक्षणे । ३ युध संप्रहारे । ४ जनी प्रादुर्भावे ।

भावकर्मणोः क्तः । कर्तरि कृदिति कर्तरि क्तवतुः । उकारेत्तौ । स्नातं मया । स्तुतस्त्वया विष्णुः । विश्वं कृतवान् विष्णुः ॥ **रदाभ्यां निष्ठातो नः पूर्वस्य च दः ।८।२।४२ ॥** रदाभ्यां परस्य निष्ठातस्य नः स्यात् निष्ठापेक्षया पूर्वस्य धातोर्दस्य च ॥ शॄ हिंसायाम् ॥ ऋत इत् । रपरः । णत्वम् । शीर्णः । भिन्नः[1] । छिन्नः[2] **संयोगादेरातो धातोर्यण्वतः ८।२।४३॥** निष्ठातस्य नः स्यात् । द्राणः[3] । ग्लानः[4] ॥ **ल्वादिभ्यः ८।२।४४॥** एकविंशतेर्लूञादिभ्यः प्राग्वत् । लूनः ॥ ज्या धातुः ॥ ग्रहिज्येति संप्रसारणम् ॥ **हलः ६।४।२॥** अङ्गावयवाद्धलः परं यत्संप्रसारणं तदन्तस्य दीर्घः ।

स्नातं मया । अहमस्नासिषमिति विग्रहे स्नाधातोर्भावे 'निष्ठा' इति क्तप्रत्यये कृदन्तत्वात्प्रातिपदिककार्ये कर्तुरनुक्तत्वात्तृतीया ।

स्तुतः । त्वं विष्णुमस्तौषीरितिविग्रहे ष्टुधातोः षस्य सत्वे कर्मणि क्ते प्रातिपदिककार्यम् । अत्र कर्मण उक्तत्वात्तत्र प्रथमा । कर्त्तुरनुक्तत्वात्तत्र तृतीया ।

विश्वमिति । विष्णुर्विश्वमकार्षीदिति विग्रहे कृधातोः कर्तरि क्तवतुप्रत्ययेऽनुबन्धलोपे प्रातिपदिकत्वात् कृतवत् शब्दात्सौ 'उगिदचाम्' इति नुमि 'अत्वसन्तस्य' इति दीर्घे सुलोपे संयोगान्तलोपः । अत्र कर्त्तुरुक्तत्वात्तत्र प्रथमा । कर्मण अनुक्तत्वाद् द्वितीया ।

शीर्णः । शॄधातोः क्ते 'ॠत इद्धातोः' इतीत्वे रपरे 'हलि च' इति दीर्घे 'रदाभ्याम्' इति तस्य नत्वे णत्वम् ।

भिन्नः । भिदः क्ते 'रदाभ्याम्' इति तकारस्य दकारस्य च नकारे प्रातिपदिककार्यम् ।

द्राणः । द्राधातोः क्ते 'संयोगादेः' इति तस्य नत्वे णत्वे प्रातिपदिकत्वात्सुः ।

---

१ भिदिर विदारणे । २ छिदिर द्वैधीकरणे । ३ द्रा कुत्सायां गतौ ४ ग्लै हर्षक्षये ।

जीनः ॥ **ओदितश्च ८।२।४५॥** भुजो[2] भुग्नः । टुओश्वि[3] उच्छूनः ॥ **शुषः कः ८।२।५१॥** निष्ठातस्य कः ॥ शुष्कः ॥ **पचो वः ८।२।५२॥** पक्वः ॥ क्षै क्षये ॥ **क्षायो मः ८।२।५३॥** क्षामः ॥ **निष्ठायां सेटि ६।४।५२॥** णेर्लोपः । भावितः । भावितवान् ॥ दृह हिंसायाम् ॥ **दृढः स्थूलबलयोः ७।२।२०॥** स्थूले बलवति च निपात्यते ॥ **दधातेर्हिः ७।४।४२॥** तादौ किति । हितम् ॥ **दो दद् घोः ७।४।४६॥** घुसंज्ञकस्य दा इत्यस्य दथ् स्यात् तादौ किति । चर्त्वम् । दत्तः ॥ **लिटः कानज्वा ३।२।१०६॥ क्वसुश्च ३।२।१०७॥** लिटः कानच् क्वसुश्च वा स्तः । तङानावात्मनेपदम् । चक्राणः ॥ **म्वोश्च ८।२।६५॥** मान्तस्य धातोर्नत्वं

जीनः । ज्याधातोः क्ते 'ग्रहिज्या' इति सम्प्रसारणे पूर्वरूपे 'हलः' इति दीर्घे 'ल्वादिभ्यश्च' इति तस्य नत्वे सौ रुत्वे विसर्गः ।

भुग्नः । भुज्धातोः क्ते नत्वस्यासिद्धत्वात्पूर्वं 'चोः कुः' इति कुत्वे ततः 'ओदितश्च' इति तस्य नत्वे सौ रुत्वे विसर्गे तत्सिद्धिः ।

उच्छूनः । उत्पूर्वात् श्विधातोः क्ते 'वचिस्वपियजादीनां किति' इति सम्प्रसारणे पूर्वरूपे 'श्वीदितो निष्ठायाम्' इतीण्निषेधे 'हलः' इति दीर्घे 'ओदितश्च' इति तकारस्य नकारे चुत्वे छत्वम् ।

शुष्कः । शुष्धातोः क्ते 'शुषः कः' इति तकारस्य ककारः ।

पक्वः । पचः क्ते 'चोः कुः' इति कुत्वे 'पचो वः' इति तस्य वत्वे सौ रुत्वे विसर्गः ।

क्षामः । क्षैधातोः क्ते 'आदेच' इत्यात्वे 'क्षायो मः' इति तस्य मत्वे सुः ।

दृढः । दृह्धातोः क्ते 'दृढः स्थूलबलयोः' इति निपातनात् क्तस्य इडभावे तकारस्य ढत्वे हकारस्य लोपे च कृते सौ रुत्वे विसर्गः ।

चक्राणः । कृधातोर्लिटि 'लिटः कानज्वा' इति लिटः कानच्यनुबन्धलोपे द्वित्वे 'उरत्' इत्यत्वे रपरे हलादिशेषे यणि चुत्वे णत्वे सुः ।

---

१ ज्या वयोहानौ । २ भुजो कौटिल्ये । ३ टुओश्वि गतिवृद्ध्योः । ४ शुष शोषणे ।

म्वोः परतः। जगन्वान् ॥ **लटः शतृशानचावप्रथमासमानाधिकरणे ३।२।१२४॥** अप्रथमान्तेन समानाधिकरणे लट एतौ वा स्तः। शबादिः। पचन्तं चैत्रं पश्य ॥ **आने मुक् ७।२।८२॥** अदन्ताङ्गस्य मुगागमः स्यादाने परे। पचमानं चैत्रं पश्य। लडित्यनुवर्तमाने पुनर्लड्ग्रहणात्प्रथमासामानाधिकरण्येऽपि क्वचित्। सन् द्विजः ॥ **विदेः शतुर्वसुः ७।१।३६॥** वेत्तेः परस्य शतुर्वसुरादेशो वा। विदन्[१]। विद्वान् ॥ **तौ सत् ३।२।१२७॥** तौ शतृशानचौ सत्संज्ञौ स्तः ॥ **लृटः सद्वा ३।३।१४॥** व्यवस्थितविभाषेयम्। तेनाप्रथमासामानाधिकरण्ये प्रत्ययोत्तरपदयोः संबोधने लक्षणहेत्वोश्च नित्यम्। करिष्यन्तं करिष्यमाणं पश्य ॥ **आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु ३।२।१३४॥** क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययास्तच्छीलादिषु कर्तृषु बोध्याः ॥ **तृन् ३।२।१३५॥**

३८०

जगन्वान्। गमो लिटि 'क्वसुश्च' इति लिटः क्वसौ द्वित्वे हलादिशेषे चुत्वे 'म्वोश्च' इति मस्य नत्वे प्रातिपदिकत्वात्सौ उगित्त्वान्नुमि 'सान्तमहतः' इति दीर्घे सुलोपे संयोगान्तलोपः।

पचन्तम्। पचो लटि 'लटः शतृ' इति लटः शत्रादेशेऽनुबन्धलोपे शपि पररूपे प्रातिपदिकत्वादमि नुम्।

पचमानम्। पचो लटः शानच्यनुबन्धलोपे शपि दीर्घे 'आने मुक्' इति मुगागमे प्रातिपदिकत्वादम्।

सन्द्विजः। 'वर्तमाने लट्' इत्यतो लडित्यनुवर्तमाने 'लटः शतृ' इति सूत्रे पुनर्लड्ग्रहणात् प्रथमासामानाधिकरण्येऽपि क्वचित् शतृशानचोर्विधानात् अस्धातोर्लटः शतृप्रत्यये शपो लुकि 'श्नसोरल्लोपः' इत्यल्लोपे सौ नुमि सुलोपे संयोगान्तलोपः।

करिष्यन्तम्। कृधातोर्लृटः शत्रादेशे स्ये इटि गुणे रपरे षत्वे पररूपे प्रातिपदिकत्वादमि नुम्।

---

[१] विदज्ञाने। वेत्तीति विग्रहः।

कर्ता कटान् ॥ **जल्पभिक्षकुट्टलुण्ठवृङः षाकन् ३।२।१५५॥ षः प्रत्ययस्य १।३।६॥** प्रत्ययस्यादिः ष इत्संज्ञः स्यात् । जल्पाकः[1] । भिक्षाकः[2] । कुट्टाकः[3] । लुण्ठाकः[4] । वराकः[5], वराकी ॥ **सनाशंसभिक्ष उः ३।२।१६८॥** चिकीर्षुः । आशंसुः । भिक्षुः ॥ **भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप् ३।२।१७७॥** विभ्राट्[6] । भाः ॥ **राल्लोपः ६।४।२१॥** रेफाच्छ्वोर्लोपः क्वौ झलादौ क्ङिति । धूः । विद्युत् । ऊर्क् । पूः । दृशिग्रहणस्यापकर्षाज्जवतेर्दीर्घः । जूः । ग्रावस्तुत् ।

कर्ता कटान् । कटान् करोति तच्छील इति विग्रहे कृधातोस्तृनि गुणे रपरे सुः । अत्र 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' इति कर्मणि षष्ठीनिषेधः ।

कटान् करोति तत्स्व[illegible] इति विग्र
″ ″ तद्धर्मा इति विग्रहः

चिकीर्षुः । कृधातोः सनि निष्पन्नचिकीर्षधातोः 'सनाशंस' इति उप्रत्यये सुः ।

विभ्राट् । विपूर्वाद्भ्राजः 'भ्राजभास' इति क्विपि तल्लोपे सुलोपे 'व्रश्च' इति षत्वे जश्त्वचर्त्वे ।

धूः । धुर्वीधातोः क्विपो लोपे 'राल्लोपः' इति वलोपे सुलोपे 'र्वोरुपधाया' इति दीर्घः ।

ऊर्क् । ऊर्जः क्विपो लोपे सुलोपे 'रात्सस्य' इति नियमात्संयोगान्तलोपाभावे चुत्वम् ।

पूः । पॄधातोः क्विपो लोपे 'उदोष्ठ्यपूर्वस्य' इत्युत्वे रपरे सुलोपे 'र्वोः' इति दीर्घः ।

जूः । जुधातोः क्विपो लोपे 'भ्राजभास' इत्यत्र 'अन्येभ्योऽपि दृश्यते' इत्यतो दृशिग्रहणस्यापकर्षाद्दीर्घः ।

---

[1] जल्प व्यक्तायां वाचि । जल्पतीति । [2] भिक्ष भिक्षायां लाभेऽलाभे च । [3] कुट्ट छेदने । कुट्टयतीतिविग्रहः । [4] लुण्ठयतीति । लुण्ठ स्तेये । लुण्ठतेः षाकनिति माधवः । [5] वृङ् संभक्तौ । [6] भ्राजृ दीप्तौ । भास दीप्तौ । धुर्वी हिंसायाम् । द्युत दीप्तौ।ऊर्ज बलप्राणनयोः । पॄ पालनपूरणयोः । जु गतौ सौत्रः । ग्रावपूर्वःष्टुञ स्तुतौ ।

(क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च) । वक्तीति वाक् ॥ **च्छ्वोः शूडनुनासिके च ६।४।१९॥** सतुक्कस्य च्छस्य वस्य च क्रमात् श् ऊठ् इत्यादेशौ स्तोऽनुनासिके क्वौ झलादौ च क्ङिति । पृच्छतीति प्राट् । आयतं स्तौतीति आयतस्तूः । कटं प्रवते कटप्रूः । जूरुक्तः । श्रयति हरिं श्रीः ॥ **दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ३।२।१८२॥** दाबादेः ष्ट्रन् स्यात्करणेऽर्थे । दात्यनेन दात्रम् ॥ **तितुत्रतथसिसुसरकसेषु च ७।२।९॥** एषां दशानां कृत्प्रत्ययानामिण् न । शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् । मेढ्रम् । पत्रम् । दंष्ट्रा । नद्ध्री ॥ **अर्तिलूधूसूखनसहचर इत्रः ३।२।१८४॥** अरित्रम् । लवित्रम् ।

वाक् । वच्धातोः 'क्विब्वचि' इतिवार्तिकेन क्विपि उपधादीर्घे 'वचिस्वपि' इतिसूत्रप्राप्तसम्प्रसारणाभावे सुलोपे कुत्वम् ।

प्राट् । प्रच्छधातोः 'क्विब्वचि' इति क्विपि दीर्घे 'ग्रहिज्या' इतिप्राप्तसम्प्रसारणाभावे 'च्छ्वोः' इति च्छस्य शादेशे क्विपोलोपे सुलोपे 'व्रश्च' इति षत्वे जश्त्वचर्त्वे ।

आयतस्तूः । अत्र स्तुधातोः 'क्विब्वचि' इति क्विपि दीर्घे कर्मषष्ठ्या समासः ।

इति पूर्वकृदन्तम् ।

* * *

---

१ वच परिभाषणे । प्रच्छ ज्ञीप्सायाम् । प्रुङ् गतौ । श्रीञ् सेवायाम् । २ दाप् लवने । णीञ् प्रापणे । शस हिंसायाम् । यु मिश्रणामिश्रणयोः । युज समाधौ । ष्टुञ् स्तुतौ । तुद व्यथने । षिञ् बन्धने । षिच क्षरणे । मिह सेचने । पत्लृ गतौ दंश दशने । णह बन्धने । ३ ऋ गतौ । लूञ् छेदने । धू विधूनने कुटादिः । षू प्रेरणे । खनु अवदारणे । षह मर्षणे । चर गतिभक्षणयोः ।

धुवित्रम् । सवित्रम् खानित्रम् । साहित्रम् । चरित्रम् ॥ **पुवः संज्ञायाम् ३।२।१८५** ॥ पवित्रम् ॥

इति पूर्वकृदन्तम् ॥

* * *

अथोणादयः ।

कृवापाजिमिस्वदिसाध्यशूभ्य[1] उण् ॥ १ ॥ करोतीति कारुः । वातीति वायुः । पायुर्गुदम् । जायुरौषधम् । मायुः पित्तम् । स्वादुः । साध्नोति परकार्यमिति साधुः । आशु शीघ्रम् ॥ **उणादयो बहुलम् ३।३।१॥** एते वर्तमाने संज्ञायां च बहुलं स्युः । केचिदविहिता अप्यूह्याः ॥

संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ॥

॥ इत्युणादयः ॥

* * *

अथोत्तरकृदन्तम् ।

तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ३।३।१०॥ क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः । मान्तत्वादव्ययत्वम् ।

कारुः । कृधातोः 'कृवापा' इत्युणि 'अचो ञ्णिति' इति वृद्धौ रपरत्वे सुः । **वायुः** । वाधातोरुणि 'आतो युक् चिण्कृतोः' इति युक् । **पायुः** । पाधातोरुणि युक् । **जायुः** । जिधातोरुणि वृद्धौ आयादेशः । **मायुः** । मिधातोरुणि वृद्धिं बाधित्वा 'मीनातिमिनोति' इत्यात्वे 'आतो युक् चिण्कृतोः' इति युक् । **स्वादुः** । स्वद्धातोरुणि 'अत उपधायाः' इति वृद्धिः । **आशु** । अश्धातोरुणि उपधावृद्धिः । आशु, इति विलम्बाभावमात्रपरत्वे क्लीबम् ।

इत्युणादयः ॥

* * *

---

[1] डुकृञ् करणे । वा गतिगन्धनयोः । पा पाने । पा रक्षणे । जि अभिभवे । डुमिञ् प्रक्षेपणे । स्वद आस्वादने । साध संसिद्धौ । अशू व्याप्तौ ।

कृष्णं द्रष्टुं याति । कृष्णं दर्शको याति ॥ **कालसमयवेलासु तुमुन् ३।३।१६७॥** कालार्थेषूपपदेषु तुमुन् । कालः समयो वेला वा भोक्तुम् ॥ **भावे ३।३।४८॥** सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् । पाकः ॥ **अकर्तरि च कारके संज्ञायाम् ३।३।१९॥** कर्तृभिन्ने कारके घञ् स्यात् ॥ **घञि च भावकरणयोः ६।४।२७॥** रञ्जेर्नलोपः स्यात् । रागः । अनयोः किम्—रज्यत्यस्मिन्निति रङ्गः ॥ **निवासचितिशरीरोपसमाधानेष्वादेश्च कः ३।३।४१॥** एषु चिनोतेर्घञ् आदेश्च ककारः । उपसमाधानं राशीकरणम् । निकायः । कायः । गोमयनिकायः ॥ **एरच् ३।३।५६ ॥** इवर्णान्तादच् । चयः । जयः ॥ **ऋदोरप् ३।३।**

द्रष्टुम् । दृश्धातोः 'तुमुन्ण्वुलौ' इति तुमुन्प्रत्ययेऽनुबन्धलोपे 'सृजिदृशोर्झल्यमकिति' इति अमि यणि 'व्रश्च' इति षत्वे ष्टुत्वे मान्तत्वात् 'कृन्मेजन्तः' इत्यव्ययत्वात्सुपो लुक् । **दर्शकः** । दृशो ण्वुलि वोरकि गुणे रपरे प्रातिपदिकत्वात्सुः ।

पाकः । पच्धातोः 'भावे' इति घञि 'चजोः' इति कुत्वे उपधावृद्धौ सुः ।

रागः । रञ्ज्धातोः 'अकर्त्तरि' इति घञि 'चजोः' इति कुत्वं 'घञि च' इति नलोपे उपधावृद्धिः

निकायः । निपूर्वात् चिधातोः 'निवास' इति घञि चस्य कत्वं वृद्धौ आयादेशे सुः । **चयः** । चिधातोराचि गुणेऽयादेशः ।

संज्ञासु-अनादिसंज्ञासु, न तु सर्वासु, धातुरूपाणि ऊह्यन्ते । ततः परे प्रत्ययाश्च ऊह्यन्ते । यथा शङ्कुलाशब्दे 'हृषेरुलच्' इति उलच्प्रत्ययं दृष्ट्वा शङ्कधातुरूह्यते । ऋफिड इत्यादौ ऋधातोः फिडफिड्डादिप्रत्यया ऊह्यन्ते । तयोः कित्त्वं च कल्प्यते । कार्यात्-ऋफिड इत्यादौ गुणनिषेधादिरूपकार्यानुरोधात्-अनुबन्धं ककारादिकं विद्यात्-कल्पयेत् । एतदुणादिषु शास्त्रं शासितव्यमित्यर्थः । १ दृशिर प्रेक्षणे । २ रञ्ज रागे ।

⊙ मत भाष्यकारमतम् ।। ३।३।५८ [illegible]
मतभेदः अष्टाध्यायीभाष्यम् - द्रष्टव्यम् ।।

CC0. In Public Domain, Digitization by eGangotri

५७॥ ऋदुवर्णान्तादुवर्णान्ताच्चाऽप् । करः[1] । गरः[2] । यवः[3] । लवः[4] । स्तवः । पवः[5] ॥ (वा) "घञर्थे कविधानम्" । प्रस्थः[6] । विघ्नः[7] ॥ **ड्वितः क्त्रिः ३।३।८८॥ क्त्रेर्मम्नित्यम् ४।४।२०॥** क्त्रिप्रत्ययान्तात् मप् निर्वृत्तेऽर्थे । पाकेन निर्वृत्तं पक्त्रिमम्[8] । डुवप् उप्त्रिमम्[9] ॥ **ट्वितोऽथुच् ३।३।८९॥** टुवेपृ कम्पने वेपथुः ॥ [10]**यजयाचयतविच्छप्रच्छरक्षो नङ् ३।३।९०॥** यज्ञः । याच्ञा । यत्नः । विश्नः । प्रश्नः । रक्षणः ॥ **स्वपो नन् ३।९३।१॥** स्वप्नः[11] ॥ **उपसर्गे घोः किः ३।३।९२॥** प्राधिः । उपधिः । **स्त्रियां क्तिन् ४।३।९४॥** स्त्रीलिङ्गे भावे क्तिन् स्यात् । घञोऽपवादः । कृतिः । स्तुतिः । (ग) ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः । तेन नत्वम् । कीर्णिः[12] । लूनिः । धूनिः । पूनिः । (ग) ⑦ संपदादिभ्यः क्विप् ॥ संपत् ।

सि० कौमुदी पृ. ६२०

३।४।२०।२१।।

करः । कृधातोरपि गुणे रपरत्वम् । **प्रस्थः** । प्रपूर्वात्स्थाधातो 'घञर्थे कविधानम्' इति के 'आतो लोप इटि च' इत्यालोपः ।

विघ्नः । विपूर्वाद् हनः घञर्थे के 'गमहन' इत्युपधालोपे 'हो हन्तेः' इति कुत्वम् ।

उप्त्रिमम् । वपः क्त्रौ मपि 'वचिस्वपि' इति सम्प्रसारणे पररूपादि । **यज्ञः** । यजो नङि चुत्वम् । **विश्नः** । विच्छो नङि 'च्छ्वोः' इति शादेशः । **प्रधिः** । प्रपूर्वाद् धाधातोः किप्रत्यये 'आतो लोप इटि च' इत्यालोपः ।

कीर्णिः । कॄधातोः 'स्त्रियां क्तिन्' इति क्तिनि 'ॠत इद्धातोः' इतीत्वे रपरे 'हलि च' इतिदीर्घे 'ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः' इति निष्ठावद्भावात् तकारस्य नत्वे णत्वे सुः ।

---

१ कॄ विक्षेपे, कॄ हिंसायाम् इति वा । २ गॄ निगरणे, गॄ शब्दे इति वा । ३ यु मिश्रणामिश्रणयोः । ४ लूञ् छेदने । ५ पूञ् पवने । ६ प्रतिष्ठन्तेऽस्मिन् धान्यानि जना वेति विग्रहः । ७ विहन्यस्मिन्मनांसीति विग्रहः । ८ डुपचष् पाके । ९ डुवप् बीजसन्ताने । १० यज देवपूजा । टुयाचृ याच्ञायाम् । यती प्रयत्ने । विच्छ गतौ । प्रच्छ ज्ञीप्सायाम् । रक्ष पालने । ११ ञिष्वप् शये । १२ कॄ विक्षेपे ।

विपत् । आपत् । (वा) क्तिन्नपीष्यते । संपत्तिः । विपत्तिः । आपत्तिः । **ऊतियूतिजूतिसातिहेतिकीर्तयश्च**[1] ३।३।९७॥ एते निपात्यन्ते ॥ **ज्वरत्वरस्रिव्यविमवामुपधायाश्च**[2] ६।४।२०॥ एषामुपधावकारयोरूठ् अनुनासिके क्वौ झलादौ क्ङिति ॥ अतः क्विप् । जूः । तूः । स्रूः । ऊः । मूः । **इच्छा** ३।३।१०१॥ इषेर्निपातोयम् ॥ **अ प्रत्ययात्** ३।३।१०२॥ प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारः प्रत्ययः स्यात् । चिकीर्षा । पुत्रकाम्या । **गुरोश्च हलः** ३।३।१०३॥ गुरुमतो हलन्तात्स्त्रियामकारः प्रत्ययः स्यात् । ईहा[3] ॥ **ण्यासश्रन्थो युच्** ३।३।१०७॥

ऊतीति । अवधातोः 'ऊतियूति' इति क्तिनि तस्य निपातनादुदात्तत्वे 'ज्वरत्वर' इति अकारवकारयोरूठि ऊतिरिति । युधातोः जुधातोश्च क्तिनि निपातनाद्दीर्घः । षोऽन्तकर्मणि इत्यस्मात् क्तिनि 'आदेच' इत्यात्वे 'द्यतिस्यतिमास्थामित्तिकिति' इतीत्वे प्राप्ते तदभावनिपातनात्सातिरिति । अथवा सन्धातोः क्तिनि 'जनसन' इत्यात्वे सातिरिति । अत्र क्तिन उदात्तत्वं निपात्यते । हन्धातोः क्तिनि नकारस्य निपातनादित्त्वे 'आद्गुणः' इति गुणे हेतिरिति । यद्वा हिधातोः क्तिनि निपातनाद्गुणे हेतिरिति । ण्यन्तकृतधातोः 'ण्यासश्रन्थो युच्' इति युचं बाधित्वा निपातनात् क्तिनि इत्वे रपरे दीर्घे 'झरो झरि सवर्णे' इति तलोपे कीर्तिरिति ।

जूः । ज्वरधातोः क्विपि 'ज्वरत्वर' इति अकारवकारयोरूठ् । इच्छा । इष्धातोर्निपातनाद्भावे शप्रत्यये यकोऽभावे च छे तुकि चुत्वे टाप् । चिकीर्षा । कृधातोः सनि द्वित्वादिके चिकीर्ष इत्यस्य धातुत्वात् अप्रत्यये टाप् ।

---

[1] अव रक्षणे । यु मिश्रणामिश्रणयोः । जु गतौ । षोऽन्तकर्मणि । षणु दाने इति वा । हन् हिंसागत्योः, हि गतौ वृद्धौ च इति वा । [2] ज्वर रोगे । ञित्वरा सम्भ्रमे । स्रिवु गतिशोषणयोः । अव रक्षणे । मव बन्धने । [3] ईह चेष्टायाम् ।

अकारस्यापवादः। कारणा। हारणा॥ **नपुंसके भावे क्तः ३।३।११४॥ ल्युट् च ३।३।११५॥** हसितम्[1], हसनम्॥ **पुंसि संज्ञायां घः प्रायेण ३।३।११८॥ छादेर्घेऽद्व्युपसर्गस्य ६।४।९६॥** द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वो घे परे। दन्ताश्छाद्यन्तेऽनेनेति दन्तच्छदः[2]। आकुर्वन्त्यस्मिन्नित्याकरः॥ **अवे तॄस्त्रोर्घञ् ३।३।१२०॥** अवतारः[3] कूपादेः। अवस्तारो[4] जवनिका॥ **हलश्च ३।३।१२१॥** हलन्ताद् घञ्। घापवादः। रमन्ते[5] योगिनोऽस्मिन्निति रामः। अपमृज्यतेऽनेन[6] व्याध्यादिरित्यपामार्गः॥ **ईषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल् ३।३।१२६॥ खल् ३।३।२६॥** करणाधिकरणयोरिति निवृत्तम्। एषु दुःखसुखार्थेषूपपदेषु खल् तयोरेवेति भावे कर्मणि च। कृच्छ्रे—दुष्करः कटो भवता। अकृच्छ्रे—ईषत्करः। सुकरः॥ **आतो युच् ३।३।१२८॥** खलोऽपवादः। ईषत्पानः सोमो भवता। दुष्पानः। सुपानः॥ **अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा ३।४।१८॥** प्रतिषेधार्थयोरलंखल्वोरुपपदयोः क्त्वा स्यात्। प्राचां ग्रहणं पूजार्थम्। अमैवाव्ययेनेति नियमान्नोपपदसमासः। दो दद्धोः। अलं दत्त्वा। घुमास्थेतीत्वम्। पीत्वा खलु। अलंखल्वोः किम्—मा कार्षीत्। प्रतिषेधयोः किम्—अलंकारः॥ **समानकर्तृकयोः[7] पूर्वकाले ३।४।२१॥** समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः

कारणा। कृधातोर्णिचि कारि इत्यस्माद् युचि योरनादेशे णिलोपे णत्वे टाप्। **आकरः।** आङ्पूर्वात्कृञो घे गुणे रपरत्वम्। **अपामार्गः।** अपपूर्वान्मृज्धातोः 'हलश्च' इति घञि 'चजोः' इति कुत्वे 'मृजेर्वृद्धिः' इति वृद्धौ 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति दीर्घः। **दुष्करः।**

---

[1] हसे हसने। [2] छद अपवारणे। [3] तॄ प्लवनतरणयोः। [4] स्तॄञ् आच्छादने। [5] रमु क्रीडायाम्। [6] मृजूष् शुद्धौ। [7] समान (एक ही) है कर्ता जिनका ऐसे जो अनेक धात्वर्थ उनके मध्य में पूर्वकाल है जिसका उस धात्वर्थ में विद्यमानधातु से क्त्वा प्रत्यय होता है।

क्त्वा स्यात् । भुक्त्वा व्रजति । द्वित्वमतन्त्रम् । भुक्त्वा पीत्वा व्रजति ॥ **न क्त्वा सेट् १।२।१८॥** सेट् क्त्वा किन्न स्यात् । शयित्वा सेट् । किम्—कृत्वा ॥ **रलो व्युपधाद्धलादेः संश्च १।२।२६॥** इवर्णोवर्णोपधाद्धलादेः रलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः । द्युतित्वा, द्योतित्वा । लिखित्वा, लेखित्वा । व्युपधात्किम्—वर्तित्वा । रलः किम्—सेवित्वा । हलादेः किम्—एषित्वा । सेट् किम्—भुक्त्वा ॥ **उदितो वा ७।२।५६॥** उदितः परस्य क्त्व इड्वा । [1]शमित्वा, शान्त्वा । [2]देवित्वा, द्यूत्वा । दधातेर्हिः । हित्वा ॥ **[3]जहातेश्च क्त्वि ७।४।४३॥** हित्वा । हाङस्तु—हात्वा ॥ **समासेऽनञ्पूर्वे क्त्वो ल्यप् ७।१।३७॥**

दुस्पूर्वात्कृञः कर्मणि खलि गुणे रपरे सस्य रुत्वे विसर्गे 'इदुदुपधस्य चाप्रत्ययस्य' इति षत्वम् ।

द्युतित्वा । द्युतधातोः त्त्वाप्रत्यये इटि 'न क्त्वा सेट' इति कित्त्वनिषेधं बाधित्वा 'रलो व्युपधात्' इति पाक्षिककित्त्वाद् गुणनिषेधे द्युतित्वेति, पक्षे द्योतित्वेति ।

वर्तित्वा । वृतधातोः क्त्वाप्रत्यये इटि 'न त्त्वा सेट्' इति त्त्वाप्रत्ययस्य कित्त्वनिषेधाद् गुणः । 'रलो व्युपधात्' इति सूत्रे व्युपधाद्ग्रहणाभावे ऋकारोपधादपि वृतधातोः परस्य त्त्वाप्रत्ययस्य पाक्षिककित्त्वविधानेन वृतित्वा वर्त्तित्वा इत्यनिष्टं रूपद्वयं स्यादतस्तदावश्यकम् । कृते तु तस्मिन् इवर्णोवर्णोपधत्वाभावान्न कित्त्वम् ।

शमित्वा । शम्धातोः त्त्वाप्रत्यये 'उदितो वा' इति पाक्षिके इटि शमित्वेति, इडभावपक्षे 'अनुनासिकस्य क्विझलोः क्ङिति' इत्यात्वेऽनुस्वारे परसवर्णे शान्त्वेति । **देवित्वा**। दिवः क्त्वाप्रत्यये इटि गुणे देवित्वेति, इडभावे 'च्छ्वोः' इत्यूठि यणि द्यूत्वेति । **हित्वा** । ओहाक् त्यागे इत्यस्मात् त्त्वाप्रत्यये 'जहातेश्च त्त्वि' इति हि इत्यादेशः ।

---

[1] शम उपशमे । [2] दिवु क्रीडा । [3] जहातेरङ्गस्य हि इत्ययमादेशो भवति त्त्वाप्रत्यये परतः ।

① अनभिहिते ॥२।३।१॥

अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशः स्यात् । तुक् । प्रकृत्य । अनञ् किम्—अकृत्वा ॥ **आभीक्ष्ण्ये णमुल् च ३।४।२२॥** आभीक्ष्ण्ये द्योत्ये पूर्वविषये णमुल् स्यात् क्त्वा च ॥ **नित्यवीप्सयोः ८।१।४॥** आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्वित्वं स्यात् । आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञकेषु च कृदन्तेषु च । स्मारं-स्मारं[1] नमति शिवम् । स्मृत्वा स्मृत्वा । पायम्पायम्[2] । भोजम्भोजम्[3] । श्रावंश्रावम्[4] **अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् ३।४।२७॥** एषु कृञो णमुल् स्यात् । सिद्धोऽप्रयोगोऽस्य एवम्भूतश्चेत् कृञ् । व्यर्थत्वात्प्रयोगानर्ह इत्यर्थः अन्यथाकारम् । एवङ्कारम् । कथङ्कारम् । इत्थङ्कारं भुंक्ते । सिद्धेति किम्—शिरोऽन्यथा कृत्वा भुंक्ते ॥ इत्युत्तर कृदन्तम् ॥

एतदर्थं द्रष्टव्यानि सूत्राणि:— १।४।१००, से १०८। १।४।२३॥ १।४।२१-२२॥ १।४।५४-५५॥

इति कृदन्तम् ॥

"तिङ् समानाधिकरणे प्रथमा" ॥ (सि॰ का॰— २।३।४६) ① द॰ ३५६

अथ विभक्त्यर्थाः ।①

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा २।३।४६॥ नियतोपस्थितिकः प्रातिपदिकार्थः[5] । मात्रशब्दस्य प्रत्येकं योगः ।

पायम्पायम् । पाधातोः 'आभीक्ष्ण्ये णमुल् च' इति णमुल्यनुबन्धलोपे 'आतो युक् चिण्कृतोः' इति युकि 'नित्यवीप्सयोः' इति द्वित्वे मान्तत्वादव्ययत्वेन सुपो लुक् ।

इत्युत्तरकृदन्तम् ॥

प्रातिपदिकार्थेति । प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्च प्रातिपदिकार्थलिङ्गपरिमाणवचनानि तान्येव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रं तस्मिन् । 'द्वन्द्वादौ द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति न्यायात् द्वन्द्वान्ते श्रूयमाणमात्रपदस्य प्रत्येकं

---

[1] स्मृ स्मरणे । [2] पा पाने । [3] भुज पालनाभ्यवहारयोः । [4] श्रु श्रवणे ।

[5] जिस प्रातिपदिक के उच्चारण करने पर जिस अर्थ की नियम से प्रतीति हो वह उस प्रातिपदिक का अर्थ है ।

①· अथवा अभिहिते प्रथमा ॥ महाभाष्ये— ३५५

प्रातिपदिकार्थमात्रे[1] लिङ्गमात्राद्याधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा स्यात् । प्रातिपदिकार्थमात्रे—उच्चैः । नीचैः । कृष्णः । श्रीः । ज्ञानम् । लिङ्गमात्रे—तटः, तटी, तटम् । परिमाणमात्रे—द्रोणो व्रीहिः । वचनं—संख्या । एकः, द्वौ, बहवः ॥ **सम्बोधने च २।३।४६॥** प्रथमा स्यात् । हे राम ॥ (इति प्रथमा) ॥ **कर्तुरीप्सिततमं कर्म १।४।४९॥** पृ. कर्तुः[2] क्रियया आप्तुष्टितमं कारकं कर्मसंज्ञं स्यात् ॥ **कर्मणि द्वितीया** २१५ **२।३।२॥** अनुक्ते कर्मणि द्वितीया स्यात् । हरिं भजति । अभिहिते तु कर्मादौ प्रथमा—हरिः सेव्यते । लक्ष्म्या सेवितः ॥ **अकथितं च १।४।५१॥** अपादाना[3]दिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात् । दुह्याच्पच्दण्डरुधिप्रच्छिचिब्रूशासुजिमन्थमुषाम् ॥ कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥ १ ॥ गां दोग्धि पयः । बलिं याचते वसुधाम् ।

सम्बन्धात्प्रादिपदिकार्थमात्रे इत्याद्यर्थलाभः । जाति द्रव्य लिङ्ग सङ्ख्या कारक एतत्पञ्चकं प्रातिपदिकार्थ इति पक्षे लिङ्गग्रहणवैयर्थ्यादाह नियतेति । नियता उपस्थितिर्यस्य स नियतोपस्थितिकः । यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेन भानं स तत्प्रातिपदिकार्थः इति तदर्थः ।

हरिं भजति । अत्र भजनक्रियया सम्बन्धुं देवदत्तादिकर्तुरत्यन्तेच्छाविषयीभूतस्य हरेः 'कर्तुरीप्सित' इति कर्मत्वात् 'कर्मणि द्वितीया' इति द्वितीया । हरिः सेव्यते । अत्र 'षेवृ सेवने' इत्यस्मात्कर्मणि तङो विधानात् तङा कर्मणो हरेरुक्तत्वात्तत्र प्रथमैव न तु द्वितीया ।

गां दोग्धि पयः । अत्र गोः अपादानत्वाविवक्षया कर्मत्वविवक्षायां कर्मसंज्ञा ततो द्वितीया । बलिमिति । अत्र बलेरपादानत्वाविवक्षायां

---

[1] प्रातिपदिकार्थमात्र में, प्रातिपदिकार्थ की अपेक्षा लिङ्ग और तद्वृत्तिधर्ममात्र के आधिक्य में, परिमाणमात्र में, संख्यामात्र में प्रथमा होती है । [2] कर्ता जिसको क्रिया के साथ सम्बन्ध करने के लिये अत्यन्त इच्छा करे उसको कारक संज्ञा होते हुये कर्मसंज्ञा होती है । [3] अपादानादिविशेष (अपादानत्वादि) से अविवक्षित और कर्मत्वेन विवक्षित जो उसको कारकसंज्ञा होने हुये कर्मसंज्ञा होती है ।

तण्डुलानोदनं पचति । गर्गान् शतं दण्डयति । व्रजमवरुणद्धि गाम् । माणवकं पन्थानं पृच्छति । वृक्षमवचिनोति फलानि । माणवकं धर्मं ब्रूते शास्ति वा । शतं जयति देवदत्तम् । सुधां क्षीरनिधिं मथ्नाति । देवदत्तं शतं मुष्णाति । ग्राममजां नयति हरति कर्षति वहति वा । अर्थनिबन्धनेयं संज्ञा । बलिं भिक्षते वसुधाम् । माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादि ॥ (इति द्वितीया) ॥ **स्वतन्त्रः कर्ता १।४।५४॥** क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् ॥ **साधकतमं करणम् १।४।४२॥** क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात् ॥ **कर्तृकरणयोस्तृतीया २।३।१८॥** अनभिहिते कर्तरि करणे च तृतीया स्यात् । रामेण बाणेन हतो वाली ॥ (इति तृतीया) ॥ **कर्मणा यमभिप्रैति स सम्प्रदानम् १।४।३२॥** दानस्य[1] कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात् ।

कर्मत्वविवक्षा । **तण्डुलानिति** । अत्र तण्डुलानां करणत्वाविवक्षा । **गर्गानिति** । अत्र गर्गाणामपादानत्वाविवक्षा । **व्रजमिति** । अत्र व्रजस्याधिकरणत्वाविवक्षा । **माणवकं पन्थानं पृच्छति** । अत्र माणवकस्य करणत्वाविवक्षा । **वृक्षमिति** । अत्र वृक्षस्यापादानत्वाविवक्षा । **माणवकं धर्ममिति** । अत्र माणवकस्य सम्प्रदानत्वाविवक्षा । **शतमिति** । अत्र देवदत्तस्यापादानत्वाविवक्षा । **सुधामिति** । क्षीरनिधेरपादानत्वाविवक्षा । **देवदत्तमिति** । देवदत्तस्यापादानत्वाविवक्षा । **ग्राममिति** । ग्रामस्याधिकरणत्वाविवक्षा ।

रामेणेति । रामः वाणेन वालिनमवधीत् इति विग्रहे हन्धातोः कर्मणि क्तप्रत्यये कर्मण उक्तत्वात्तत्र प्रथमा । हननक्रियायां रामस्य स्वातन्त्र्यविवक्षया कर्तृसंज्ञा । वाणस्य च हननक्रियायामत्यन्तोपकारकत्वात्करणसंज्ञा । ततश्च कर्तृकरणयोरनुक्तत्वात्तत्र तृतीया । स्वातन्त्र्यमिह प्राधान्यम् ।

---

[1] दानक्रिया के कर्म के साथ कर्ता जिसका सम्बन्ध करना चाहे वह कारक होते हुये सम्प्रदानसंज्ञक होता है ।

चतुर्थी सम्प्रदाने २।३।१३॥ विप्राय गां ददाति ॥ **नमस्स्वस्तिस्वाहास्वधालंवषड्योगाच्च २।३।१६॥** एभिर्योगे चतुर्थी । हरये नमः । प्रजाभ्यः स्वस्ति । अग्नये स्वाहा । पितृभ्यः स्वधा । अलमिति पर्याप्त्यर्थग्रहणम् । तेन दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्यादि ॥ (इति चतुर्थी) **ध्रुवमपायेऽपादानम् १।४।२४॥** अपायो[1] विश्लेषस्तस्मिन्साध्ये यद् ध्रुवमवधिभूतं कारकं तदपादानं स्यात् ॥ **अपादाने पञ्चमी २।३।२८॥** ग्रामादायाति । धावतोऽश्वात्पततीत्यादि ॥ (इति पञ्चमी) **षष्ठी शेषे २।३।५० ॥** कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः संबन्धः शेषस्तत्र षष्ठी । राज्ञः पुरुषः । कर्मादीनामपि संबन्धमात्रविवक्षायां षष्ठ्येव । सतां गतम् । सर्पिषो जानीते । मातुः स्माति । एधोदकस्योपस्कुरुते । भजे शम्भोश्चरणयोः ॥ (इति षष्ठी) **आधारोऽधिकरणम् १।४।४५॥** कर्तृकर्म[2]द्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणं स्यात् ॥ **सप्तम्यधिकरणे च २।३।३६॥** अधिकरणे सप्तमी स्यात् चकाराद्दूरान्तिकार्थेभ्यः । औप[3]श्लेषिको वैषयिकोऽभिव्यापक-

विप्रायेति । अत्र देवदत्तादिः कर्त्ता दानस्य कर्मणा गवा विप्रं सम्बन्धुमिच्छतीति विप्रस्य सम्प्रदानसंज्ञायां चतुर्थी ।

ग्रामादायाति । देवदत्तो ग्रामादायातीत्यत्र देवदत्तविभागावधिर्ग्रामः इति तस्यापादानत्वात्पञ्चमी ।

सतां गतम् । अत्र कर्मत्वाविवक्षायां शेषत्वविवक्षया षष्ठी ।

सर्पिषो जानीते । अत्र करणत्वाविवक्षायां शेषत्वविवक्षया षष्ठी ।

---

[1] विभाग साध्य करने में अवधिभूत जो वह कारक होते हुये अपादानसंज्ञक होता है।

[2] कर्ता और कर्म के द्वारा कर्ता और कर्म में रहनेवाली क्रिया का जो आधार वह कारक होते हुये अधिकरणसंज्ञक होता है ।

[3] उप-समीपे श्लेषः-संबन्धः तत्कृतमौपश्लेषिकम् । कटे आस्ते इत्याद्युदाहरणम् । सर्वावयवव्याप्त्या आधारोऽभिव्यापकः । सर्वस्मिन्नात्माऽस्ति, तिलेषु तैलमित्याद्युदाहरणम् । एतदुभयभिन्नो वैषयिकः । मोक्षे इच्छास्तीत्युदाहरणम् ।

CC0. In Public Domain. Digitization by eGangotri

① समर्थः पदविधिः ॥२।१।१॥

श्चेत्याधारस्त्रिधा । कटे[1] आस्ते । स्थाल्यां[2] पचति । मोक्षे[3] इच्छाऽस्ति । सर्वस्मिन्[4]नात्मास्ति । वनस्य दूरे अन्तिके वा ॥ (इति सप्तमी) ॥

इति विभक्त्यर्थाः ॥

* * *

अथ समासः ।

तत्रादौ केवलसमासः । समासः पञ्चधा । तत्र समसनं समासः । स च विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः ॥ १ ॥ प्रायेण[5] पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः ॥ २ ॥ प्रायेणो[6]त्तरपदार्थप्रधानस्तत्पुरुषस्तृतीयः ॥ तत्पुरुषभेदः कर्मधारयः । कर्मधारयभेदो द्विगुः ॥ ३ ॥ प्रायेणा[7]न्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः ॥ ४ ॥ प्रायेणो[8]भयपदार्थप्रधानो द्वन्द्वः पञ्चमः ॥ ५ ॥ **समर्थः[9] पदविधिः २ । १ । १** ॥ पदसंबन्धी यो विधिः स समर्थाश्रितो बोध्यः ॥ **प्राक्कडारात्समासः २।१।३**॥ कडारः कर्मधारय इत्यतः प्राक् समास इत्यधिक्रियते ॥ **सह सुपा २।१।४**॥ सुप् सुपा सह वा समस्यते । समासत्वात्प्रातिपदिकत्वेन

मातुरिति । अत्र कर्मत्वाविवक्षा । एधः । अत्र दकस्य कर्मत्वाविवक्षायां शेषत्वविवक्षया षष्ठी । भजे इति । अत्र चरणयोः कर्मत्वाविवक्षा ।

इति विभक्त्यर्थाः ॥

---

[1] आसनक्रियाया कर्तृद्वारा आधारः कटः । [2] तण्डुलादिकर्मद्वारा पाकक्रियाया आधारः स्थाली । [3] इच्छारूपकर्तृद्वारा अस्तिक्रियाया आधारो मोक्षः । [4] कर्तृभूतात्मद्वारा अस्तिक्रियाया आधारः सर्वः । [5] सूपप्रति उन्मत्तगङ्गमित्याद्यव्ययीभावे पूर्वपदार्थप्राधान्याभावात्प्रायेणेति । [6] अतिमालः इत्यादौ तत्पुरुषे उत्तरपदार्थप्राधान्याभावात्प्रायेणेति । [7] द्वित्राः इत्यादौ बहुव्रीहावन्यपदार्थप्राधान्याभावात्प्रायेणेति । [8] पाणिपादमित्यादौ द्वन्द्वे उभयपदार्थप्राधान्याभावात्प्रायेणेति । [9] सामर्थ्यं द्विविधम् । व्यपेक्षा एकार्थीभावश्च । स्वार्थपर्यवसायिनां पदानामाकाङ्क्षादिवशात्परस्परं यः सम्बन्धः सा व्यपेक्षा । पृथगर्थानां पदानामेकार्थोपस्थितिजनकः एकार्थीभावः । अत्रैव समासो भवति ।

समासः — ① अव्ययीभावः ॥२।१।५॥ अव्ययं विभक्ति…
वचनेषु ॥२।१।६॥ ② तत्पुरुषः ॥२।१।२२॥ ③ शेषो बहुव्रीहि…
॥२।२।२३॥ अनेकमन्यपदार्थे ॥२।२।२४॥ ⑤ चार्थे
द्वन्द्वः ॥२।२।२९॥

सुपो लुक् । परार्थाभिधानं वृत्तिः । कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः । वृत्त्यर्थावबोधकं वाक्यं विग्रहः । स च लौकिकोऽलौकिकश्चेति द्विधा । तत्र पूर्वं भूत इति लौकिकः । पूर्व अम् भूत सु इत्यलौकिकः । भूतपूर्वः । भूतपूर्वे चरडिति निर्देशात्पूर्वनिपातः । (वा) इवेन समासो विभक्त्यलोपश्च । वागर्थौ इव वागर्थाविव ॥

इति केवलसमासः ॥ १ ॥

* * *

अथाव्ययीभावः ॥ २ ॥

अव्ययीभावः २।१।५॥ अधिकारोयं प्राक् तत्पुरुषात् ॥ **अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु २।१।६॥** विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते सोऽव्ययीभावः ॥ प्रायेणाविग्रहो नित्यसमासः प्रायेणास्वपदविग्रहो वा । विभक्तौ हरि ङि अधि इति स्थिते ॥ **प्रथमानिर्दिष्टं समास उपसर्जनम् १।२।४३॥** समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् ॥ **उपसर्जनं पूर्वम् २।२।३०॥** समासे उपसर्जनं प्राक्प्रयोज्यम् । इत्यधेः प्राक् प्रयोगः । सुपो लुक् । एकदेशविकृतस्यानन्यत्वात्प्रा-

---

भूतपूर्वः । पूर्व अम् भूत सु इत्यलौकिकविग्रहे 'सह सुपा' इति समासे समासत्वात्प्रातिपदिकत्वेन 'सुपो धातुप्रातिपदिकयोः' इति सुपोर्लुकि 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति भूतशब्दस्य पूर्वशब्दस्य चोपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इति द्वयोरुपसर्जनत्वात् कस्य पूर्वं प्रयोग इत्याशङ्कायां 'भूतपूर्वे चरट्' इति निर्देशाद् भूतशब्दस्यैव पूर्वप्रयोगे 'एकदेशविकृतमनन्यवत्' इति परिभाषया भूतपूर्व इत्यस्य प्रातिपदिकत्वात्ततः सौ रुत्वे विसर्गेतत्सिद्धिः ।

इति केवलसमासः ॥

उभयपदप्रधानं पृ ५६३ – महाभाष्य – "नदीभिश्च" २।१।१९॥ सूत्रको महाभाष्य में देखिये / पृ. ८०॥

तिपदिकसंज्ञायां स्वाद्युत्पत्तिः । अव्ययीभावश्चेत्यव्ययत्वात्सुपो लुक् । अधिहरि ॥ **अव्ययीभावश्च २।४।१८॥** अयं नपुंसकं स्यात् । **नाव्ययीभावादतोऽम्त्वपञ्चम्याः २।४।८३॥** अदन्तादव्ययीभावात्सुपो न लुक् तस्य पञ्चमीं विना अमादेशश्च स्यात् । गाः पातीति गोपास्तस्मिन्नित्यधिगोपम् । **तृतीयासप्तम्योर्बहुलम् २।४।८४॥** अदन्तादव्ययीभावात्तृतीयासप्तम्योर्बहुलमम्भावः स्यात् । अधिगोपम्, अधिगोपेन, अधिगोपे वा ॥ कृष्णस्य समीपम् उपकृष्णम् ॥ मद्राणां समृद्धिः सुमद्रम् ॥ यवनानां व्यृद्धिर्दुर्यवनम् ।

गोपि इति अधिगोपम्

दर्शागि

अधिहरि । हरि ङि अधि इत्यलौकिकविग्रहे 'अव्ययं विभक्ति' इत्यादिना समासे 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यधेरुपसर्जनत्वात् 'उपसर्जनं पूर्वम्' इति पूर्वप्रयोगे समासत्वात्प्रातिपदिकत्वेन सुपो लुकि एकदेशविकृतस्यानन्यत्वात्प्रातिपदिकत्वेन सौ 'अव्ययीभावश्च' इत्यव्ययत्वात् 'अव्ययादाप्सुपः' इति सोर्लुकि तत्सिद्धिः ।

अधिगोपम् । गोपा ङि अधि इत्यलौकिकविग्रहे 'अव्ययं विभक्ति' इति समासे अधेरुपसर्जनत्वात्प्राक्प्रयोगे समासत्वात्प्रातिपदिकत्वेन सुपो लुकि 'अव्ययीभावश्च' इति नपुंसकत्वात् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे सौ अव्ययत्वात्सोर्लुकि प्राप्ते 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इति तन्निषेधे सोरमादेशे च 'अमि पूर्वः' इतिपूर्वरूपम् ।

उपकृष्णम् । कृष्णस्य समीपमितिलौकिकविग्रहः । कृष्ण ङस् उप इत्यलौकिकविग्रहे समासत्वात्प्रातिपदिकत्वेन सुपो लुकि उपेत्यस्योपसर्जनत्वात्प्राक्प्रयोगे टाविभक्तौ अव्ययत्वात्तस्या लुकि प्राप्ते 'नाव्ययीभावाद्' इति तन्निषेधे 'तृतीयासप्तम्योर्बहुलम्' इति टाइत्यस्य अमादेशे पूर्वरूपे उपकृष्णमिति पक्षे इनादेशे गुणे उपकृष्णेनेति ।

सुमद्रम् । मद्र अम् सु इत्यलौकिकविग्रहे समासः शेषं पूर्ववत् । **दुर्यवनम्** । यवन आम् दुर् इत्यलौकिकविग्रहः । **निर्मक्षिकम्** ।

मक्षिकाणामभावो निर्मक्षिकम् । हिमस्यात्ययोऽतिहिमम् । निद्रा संप्रति न युज्यत इत्यतिनिद्रम् । हरिशब्दस्य प्रकाश इतिहरि । विष्णोः पश्चादनुविष्णु । योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः । रूपस्य योग्यमनुरूपम् । अर्थमर्थं प्रति प्रत्यर्थम् । शक्तिमनतिक्रम्य यथाशक्ति ॥ **अव्ययीभावे चाकाले ६।३।८१॥** सहस्य सः स्यादव्ययीभावे न तु काले । हरेः सादृश्यं सहरि । ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम् । चक्रेण युगपत् सचक्रम् । सदृशः सख्या ससखि । क्षत्राणां संपत्तिः सक्षत्रम् । तृणमप्यपरित्यज्य सतृणमत्ति । अग्निग्रन्थपर्यन्तमधीते साग्नि ॥ **नदीभिश्च २।१।२०॥** नदीभिः

अक्षिका आम् निर् इति विग्रहः । **अतिहिमम्** । हिम ङस् अति इति विग्रहः । **अतिनिद्रम्** । निद्रा सु अति इति विग्रहः । **इति हरि** । हरि ङस् इति इति विग्रहः । **अनुविष्णु** । विष्णु ङस् अनु इति विग्रहः । **अनुरूपम्** । रूप ङस् अनु इति विग्रहः । **प्रत्यर्थम्** । अर्थ अम् प्रति इति विग्रहः । **यथाशक्ति** । शक्ति अम् यथा इति विग्रहः ॥

सहरि । हरि ङस् सह इति विग्रहे समासे प्रातिपदिकत्वात्सुपो लुकि उपसर्जनत्वात्सहस्य पूर्वप्रयोगे 'अव्ययीभावे चाकाले' इति सहस्य सादेशे सोर्लुक् । **अनुज्येष्ठम्** । ज्येष्ठ ङस् अनु इति विग्रहः । **सचक्रम्** । चक्र टा सह इति विग्रहः । **ससखि** । सखि टा सह इति विग्रहः । **सक्षत्रम्** । क्षत्र आम् सह इति विग्रहः । **सतृणम्** । तृण अम् सह इति विग्रहः । **साग्नि** । अग्नि अम् सह इति विग्रहः ।

पञ्चगङ्गम् । पञ्चानां गङ्गानां समाहार इति लौकिकविग्रहः । पञ्चन् आम् गङ्गा आम् इत्यलौकिकविग्रहे 'समाहारे चायमिष्यते' इति वार्तिकबलात् 'नदीभिश्च' इति समासे पञ्चन उपसर्जनत्वात्प्राक्प्रयोगे सुपोर्लुकि नलोपे 'एकविभक्ति चापूर्वनिपाते' इति गङ्गाइत्यस्योपसर्जनत्वाद् 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे सौ अव्यत्वात्सोर्लुकि प्राप्ते 'नाव्ययीभावाद्' इति तन्निषेधे सोरमादेशे च पूर्वरूपे तत्सिद्धिः ।

सह संख्या समस्यते । (समाहारे चायमिष्यते) । पञ्चगङ्गम् । द्वियमुनम्[1] ॥ **तद्धिताः ४।१।७६॥** आपञ्चमसमाप्तेरधिकारोऽयम् ॥ **अव्ययीभावे शरत्प्रभृतिभ्यः ५।४।१०७॥** शरदादिभ्यष्टच् स्यात्समासान्तोऽव्ययीभावे । शरदः समीपमुपशरदम् । प्रतिविपाशम्[2] । (जराया जरश्च) । उपजरसमित्यादि[3] ॥ **अनश्च ५।४।१०८॥** अन्नन्तादव्ययीभावाट्टच् स्यात् ॥ **नस्तद्धिते ६।४।१४४॥** नान्तस्य भस्य टेर्लोपस्तद्धिते । उपराजम् । अध्यात्मम् ॥ **नपुंसकादन्यतरस्याम् ५।४।१०९॥** अन्नन्तं यत् क्लीबं तदन्तादव्ययीभावाट्टज्वा स्यात् । उपचर्मम् । उपचर्म ॥ **झयः ५।४।११२॥** झयन्तादव्ययीभावाट्टच् वा स्यात् । उपसमिधम्[4] । उपसमित् ॥

इत्यव्ययीभावः ॥ २ ॥

* * *

उपशरदम् । शरद् ङस् उपेति विग्रहे 'अव्ययम्' इत्यादिना समासे टचि प्रातिपदिकत्त्वेन सुपो लुकि उपेत्यस्योपसर्जनत्वात्प्राक्प्रयोगे सौ लुको निषेधे सोरमादेशे पूर्वरूपम् । **प्रतिविपाशम्** । विपाश् अम् प्रतीतिविग्रहः । **उपजरसम्** । जरा ङस् उपेतिविग्रहे 'अव्ययम्' इति समासे 'अव्ययीभावे शरत्प्रभृतिभ्यः' इति टचि सुव्लुकि उपेत्यस्य पूर्वनिपाते 'जराया जरश्च' इति जरसादेशे सोरमादेशः ।

उपराजम् । राजन् ङस् उपेतिविग्रहे 'अव्ययम्' इति समासे 'अनश्च' इति टचि सुव्लुकि भत्वात् 'नस्तद्धिते' इति टिलोपे सौ लुको निषेधे सोरमादेशः । **अध्यात्मम्** । आत्मन् ङि अधि इति विग्रहे समासे टचि सुव्लुकि सोरमादेशः । **उपचर्मम्** । चर्मन् ङस् उपेतिविग्रहे समासे पाक्षिके टचि सुव्लुकि टिलोपे सौ 'नाव्ययी' इति सोर्लुको निषेधे सोरमादेशे च उपचर्ममिति, टचोऽभावपक्षे 'अव्ययादाप्सुपः' इति सोर्लुकि 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे उपचर्मेति ।

इत्यव्ययीभावः ॥

---

[1] द्वयोर्यमुनयोः समाहार इति विग्रहः । [2] विपाशं विपाशं प्रतीति लौकिको विग्रहः । [3] जरायाः समीपमिति विग्रहः । [4] समिधः समीपमिति विग्रहः ।

अथ तत्पुरुषः ।

तत्पुरुषः २।१।२२॥ अधिकारोऽयं प्राग्बहुव्रीहेः ॥ **द्विगुश्च २।१।२३॥** द्विगुरपि तत्पुरुषसंज्ञकः स्यात् ॥ **द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः २।१।२४॥** द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते स च तत्पुरुषः । कृष्णश्रित इत्यादि ॥ **तृतीया तत्कृतार्थेन गुणवचनेन २।१।३०॥** तृतीयान्तं[1] तृतीयान्तार्थकृतगुणवचनेनार्थेन च सह वा प्राग्वत् । शङ्कुलया खण्डः शङ्कुलाखण्डः । धान्येनार्थो धान्यार्थः । तत्कृतेति किम्—अक्ष्णा काणः ॥ **कर्तृकरणे कृता बहुलम् २।१।३२॥** कर्तरि करणे च तृतीया कृदन्तेन बहुलं प्राग्वत् । हरिणा त्रातो हरित्रातः । नखैर्भिन्नो नखभिन्नः । कृद्ग्रहणे गति-

---

कृष्णश्रितः । कृष्ण अम् श्रित सु इति विग्रहे 'द्वितीया श्रित' इति समासत्वात्प्रातिपदिकत्वेन सुब्लुकि कृष्णेत्यस्योपसर्जनत्वात्पूर्वनिपाते एकदेशविकृतस्यानन्यत्वात्प्रातिपदिकत्वेन सौ रुत्वे विसर्गे तत्सिद्धिः ।

शङ्कुलाखण्डः । शङ्कुला टा खण्ड सु इत्यलौकिकविग्रहे 'तृतीया तत्कृत' इति समासत्वात्प्रातिपदिकत्वेन सुब्लुकि प्रातिपदिकत्वात्सुः ।

अक्ष्णा काणः । 'तृतीया तत्कृत' इति सूत्रे तत्कृतग्रहणाभावे 'अक्षि टा काण सु इति विग्रहे काणशब्दस्य गुणवाचकत्वात् तेन सह समासः स्यादतस्तदावश्यकम् । कृते तु तस्मिन् अक्षिकृतकाणत्वाभावान्न समासः ।

हरित्रातः । हरि टा त्रात सु इति विग्रहे 'कर्तृकरणे कृता बहुलम्' इति समासत्वात्प्रातिपदिकत्वेन सुब्लुकि प्रातिपदिकत्वात्सौ

---

[1] तृतीयान्त पदका जो अर्थ उससे किया जो गुण तद्वाचक जो शब्द तत्प्रकृतिक सुवन्त के साथ और अर्थशब्द प्रकृतिक सुवन्त के साथ तृतीयान्त का समास होता है । तृतीयान्तपद शङ्कुलया उसका अर्थ शङ्कुलारूप उससे किया गुण खण्डनरूप तद्वाचकशब्द खण्ड तत्प्रकृतिक सुवन्त खण्ड सु उसके साथ तृतीयान्त शङ्कुला टा का समास हुआ ।

कारकपूर्वस्याऽपि ग्रहणम् । नखनिर्भिन्नः ॥ **चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः २।१।३६॥** चतुर्थ्यन्तार्थाय[1] यत् तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा प्राग्वत् । यूपाय दारु यूपदारु । (तदर्थेन प्रकृतिविकृतिभाव एवेष्टः) तेनेह न—रन्धनाय स्थाली । (वा) अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम् ॥ द्विजार्थः[2] सूपः । द्विजार्था[3] यवागूः । द्विजार्थं[4] पयः । भूतबलिः । गोहितम् । गोसुखम् । गोरक्षितम् ॥ **पञ्चमी भयेन २।१।३७॥** चोराद्भयं चोरभयम् ॥ **स्तोकान्तिकदूरार्थकृच्छ्राणि**[5]

रुत्वे विसर्गः । **नखनिर्भिन्नः** । नख भिस् निर्भिन्न सु इत्यलौकिकविग्रहे 'समासप्रत्ययविधौ प्रतिषेधः' इति समासे तदन्तविधिनिषेधात् निर्भिन्नेत्यस्य कृदन्तत्वाभावात्समासाप्राप्तौ 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति परिभाषाबलात् 'कर्तृकरणे कृता बहुलम्' इति समासत्वात्प्रातिपदिकत्वेन सुब्लुकि सुः ।

यूपदारु । यूप ङे दारु सु इति विग्रहे 'चतुर्थी तदर्थार्थ' इति समासे सुब्लुकि सोर्लुक् । **द्विजार्थः सूपः** । द्विज ङे अर्थ सु इति विग्रहे 'चतुर्थी तदर्थ' इति वैकल्पिके समासे अर्थशब्दस्य नित्यपुंलिङ्गत्वात् 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति पुंलिङ्गत्वे च प्राप्ते 'अर्थेन नित्यसमासो विशेष्यलिङ्गताचेति वक्तव्यम्' इति वार्तिकेन नित्यसमासे सूपादेर्विशेष्यस्य लिङ्गत्वे च सुब्लुकि प्रातिपदिकत्वात्सुः । **द्विजार्था यवागूः** । द्विज ङे अर्थ सु इति विग्रहे 'अर्थेन नित्यसमास' इति नित्यसमासे यवागूशब्दलिङ्गत्वे च सुब्लुकि टापि सोर्लोपः ।

---

[1] चतुर्थ्यन्तपद का जो अर्थ उसके लिये जो तद्वाचक जो शब्द तत्प्रकृतिक सुबन्त के साथ और अर्थादिशब्दप्रकृतिक सुबन्त के साथ चतुर्थ्यन्त का समास होता है । चतुर्थ्यन्तपद यूपाय उसका अर्थ यूप उसके लिये कौन काष्ठ तद्वाचक शब्द दारु तत्प्रकृतिक सुबन्त दारु सु उसके साथ चतुर्थ्यन्त यूप ङे का समास हुआ ।
[2] द्विजाय अयमिति विग्रहः । [3] द्विजायेयमिति । [4] द्विजायेदम् । [5] स्तोकाद्यर्थप्रकृतिकं कृच्छ्रप्रकृतिकं च पञ्चम्यन्तं क्तान्तप्रकृतिकसुबन्तेन सह समस्यते ।

क्तेन २।१।३९॥ पञ्चम्याः स्तोकादिभ्यः ६।३।२॥ अलुगुत्तरपदे। स्तोकान्मुक्तः। अन्तिकादागतः। अभ्याशादागतः। दूरादागतः। कृच्छ्रादागतः॥ **षष्ठी २।२।८॥** सुबन्तेन प्राग्वत्। राजपुरुषः॥ **पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे २।२।१॥** अवयविना सह पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चेदवयवी। षष्ठीसमासापवादः। पूर्वं कायस्य पूर्वकायः। अपरकायः[1]। एकाधिकरणे किम्—पूर्वश्छात्राणाम्॥ **अर्धं नपुंसकम् २।२।८॥** समांशवाच्यर्धशब्दो नित्यं क्लीबे, स प्राग्वत्। अर्धं पिप्पल्याः अर्धपिप्पली॥ **सप्तमी शौण्डैः २।१।४०॥** सप्तम्यन्तं शौण्डादिभिः प्राग्वत्। अक्षेषु शौण्डः अक्षशौण्ड इत्यादि। द्वितीयातृतीयेत्यादियोगविभागादन्यत्रापि तृतीयादिविभक्तीनां प्रयोगवशात्समासो ज्ञेयः॥ **दिक्संख्ये संज्ञायाम् २।१।५०॥** संज्ञायामेवेति नियमार्थं सूत्रम्। पूर्वेषुकामशमी[2]। सप्तर्षयः[3]। तेनेह न—उत्तरा वृक्षाः। पञ्च ब्राह्मणाः॥ **तद्धितार्थोत्तरपदसमाहारे च २।१।५१॥** तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत्। पूर्वस्यां शालायां भवः

राजपुरुषः। राजन् ङस् पुरुष सु इति विग्रहे 'षष्ठी' इति समासे सुब्लुकि सुः। **पूर्वकायः।** काय ङस् पूर्व सु इति विग्रहे 'षष्ठी' इति समासं बाधित्वा 'पूर्वापर' इति समासे सुब्लुकि पूर्वशब्दस्योपसर्जनत्वात्पूर्वनिपाते सुः। **अर्धपिप्पली।** पिप्पली ङस् अर्ध सु इति विग्रहे 'षष्ठी' इति समासं बाधित्वा 'अर्धं नपुंसकम्' इति समासे सुब्लुकि सौ 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति परपदलिङ्गत्वात्सोर्लोपः।

पूर्वेषुकामशमी। पूर्व सु इषुकामशमी सु इति विग्रहः। **सप्तर्षयः।** सप्तन् जस् ऋषि जस् इति विग्रहे समासे नलोपः। **उत्तरा वृक्षाः।** उत्तर जस् वृक्ष जस् इति विग्रहे 'विशेषणं विशेष्येण बहुलम्' इति समासे प्राप्ते 'दिक्सङ्ख्ये संज्ञायाम्' इति नियमात्समासाभावः।

---

[1] अपरं कायस्येतिविग्रहः। [2] पूर्वश्चासौ इषुकामशमी। [3] सप्त च ते ऋषयः।

पूर्वाशाला इति समासे जाते (भा) सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः ॥ **दिक्पूर्वपदादसंज्ञायां ञः ४।२।१०७॥** अस्माद्भवाद्यर्थे ञः स्यादसंज्ञायाम् ॥ **तद्धितेष्वचामादेः ७।२।११६॥** ञिति णिति च तद्धितेष्वचामादेरचो वृद्धिः स्यात् । यस्येति च । पौर्वशालः ॥ पञ्च गावो धनं यस्येति त्रिपदे बहुव्रीहौ । (वा) द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम् ॥ **गोरतद्धितलुकि ५।४।९२॥** गोन्तात्तत्पुरुषाट्टच् स्यात् समासान्तो न तु तद्धितलुकि । पञ्चगवधनः ॥ **तत्पुरुषः समानाधिकरणः कर्मधारयः १।२।४२॥** **संख्यापूर्वो द्विगुः २।१।५२॥** तद्धितार्थेत्यत्रोक्तस्त्रिविधः संख्यापूर्वो द्विगुसंज्ञः स्यात् ॥ **द्विगुरेकवचनम् २।४।१॥** द्विग्वर्थः समाहार एकवत्स्यात् ॥ **स नपुंसकम् २।४।१७॥** समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् । पञ्चानां गवां समाहारः पञ्चगवम् ॥ **विशेषणं**

पौर्वशालः । पूर्वा ङि शाला ङि इति विग्रहे 'तद्धितार्थ' इतिसमासत्वात्सुब्लुकि पूर्वाशब्दस्योपसर्जनत्वात्पूर्वनिपाते 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इतिपूर्वाशब्दस्य पुंवद्भावे 'दिक्पूर्व' इति ञप्रत्यये 'तद्धितेष्वचामादेः' इत्यादेरच उकारस्य वृद्धौ भत्वात् 'यस्येति च' इत्याकारलोपे पौर्वशालेत्यस्य तद्धितान्तत्वात्प्रातिपदिकत्वेन सौ रुत्वे विसर्गे तत्सिद्धिः ।

पञ्चगवधनः । पञ्चन् जस् गो जस् धन सु इति विग्रहे 'शेषो 2।1।52 बहुव्रीहिः' इति त्रिपदबहुव्रीहिसमासे 'तद्धितार्थ' इति वैकल्पिकसमासे प्राप्ते 'द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्' इति नित्यसमासे सुब्लुकि नलोपे 'गोरतद्धितलुकि' इति टच्यनुबन्धलोपेऽवादेशे सौ रुत्वे विसर्गे तत्सिद्धिः । → नलोपः प्रातिपदिकान्तस्य

पञ्चगवम् । पञ्चन् आम् गो आम् इति विग्रहे 'तद्धितार्थ' इतिसमासे सुब्लुकि नलोपे टचि अवादेशे कर्मधारयसंज्ञायां द्विगुसंज्ञायामे-

---

[१] भेद्यं विशेष्यमित्याहुर्भेदकं तु विशेषणम् । प्रधानं तु विशेष्यं स्यादप्रधानं विशेषणम् । परार्थे स्वार्थनिक्षेपादप्रधानं विशेषणम् । विशेष्यं तु प्रधानं स्यात्स्वार्थस्यैव समर्पणात् ।

विशेष्यपूर्वपदः कर्मधारयः। वैयाकरणश्चासौ खसू-
चिश्चेति वैयाकरणखसूचिः। गोपापश्चासौ बा-
लश्चेति गोपापबालिशः।

CC0. In Public Domain, Digitization by eGangotri

विशेष्येण बहुलम् २।१।५७॥ भेदकं भेद्येन समानाधिकरणेन बहुलं प्राग्वत् । नीलमुत्पलं नीलोत्पलम् । बहुलग्रहणात्क्वचिन्नित्यम्—कृष्णसर्पः क्वचिन्न—रामो जामदग्न्यः ॥⑦ **उपमानानि सामान्यवचनैः २।१। ५५॥** घन इव श्यामो घनश्यामः । (वा.) शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम् । शाकप्रियः पार्थिवः शाकपार्थिवः । देवपूजको ब्राह्मणो देवब्राह्मणः ॥ **नञ् २।२।६ ॥** नञ् सुपा सह समस्यते ॥ **न लोपो नञः ६।३।७३॥** नञो नस्य लोप उत्तरपदे । न ब्राह्मणः अब्राह्मणः ॥ **तस्मान्नुडचि ६।३।७४॥** लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात् । अनश्वः । नैकधेत्यादौ तु नशब्देन सह सुप्सुपेति समासः ॥ **कुगतिप्रादयः २।२।१८॥** एते समर्थेन नित्यं समस्यन्ते । कुत्सितः पुरुषः कुपुरुषः[1] ॥ **ऊर्यादिच्विडाचश्च १।४।६१॥** ऊर्यादयश्च्व्यन्ता

मध्यमपदलोपी

६।३।७३

कवद्भावे नपुंसकत्वात्सोरम् । **नीलोत्पलम्** । नील सु उत्पल सु इति विग्रहे 'विशेषणं विशेष्येण बहुलम्' इति समासे सुब्लुकि गुणे नीलशब्दस्योपसर्जनत्वात्पूर्वनिपाते सोरमादेशः । **घनश्यामः** । घन सु श्याम सु इति विग्रहः ।

शाकपार्थिवः । शाकः प्रियो यस्य स शाकप्रियः शाकप्रियश्चासौ पार्थिवः शाकपार्थिवः इति लौकिकविग्रहः । शाक सु प्रिय सु इति विग्रहे बहुव्रीहिसमासे सुब्लुकि शाकप्रिय सु पार्थिव सु इति विग्रहे 'विशेषणं विशेष्येण' इति समासे सुब्लुकि 'शाकपार्थिवादीनाम्' इति प्रियपदलोपे सुः ।

देवब्राह्मणः । देवस्य पूजको देवपूजकः स चासौ ब्राह्मण इति लौकिकविग्रहः । देव ङस् पूजक सु इति विग्रहे 'षष्ठी' इति समासे सुब्लुकि देवपूजक सु ब्राह्मण सु इति विग्रहे विशेषणसमासे सुब्लुकि पूजकपदलोपे सुः ।

अनश्वः । अश्व सु न इति विग्रहे 'नञ्' इति समासे सुब्लुकि न इत्यस्य पूर्वनिपाते नलोपे अ अश्व इति जाते नुटि अनश्वशब्दात्सुः ।

सुपो धातुप्रातिपदिकयोः ॥२।४।७१॥

---

[1] कु पुरुष सु इत्यलौकिकः ।

⑦ उपमानपूर्वपदः कर्मधारयः
मेघः इव श्यामः इति। उपमानोत्तरपदः कर्मधा-
पुरुषः व्याघ्रः इव = पुरुषव्याघ्रः।

डाजन्ताश्च क्रियायोगे गतिसंज्ञाः स्युः। ऊरीकृत्य। शुक्लीकृत्य। पटपटाकृत्य॥ सु[1]पुरुषः (वा॰) प्रादयो गताद्यर्थे प्रथमया। प्रगत आचार्यः प्राचार्यः। (वा॰) अत्यादयः क्रान्ताद्यर्थे द्वितीयया। अतिक्रान्तो मालामिति विग्रहे—। **एकविभक्ति चापूर्वनिपाते १।२।४४॥** विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यान्न तु तस्य पूर्वनिपातः॥ **गोस्त्रियोरुपसर्जनस्य १।२।४८॥** उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात्। अतिमालः। (वा॰) अवादयः क्रुष्टाद्यर्थे तृतीयया। अवक्रुष्टः कोकिलया—अ[2]वकोकिलः। (वा॰) पर्यादयो ग्लानाद्यर्थे चतुर्थ्या। परिग्लानोऽध्ययनाय पर्य[3]ध्ययनः। (वा॰) निरादयः

ऊरीकृत्य। ऊरीकृत्वा इति विग्रहे ऊरीशब्दस्य गतिसंज्ञायां समासे 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति क्त्वा इत्यस्य ल्यबादेशे 'ह्रस्वस्य पिति कृति तुक्' इति तुकि अव्ययत्वात्सोर्लुक्।

शुक्लीकृत्य। न शुक्लः अशुक्लः अशुक्लं शुक्लं कृत्वा इति विग्रहे 'कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः' इति शुक्लशब्दात् च्विप्रत्यये 'अस्य च्वौ' इतीत्वे च्वेर्लोपे 'ऊर्यादिच्विडाचश्च' इति शुक्लीत्यस्य गतिसंज्ञायाम् 'कुगतिप्रादयः' इति समासे क्त्वो ल्यपि तुक्।

पटपटाकृत्य। पटत् कृत्वेति स्थिते पटत्शब्दस्य 'डाचि विवक्षिते द्वे बहुलम्' इति द्वित्वे 'अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच्' इति डाचि टिलोपे 'नित्यमाम्रेडिते डाचीतिवक्तव्यम्' इति तकारपकारयोः पकारआदेशे पटपटा इत्यस्य 'ऊर्यादिच्विडाचश्च' इति गतिसंज्ञायां 'कुगतिप्रादयः' इति कृत्वाशब्देन समासे क्त्वो ल्यपि तुक्।

अतिमालः। माला अम् अति इतिविग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासत्वात्प्रातिपदिकत्वेन सुब्लुकि अतीत्यस्योपसर्जनत्वात्प्राक्प्रयोगे 'एकविभक्ति चापूर्वनिपाते' इति मालाशब्दस्योपसर्जनत्वात् 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे सुः।

---

[1] शोभनः पुरुषः इति लौकिकः। सु पुरुष सु इत्यलौकिकः। [2] कोकिला टा अव इति अलौकिकः। [3] अध्ययन ङे परि इति अलौकिकः।

क्रान्ताद्यर्थे पञ्चम्या । निष्क्रान्तः कौशाम्ब्याः—निष्कौशाम्बिः ॥ **तत्रोपपदं सप्तमीस्थम् ३।१।९१॥** सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं यत्कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यात् ॥ **उपपदमतिङ् २।२।१९॥** उपपदं सुबन्तं समर्थेन नित्यं समस्यते । अतिङन्तश्चायं समासः । कुम्भं करोतीति कुम्भकारः । अतिङ् किम्—मा भवान् भूत् । माङि लुङिति सप्तमीनिर्देशान्माङुपपदम् । (प०) गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः । व्याघ्री । अश्वक्रीती । कच्छपीत्यादि ॥ **तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ५।४।८६॥** संख्याव्ययादेरङ्गुल्यन्तस्य समासान्तोऽच् स्यात् ॥ द्वे अङ्गुली प्रमाणमस्य-द्व्यङ्गुलम् । निर्गतमङ्गुलिभ्यो निरङ्गुलम् ॥

व्याघ्री । व्याजिघ्रतीतिविग्रहे वि आङ्पूर्वाद् घ्राधातोः 'आतश्चोपसर्गे' इति कप्रत्यये 'आतो लोप इटि च' इत्यालोपे 'गतिकारकोपपदानाम्' इतिपरिभाषया सुबुत्पत्तेः पूर्वं घ्रशब्देन आङः 'कुगतिप्रादयः' इति गतिसमासे तत आघ्रशब्देन वेर्गतिसमासे यणि व्याघ्रशब्दात् जातेरस्त्रीविषयादयोपधात्' इति ङीप् अलोपः ।

गति [illegible] आङ्
गतिका
रको
पपदा
नाम्

अश्वक्रीती । अश्वेन क्रीतेति विग्रहः । अश्व टा क्रीत इति विग्रहे 'गतिकारक' इति परिभाषया क्रीतशब्दात् सुबुत्पत्तेः पूर्वं 'कर्तृकरणे कृता बहुलम्' इति समासे सुब्लुकि 'क्रीतात्करणपूर्वात्' इति ङीषि स्वादयः ।

कच्छपी । कच्छेन पिबतीति विग्रहः । पाधातोः 'सुपि स्थः' इत्यत्र सुपीति योगविभागात्कप्रत्यये आलोपे 'गतिकारक' इति परिभाषया पशब्दात्सुबुत्पत्तेः पूर्वं कच्छ टा प इति विग्रहे उपपदसमासे सुब्लुकि जातिलक्षणङीप् ।

द्व्यङ्गुलम् । द्वि औ अङ्गुलि औ इति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इति समासे सुब्लुकि 'तत्पुरुषस्याङ्गुलेः' इत्यचि 'यस्येति च' इतीकारलोपे प्रातिपदिककार्यम् । निरङ्गुलम् । अङ्गुलि भ्यस् निर् इति विग्रहे 'निरादयः' इति समासे सुब्लुकि अचि इलोपे सुः ।

अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः ५।४।८७॥ एभ्यो रात्रेरच् स्याच्चात्संख्याव्ययादेः । अहर्ग्रहणं द्वन्द्वार्थम् ॥ **रात्राह्नाहाः पुंसि २।४।२९॥** एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव । अहश्च रात्रिश्चाहोरात्रः । सर्वरात्रः संख्यातरात्रः । (संख्यापूर्वं रात्रं क्लीबम्) द्विरात्रम् । त्रिरात्रम्[1] ॥ **राजाहःसखिभ्यष्टच् ५।४।९१॥** एतदन्तात्तत्पुरुषाट्टच् स्यात् । परमराजः ॥ **आन्महतः समानाधिकरणजातीययोः ६।३।४६॥** महत आकारोऽन्तादेशः स्यात्समानाधिकरणे उत्तरपदे जातीये च परे । महाराजः । प्रकारवचने जातीयर् । महाप्रकारो महाजातीयः[2] ॥ **द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः**

अहोरात्रः । अहन् सु रात्रि सु इति विग्रहे द्वन्द्वसमासे 'अहःसर्वैकदेश' इत्यचि 'यस्येति च' इतीकारलोपे 'रात्राह्नाहाः' इति पुंस्त्वे 'रूपरात्ररथन्तरेषु रुत्वं वाच्यम्' इतिरुत्वे उत्वे गुणे सुः ।

सर्वरात्रः । सर्वाचासौ रात्रिरिति विग्रहः । सर्वा सु रात्रि सु इति विग्रहे 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन' इति समासे अचि इकारलोपे पुंस्त्वे 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति सर्वाशब्दस्य पुंवद्भावे सुः ।

संख्यातरात्रः । संख्याता चासौ रात्रिरितिविग्रहे 'विशेषणं विशेष्येण' इति समासे आचि इलोपे पुंस्त्वे 'पुंवत्कर्मधारयजातीयदेशीयेषु' इति संख्याताशब्दस्य पुंवद्भावः ।

द्विरात्रम् । द्वयोः रात्र्योः समाहार इति विग्रहे 'तद्धितार्थ' इति समासे अचि इलोपे 'संख्यापूर्वं रात्रं क्लीवम्' इति नपुंसकत्वम् ।

परमराजः । परमश्चासौ राजेति विग्रहे 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इति समासे टचि 'नस्तद्धिते' इति टिलोपः ।

---

[1] तिसृणां रात्रीणां समाहार इति विग्रहः । [2] महच्छब्दात् 'प्रकारवचने जातीयर्' इति जातीयरि 'आन्महतः' इत्यात्वम् ।

६।३।४७॥ आत्स्यात् । द्वौ च दश च द्वादश। अष्टाविंशतिः॥ **त्रेस्त्रयः ६।३।४८॥** त्रयोदश । त्रयोविंशतिः। त्रयस्त्रिंशत्। **परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः २।३।२६॥** एतयोः परपदस्येव लिङ्गं स्यात् । कुक्कुटमयूर्याविमे[1] । मयूरीकुक्कुटाविमौ । अर्धपिप्पली । (वा.) द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः । पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पुरोडाशः । **प्राप्तापन्ने च द्वितीयया २।२।४॥** समस्येते । अकारश्चानयोरन्तादेशः । प्राप्तो जीविकां प्राप्तजीविकः[2] । आपन्नजीविकः । अलंकुमार्यै—अलंकुमारिः । अत एव ज्ञापकात्समासः । निष्कौशाम्बिः। **अर्धर्चाः पुंसि च २।४।३१॥** अर्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः । अर्धर्चः । अर्ध-

महाराजः । महांश्चासौ राजेति विग्रहे 'सन्महत्परम' इति समासे टचि टिलोपे आत्वे दीर्घः ।

द्वादश । द्वन्द्वसमासे आत्वम् । **अष्टाविंशतिः** । द्वन्द्वे आत्वे सवर्णदीर्घः । **त्रयोदश** । त्रयश्च दश चेति विग्रहः । द्वन्द्वे त्रेस्त्रयसादेशे रुत्वे उत्त्वे गुणः ।

2/1/29

पञ्चकपालः । पञ्चन् सुप् कपाल सुप् इत्यलौकिकविग्रहे 'तद्धितार्थोत्तरपद' इति समासे सुब्लुकि 'संस्कृतं भक्षाः' इत्यणि 'द्विगोर्लुगनपत्ये' इत्यणो लुकि कपालशब्दस्य नपुंसकत्वात् 'परवल्लिङ्गम्' इति पञ्चकपालशब्दस्यापि नपुंसकत्वे प्राप्ते 'द्विगुप्राप्त' इति तन्निषेधाद्विशेष्यलिङ्गत्वे प्रातिपदिककार्यम् ।

अलङ्कुमारिः । कुमारी ङे अलमिति विग्रहे 'द्विगुप्राप्तापन्न' इति ज्ञापकात्समासे परपदलिङ्गत्वनिषेधे च कुमारीशब्दस्य 'एकविभक्ति' इत्युपसर्जनत्वाद् 'गोस्त्रियोः' इति ह्रस्वः । **निष्कौशाम्बिः** । कौशाम्बी ङस् निर् इति विग्रहे 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति समासे

---

[1] कुक्कुटश्च मयूरी चेति विग्रहे द्वन्द्वः । [2] प्राप्त सु जीविका अम् इति विग्रहः ।

⑦ प्रादिबहुव्रीहिसमासः

र्चम् । एवं ध्वजतीर्थशरीरमण्डपयूपदेहाङ्कुशपात्रसूत्रादयः । सामान्ये नपुंसकम् । मृदु पचति । प्रातः कमनीयम् ।

इति तत्पुरुषः ॥ ३ ॥

* * *

अथ बहुव्रीहिः ।

शेषो बहुव्रीहिः २।२।२३॥ अधिकारोऽयं प्राग्द्वन्द्वात् । **अनेकमन्यपदार्थे २।२।२४॥** अनेकं प्रथमान्तमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः । **सप्तमीविशेषणे बहुव्रीहौ २।२।३५॥** सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं स्यात् । अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः । **हलदन्तात्सप्तम्याः संज्ञायाम् ६।३।९॥** हलन्तादद-न्ताच्च सप्तम्या अलुक् । कण्ठेकालः । प्राप्तमुदकं यं स प्राप्तोदको ग्रामः । ऊढरथो[1]ऽनड्वान् । उपहृ[2]तपशू रुद्रः । उद्धृ[3]तौदना स्थाली । पीता[4]म्बरो हरिः । वीर[5]पुरुषको ग्रामः । (वा.) प्रादि[6]भ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः । ⑦ उत्तरपद लोप प्रपतितपर्णः, प्रपर्णः । (वा.) नञो[7]ऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः । // अपू. ॥ २।२।२४॥

सुब्लुकि 'द्विगुप्राप्त' इति परपदलिङ्गत्वनिषेधे 'गोस्त्रियोः' इति ह्रस्वे निरो रेफस्य विसर्गे 'इदुदुपधस्य चाप्रत्ययस्य' इति षत्वे स्वादिः ।

इति तत्पुरुषः ॥

कण्ठेकालः । कण्ठे कालो यस्येति विग्रहे 'सप्तमी विशेषणे' इति ज्ञापकात्समासे कण्ठशब्दस्य पूर्वनिपाते च 'हलदन्तात्' इति सप्तम्या अलुकि प्रातिपदिककार्यम् ।

प्रपर्णः । प्रकृष्टं पतितमिति विग्रहे 'प्रादयो गताद्यर्थे प्रथमया'

---

[1] ऊढो रथो येनेति विग्रहः । [2] उपहृतः पशुर्यस्मै सः । [3] उद्धृतः ओदनो यस्याः सा । [4] पीतम् अम्बरं यस्य सः । [5] वीराः पुरुषा यस्मिन् सः । [6] प्रादिक से पर जो धातुजन्य शब्द तदन्तप्रकृतिक सुबन्त का पदान्तर के साथ बहुव्रीहिसमास हो और पूर्वपदान्तर्गत उत्तरपद का लोप हो विकल्प से । [7] नञ् से पर जो अस्त्यर्थवाचक शब्द तदन्तप्रकृतिक सुबन्त का पदान्तर के साथ समास हो और पूर्वपदान्तर्गत उत्तरपद का विकल्प से लोप हो ।

CC0. In Public Domain. Digitization by eGangotri

अविद्यमानपुत्रः, अपुत्रः । **स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ६।३।३४॥** उक्तपुंस्कादनूङ् ऊङोऽभावोऽस्यामिति बहुव्रीहिः । निपातनात्पञ्चम्या अलुक् षष्ठ्याश्च लुक् । तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात्पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात् समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः । गोस्त्रियोरिति ह्रस्वः । चित्रगुः । रूपवद्भार्यः । अनूङ् किम्—वामोरूभार्यः । पूरण्यां तु—। **अप्पूरणीप्रमाण्योः ५।४।११६॥** पूरणार्थप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप्स्यात् । कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । स्त्री

इति समासः । प्रपतितं पर्णं यस्य इति विग्रहे 'प्रादिभ्यो धातुजस्य' इति वार्तिकेन समासे पतितपदलोपे प्रातिपदिककार्यम् । अपुत्रः । न विद्यमान अपुत्रः इति विग्रहे 'नञ्' इति समासे नलोपे, अविद्यमानः पुत्रो यस्येति विग्रहे 'नञोऽस्त्यर्थानाम्' इति समासे विद्यमानपदलोपे च प्रातिपदिककार्यम् ।

चित्रगुः । चित्रा गावो यस्येति विग्रहः । चित्रा जस् गो जस् इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थे' इति समासे सुब्लुकि 'स्त्रियाः पुंवद्' इति चित्राशब्दस्य पुंवद्भावात् टापो निवृत्तौ 'एकविभक्ति' इति गोशब्दस्योपसर्जनत्वाद् 'गोस्त्रियोः' इति ह्रस्वे प्रातिपदिककार्यम् ।

रूपवद्भार्यः । रूपवती भार्या यस्येति विग्रहे समासे सुब्लुकि रूपवतीशब्दस्य पुंवद्भावान्ङीपो निवृत्तौ भार्याशब्दस्य ह्रस्वे प्रातिपदिकत्वादि ।

कल्याणीपञ्चमाः । पञ्चानां पूरणीति विग्रहे पञ्चन्शब्दात् 'तस्य पूरणे डट्' इति डटि 'नान्तादसङ्ख्यादेर्मट्' इति डटो मडागमे नलोपे टित्त्वात् ङीपि पञ्चमीति सिद्ध्यति । कल्याणी सु पञ्चमी सु इति विग्रहे

---

१ प्रवृत्ति निमित्त एक होने पर पुँल्लिङ्ग को कहनेवाला और ऊङ्प्रत्यय न हुआ हो जिसमें ऐसा जो स्त्रीवाचकशब्द उसको पुँल्लिङ्गवाचकशब्द के सदृश रूप हो समानाधिकरण स्त्रीलिङ्ग उत्तरपद पर रहते परन्तु पूरणप्रत्ययान्त और प्रियादिगणपठित शब्द पर रहते न हो ।

प्रमाणी यस्य स स्त्रीप्रमाणः । अप्रियादिषु किम्—कल्याणीप्रिय इत्यादि । **बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् ५।४।११३॥** स्वाङ्गवाचिसक्थ्यक्ष्यन्ताद्बहुव्रीहेः षच् स्यात् । दीर्घसक्थः । जलजाक्षी । स्वाङ्गात्किम्—दीर्घसक्थि शकटम् । स्थूलाक्षा[1] वेणुयष्टिः । अक्ष्णोऽदर्शनादिति वक्ष्यमाणोऽच् । **द्वित्रिभ्यां ष मूर्ध्नः ५।४।११५॥** आभ्यां मूर्ध्नः षः स्याद्बहुव्रीहौ । द्विमूर्धः । त्रिमूर्धः । **अन्तर्बहिर्भ्यां च लोम्नः ५।४।११७॥** आभ्यां लोम्नोऽप्स्याद्बहुव्रीहौ । अन्तर्लोमः । बहिर्लोमः[2] । **पादस्य लोपोऽहस्त्यादिभ्यः ५।४।१३८॥** हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य लोपः स्याद्बहुव्रीहौ । व्याघ्रस्येव पादावस्य व्याघ्रपात् । अहस्त्यादिभ्यः किम्-हास्तिपादः । कुसूलपादः । **संख्यासुपूर्वस्य ५।४।१४०॥** पादस्य लोपः स्यात्समासान्तो बहुव्रीहौ । द्विपात् । सुपात् ॥ **उद्विभ्यां काकुदस्य ५।४।१४८॥** लोपः स्यात् ।

समासे पञ्चमीशब्दस्य पूरणप्रत्ययान्तत्वेन तस्मिन्परे 'स्त्रियाः' इति पुंवद्भावाप्राप्तौ 'अप्पूरणीप्रमाण्योः' इत्यपि 'यस्येति च' इति ईकारलोपे प्रातिपदिककार्यम् ।

दीर्घसक्थः । दीर्घे सक्थिनी यस्येतिविग्रहे समासे 'बहुव्रीहौ सक्थ्यक्ष्णोः' इति षचि 'यस्येति च' इतीकारलोपे प्रातिपदिककार्यम् । **जलजाक्षी** । जलजे इव अक्षिणी यस्या इति विग्रहे समासे सुब्लुकि षचि इलोपे 'षिद्गौरादिभ्यश्च' इति ङीषि अलोपे स्वादिः । **द्विमूर्धः** । द्वौ मूर्धानौ यस्येति विग्रहे समासे 'द्वित्रिभ्यां ष मूर्ध्नः' इति षप्रत्यये 'नस्तद्धिते' इति टिलोपे प्रातिपदिककार्यम् । **त्रिमूर्धः** । त्रयो मूर्धानो यस्येति विग्रहः ।

अन्तर्लोमः । अन्तर्लोमानि यस्येति विग्रहः । समासे अपि सुब्लुकि टिलोपः । **व्याघ्रपात्** । व्याघ्र औ पाद औ इति विग्रहे 'अनेकमन्यपदार्थे' इति समासे 'पादस्य लोपः' इत्यलोपे सुब्लुकि प्रातिपदिककार्यम् ।

---

[1] स्थूलानि अक्षीणि पर्वाङ्कुराणि यस्याः सा । [2] बहिर्लोम यस्य सः ।

उत्काकुत्[1] । विकाकुत्[2] ॥ **पूर्णाद्विभाषा ५।४।१४९॥** पूर्णकाकुत् । पूर्णकाकुदः ॥ **सुहृद्दुर्हृदौ मित्रामित्रयोः ५।४।१०५॥** सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते । सुहृन्मित्रम् । दुर्हृदमित्रः ॥ **उरःप्रभृतिभ्यः कप् ५।४।१५१॥ सोऽपदादौ ८।३।३८॥** पाशकल्पककाम्येषु विसर्गस्य सः ॥ **कस्कादिषु च ८।३।४८॥** एष्विण उत्तरस्य विसर्गस्य षोऽन्यस्य तु सः । इति सः । व्यूढोरस्कः ॥ **इणः षः ८।३।३९॥** इण उत्तरस्य विसर्गस्य षः पाशकल्पककाम्येषु परेषु ॥ प्रियसर्पिष्कः ॥ **निष्ठा २।२।३६॥** निष्ठान्तं बहुव्रीहौ पूर्वं स्यात् । युक्तयोगः ॥ **शेषाद्विभाषा ५।४।१५४॥** अनुक्तसमासान्ताद्बहुव्रीहेः कब्वा । महायशस्कः, महायशाः ॥

इति बहुव्रीहिः ॥ ४ ॥

सुहृत् । शोभनं हृदयं यस्येति विग्रहे समासे सुब्लुकि निपातनात् 'सहृद्दुर्हृदौ' इति हृदयस्य हृदादेशे प्रातिपदिककार्यम् ।

व्यूढोरस्कः । व्यूढमुरो यस्येति विग्रहे समासे कपि सुब्लुकि सस्य रुत्वे विसर्गे 'सोऽपदादौ' इति विसर्गस्य सत्त्वे गुणे प्रातिपदिककार्यम् ।

प्रियसर्पिष्कः । प्रियं सर्पिः यस्येति विग्रहे समासे कपि सुब्लुकि षत्वस्यासिद्धत्वात् 'ससजुषो रुः' इति रुत्वे विसर्गे 'इणः षः' इति विसर्गस्य षत्वे स्वादिः ।

युक्तयोगः । योगः युक्तो येनेति विग्रहे समासे सुब्लुकि 'निष्ठा' इति युक्तपदस्य पूर्वनिपाते सुः ।

महायशस्कः । महद् यशो यस्येति विग्रहे समासे कपि सुब्लुकि आत्वे सस्य रुत्वे विसर्गे 'सोऽपदादौ' इति विसर्गस्य सत्त्वम् । कपोऽभावे 'अत्वसन्तस्य' इति दीर्घः ।

इति बहुव्रीहिः ।

---

[1] उद्गतं काकुदं यस्य सः । [2] विगतं काकुदं यस्य । काकुदं तालु ।

अथ द्वन्द्वः ।

चार्थे द्वन्द्वः २।२।२९॥ अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । तत्र 'ईश्वरं गुरुं च भजस्व' इति परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः । 'भिक्षामट गां चानय' इत्यन्यतरस्यानुषङ्गिकत्वेनान्वयोऽन्वाचयः । अनयोरसामर्थ्यात्समासो न । 'धवखदिरौ छिन्धि' इति मिलितानामन्वय इतरेतरयोगः । 'संज्ञापरिभाषम्' इति समूहः समाहारः ॥ **राजदन्तादिषु परम् २।२।३१॥** एषु पूर्वप्रयोगार्हं परं स्यात् । दन्तानां राजानो राजदन्ताः । (धर्मादिष्वनियमः) । अर्थधर्मौ । धर्मार्थावित्यादि ॥ **द्वन्द्वे घि २।२।३२॥** द्वन्द्वे घिसंज्ञं पूर्वं स्यात् । हरिश्च हरश्च हरिहरौ । **अजाद्यदन्तम् २।२।३३॥** द्वन्द्वे पूर्वं स्यात् । ईशकृष्णौ ॥ **अल्पाच्तरम् २।२।३४॥** शिवकेशवौ ॥ **पिता मात्रा १।२।७०॥** मात्रा सहोक्तौ पिता वा शिष्यते । माता च पिता च पितरौ मातापितरौ वा ॥

राजदन्तः । दन्त आम् राजन् सु इति विग्रहे 'षष्ठी' इति समासे सुब्लुकि दन्तशब्दस्योपसर्जनत्वात्पूर्वप्रयोगे प्राप्ते 'राजदन्तादिषु परम्' इति तस्य परनिपाते नलोपे स्वादिः ।

अर्थधर्मौ । अर्थश्च धर्मश्च इति ग्रहः । अर्थ सु धर्म सु इति विग्रहे 'चार्थे द्वन्द्वः' इति समासे सुब्लुकि 'अजाद्यदन्तम्' इति अर्थशब्दस्य पूर्वनिपाते प्राप्ते 'धर्मादिष्वनियमः' इति तन्निषेधात् कदाचिदर्थशब्दस्य पूर्वनिपातः कदाचिद्धर्मशब्दस्य पूर्वनिपातः ।

हरिहरौ । हरि सु हर सु इति विग्रहे समासे सुब्लुकि 'द्वन्द्वे घि' इति हरिशब्दस्य पूर्वनिपाते औ विभक्तिः । **ईशकृष्णौ** । ईशश्च कृष्णश्चेति विग्रहे समासे सुब्लुकि ईशशब्दस्य पूर्वनिपातः । **शिवकेशवौ** । शिवश्च केशवश्चेति विग्रहे समासे शिवस्य पूर्वनिपातः ।

पितरौ । मातृ सु पितृ सु इति विग्रहे 'चार्थे द्वन्द्वः' इति समासे सुब्लुकि 'पिता मात्रा' इति पाक्षिके पितृशब्दस्यैकशेषे प्रातिपदिकत्वाद् औ-

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् २।४।२॥ एषां द्वन्द्व एकवत्। पाणिपादम्। मार्दङ्गिकवैणविकम्। रथिकाश्वारोहम्॥ **द्वन्द्वाच्चुदषहान्तात्समाहारे ५।४।१०६॥** चवर्गान्ताद्दषहान्ताच्च द्वन्द्वाट्टच् स्यात्समाहारे। वाक् च त्वक् च वाक्त्वचम्। त्वक्स्रजम्। शमीदृषदम्। वाक्त्विषम्। छत्रोपानहम्। समाहारे किम्—प्रावृट्शरदौ॥

इति द्वन्द्वः॥ ५॥

ऋक्पूरब्धूःपथामानक्षे ५।४।७४॥ अ अनक्षे इति च्छेदः। ऋगाद्यन्तस्य समासस्य अप्रत्ययोऽन्तावयवोऽक्षे या धूस्तदन्तस्य तु न। अर्धर्चः। विष्णुपुरम्[1]। विमलापं[2] सरः। राजधुरा[3]। अक्षे तु अक्षधूः[4]। दृढधूरक्षः[5]। सखिपथः[6]। रम्यपथो[7] देशः॥ **अक्ष्णोऽदर्शनात् ५।४।७६॥** अचक्षुःपर्यायादक्ष्णोऽच् स्यात्समासान्तः। गवामक्षीव गवाक्षः॥

विभक्तौ पितराविति। एकशेषाभावपक्षे 'आनङ् ऋतो द्वन्द्वे' इति मातृशब्दस्य आनङादेशेऽनुबन्धलोपे नलोपे मातापितराविति।

पाणिपादम्। पाणी च पादौ च एषां समाहारः इति विग्रहे समासे सुब्लुकि 'द्वन्द्वश्च प्राणि' इत्येकवद्भावे 'स नपुंसकम्' इति नपुंसकत्वात्सोरम्। **वाक्त्वचम्।** वाच् सु त्वच् सु इति विग्रहे समाहारद्वन्द्वे टचि सुब्लुकि कुत्वे प्रातिपदिकत्वादि।

इति द्वन्द्वः।

अर्धर्चः। ऋचोऽर्धमिति विग्रहे 'अर्धं नपुंसकम्' इति समासे अर्धशब्दस्य पूर्वनिपाते 'ऋक्पूरब्धूः' इति अप्रत्यये गुणे रपरे सुब्लुकि 'अर्धर्चाः पुंसि च' इति पुंस्त्वे स्वादिः।

गवाक्षः। गो आम् अक्षि सु इति विग्रहे षष्ठीसमासे 'अक्ष्णोऽदर्शनात्' इत्यचि सुब्लुकि 'यस्येति च' इतीकारलोपे 'अवङ्स्फोटायनस्य' इत्यवङि दीर्घे प्रातिपदिकत्वात्सुः।

---

[1] विष्णोः पूः इति विग्रहः। [2] विमला आपो यस्मिन् तत्। [3] राज्ञां धूः। [4] अक्षस्य धूः। [5] दृढा धूर्यस्य सः। [6] सख्युः पन्थाः इति विग्रहे समासे सुब्लुकि अप्रत्यये टिलोपः। [7] रम्यः पन्थाः यस्मिन् सः।

"नस्तद्धिते" (६।४।१४४) इत्यनेन टि

लोपः।

उपसर्गादध्वनः ५।४।८५॥ प्रगतोऽध्वानं प्राध्वो रथः ॥ **न पूजनात् ५।४।६९॥** पूजनार्थात्परेभ्यः समासान्ता न स्युः । सुराजा । अतिराजा ॥

इति समासान्ताः ।

अथ तद्धिताः तत्रादौ साधारणाः ॥

समर्थानां प्रथमाद्वा ४।१।९२॥ इदं पदत्रयमधिक्रियते प्राग्दिश इति यावत् ॥ **अश्वपत्यादिभ्यश्च ४।१।८४॥** एभ्योऽण् स्यात्प्राग्दीव्यतीयेष्वर्थेषु । अश्वपतेरपत्यादि-आश्वपतम् । गार्णपतम् ॥ **दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ४।१।८५॥** दित्यादिभ्यः पत्युत्तरपदाच्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यात् । अणोपवादः । दितेरपत्यं दैत्यः । अदितेरादित्यस्य वा ॥ **हलो यमां यमि लोपः ८।४।६४॥**

दैत्यः
आदित्य

प्राध्वः । प्रगतोऽध्वानमिति विग्रहे 'अत्यादयः क्रान्ताद्यर्थे' इति समासे 'उपसर्गादध्वनः' इत्यचि 'नस्तद्धिते' इति टिलोपे दीर्घे स्वादिः ।

सुराजा । शोभनो राजेति विग्रहे 'कुगतिप्रादयः' इति समासे 'राजाहःसखिभ्यष्टच्' इति प्राप्तटचः 'न पूजनात्' इति निषेधे सुब्लुकि प्रातिपदिककार्यम् । **अतिराजा** । राजानमतिक्रान्त इति विग्रहे 'अत्यादय' इति समासे टचो निषेधे स्वादिः ।

इति समासान्ताः ।

आश्वपतम् । अश्वपतेरपत्यादि इति विग्रहे अश्वपतिशब्दात् 'अश्वपत्यादिभ्यश्च' इत्यणि 'तद्धितेष्वचामादेः' इत्यादेरचो वृद्धौ 'यस्येति च' इतीकारलोपे प्रातिपदिककार्यम् ।

दैत्यः । दितिशब्दादपत्येऽर्थे 'दित्यदित्यादित्य' इति ण्ये आदिवृद्धौ इलोपे प्रातिपदिकत्वात्सुः । **आदित्यः** । अदितिशब्दात् ण्ये आदिवृद्धौ

---

१ गणपतेरपत्यादि ।

इति यलोपः। आदित्यः। प्राजापत्यः[1]। (देवाद्यञञौ) दैव्यम्। दैवम् (बहिषष्टिलोपो यञ्च)। बाह्यः। (ईकक्च)-**किति च ७।२।११८॥** किति तद्धिते चाचामादेरचो वृद्धिः स्यात्। बाहीकः। (गोरजादिप्रसङ्गे यत्) गोरपत्यादि गव्यम्॥ **उत्सादिभ्योऽञ् ४।१।८६॥** औत्सः॥ पृ.98 11-३-६६

इत्यपत्यादिविकारान्तार्थसाधारणाः॥ १॥

* * *

अथापत्याधिकारः॥

स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ४।१।८७॥ धान्यानां भवन इत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ स्तः। स्त्रैणः पौंस्नः॥

इलोपे तत्सिद्धिः। यद्वा आदित्यशब्दात् ण्यप्रत्यये 'यस्येति च' इति अलोपे 'हलो यमां यमि लोपः' इति यलोपे प्रातिपदिककार्यम्।

दैव्यम्। देवस्यापत्यादीति विग्रहे 'देवाद्यञञौ' इति यञि आदिवृद्धौ अलोपे दैव्यमिति, अञि तु दैवमिति। बाह्यः। बहिर्भव इति विग्रहे बहिष्शब्दात् 'बहिषष्टिलोपो यञ्च' इति यञि टिलोपे च आदिवृद्धौ प्रातिपदिककार्यम्।

बाहीकः। बहिर्भव इति विग्रहे बहिष्शब्दाद् 'ईकक्च' इति ईकक्प्रत्यये टिलोपे च 'किति च' इत्यादेरचो वृद्धौ प्रातिपदिकत्वात्स्वादिः।

गव्यम्। गोरपत्यादीति विग्रहे 'गोरजादिप्रसङ्गे यत्' इति यति अवादेशः। औत्सः। उत्सस्यापत्यादि इति विग्रहे अञि आदिवृद्धौ प्रातिपदिककार्यम्। पृ.98

इत्यपत्यादि विकारान्तार्थाः साधारणाः प्रत्ययाः।

स्त्रैणः। स्त्रिया अपत्यम्, स्त्रीषु भवः, स्त्रीणां समूहः, स्त्रीभ्य आगतः, स्त्रीभ्यो हितः इत्यादिविग्रहे विग्रहोक्तषष्ठ्याद्यन्तस्त्रीशब्दात्

---

[1] प्रजापतेरपत्यमिति विग्रहः।

तस्यापत्यम् ४।१।९२॥ षष्ठ्यन्तात्कृतसन्धेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः ॥ **ओर्गुणः ६।४।१४६॥** उवर्णान्तस्य भस्य गुणस्तद्धिते । उपगोरपत्यमौपगवः । आश्वपतः । दैत्यः । औत्सः । स्त्रैणः । पौंस्नः ॥ **अपत्यं पौत्रप्रभृति गोत्रम् ४।१।१६३॥** अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात् ॥ **एको गोत्रे ४।१।९३॥** गोत्रे एक एवापत्यप्रत्ययः स्यात् । उपगोर्गोत्रापत्यमौपगवः ॥ **गर्गादिभ्यो यञ् ४।१।१०५॥** गोत्रापत्ये । गर्गस्य गोत्रापत्यं गार्ग्यः । वात्स्यः । **यञञोश्च २।४।६४॥** गोत्रे यद्यञन्तमञन्तं च तदवयवयोरेतयोर्लुक् स्यात्तत्कृते बहुत्वे न तु स्त्रियाम् । गर्गाः । वत्साः । **जीवति तु वंश्ये युवा ४।१।१६३॥** वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव स्यात् । **गोत्राद्यून्यस्त्रियाम् ४।१।९४॥** यून्यपत्ये गोत्रप्रत्ययान्तादेव प्रत्ययः स्यात्, स्त्रियां तु न युवसंज्ञा । **यञिञोश्च ४।१।१०१॥** गोत्रे यौ यञिञौ तदन्तात्फक् स्यात् । **आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्**

‘स्त्रीपुंसाभ्याम्’ इति नञ्प्रत्ययेऽनुबन्धलोपे तद्धितान्तत्वात्प्रातिपदिकत्वेन ‘सुपो धातुप्रातिपदिकयोः’ इति सुपो लुकि आदिवृद्धौ णत्वे सुः ।

पौंस्नः । पुंसोऽपत्यमित्यादि विग्रहे पुंस्शब्दात्स्नञि ‘स्वादिषु’ इति पदत्वात्पुंसः सकारस्य संयोगान्तलोपे आदिवृद्धौ प्रातिपदिककार्यम् ।

औपगवः । उपगोरपत्यमितिविग्रहे षष्ठ्यन्त उपगुशब्दात् ‘तस्यापत्यम्’ इति अणि सुब्लुकि आदिवृद्धौ ‘अचो ञ्णिति’ इति वृद्धिं बाधित्वा ‘ओर्गुणः’ इति गुणेऽवादेशः । उपगोर्गोत्रापत्यमितिविग्रहेतु उपगुशब्दात् ‘तस्यापत्यम्’ इत्यणि निष्पन्न औपगवशब्दात् ‘अत इञ्’ इति इञि प्राप्ते ‘एको गोत्रे’ इति नियमात् उपगुशब्दादणेव भवति, न तु अणि कृते तत इञपीति बोध्यम् ।

गार्ग्यः । गर्गशब्दाद्गोत्रापत्येऽर्थे यञि आदिवृद्धौ ‘यस्येति च’ इति अलोपे सुः । **गर्गाः** । गर्गस्य गोत्रापत्यानीति विग्रहे यञि ‘यञञोश्च’ इति यञो लुकि जस् ।

७।१।२॥ प्रत्ययादेः फस्य आयन्, ढस्य एय्, खस्य ईन्, छस्य ईय्, घस्य इय्, स्युः । गर्गस्य युवापत्यं-गार्ग्यायणः । दाक्षायणः । **अत इञ् ४।१।९५॥** अपत्येऽर्थे । दाक्षिः । **बाह्वादिभ्यश्च ४।१।९६॥** बाहविः । औडुलोमिः । (लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः) उडुलोमाः । आकृतिगणोऽयम् । **अनृष्यानन्तर्ये बिदादिभ्योऽञ् ४।१।१०४॥** एभ्योऽञ् गोत्रे । ये त्वत्रानृषयस्तेभ्योऽपत्येऽन्यत्र तु गोत्रे । बिदस्य गोत्रं बैदः । बैदौ । बिदाः । पुत्रस्यापत्यं पौत्रः । पौत्रौ । पौत्राः । एवं दौहित्रादयः । **शिवादिभ्योऽण् ४।१।११२॥** अपत्ये । शैवः । गाङ्गः । **ऋष्यन्धकवृष्णिकुरुभ्यश्च ४।१।११४॥** ऋषिभ्यः—वासिष्ठः । वैश्वामित्रः । अन्धकेभ्यः श्वाफल्कः । वृष्णिभ्यः-वासुदेवः । कुरुभ्यः-नाकुलः । साहदेवः ।

गार्ग्यायणः । गर्गस्य युवापत्यमितिविग्रहे यञि आदिवृद्धौ अलोपे गार्ग्यइत्यस्माद् 'यञिञोश्च' इति फकि 'आयनेयी' इति फस्यायन्नादेशे अलोपे णत्वे प्रातिपदिकत्वात्सुः ।

गार्ग्य + फक् । गार्ग्य + फ ।
गार्ग्य + आयन् + अ । ~~अ~~ गार्ग्य + आयन् + अ । गार्ग्य् आयन । गार्ग्यायन + सु ।

दाक्षायणः । दक्षस्य युवापत्यमिति विग्रहे 'अत इञ्' इति इञि अलोपे आदिवृद्धौ 'यञिञोश्च' इति फकि फस्यायन्नादेशे इलोपे णत्वे प्रातिपदिककार्यम् ।

दाक्षिः । दक्षस्यापत्यमितिविग्रहे इञि अलोपे आदिवृद्धौ सुः । **बाहविः** । बाहोरपत्यमिति विग्रहे इञि 'ओर्गुणः' इति गुणेऽवादेशः ।

औडुलोमिः । उडूनि नक्षत्राणीव लोमानि यस्य स उडुलोमा । उडुलोम्नोऽपत्यमिति विग्रहे इञि आदिवृद्धौ 'नस्तद्धिते' इति टिलोपः । **उडुलोमाः** । उडुलोम्नोऽपत्यानीतिविग्रहे अकारप्रत्यये टिलोपे प्रातिपदिकत्वाज्जस् ।

बैदः । बिदस्य गोत्रापत्यमितिविग्रहे 'अनृष्यानन्तर्ये' इत्यञि अलोपे आदिवृद्धिः । **शैवः** । शिवस्यापत्यमितिविग्रहे अणि आदिवृद्धौ अलोपः । **गाङ्गः** । गङ्गाया अपत्यमितिविग्रहः । **वासिष्ठः** । वसिष्ठस्यापत्यमिति विग्रहेऽणि आदिवृद्धौ अलोपः ।

मातुरुत्संख्यासंभद्रपूर्वायाः ४।१।११५॥ संख्यादिपूर्वस्य मातृशब्दस्योदादेशः स्यादण् प्रत्ययश्च । द्वैमातुरः । षाण्मातुरः । सांमातुरः । भाद्रमातुरः । **स्त्रीभ्यो ढक् ४।१।१२०॥** स्त्रीप्रत्ययान्तेभ्यो ढक् । वैनतेयः । **कन्यायाः कनीन च ४।१।११६॥** चादण् । कानीनो व्यासः कर्णश्च । **राजश्वशुराद्यत् ४।१।१३७॥** (राज्ञो जातावेवेति वाच्यम्) । **ये चाभावकर्मणोः ६।४।१६८॥** यादौ तद्धिते परेऽन् प्रकृत्या स्यान्न तु भावकर्मणोः । राजन्यः । जातावेवेति किम्—**अन् ६।४।१६७॥** अन् प्रकृत्या स्यादणि परे । राजनः । श्वशुर्यः ॥ **क्षत्राद् घः ४।१।१३८॥** क्षत्रियः ॥ जातावित्येव । क्षात्रिरन्यत्र ॥ **रेवत्यादिभ्य-**

द्वैमातुरः । द्वयोर्मात्रोरपत्यमितिविग्रहे 'तद्धितार्थोत्तर' इति समासे सुब्लुकि द्विमातृशब्दात् 'मातुरुत्' इत्यणि ऋकारस्य उकारे च रपरत्वे आदिवृद्धौ प्रातिपदिकत्वात्सुः । **षाण्मातुरः** । षण्णां मातृणामपत्यमिति विग्रहे 'तद्धितार्थ' इति समासे सुब्लुकि षस्य जश्त्वेन डकारे 'यरोऽनुनासिके' इति डस्य णत्वे षण्मातृशब्दादणि उत्वे रपरत्वे आदिवृद्धिः ।

वैनतेयः । विनताया अपत्यमितिविग्रहे 'स्त्रीभ्यो ढक्' इति ढकि 'आयनेयी' इति ढस्य एयादेशे आलोपे 'किति च' इत्यादिवृद्धौ प्रातिपदिकत्वात्सुः । **कानीनः** । कन्याया अपत्यमितिविग्रहेऽणि कन्यायाः कनीनादेशे अलोपे आदिवृद्धौ सुः ।

राजन्यः । राज्ञोऽपत्यं जातिरितिविग्रहे 'तस्यापत्यम्' इत्यणि प्राप्ते यत्प्रत्यये प्रकृतिभावात् टिलोपो न । अपत्यमात्रविवक्षायां तु राजन्शब्दादणि 'अन्' इति प्रकृतिभावात् टिलोपाभावे राजनः इति । **श्वशुर्यः** । श्वशुरस्यापत्यमितिविग्रहे इञं बाधित्वा यति अलोपः । **क्षत्रियः** । क्षत्रस्यापत्यं जातिरिति विग्रहे घप्रत्यये 'आयनेयी' इति घस्य इयादेशे

---

१ समीचीना माता संमाता संमातुरपत्यमिति विग्रहः । २ भद्रा चासौ माता भद्रमातेति विग्रहे विशेषणसमासे 'पुंवत्कर्मधारय' इति पुंवत्त्वे अणि उत्त्वे रपरत्वे वृद्धिः ।

छक् ४।१।१४६॥ **ठस्येकः ७।३।५०॥** अङ्गात्परस्य ठस्येकादेशः स्यात् । रैवतिकः । **जनपदशब्दात्क्षत्रियादञ् ४।१।१६८॥** जनपदक्षत्रियवाचकाच्छब्दादञ् स्यादपत्ये । पाञ्चालः । (क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्) पञ्चालानां राजा पाञ्चालः । पूरोरण् वक्तव्यः) । पौरवः । (पाण्डोर्ड्यण् । पाण्ड्यः । **कुरुनादिभ्यो ण्यः ४।१।१७२॥** कौरव्यः । नैषध्यः ॥ **ते तद्राजाः ४।१।१७४ ॥** अञादयस्तद्राजसंज्ञाः स्युः ॥ **तद्राजस्य बहुषु तेनैवास्त्रियाम् २।४।१७४** बहुष्वर्थेषु तद्राजस्य लुक् तदर्थकृते बहुत्वे न तु स्त्रियाम् । इक्ष्वाकवः । पञ्चालाः इत्यादि ॥ **कम्बोजाल्लुक् ४।१।१७५॥** अस्मात्तद्राजस्य लुक् । कम्बोजः । कम्बोजौ । (कम्बोजादिभ्य इति वक्तव्यम्) । चोलः । शकः । केरलः । यवनः ।

तद्राज संज्ञा

इत्यपत्याधिकारः ॥ २ ॥

* * *

अलोपे सुः । अपत्यमात्रे तु क्षत्रशब्दात 'अत इञ्' इति इञि अलोपे आदिवृद्धौ क्षात्रिः ।

रैवतिकः । रेवत्याः अपत्यमितिविग्रहे ठकि ठस्य इकादेशे ईकारलोपे 'किति च' इत्यादिवृद्धिः । **पाञ्चालः** । पञ्चालो नाम देशः राजा च । तस्य राज्ञोऽपत्यमितिविग्रहे अञि आदिवृद्धौ अलोपे स्वादिः । पञ्चालानां राजेति विग्रहेऽपि अञादिः ।

पौरवः । पूरोरपत्यमितिविग्रहेऽणि आदिवृद्धौ 'ओर्गुणः' इति गुणेऽवादेशादिः । **पाण्ड्यः** । पाण्डोरपत्यमितिविग्रहे ड्यणि अनुबन्धलोपे डित्त्वात् टिलोपे सुः । **कौरव्यः** । कुरूणां राजा कुरोरपत्यमिति वा विग्रहे ण्ये आदिवृद्धौ गुणेऽवादेशः । **नैषध्यः** । निषधस्यापत्यं राजा वेति विग्रहे ण्ये आदिवृद्धौ अलोपः ।

इक्ष्वाकवः । इक्ष्वाकूणामपत्यानीतिविग्रहे 'जनपदशब्दात्' इत्यञि तस्य तद्राजसंज्ञायां 'तद्राजस्य बहुषु' इति लुकि प्रातिपदिकत्वाज्जस् । **कम्बोजः** । कम्बोजस्यापत्यमिति विग्रहेऽञि तस्य लुक् ।

इत्यपत्याधिकारः ॥

अथचातुरर्थिकाः ।

तेन रक्तं[१] रागात् ४।२।१॥ अण् स्यात् । रज्यतेनेनेति रागः । कषायेण रक्तं वस्त्रं काषायम् ॥ **नक्षत्रेण[२] युक्तः कालः ४।२।३॥** अण् स्यात् । (तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम्) । पुष्येण युक्तं पौषमहः ॥ **लुबविशेषे ४।२।४॥** पूर्वेण विहितस्य लुप् स्यात् षाष्टिदण्डात्मकस्य कालस्यावान्तरविशेषश्चेन्न गम्यते । अद्य पुष्यः ॥ **दृष्टं साम[३] ४।२।७॥** तेनेत्येव । वसिष्ठेन दृष्टं वासिष्ठं साम ॥ **वामदेवाड्ड्यड्ड्यौ[४] ४।२।९॥** वामदेवेन दृष्टं साम वामदेव्यम् ॥ **परिवृतो[५] रथः ४।२।१०॥** अस्मिन्नर्थेऽण् प्रत्ययो भवति । वस्त्रेण परिवृतो वास्त्रो रथः ॥ **तत्रोद्धृतममत्रेभ्यः[६] ४।२।१४॥** शरावे उद्धृतः शाराव ओदनः ॥ **संस्कृतं भक्षाः ४।२।१६॥** सप्तम्यन्तादण् स्यात्संस्कृतेऽर्थे यत्संस्कृतं

काषायम् । काषायेण रक्तमितिविग्रहे कषायशव्दादणि आदिवृद्धौ अलोपः । **पौषम्** । पुष्येण युक्तमह इति विग्रहेऽणि आदिवृद्धौ अलोपे यलोपे स्वादिः । **अद्य पुष्यः** । पुष्येण युक्तः काल इति विग्रहेऽणि तस्य कालविशेषानवगमाल्लुप् ।

वासिष्ठं साम । वसिष्ठेन दृष्टं सामेति विग्रहे वसिष्ठशव्दादणादि । **वामदेव्यम्** । वामदेवेन दृष्टं सामेति ड्यत्प्रत्यये टिलोपः । **वास्त्रः** । वस्त्रेण परिवृत इति विग्रहेऽणि आदिवृद्धिः । **शारावः** । शरावशव्दादण् वृद्ध्यादि ।

---

१ रागवाचकात्तृतीयान्तात् समर्थाद् रक्तम् इत्यर्थे अण् स्यात् । २ तृतीयान्तात् समर्थाद् नक्षत्रविशेषवाचिनः शव्दाद् युक्त इत्यर्थे अण् प्रत्ययः योऽसौ युक्तः स कालश्चेद् भवति इति सूत्रार्थः । ३ तृतीयान्तसमर्थाद् दृष्टं सामेत्यर्थे अण् स्यात् यद् दृष्टं साम चेत्तद्भवति । ४ तृतीयान्तसमर्थाद् वामदेवशव्दात् दृष्टं सामेत्यर्थे ड्यत् ड्य इत्येतौ प्रत्ययौ भवतः । ५ तृतीयान्तसमर्थात्परिवृत इत्यर्थे अण् यः परिवृतो रथश्चेत्स इत्यर्थः । ६ सप्तम्यन्तसमर्थादमत्रवाचिनः शव्दादुद्धृतमित्यर्थे अण् प्रत्ययः ।

भक्षाश्चेत्ते स्युः । भ्राष्ट्रेषु संस्कृता भ्राष्ट्राः यवाः ॥ **साऽस्य[1] देवता ४।२।२४॥** इन्द्रो देवताऽस्येति ऐन्द्रं हविः । पाशुपतम् । बार्हस्पत्यम् ॥ **शुक्राद्[2] घन् ४।२।२६॥** शुक्रियम् ॥ **सोमाट्[3] ट्यण् ४।२।३०॥** सौम्यम् ॥ **वाय्वृतुपित्रुषसो[4] यत् ४।२।३१॥** वायव्यम् । ऋतव्यम् ॥ **रीङ् ऋतः ७।४।२७॥** अकृद्यकारे असार्वधातुके यकारे च्वौ च परे ऋदन्ताङ्गस्य रीङादेशः । यस्येति च । पित्र्यम् । उषस्यम् ॥ **पितृव्यमातुलमातामहपितामहाः ४।२।३६॥** एते निपात्यन्ते । पितुर्भ्राता पितृव्यः । मातुर्भ्राता मातुलः । मातुः पिता मातामहः । पितुः पिता

भ्राष्ट्राः । भ्राष्ट्रशब्दादण् । **ऐन्द्रम्** । इन्द्रो देवता अस्येति विग्रहेऽणि आदिवृद्धौ अलोपे सुः । **पाशुपतम्** । पशुपतिर्देवता अस्येतिविग्रहे पशुपतिशब्दादणि वृद्धौ इलोपः । **बार्हस्पत्यम्** । बृहस्पतिर्देवता अस्येतिविग्रहे ण्ये आदिवृद्धौ रपरे इलोपादि । **शुक्रियम्** । शुक्रो देवता अस्येतिविग्रहे शुक्रशब्दाद् घनि घस्य इयादेशे अलोपे स्वादि । **सौम्यम्** । सोमो देवता अस्येति विग्रहे ट्यणि आदिवृद्धौ अलोपादि ।

वायव्यम् । वायुर्देवता अस्येतिविग्रहे वायुशब्दाद् यत्प्रत्यये 'ओर्गुणः' इति गुणेऽवादेशादि । **ऋतव्यम्** । ऋतुर्देवता अस्येति विग्रहः । **पित्र्यम्** । पितरो देवता अस्येतिविग्रहे यति ऋकारस्य रीङादेशे 'यस्येति च' इतीकारलोपे स्वादि । **उषस्यम्** । उषः देवता अस्येति विग्रहः ।

पितृव्यः । पितुर्भ्रातेति विग्रहे पितृशब्दाद् व्यत्प्रत्ययः । **मातुलः** । मातुर्भ्रातेति विग्रहे मातृशब्दाद् डुलच्प्रत्यये डित्त्वात् टिलोपः । **मातामहः** । मातुः पितेतिविग्रहे मातृशब्दाद् डामहचि टिलोपः । **पितामहः** । पितुः पितेतिविग्रहे डामहचि टिलोपः ।

---

[1] प्रथमान्तसमर्थाद् देवता अस्येत्यर्थेऽणादयः । [2] प्रथमान्तशुक्रशब्दादस्यदेवतेत्यर्थे घन् प्रत्यय इत्यर्थः । [3] सोमशब्दात्प्रथमान्तसमर्थात् अस्य देवतेत्यर्थे ट्यण् । [4] प्रथमान्तेभ्यः वायु ऋतु पितृ उषस् शब्देभ्यः देवताऽस्येत्यर्थे यत्प्रत्ययः ।

पितामहः ॥ **तस्य[1] समूहः ४।२।३७॥** काकानां समूहः काकम् ॥ **भिक्षादिभ्योऽण्[2] ४।२।३८॥** भिक्षाणां समूहो भैक्षम् । गर्भिणीनां समूहो गार्भिणम् । इह (भस्याऽढे[3] तद्धिते) इति पुंवद्भावे कृते- **इनण्यनपत्ये ६।४।१६७॥** अनपत्यार्थेऽणि परे इन्प्रकृत्या स्यात् । तेन नस्तद्धित इति टिलोपो न । युवतीनां समूहो यौवनम् ॥ **ग्राम[4]जनबन्धुभ्यस्तल् ४।२.४३ ॥** तलन्तं स्त्रियाम् । ग्रामता । जनता । बन्धुता (गजसहायाभ्यां चेति वक्तव्यम्) गजता । सहायता । (अह्नः[5] खः क्रतौ) । अहीनः ।

काकम् । काकानां समूह इति विग्रहे काकशब्दादणि अलोपः । **भैक्षम्** । भिक्षाशब्दादणि आदिवृद्धौ आलोपः । **गार्भिणम्** । गर्भिणीशब्दादणि 'भस्याढे तद्धिते' इति पुंवद्भावान्ङीपो निवृत्तौ 'इनण्यनपत्ये' इति प्रकृतिभावात् 'नस्तद्धिते' इति टिलोपाभावे आदिवृद्धौ स्वादिः ।

यौवनम् । युवन्शब्दात् 'यूनस्तिः' इति तिप्रत्यये निष्पन्नयुवतिशब्दात्समूहेऽर्थे 'भिक्षादिभ्योऽण्' इत्यणि 'भस्याढे तद्धिते' पुंवद्भावात्तिप्रत्ययनिवृत्तौ आदिवृद्धौ 'अन्' इति प्रकृतिभावात् टिलोपाभावे स्वादि । युधातोः शतृप्रत्यये उवङि युवत्शब्दात् 'उगितश्च' इति ङीपि युवतीशब्दात्तु 'अनुदात्तादेरञ्' इत्यञि 'भस्याढे' इति पुंवद्भावेन ङीपो निवृत्तौ आदिवृद्धौ यौवतमिति ।

ग्रामता । ग्रामाणां समूहः इति विग्रहे ग्रामशब्दात्तलि स्त्रीत्वात् टाबादि । **अहीनः** । अहर्गणसाध्यसुत्याकः क्रतुरित्यर्थः । अह्नां समूह इति विग्रहे क्रतौ विद्यमानाद् अहन्शब्दात्खप्रत्यये तस्य ईनादेशे 'अह्नष्टखोरेव' इति टिलोपः ।

---

[1] षष्ठ्यन्तात्समूह इत्यर्थेऽण् स्यात् । [2] षष्ठ्यन्तभिक्षादिभ्यः समूह इत्यर्थे अण् स्यात् । [3] ढभिन्ने तद्धिते परे भसंज्ञकस्य पुंवद्भाव इत्यर्थः । [4] षष्ठ्यन्तग्रामादिभ्यः समूहेऽर्थे तल् इत्यर्थः । [5] षष्ठ्यन्तादहन्शब्दात्समूह इत्यर्थे खप्रत्ययः समूहः क्रतुसाधकश्चेदित्यर्थः ।

अचित्त[1]हस्तिधेनोष्ठक् ४।२।४७॥ **इसुसुक्तान्तात्कः ७।३।५१॥** इस् उस् उक् त एतदन्तात्परस्य ठस्य कः। सात्तुकम्। हास्तिकम्। धैनुकम्॥ **तद[2]धीते तद्वेद ४।२।५९॥** **न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ७।३।३॥** पदान्ताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः किं तु ताभ्यां पूर्वौ क्रमादैजागमौ स्तः। व्याकरणमधीते वेद वा वैयाकरणः॥ **क्रमा[3]दिभ्यो वुन् ४।२।६१॥** क्रमकः[4]। पदकः। शिक्षकः। मीमांसकः॥ **तदस्मिन्[5]नस्तीति देशे तन्नाम्नि ४।२।६७॥** उदुम्बराः सन्त्यस्मिन्देशे—औदुम्बरो देशः॥ **तेन[6] निर्वृत्तम् ४।२।६८॥** कुशाम्बेन निर्वृत्ता नगरी कौशाम्बी॥ **त[7]स्य निवासः ४।२।६९॥** शिबीनां निवासो देशः शैबः॥ **अ[8]दूरभवश्च ४।२।७०॥**

सात्तुकम्। सक्तूनां समूह इति विग्रहे ठकि ठस्य कादेशे 'किति च' इत्यादिवृद्धिः। **हास्तिकम्**। हस्तिनां समूह इति विग्रहे हस्तिन् शब्दात् ठकि ठस्येकादेशे आदिवृद्धौ टिलोपः। **धैनुकम्**। धेनूनां समूह इति विग्रहे धेनुशब्दात ठकि ठस्य कादेशे आदिवृद्धिः। **वैयाकरणः**। व्याकरणशब्दात् 'तदधीते' इत्यणि यकारात्पूर्वमैजागमः। **क्रमकः**। क्रममधीते वेद वेति विग्रहे क्रमशब्दाद्वुनि 'युवोरनाकौ' इति अकादेशः।

इति रक्ताद्यर्थाः।

औदुम्बरः। उदुम्बरशब्दादणि आदिवृद्धिः। **कौशाम्बी**। कुशाम्बशब्दादणि अणन्तत्वात् 'टिड्ढा' इति ङीप्। **शैबः**। शिबिशब्दादणि

---

१ अचित्तार्थेभ्यो हस्तिधेनुशब्दाभ्यां च ठक् प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये। २ द्वितीयान्तसमर्थादधीते वेद इत्येतयोरर्थयोः अणादयः स्युः। ३ द्वितीयान्तसमर्थक्रमादिभ्यः अधीते, वेद इत्यर्थयोः वुन्। ४ क्रममधीते वेद वेति विग्रहः।

५-६-७-८ प्रथमान्ताद् 'अस्मिन्नस्ति' इत्यर्थे, तृतीयान्ताद् 'निर्वृत्तम्' इत्यर्थे, षष्ठ्यन्ताद् 'निवासः' इत्यर्थे 'अदूरभवः' इत्यर्थे च उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः,

विदिशाया अदूरभवं नगरं वैदिशम् ॥ **जनपदे लुप् ४।२।८१॥** जनपदे वाच्ये चातुरर्थिकस्य लुप् ॥ **लुपि युक्तवद्व्यक्तिवचने १।२।५१॥** लुपि सति प्रकृतिवल्लिङ्गवचने स्तः । पञ्चालानां निवासो जनपदः पञ्चालाः । कुरवः । अङ्गाः । वङ्गाः । कलिङ्गाः ॥ **वरणादिभ्यश्च ४।२।८२ ॥** अजनपदार्थ आरम्भः । वरणानामदूरभवं नगरं वरणाः ॥ **कुमुदनडवेतसेभ्यो ड्मतुप् ४।२।८७॥ झयः ८।२।१० ॥** झयन्तान्मतोर्मस्य वः । कुमुद्वान् । नड्वान् ॥ **मादुपधायाश्च मतोर्वोऽयवादिभ्यः ८।२।९॥** मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जितात्परस्य मतोर्मस्य वः । वेतस्वान् ॥ **नडशादाड्ड्वलच् ४।२।८८॥** नड्वलः । शाद्वलः ॥ **शिखाया वलच् ४।२।८९॥** शिखावलः ॥

इति चातुरर्थिकाः ॥ ३ ॥

* * *

आदिवृद्धौ इकारलोपः । **वैदिशम्** । विदिशाशब्दादणि आदिवृद्धौ आलोपः । **पञ्चालाः** । पञ्चालानां निवासो जनपद इति विग्रहे 'तस्य निवास' इत्यणि 'जनपदे लुप्' इति अणो लुपि प्रकृतिवद्बहुवचनम् ।

वरणाः । वरणाशब्दाद् 'अदूरभवश्च' इत्यणि तस्य 'वरणादिभ्यश्च' इति लुपि 'लुपि युक्तवद्व्यक्तिवचने' इति प्रकृतिवत् स्त्रीलिङ्गं बहुवचनञ्च । **कुमुद्वान्** । कुमुदाः सन्ति अस्मिन्देशे इति विग्रहे ड्मतुपि अलोपे 'झयः' इति मस्य वत्वे कुमुद्वत्शब्दात्स्वादयः । **वेतस्वान्** । वेतसाः सन्त्यस्मिन्निति विग्रहे वेतसशब्दात् ड्मतुपि अलोपे 'मादुपधायाश्च' इति मस्य वत्वे स्वादयः ।

इति चातुरर्थिकाः ॥

तन्नाम्ना देशप्रसिद्धिश्चेदिति क्रमेण सूत्रचतुष्टयार्थः । १ कुरूणाम् अङ्गानां वङ्गानां कलिङ्गानां निवासो जनपद इति क्रमेण विग्रहः ।

अथ शैषिकाः ।

शेषे ४।२।९२॥ अपत्यादिचतुरर्थ्यन्तादन्योर्थः शेषस्तत्राणादयः स्युः । चक्षुषा गृह्यते चाक्षुषं रूपम् । श्रावणः शब्दः । औपनिषदः पुरुषः ॥ दृषदि पिष्टाः—दार्षदाः सक्तवः । चतुर्भिरुह्यं चातुरं शकटम् । चतुर्दश्यां दृश्यते चातुर्दशं रक्षः । 'तस्य विकार' इत्यतः प्राक् शेषाधिकारः । **राष्ट्राऽवारपाराद्घखौ ४।२।९३॥** आभ्यां क्रमाद् घखौ स्तः शेषे । राष्ट्रे जातादिः—राष्ट्रियः । अवारपारीणः । (अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम् । अवारीणः । पारीणः । पारावारीणः । इह प्रकृतिविशेषाद् घादयष्ट्युटयुलन्ताः प्रत्यया उच्यन्ते तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते । **ग्रामाद्यखञौ ४।२।९४॥** ग्राम्यः । ग्रामीणः ॥ **नद्यादिभ्यो ढक् ४।२।९७॥** नादेयम् । माहेयम् । वाराणसेयम् ॥ **दक्षिणापश्चात्पुरसस्त्यक्**

चाक्षुषम् । चक्षुषा गृह्यते इति विग्रहे चक्षुष्शब्दात् 'शेषे' इत्यणि आदिवृद्धिः । **श्रावणः** । श्रवणेन गृह्यते इति विग्रहे श्रवणशब्दादणि आदिवृद्धौ अलोपे स्वादिः । **औपनिषदः** । उपनिषदा गृह्यते इति विग्रहे उपनिषद्शब्दादणि आदिवृद्धौ सुः । **दार्षदाः** । दृषद्शब्दादणि आदिवृद्धौ रपरत्वे प्रातिपदिकत्वाज्जस् । **चातुरम्** । चतुर्शब्दादणि आदिवृद्धिः । **चातुर्दशम्** । चतुर्दशीशब्दादणि आदिवृद्धौ ईकारलोपः ।

राष्ट्रियः । राष्ट्रशब्दाद् घप्रत्यये घस्य इयादेशे अलोपः । **अवारपारीणः** । अवारपारे जात इति विग्रहे अवारपारशब्दात् खे खस्य ईनि अलोपे णत्वम् । **ग्राम्यः** । ग्रामे जातादिरिति विग्रहे यप्रत्यये अलोपः । **ग्रामीणः** । ग्रामशब्दाज्जाताद्यर्थे खे तस्य ईनादेशे अलोपे णत्वादि ।

नादेयम् । नद्यां जातादि इति विग्रहे नदीशब्दाद् ढकि ढस्य एयि 'किति च' इत्यादिवृद्धौ 'यस्येति च' इति ईकारलोपः । **माहेयम्** । मह्यां जात इति विग्रहे महीशब्दाद् ढक् । **वाराणसेयम्** ।

४।२।९८॥ दाक्षिणात्यः । पाश्चात्यः[1] । पौरस्त्यः ॥ **द्युप्रागपागुदक्प्रतीचो यत् ४।२।१०१॥** दिव्यम् । प्राच्यम् । अपाच्यम् । उदीच्यम् । प्रतीच्यम् ॥ **अव्ययात्त्यप् ४।२।१०४॥** (अमेहक्वतसित्रेभ्य एव) अमात्यः ॥ इहत्यः[2] । क्वत्यः । ततस्त्यः । तत्रत्यः । (त्यब्नेर्ध्रुव इति वक्तव्यम्) । नित्यः ॥ **वृद्धिर्यस्याचामादिस्तद्वृद्धम् १।१।७३॥** यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात् ॥ **त्यदादीनि च १।१।७४॥** वृद्धसंज्ञानि स्युः । **वृद्धाच्छः ४।२।११४॥** शालीयः । मालीयः । तदीयः । (वा नामधेयस्य वृद्धसंज्ञा वक्तव्या) । देवदत्तीयः । देवदत्तः ॥ **गहादिभ्यश्च ४।२।१३८॥** गहीयः ॥ **युष्मदस्मदोरन्यतरस्यां खञ् च ४।३।१॥** चाच्छः । पक्षेऽण् । युवयोर्युष्माकं वायं युष्मदीयः । अस्मदीयः ॥ **तस्मिन्नणि च युष्माकास्माकौ ४।३।२॥**

वाराणस्यां जातादीति विग्रहे वाराणसीशब्दाद् ढगादि । दाक्षिणात्यः । दक्षिणेत्याजन्तमव्ययम् । दक्षिणा जातादि इति विग्रहे दक्षिणाशब्दात् त्यकि आदिवृद्धिः ।

दिव्यम् । दिवि जातादीति विग्रहे दिवशब्दात् यत् । **प्राच्यम्** । प्राचि जातादीति विग्रहः । प्रपूर्वादञ्चुधातोः क्विनि तस्य लोपे 'द्युप्राग' इति यति 'अनिदिताम्' इति नलोपे 'अचः' इत्यकारलोपे 'चौ' इति दीर्घे स्वादि ।

अमात्यः । अमा 'अन्तिकसहार्थयोः । अमा भवो जातो वेति विग्रहे अमाशब्दात्त्यप् । **शालीयः** । शालायां जातादिरितिविग्रहे शालाशब्दस्य वृद्धसंज्ञायां 'वृद्धाच्छः' इति छप्रत्यये छस्य ईयि आलोपे सुः । **गहीयः** । गहो देशविशेषः । तत्र जातादिरितिविग्रहे छः । **युष्मदीयः** । युष्मद्शब्दात् छप्रत्यये छस्य ईय् ।

---

[1] पश्चाज्जातः, पुरो जात इति विग्रहः । [2] इह जातादि इति विग्रहः ।

युष्मदस्मदोरेतावादेशौ स्तः खञ्यणि च । यौष्माकीणः । आस्माकीनः । यौष्माकः । आस्माकः । **तवकममकावेकवचने ४।३।३ ॥** एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञि अणि च । तावकीनः । तावकः । मामकीनः । मामकः । छे तु—**प्रत्ययोत्तरपदयोश्च ७।२।९८ ॥** मपर्यन्तयोरेतयोरेकार्थवाचिनोस्त्वमौ स्तः प्रत्यये उत्तरपदे च परतः । त्वदीयः । मदीयः । त्वत्पुत्रः । मत्पुत्रः ॥ **मध्यान्मः ४।३।८ ॥** मध्यमः ॥ **कालाट्ठञ् ४।३।११॥** कालवाचिभ्यष्ठञ् स्यात् । कालिकम् । मासिकम् । सांवत्सरिकम् । (अव्ययानां भमात्रे टिलोपः) । सायम्प्रातिकः[1] । पौनःपुनिकः[2] ॥ **प्रावृष एण्यः ४।३।१७॥** प्रावृषेण्यः । **सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ४।३।२३ ॥** सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यष्ट्युट्युलौ स्तस्तयोस्तुट् च । सायन्तनम् । चिरन्तनम् । प्राह्णेप्रगेऽनयोरेदन्तत्वं निपात्यते प्राह्णेतनम् । प्रगेतनम् । दोषातनम् ॥

यौष्माकीणः । युष्मदः खञि खस्य ईनादेशे युष्मदो युष्माकादेशे अलोपे आदिवृद्धौ णत्वे सुः । **तावकीनः** । तवायमितिविग्रहे युष्मदः खञि तस्य ईनि युष्मदस्तवकादेशे अलोपे आदिवृद्धिः । **त्वदीयः** । तवायमितिविग्रहे युष्मदः छे छस्य ईयि युष्मदस्त्वादेशे पररूपम् ।

मध्यमः । मध्ये जातादिरिति विग्रहः । **कालिकम्** । काले भवमितिविग्रहे कालशब्दात् ठञि ठस्येकादेशे अलोपः ।

सायन्तनम् । सायम्भवमितिविग्रहः । षोऽन्तकर्मणि इति धातोः षस्य सत्वे घञि आत्वे युकि सायशब्दात् ट्युप्रत्यये योरनादेशे तुटि निपातनात्सायशब्दस्य मान्तत्वेऽनुस्वारे परसवर्णे स्वादि । यदि तु सायमिति चिरमिति च मान्ताव्ययमाश्रित्य ट्युट्युलौ विधीयेते तदा सूत्रे सायंचिरं ग्रहणं व्यर्थमेव अव्ययत्वादेव प्रयोगसिद्धेः

---

[1] सायम्प्रातर्भव इति । [2] पुनः पुनर्भव इति ।

तत्र जातः ४।४।२५ ॥ सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः । स्रुघ्ने जातः स्रौघ्नः । उत्से जातः औत्सः । राष्ट्रे जातो राष्ट्रियः । अवारपारे जातः अवारपारीण इत्यादि ॥ **प्रावृषष्ठप्**[1] **४।३।२६ ॥** एण्यापवादः । प्रावृषिकः । **प्रायभवः**[2] **४।३।३९ ॥** तत्रेत्येव । स्रुग्घ्ने प्रायेण बाहुल्येन भवति स्रौग्घ्नः ॥ **संभूते ४।३।४१ ॥** स्रुघ्ने संभवति स्रौग्घ्नः ॥ **कोशाड्ढञ् ४।३।४२ ॥** कौशेयं वस्त्रम् ॥ **तत्र**[3] **भवः ४।३।५३ ॥** स्रुघ्ने भवः स्रौग्घ्नः । औत्सः । राष्ट्रियः ॥ **दिगादिभ्यो यत् ४।३।५४ ॥** दिश्यम् । वर्ग्यम् ॥ **शरीरावयवाच्च ४।३।५५ ॥** दन्त्यम् । कण्ठ्यम् । (अध्यात्मादेष्ठञिष्यते) । अध्यात्मं भवमाध्यात्मिकम् ॥ **अनुशतिकादीनां च ७।३।२० ॥** एषामुभयपदवृद्धिर्ञिति णिति किति च । आधिदैविकम् । आधिभौतिकम् । ऐहलौकिकम् । पारलौकिकम् । आकृतिगणोऽयम् ॥ **जिह्वामूला-**

प्रावृषिकः । प्रावृषि जात इति विग्रहे ठपि ठस्येकादेशे स्वादिः ।

कौशेयम् । कोशे सम्भूतमितिविग्रहे कोशशब्दात् ढञि ढस्य एयि अलोपे आदिवृद्धौ स्वादि । **दिश्यम्** । दिशि भवमिति विग्रहे दिश्शब्दाद् यत् । **दन्त्यम्** । दन्ते भवमितिविग्रहे दन्तशब्दाद् यति अलोपः ।

आध्यात्मिकम् । आत्मन् ङि अधि इति विग्रहे 'अव्ययम्' इति समासे सुब्लुकि 'अनश्च' इति टचि 'नस्तद्धिते' इति टिलोपे यणि अध्यात्मशब्दात् ठञि ठस्य इकादेशे आदिवृद्धौ अलोपे स्वादिः । **आधिदैविकम्** । अधिदेवं भवमितिविग्रहे अधिदेवशब्दात ठञि ठस्येकादेशे उभयपदवृद्धौ अलोपे प्रातिपदिककार्यम् ।

---

[1] सप्तम्यन्तसमर्थाज्जात इत्यर्थे प्रावृष्शब्दात् ठप्प्रत्ययः । [2] सप्तम्यन्तसमर्थात्प्रायभव इत्यर्थे संभूतइत्यर्थे चाणादयो घादयश्च स्युः इति सूत्रद्वयार्थः । [3] सप्तम्यन्तसमर्थाद्भव इत्यर्थेऽणादयः ।

ङ्गुलेश्छः ४।३।६२ ॥ जिह्वामूलीयम् । अङ्गुलीयम् ॥ **वर्गान्ताच्च ४।३।६३** ॥ कवर्गीयम् ॥ **तत[1] आगतः ७।३।७४** ॥ स्रुग्घ्नादागतः स्रौग्घ्नः ॥ **ठगायस्थानेभ्यः ४।३।७५** ॥ शुल्कशालाया आगतः शौल्कशालिकः ॥ **विद्यायोनिसंबन्धेभ्यो वुञ् ४।३।७७**। औपाध्यायकः । पैतामहकः ॥ **हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ४।३।८१**॥ समादागतं समरूप्यम् । पक्षे गहादित्वाच्छः । समीयम् । विषयीयम् । देवदत्तरूप्यम् । दैवदत्तम् ॥ **मयट् च ४।३।८२**। सममयम्। देवदत्तमयम् । **प्रभवति[2] ४।३।८३** ॥ हिमवतः प्रभवति हैमवती गङ्गा ॥ **तद्गच्छति[3] पथिदूतयोः ४।३।८५**॥ स्रुग्घ्नं गच्छति स्रौग्घ्नः पन्था दूतो वा ॥ **अभिनिष्क्रामति[4] द्वारम् ४।३।८६**॥ स्रुग्घ्नमभिनिष्क्रामति स्रौग्घ्नं कान्यकुब्जद्वारम् ॥ **अधिकृत्य[5] कृते**

जिह्वामूलीयम् । जिह्वामूले भवमितिविग्रहे जिह्वामूलशब्दाच्छे छस्य ईयि अलोपे स्वादिः । **कवर्गीयम्** । कवर्गे भवमितिविग्रहे कवर्गशब्दाच्छः । **शौल्कशालिकः** । शुल्कशालाशब्दात् ठकि ठस्येकादेशे आदिवृद्धौ आलोपे प्रातिपदिककार्यम् । **औपाध्यायकः** । उपाध्यायादागत इति विग्रहे उपाध्यायशब्दाद्वुञि वोरकादेशे आदिवृद्धौ अलोपे सुः ।

समरूप्यम् । समशब्दाद् रूप्यप्रत्यये स्वादिः । पक्षे छे छस्य ईयि अलोपः । **सममयम्** । समादागतमिति विग्रहे समशब्दान्मयट् । **हैमवती** । हिमवतः प्रभवतीति विग्रहे हिमवत्शब्दात् अणि आदिवृद्धौ

---

[1] पञ्चम्यन्तसमर्थाद् आगत इत्यर्थेऽणादयो घादयश्च स्युः । [2] पञ्चम्यन्तसमर्थात् प्रभवति इत्यर्थेऽणादयो घादयश्च स्युः । [3] द्वितीयान्तसमर्थाद् गच्छतीत्यर्थेऽणादयो घादयश्च स्युः, यो गच्छति स पन्था दूतो वा चेत् इत्यर्थः । [4] द्वितीयान्तसमर्थाद् अभिनिष्क्रामति इत्यर्थेऽणादयो घादयश्च स्युः, यद् अभिनिष्क्रामति द्वारं तच्चेद्भवति । [5] द्वितीयान्तसमर्थाद् अधिकृत्य कृतो ग्रन्थ इत्यर्थेऽणादयो घादयश्च स्युः ।

ग्रन्थे ४।३।८७ ॥ शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः ॥ **सोऽस्य[1] निवासः ४।३।८९॥** स्रुघ्नो निवासोऽस्य स्रौघ्नः ॥ **तेन प्रोक्तम्[2] ४।३।१०१॥** पाणिनिना प्रोक्तं पाणिनीयम् ॥ **तस्येदम्[3] ४।३।१२०॥** उपगोरिदं औपगवम् ॥

॥ इति शैषिकाः ॥ ४ ॥

* * *

अथ विकारार्थकाः ॥

तस्य[4] विकारः ४।३।१३४॥ (अश्मनो विकारे टिलोपो वक्तव्यः) । अश्मनो विकारः-आश्मः । भास्मनः । मार्तिकः ॥ **अवयवे च[5] प्राण्योषधिवृक्षेभ्यः ४।३।१३५ ॥** चाद्विकारे । मयूरस्यावयवो विकारो वा मायूरः । मौर्वं काण्डं भस्म वा । पैप्पलम् ॥ **मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः ४।३।१४३ ॥**

'टिड्ढा' इति ङीप् । **शारीरकीयः** । शारीरकशब्दाच्छः । **पाणिनीयम्** । पाणिनिशब्दाच्छः ।

इति शैषिकाः ।

आश्मः । अश्मनो विकार इति विग्रहे अश्मनशब्दणि आदिवृद्धौ टिलोपः । **भास्मनः** । भस्मनो विकार इति विग्रहे भस्मन्शब्दादणि आदिवृद्धौ 'अन्' इति प्रकृतिभावात् टिलोपो न । **मायूरः** । मयूरशब्दात् 'प्राणिरजतादिभ्योऽञ्' इत्यञ् । **मौर्वम्** । मूर्वा ओषधिविशेषः । मूर्वायाः अवयवोविकारोवेति विग्रहे मूर्वाशब्दादणि । वृद्ध्यादिः ।

---

[1] प्रथमान्तसमर्थाद् अस्य निवास इत्यर्थेऽणादयो घादयश्च । [2] तृतीयान्तसमर्थात्प्रोक्तमित्यर्थेऽणादयः । [3] षष्ठयन्तसमर्थाद् इदम् इत्यर्थेऽणादयो घादयश्च स्युः । [4] षष्ठयन्तसमर्थाद् विकार इत्यर्थेऽणादयः प्रत्ययाः स्युः । [5] षष्ठयन्तेभ्यः प्राणिवाचक ओषधिवाचक वृक्षवाचकशब्देभ्यः अवयवे विकारे चाणादयः स्युः ।

प्रकृतिमात्रान्मयड्वा स्यात् विकारावयवयोः । अश्ममयम् । आश्मनम् । अभक्ष्येत्यादि किम्-मौद्गः सूपः । कार्पासमाच्छादनम् । **नित्यं वृद्धशरादिभ्यः ४।३।१४४॥** आम्रमयम् ॥ **गोश्च पुरीषे ४।३।१४५ ॥** गोः पुरीषं गोमयम् ॥ **गोपयसोर्यत् ४।३।१६० ॥** गव्यम् । पयस्यम् ॥ पृ. १५, ३८३

॥ इति विकारार्थाः । (प्राग्दीव्यतीयाः) ॥ ९ ॥

* * *

अथ ठगधिकारः ।

प्राग्वहतेष्ठक् ४।४।१॥ तद्वहतीत्यतः प्राक् ठगधिक्रियते ॥ **तेन[1] दीव्यति खनति जयति जितम् ४।४।२॥** अक्षैर्दीव्यति खनाति जयति जितो वा-आक्षिकः ॥ **संस्कृतम् ४।४।३॥** दध्ना संस्कृतं दाधिकम् । मारीचिकम् ॥ **तरति ४।४।५ ॥** तेनेत्येव । उडुपेन तरति

अश्ममयम् । 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वाच्यः' इति वचनाद् अश्मभेदशब्दे भेदशब्दस्य लोपे अश्मन् इति । तस्यावयवो विकारोवेति विग्रहे षष्ठयन्त अश्मन् शब्दान्मयटि प्रातिपदिकत्त्वात्सुब्लुकि 'स्वादिषु' इति पदत्वात् नलोपे प्रातिपदिककार्यम् । मयटोऽभावपक्षेतु अणि आदिवृद्धौ 'अन्' इति प्रकृतिभावात् टिलोपाभावे आश्मनमिति । अत्र 'अश्मनो विकारे' इति टिलोपस्तु न प्रसिद्धत्वात्पाषाणवाचकस्यैव अश्मन्शब्दस्य तत्र ग्रहणात् ।

गव्यम् । गोर्विकार इति विग्रहे षष्ठ्यन्तगोशब्दाद् यति सुब्लुकि अवादेशे प्रातिपदिककार्यम् ।

इति विकारार्थाः ॥

आक्षिकः । तृतीयान्तात् अक्षशब्दात् ठकि सुब्लुकि ठस्येकादेशे 'किति च' इत्यादिवृद्धौ अलोपे सुः । **दाधिकम्** । दधिशब्दात् ठक् ।

---

[1] तृतीयान्तसमर्थात् दीव्यति, खनति, जयति, जितम्, संस्कृतम्, तरति, चरति, संसृष्टम्, इत्येतेष्वर्थेषु ठक् प्रत्ययः स्यात् इति सूत्रपञ्चकार्थः ।

औडुपिकः ॥ **चरति ४।४।८** ॥ तृतीयान्ताद्गच्छति भक्षयतीत्यर्थयोष्ठक् स्यात् । हस्तिना चरति हास्तिकः । दध्ना चरति दाधिकः ॥ **संसृष्टे ४।४।२२॥** दध्ना संसृष्टं दाधिकम् ॥ **उञ्छति[1] ४।४।३२॥** बदराण्युञ्छति बादरिकः ॥ **रक्षति ४।४।३३॥** समाजं रक्षति सामाजिकः ॥ **शब्ददर्दुरं[2] करोति ४।३।३४॥** शब्दं करोति शाब्दिकः । दर्दुरं करोति दार्दुरिकः ॥ **धर्मं[3] चरति ४।४।४१॥** धार्मिकः । (अधर्माच्चेति वक्तव्यम्) आधर्मिकः ॥ **शिल्पम्[4] ४।४।५५॥** मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः ॥ **प्रहरणम् ४।४।५७॥** तदस्येत्येव । असिः प्रहरणमस्य—आसिकः ॥ धानुष्कः ॥ **शीलम् ४।४।६१॥** अपूपभक्षणं शीलमस्य—आपूपिकः **निकटे[5] वसति ४।४।७३॥** नैकटिको भिक्षुकः ॥

इति ठगधिकारः ॥ (प्राग्वहतीयाः) ॥ ६ ॥

* * *

अथ यदधिकारः ।

प्राग्घिताद्यत् ४।४।७५॥ तस्मै हितमित्यतः प्राग् यदधिक्रियते ॥ **तद्वहति[6] रथयुगप्रासंगम् ४।४।७६॥** रथं वहति रथ्यः ।

औडुपिकः । उडुपशब्दात् ठकि आदिवृद्धौ इकादेशे अलोपः । **हास्तिकः** । हस्तिन्शब्दात् ठकि इके वृद्धौ टिलोपः । **बादरिकः** । बदरशब्दात् ठक् । **सामाजिकः** । समाजशब्दात् ठक् । **मार्दङ्गिकः** । मृदङ्गशब्दात् ठकि वृद्धौ रपरे अलोपः ।

इति ठगधिकारः ॥

---

[1] द्वितीयान्तसमर्थात् उञ्छत्ति, रक्षति, इत्यर्थयोः ठक् इति सूत्रद्वयार्थः । [2] द्वितीयान्तसमर्थाभ्यां शब्द. दर्दुरशब्दाभ्यां करोति इत्यर्थे ठक् । [3] द्वितीयान्तसमर्थाद् धर्मशब्दात् चरति इत्यर्थे ठक् । [4] प्रथमान्तसमर्थाद् शिल्पम्, प्रहरणम्, शीलम्, अस्य इत्येतेष्वर्थेषु ठक् इति सूत्रत्रयार्थः । [5] सप्तम्यन्तसमर्थात् निकटशब्दात् वसति इत्यर्थे ठक् । [6] द्वितीयान्तसमर्थेभ्यो रथ, युग, प्रासङ्ग शब्देभ्यो वहति इत्यर्थे यत् प्रत्ययः ।

युग्यः । प्रासङ्ग्यः ॥ **धुरो[1] यड्ढकौ ४।४।७७॥** हलि चेति दीर्घे प्राप्ते—**न भकुर्छुराम् ८।२।७९॥** भस्य कुर्छुरोश्चोपधाया इको दीर्घो न स्यात् । धुर्यः । धौरेयः ॥ **नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु ४।४।९१॥** नावा तार्यं नाव्यं जलम् । वयसा तुल्यो वयस्यः । धर्मेण प्राप्यं धर्म्यम् । विषेण वध्यो विष्यः । मूलेन आनाम्यं मूल्यम् । मूलेन समो मूल्यः । सीतया समितं सीत्यं क्षेत्रम् । तुलया संमितं तुल्यम् । **तत्र[2] साधुः ४।४।९८॥** अग्रे साधुः–अग्र्यः । सामसु साधुः सामन्यः । 'ये चाभावकर्मणोरिति' प्रकृतिभावः । कर्मण्यः । शरण्यः ॥ **सभाया[3] यः ४।४।१०५॥** सभ्यः ॥

इति यतोऽवधिः । (प्राग्घतीयाः)॥७॥

आम्नाय-ग्रन्थालय,
भरतनिधि, करौंदी
वाराणसी-5

अथ छयतोरधिकारः ।

प्राक् क्रीताच्छः ५।१।१॥ तेन क्रीतमित्यतः प्राक् छोऽधिक्रियते । **उगवादिभ्यो यत् ५।१।२॥** प्राक् क्रीतादित्येव । उवर्णा-

---

धुर्यः । धुरं वहतीति विग्रहे धुरशब्दाद् यति 'हलि च' इति दीर्घे प्राप्ते 'न भकुर्छुराम्' इति तन्निषेधः । **धौरेयः** । धुरं वहतीति विग्रहे धुर्शब्दाद् ढकि 'किति च' इति वृद्धौ ढस्य एयि अलोपः । **नाव्यम्** । नौशब्दाद् यति आवादेशः । **अग्र्यः** । सप्तम्यन्तअग्रशब्दाद् यति सुब्लुकि अलोपः । **सभ्यः** । सभायां साधुरिति विग्रहे सभाशब्दाद् यप्रत्यये 'यस्येति च' इत्यालोपे प्रातिपदिककार्यम् ।

इति यतोऽवधिः ।

---

१ द्वितीयान्तसमर्थात् धुरशब्दाद् वहति इत्यर्थे यत्, ढक्प्रत्ययौ भवतः । २ सप्तम्यन्तसमर्थात् साधुः इत्यर्थे यत् । ३ सप्तम्यन्तसमर्थात्सभाशब्दात्साधुः इत्यर्थे य प्रत्ययः ।

न्ताद्गवादिभ्यश्च यत् स्यात् । छस्यापवादः । शङ्कवे हितं शङ्कव्यं दारु । गव्यम् । (नाभि नभं च) । नभ्योऽक्षः । नभ्यमञ्जनम् ॥ **तस्मै[1] हितम् ५।१।५॥** वत्सेभ्यो हितो वत्सीयो गोधुक् ॥ **शरीरावयवाद्यत्[2] ५।१।६॥** दन्त्यम् । कण्ठ्यम् । नस्यम् । **आत्मन्विश्वजनभोगोत्तरपदात्खः[3] ५।१।९॥ आत्माध्वानौ खे ६।४।१६९॥** एतौ खे प्रकृत्या स्तः ॥ आत्मने हितम्—आत्मनीनम् । विश्वजनीनम् । मातृभोगीणः ॥

इति छयतोरवधिः । (प्राक्क्रीतीयाः) ॥ ८ ॥

अथ ठञधिकारः ।

प्राग्वतेष्ठञ् ५।१।१८॥ तेन तुल्यमिति वतिं वक्ष्यति, ततः प्राक् ठञधिक्रियते ॥ **तेन क्रीतम्[4] ५।१।३७॥** सप्तत्या क्रीतं साप्ततिकम् । प्रास्थिकम् ॥ **तस्येश्वरः[5] ५।१।४२॥** सर्वभूमिपृथिवीभ्यामणञौ स्तः । अनुशतिकादीनां च । सर्वभूमेरीश्वरः सार्वभौमः । पार्थिवः ॥ पङ्क्ति

शङ्कव्यम् । शङ्कुशव्दात् यति 'ओर्गुणः' इति गुणेऽवादेशः । **वत्सीयः** । वत्सशव्दाच्छे छस्य ईयि अलोपः । **दन्त्यम्** । दन्ताय हितमितिविग्रहे दन्तशव्दाद् यति अलोपः । **आत्मनीनम्** । आत्मन्शव्दात् खे खस्य ईनि प्रकृतिभावात् टिलोपो न । **मातृभोगीणः** । मातृभोगाय हित इति विग्रहे मातृभोगशव्दात् खे खस्य ईनि अलोपे प्रातिपदिककार्यम् ।

इति छयतोः पूर्णोऽवधिः ॥

साप्ततिकम् । सप्ततिशव्दात् ठञि ठस्य इके आदिवृद्धौ इलोपः । **सार्वभौमः** । सर्वभूमिशव्दादणि इलोपे 'अनुशतिकादीनां च' इत्यु-

---

[1] चतुर्थ्यन्तसमर्थात् हितम् इत्यर्थे छः प्रत्ययः । [2] चतुर्थ्यन्तसमर्थात् शरीरावयववाचकशब्दात् हितम् इत्यर्थे यत्प्रत्ययः । [3] चतुर्थ्यन्तसमर्थेभ्यः आत्मन् विश्वजन, भोगोत्तरपद, एतेभ्यो हितम् इत्यर्थे खः प्रत्ययः स्यात् । [4] तृतीयान्तसमर्थात् क्रीतम् इत्यर्थे ठञ् प्रत्ययः । [5] षष्ठ्यन्तसमर्थात् ईश्वरः इत्यर्थे ठञ् ।

विंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ५।१।६९॥ एते रूढिशब्दा निपात्यन्ते॥ **तदर्हति**[1] ५।१।६३॥ लब्धुं योग्यो भवतीत्यर्थे द्वितीयान्ताट्ठञादयः स्युः। श्वैतच्छत्रमर्हति श्वैतच्छत्रिकः॥ **दण्डादिभ्यो**[2] **यत्** ५।१।६६॥ एभ्यो यत् स्यात्। दण्डमर्हति दण्ड्यः। अर्घ्यः। वध्यः॥ **तेन निर्वृत्तम्**[3] ५।१।७९॥ अह्ना

भयपदवृद्धा सुः। **पार्थिवः**। पृथिव्या ईश्वर इति विग्रहे पृथिवीशब्दादञि आदिवृद्धौ रपरत्वम्।

पङ्क्तीति। एते परिमाणेऽर्थे निपात्यन्ते। तथाहि-पञ्च पादाः परिमाणमस्येत्यर्थे पञ्चन्शब्दात् तिप्रत्यये टिलोपे कुत्वे अनुस्वारे परसवर्णे **पङ्क्तिः**। दशानां वर्ग इति विग्रहे दशन्शब्दात् 'पञ्चद्दशतौ वर्गे वा' इति निपातनात्डतिप्रत्यये टिलोपे दशत् इति ततश्च द्वौ दशतौ परिमाणमस्य इति विग्रहे शनिच्प्रत्यये प्रकृतेः विन्भावेऽनुस्वारे **विंशतिः**। त्रयः दशतः परिमाणमस्येति त्रयाणां दशतां त्रिन्भावे शत्प्रत्यये च **त्रिंशत्**। चत्वारो दशतः परिमाणमस्येति शत्प्रत्यये प्रकृतेः चत्वारिन् आदेशे **चत्वारिंशत्**। पञ्च दशतः परिमाणमस्येति शत्प्रत्यये प्रकृतेः पञ्चा इत्यादेशे **पञ्चाशत्**। षट् दशतः परिमाणमस्येति तिप्रत्यये प्रकृतेः षष्इत्यादेशे जश्त्वाभावे ष्टुत्वे **षष्टिः**। सप्त दशतः परिमाणमस्येति तिप्रत्यये प्रकृतेः सप्त इत्यादेशे **सप्ततिः**। अष्टौ दशतः परिमाणमस्येति तिप्रत्यये प्रकृते अशी इत्यादेशे **अशीतिः**। नव दशतः परिमाणमस्येति तिप्रत्यये प्रकृतेः नव इत्यादेशे **नवतिः**। दश दशतः परिमाणमस्येति तप्रत्यये प्रकृतेः श इत्यादेशे **शतम्**।

श्वैतच्छत्रिकः। श्वेतच्छत्रशब्दात् ठञि इके वृद्धौ अलोपः। **आह्निकम्**। अहन्शब्दात् ठञि इके आदिवृद्धौ 'अह्नष्टखोरेव' इति

---

[1] द्वितीयान्तसमर्थादित्यादिः। [2] द्वितीयान्तसमर्थेभ्यो दण्डादिगणपठितेभ्यः अर्हति इत्यर्थे यत्प्रत्ययः। [3] तृतीयान्तसमर्थात् निर्वृत्तमित्यर्थे ठञ् प्रत्ययः।

निर्वृत्तम्—आह्निकम् ॥

इति ठञोऽवधिः। (प्राग्वतीयाः) ॥ ९ ॥

अथ त्वतलधिकारः।

तेन तुल्यं[1] क्रिया चेद्वतिः ५।१।११५॥ ब्राह्मणेन तुल्यं ब्राह्मणवत् अधीते। क्रिया चेदिति किम् गुणतुल्ये मा भूत्। पुत्रेण तुल्यः स्थूलः॥ **तत्र[2] तस्येव ५।१।११६॥** मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः। चैत्रस्येव चैत्रवन्मैत्रस्य गावः॥ **तस्य[3] भावस्त्वतलौ ५।१।११९॥** प्रकृतिजन्यबोधे प्रकारो भावः। गोर्भावो गोत्वम्। गोता। त्वान्तं क्लीबम्। **आ च त्वात् ५।१।१२०॥** ब्रह्मणस्त्व इत्यतः प्राक् त्वतलावधिक्रियेते। अपवादैः सह समावेशार्थमिदम्। चकारो नञ्स्नञ्भ्यामपि समावेशार्थः। स्त्रियाः भावः—स्त्रैणम्। स्त्रीत्वम्। स्त्रीता। पौंस्नम्। पुंस्त्वम्। पुंस्ता॥ **पृथ्वादिभ्य[4] इमनिज्वा ५।१।१२२॥** वावचनमणादिसमावेशार्थम्। **र ऋतो हलादेर्लघोः ६।४।१६१॥** हलादेर्लघोर्ऋकारस्य रः स्यादिष्ठेमेयस्सु परतः। पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वम्॥ **टेः ६।४।१५५॥** भस्य टेर्लोप इष्ठेमेयस्सु। पृथोर्भावः प्रथिमा। इग-

---

नियमात् टिलोपाभावे 'अल्लोपोऽनः' इत्यल्लोपः। इति ठञोऽवधिः।

गोत्वम्। षष्ठ्यन्तगोशब्दात् त्वप्रत्यये सुब्लुकि त्वान्तस्य क्लीबत्वात्सोरम्। **प्रथिमा**। पृथोर्भाव इति विग्रहे पृथुशब्दाद् इमनिच्प्रत्ययेऽनुबन्धलोपे ऋकारस्य रादेशे टिलोपे प्रातिपदिकत्वात्सौ दीर्घे सुलोपे नलोपः। पक्षेऽणि वृद्धौ रपरत्वे पार्थवम्।

---

[1] तृतीयान्तसमर्थात्तुल्यम् इत्यर्थे वतिः प्रत्ययः यत् तुल्यं सा क्रिया चेत् इत्यर्थः। [2] सप्तम्यन्तसमर्थात् षष्ठ्यन्तसमर्थाच्च इव इत्यर्थे वतिः प्रत्ययः। [3] षष्ठ्यन्तसमर्थात् भावः इत्यर्थे त्वतलौ प्रत्ययौ स्तः। [4] षष्ठ्यन्तसमर्थेभ्यः पृथ्वादिभ्यः भाव इत्यर्थे इमनिच् प्रत्ययः।

न्ताच्चलघुपूर्वात् ५।१।१३१। इगन्ताल्लघुपूर्वात् प्रातिपदिकाद्भावेऽण् प्रत्ययः॥ पार्थवम्। म्रदिमा। मार्दवम्॥ **वर्णदृढादिभ्यः**[1] **ष्यञ्च** ५।१।१२३॥ चादिमनिच्। शौक्ल्यम्। शुक्लिमा। दार्ढ्यम्। द्रढिमा। **गुणवचनब्राह्मणादिभ्यः**[2] **कर्मणि च** ५।१।१२४॥ चाद्भावे। जडस्य भावः कर्म वा जाड्यम्। मूढस्य भावः कर्म वा मौढ्यम्। ब्राह्मण्यम्॥ आकृतिगणोयम्॥ **सख्युर्यः**[3] ५।१।१२६॥ सख्युर्भावः कर्म वा सख्यम्॥ **कपिज्ञात्योर्ढक्**[4] ५।१।१२७॥ कापेयम्। ज्ञातेयम्॥ **पत्यन्तपुरोहितादिभ्यो**[5] **यक्** ५।१।१२८॥ सैनापत्यम्। पौरोहित्यम्॥

॥ इति त्वतलधिकारः॥ १०॥

अथ भवनाद्यर्थकाः।

धान्यानां[6] **भवने क्षेत्रे खञ्** ५।२।१॥ भवत्यास्मिन्निति भवनम् मुद्गानां भवनं क्षेत्रं मौद्गीनम्॥ **व्रीहिशाल्योर्ढक्**[7] ५।२।२॥

शौक्ल्यम्। शुक्लस्य भाव इति विग्रहे शुक्लशब्दात्ष्यञि वृद्धौ अलोपः। **जाड्यम्**। जडशब्दात्ष्यञि वृद्धौ अलोपः। **सख्यम्**। सखिशब्दात् ये इलोपे स्वादिः। **मौद्गीनम्**। मुद्गशब्दात्खञि खस्य ईनि आदिवृद्धौ अलोपः। **व्रैहेयम्**। व्रीहीणां भवनं क्षेत्रमिति विग्रहे व्रीहिशब्दात् ढकि ढस्य एयि आदिवृद्धौ ईकारलोपे स्वादिः।

---

[1] षष्ठयन्तसमर्थेभ्यो वर्णवाचिभ्यः दृढादिभ्यश्च भावः इत्यर्थे ष्यञ् चाद् इमनिच्। [2] षष्ठयन्तसमर्थेभ्यो गुणवाचकेभ्यो ब्राह्मणादिभ्यश्च भावः कर्म, इत्यर्थयोः ष्यञ् प्रत्ययः। [3] षष्ठयन्तसमर्थात्सखिशब्दाद् भावे कर्मणि चार्थे यः प्रत्ययः। [4] षष्ठयन्तसमर्थकपिज्ञातिशब्दाभ्यां भावकर्मणोरर्थयोर्ढक् प्रत्ययः। [5] षष्ठयन्तसमर्थेभ्यः पत्यन्तशब्देभ्यः पुरोहितादिशब्देभ्यश्च भावकर्मणोरर्थयोर्यक् प्रत्ययः। [6] षष्ठयन्तसमर्थात् धान्यवाचिशब्दात् 'भवनं क्षेत्रम्' इत्यर्थे खञ् प्रत्ययः। [7] षष्ठयन्तसमर्थव्रीहिशालिशब्दाभ्यां भवनं क्षेत्रम् इत्यर्थे ढक्।

त्रैहेयम् । शालेयम् ॥ **हैयङ्गवीनं संज्ञायाम् ५।२।२३ ॥** ह्योगोदोहशब्दस्य हियङ्गुरादेशः विकारार्थे खञ्च निपात्यते । दुह्यत इति दोहः क्षीरम् । ह्योगोदोहस्य विकारः—हैयङ्गवीनं नवनीतम् ॥ **तदस्य[1] संजातं तारकादिभ्य इतच् ५।२।३६ ॥** तारकाः संजाता अस्य तारकितं नभः । पण्डितः । आकृतिगणोऽयम् ॥ **प्रमाणे[2] द्वयसज्दघ्नञ्मात्रचः ५।२।३७ ॥** तदस्येत्यनुवर्तते । ऊरू प्रमाणमस्य—ऊरुद्वयसम् । ऊरुदघ्नम् । ऊरुमात्रम् ॥ **यत्तदेतेभ्यः[3] परिमाणे वतुप ५।२।३९ ॥** यत्परिमाणमस्य यावान् । तावान् । एतावान् ॥ **किमिदम्भ्यां वो घः ५।२।४० ॥** आभ्यां वतुप् स्यात् वकारस्य घादेशश्च ॥ **इदं किमोरीश्की ६।३।९० ॥** दृग्दृशवतुषु इदम ईश् किमः की । कियान् । ईयान् । **संख्याया अवयवे तयप् ५।२।४२ ॥** पञ्च

हैयङ्गवीनम् । ह्योगोदोहशब्दात् खञि ह्योगोदोह इत्यस्य हियङ्गु इत्यादेशे खस्य ईनि आदिवृद्धौ 'ओर्गुणः' इति गुणेऽवादेशः ।

तारकितम् । तारकाशब्दादितचि आलोपे प्रातिपदिककार्यम् । **पण्डितः** । सदसद्विवेकिनी बुद्धिः पण्डा सा संजाता अस्येतिविग्रहे पण्डाशब्दादितचि आलोपः । ~~आतो लोप इटि च ॥६।४।६४॥~~ यस्येति च ॥६।४।१४८॥

तावान् । तत् परिमाणमस्येतिविग्रहे तद्शब्दात् वतुप्यनुबन्धलोपे 'आसर्वनाम्नः' इति तदो दकारस्य आकारे दीर्घे तावत् शब्दात्स्वादिः ।

कियान् । किं परिमाणमस्येतिविग्रहे किम्शब्दाद्वतुपि वकारस्य घादेशे घस्य इयि किम् इयत् इति स्थिते किमः की इत्यादेशे 'यस्येति

---

[1] प्रथमान्तसमर्थतारकादिशब्देभ्यः अस्य संजातम् इत्यर्थे इतच् । [2] प्रथमान्तसमर्थाद् प्रमाणम् अस्य इत्यर्थे द्वयसजादिः । [3] प्रथमान्तसमर्थेभ्यः यद्, तद्, एतद् शब्देभ्यः परिमाणमस्य इत्यर्थे वतुप्प्रत्ययः ।

अवयवा अस्य पञ्चतयम् ॥ **द्वित्रिभ्यां तयस्यायज्वा ५।२।४३ ॥** द्वयम् । द्वितयम् । त्रयम् । त्रितयम् ॥ **उभादुदात्तो नित्यम् ५।२।४४ ॥** उभशब्दात्तयपोऽयच् स्यात् स चाद्युदात्तः ॥ **तस्य[1]पूरणे डट् ५।२।४८ ॥** एकादशानां पूरणः—एकादशः ॥ **नान्तादसंख्यादेर्मट् ५।२।४९ ॥** डटो मडागमः । पञ्चानां पूरणः पञ्चमः । नान्तात्किम्— । **ति विंशतेर्डिति ६।४।१४२ ॥** विंशतेर्भस्य तिशब्दस्य लोपो डिति परे । विंशः । असंख्यादेः किम्—एकादशः । **षट्कतिकतिपयचतुरां थुक् ॥ ५।२।५१ ॥** एषां थुगागमः स्याड्डटि । षण्णां पूरणः षष्ठः । कतिथः । कतिपयशब्दस्यासंख्यात्वेऽप्यत एव ज्ञापकाड्डट् । कतिथः । चतुर्थः ॥ **द्वेस्तीयः ५।२।५४ ॥** डटोपवादः । द्वयोः पूरणो द्वितीयः ॥ **त्रेः संप्रसारणं च ५।२।५५ ॥** तृतीयः ॥ **श्रोत्रियंश्छन्दोऽधीते ५।२।८४ ॥** श्रोत्रियः ॥ वेत्यनुवृत्तेश्छान्दसः ॥ **पूर्वा[2]दिनिः ५।२।८६ ॥** पूर्वं कृतमनेन पूर्वी ॥ **[3]सपूर्वाच्च**

च' इतीकारलोपे कियत्शब्दात्सौ 'उगिदचाम्' इति नुमि 'अत्वसन्तस्य' इति दीर्घे सुलोपे संयोगान्तलोपः ।

द्वयम् । द्वौ अवयवौ यस्येतिविग्रहे द्विशब्दात्तयपि तयपोऽयजादेशे इकारलोपे स्वादिः । **एकादशः** । एकादशन्शब्दाद् डटि टिलोपे स्वादिः । **विंशः** । विंशतेः पूरण इतिविग्रहे विंशतिशब्दात् डटि तिलोपे अलोपे सुः । **षष्ठः** । षष्शब्दात् डटि थुकि ष्टुत्वम् ।

श्रोत्रियः । छन्दोऽधीते इति विग्रहे छन्दस्शब्दाद् घनि छन्दसः

प्रथमान्तसमर्थसंख्यावाचिशब्दात् अवयवा अस्य इत्यर्थे तयप् ।

[1] षष्ठ्यन्तसमर्थात् संख्यावाचिशब्दात् पूरणः इत्यर्थे डट् ।

[2] विद्यमानपूर्वपदात् पूर्वशब्दाद् इनिः प्रत्ययः अनेन इत्यस्मिन्नर्थे ।

१- मतुप् [illegible] ।। धारा ८।। मत्स्य [illegible]
(पृ. २६२)

५।२।८७ ॥ कृतपूर्वी ॥ **इष्टादिभ्यश्च**[1] ५।२।८८ ॥ इष्टमनेन—इष्टी । अधीती ॥

॥ इति भवनाद्यर्थकाः ॥ ११ ॥

* * *

अथ मत्वर्थीयाः ।

तदस्यास्त्यस्मिन्निति मतुप्[2] ५।२।९४ ॥ गावोऽस्याऽस्मिन्वा सन्ति गोमान् ॥ **तसौ मत्वर्थे** १।४।१९ ॥ तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे । गरुत्मान् । वसोः संप्रसारणम् । विदुष्मान् (गुणवचनेभ्यो मतुपो लुगिष्टः) शुक्लो गुणोऽस्यास्तीति शुक्लः पटः । कृष्णः ॥ **प्राणिस्थादातोलजन्यतरस्याम्**[3] ५।२।९६ ॥ चूडालः । १ चूडावान् । प्राणिस्थात्किम्—शिखावान् दीपः । प्राण्यङ्गादेव । मेधावान् ॥ श प्रत्य **लोमादिपामादिपिच्छादिभ्यः शनेलचः** ५।२।१०० ॥ य लोमादिभ्यः शः । लोमशः । लोमवान् । रोमशः । रोमवान् ॥ पामादिभ्यो

श्रोत्रादेशे घस्य इयि अलोपे सुः । **कृतपूर्वी** । कृतं पूर्वमनेनेतिविग्रहे कृतपूर्वशब्दादिनिप्रत्यये अलोपे प्रातिपदिककार्यम् ।

इति भवनाद्यर्थकाः ॥

गोमान् । गोशब्दान्मतुपि प्रातिपदिकत्वात्सौ नुमि 'अत्वसन्तस्य' इति दीर्घे सुलोपे तलोपः । **विदुष्मान्** । विद्वांसोऽस्यास्मिन्वा सन्तीतिविग्रहे विद्वस्शब्दात् 'तदस्य' इति मतुपि 'तसौ मत्वर्थे इति भसंज्ञायां 'वसोः सम्प्रसारणम्' इति सम्प्रसारणे पूर्वरूपे प्रातिपदिककार्यम् । **चूडालः** । चूडा अस्त्यस्येतिविग्रहे चूडाशब्दात् लचि स्वादिः ।

---

[1] प्रथमान्तसमर्थेभ्यः इष्टादिभ्यः अनेन इत्यर्थे इनिः प्रत्ययः । [2] प्रथमान्तसमर्थाद् 'अस्य अस्ति' 'अस्मिन् अस्ति' इत्यर्थयोर्मतुप् । [3] प्रथमान्तसमर्थाद् आकारान्तप्राण्यङ्गवाचिशब्दात् 'अस्य अस्ति' 'अस्मिन् अस्ति' इत्यर्थयोः लच् प्रत्ययः ।

CC0. In Public Domain, Digitization by eGangotri

नः । पामनः (अंगात्कल्याणे) । अंगना । (लक्ष्म्या अच्च) लक्ष्मणः । पिच्छादिभ्य इलच् । पिच्छिलः । पिच्छवान् ॥ **दन्त[१] उन्नत उरच् ५।२।१०६** ॥ उन्नता दन्ताः सन्त्यस्य दन्तुरः ॥ **केशाद्वोऽन्यतरस्याम् ५।२।१०९** ॥ केशवः । केशी । केशिकः । केशवान् । (अन्येभ्योऽपि दृश्यते) । मणिवः । (अर्णसो[२] लोपश्च) । अर्णवः[३] ॥ **अत[४] इनिठनौ ५।२।११५** ॥ दण्डी । दाण्डिकः ॥ **व्रीह्यादि[५]भ्यश्च ५।२।११६** ॥ व्रीही । व्रीहिकः ॥ **अस्मायामेधास्रजो[६] विनिः ५।२।१२१** ॥ यशस्वी । यशस्वान् । मायावी । मेधावी । स्रग्वी ॥ **वाचो ग्मिनि[७]ः ५।२।१२४** ॥ वाग्मी ॥ **अर्शआदि[८]-**

लक्ष्मणः । लक्ष्मीरस्यास्तीतिविग्रहे लक्ष्मीशब्दात् 'लक्ष्म्या अच्च' इति नप्रत्यये अकारेऽन्तादेशे च णत्वे सुः । **अङ्गना** । कल्याणानि अङ्गानि अस्याः इतिविग्रहे अङ्गशब्दात् नप्रत्यये टाप् । **पिच्छिल** । पिच्छमस्यास्तीतिविग्रहे पिच्छशब्दाद् इलचि अलोपः । **केशवः** । केशमस्यासीति विग्रहे केशशब्दात् वप्रत्ययः । पक्षे 'अत इनिठनौ' इति इनिप्रत्यये **केशी** । ठनि केशिकः । मतुपि मस्य वत्वे केशवान् ।

दण्डी । दण्डमस्यास्तीति दण्डशब्दादिनिः । **व्रीही** । व्रीहिरस्यास्तीति व्रीहिशब्दादिनिप्रत्यये इलोपे प्रातिपदिककार्यम् । ठनि व्रीहिकः । मतुपि व्रीहिमान् । **यशस्वी** । यशः अस्यास्तीति यशस्शब्दाद्विनिप्रत्यये स्वादिः । **वाग्मी** । वाक् अस्यास्तीति वाच्शब्दाद् ग्मिनिप्रत्ययः ।

---

[१] उन्नतोपाधिकाद् दन्तशब्दादुरच्प्रत्ययो मतुवर्थे । [२] अर्णस्शब्दाद् वप्रत्ययः अर्णव सस्य लोपश्च मत्वर्थे । [३] अर्णांसि जलानि सन्त्यस्मिन्निति अर्णवः समुद्रः । [४] अकारान्तात्प्रातिपदिकादिनिठनौ प्रत्ययौ भवतो मत्वर्थे । [५] मत्वर्थे इनिठनौ । [६] असन्तात्प्रातिपदिकाद् माया मेधा स्रज् इत्येतेभ्यश्च विनिः प्रत्ययो मत्वर्थे । [७] वाच् शब्दाद्ग्मिनिः प्रत्ययो मत्वर्थे । [८] अर्शस् इत्यादिभ्यः प्रातिपदिकेभ्योऽच् प्रत्ययो मत्वर्थे ।

भ्योऽच् ५।२।१२७ ॥ अर्शोऽस्य विद्यते—अर्शसः । आकृतिगणोऽयम् ॥ **अहंशुभमोर्युस्[1] ५।२।१०४ ॥** अहंयुः—अहङ्कारवान् । शुभंयुस्तु शुभान्वितः ॥

॥ इति मत्वर्थीयाः ॥ १२ ॥

[illegible] ५।४।४४ [illegible]

अथ प्राग्दिशीयाः । 14/110 ||

प्राग्दिशो विभक्तिः ५।३।१॥ दिक्छब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः ॥ **किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ५।३।२॥** किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधिक्रियन्ते । **पञ्चम्यास्तसिल् ५।३।७॥** पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल् वा स्यात् ॥ **कु तिहोः ७।२।१०४॥** किमः कुः स्यात्तादौ हादौ च विभक्तौ परतः । कुतः ॥ **इदम इश् ५।३।३॥** प्राग्दिशीये परे । इतः । **अन् ५।३।५॥** एतदः प्राग्दिशीये । अनेकाल्त्वात्सर्वादेशः । अतः । अमुतः । यतः । बहुतः । द्व्यादेस्तु द्वाभ्याम् । **पर्यभिभ्यां च ५।**

अहंयुः । अहमस्यास्तीतिविग्रहे अहमित्यव्ययाद् युस् ।

इति मत्वर्थीयाः ॥

कुतः । पञ्चम्यन्तकिम्शब्दात्तसिलि तद्धितान्तत्वेन प्रातिपदिकत्वात् सुपो लुकि किमः कुइत्यादेशे अव्ययत्वात्सुपो लुक् । **इतः** । अस्मादितिविग्रहे इदम्शब्दात्पञ्चम्यन्तात्तसिलि सुब्लुकि इदम इशि अव्ययत्वात्सोर्लुक् । **अतः** । एतस्मादिति एतद्शब्दात्तसिलि एतदः अन् इत्यादेशे नलोपः ।

अमुतः । पञ्चम्यन्ताददस्शब्दात्तसिलि सुब्लुकि 'प्राग्दिशो विभक्तिः' इति तसिलो विभक्तित्वात्तस्मिन्परे 'त्यदादीनामः' इत्यत्वे पररूपे

---

[1] अहम् इति मान्तमव्ययमहङ्कारे, शुभम् इति शुभे ताभ्यां युस् प्रत्ययो भवति मत्वर्थे ।

३।९।। अभ्यां तासिल् स्यात् । परितः । सर्वत इत्यर्थः । अभितः । उभयत इत्यर्थः ।। **सप्तम्यास्त्रल्**[1] **५।३।१०।।** कुत्र । यत्र । तत्र । बहुत्र ।। **इदमो हः**[2] **५।३।११।।** त्रलोऽपवादः । इह ।। **किमोऽत् ५।३।१२।।** वाग्रहणमपकृष्यते । सप्तम्यन्तात्किमोऽद्वा स्यात् पक्षे त्रल् ।। **क्वाति ७।२।१०५।।** किमः क्वादेशः स्यादति । क्व । कुत्र ।। **इतराभ्योऽपि दृश्यन्ते ५।३।१४।।** पञ्चमीसप्तमीतरविभक्त्यन्तादपि तासिलादयो दृश्यन्ते। दृशिग्रहणाद्भवदादियोग एव । स भवान् । ततो भवान् । तत्र भवान् । तम्भवन्तम् । ततो भवन्तम् । तत्र भवन्तम् । एवं दीर्घायुः । देवानाम्प्रियः । आयुष्मान् ।। **सर्वैकान्यकिंयत्तदः काले दा ५।३।१५।।** सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे दा स्यात ।। **सर्वस्य सोऽन्यतरस्यां दि ५।३।६।।** दादौ प्राग्दिशीये सर्वस्य सो वा स्यात् । सर्वस्मिन् काले सदा । सर्वदा । अन्यदा । कदा । यदा । तदा । काले किम्—सर्वत्र देशे ।। **इदमो र्हिल् ५।३।१६।।** सप्तम्यन्तात् । काले इत्येव । **एतेतौ रथोः ५।३।४।।** इदम्शब्दस्य एत इत् इत्यादेशौ स्तो रफादौ थकारादौ च

'अदसोऽसेर्दादुदोमः' इति मुत्वे अव्ययत्वात्सोर्लुक् । **यतः** । यद्शब्दात्तसिलि त्यदाद्यत्वे पररूपत्वम् । **कुत्र** । कस्मिन्निति विग्रहे सप्तम्यन्तकिम्शव्दात् त्रलि सुब्लुकि किमः कुइत्यादेशेऽव्ययत्वात्सोर्लुक् । **इह** । अस्मिन्निति विग्रहे इदम्शव्दात् त्रलं वाधित्वा हप्रत्यये इदम इशि सोर्लुक् ।

क्व । किमः अत्प्रत्यये क्वादेशे अलोपः । **सदा** । सप्तम्यन्तसर्वशव्दात्काले दाप्रत्यये सुब्लुकि सर्व इत्यस्य स इत्यादेशः । **कदा** । कस्मिन्काले इति विग्रहे किम्शव्दाद् दाप्रत्यये तस्य विभक्तित्वात्तस्मिन्परे 'किमः कः' इति किमः कादेशेऽव्ययत्वात्सोर्लुक् ।

---

[1] किम् सर्वनामबहुभ्यः सप्तम्यन्तेभ्यः त्रल्प्रत्ययो भवति । [2] सप्तम्यन्ताद् इदम्शब्दाद् हः प्रत्ययो भवति ।

CC0. In Public Domain, Digitization by eGangotri

द्वे इमे कुमार्यौ [illegible] कुमारी इति
कुमारितरा ॥ सर्वाः इमाः कुमार्यः, इयमासामतिशयेन
कुमारी इति कुमारितमा।

प्राग्दिशीये परे । अस्मिन् काले—एतर्हि । काले—इह देशे ॥ **अनद्यतने र्हिलन्यतरस्याम् ५।३।२१॥** कर्हि । कदा । यर्हि । यदा । तर्हि तदा ॥ **एतदः ५।३।५॥** एत इत् एतौ स्तो रेफादौ थादौ च प्राग्दिशीये । एतस्मिन्काले—एतर्हि ॥ **प्रकारवचने थाल् ५।३।२३॥** प्रकारवृत्तिभ्यः किमादिभ्यस्थाल् स्यात् स्वार्थे । तेन प्रकारेण तथा । यथा ॥ **इदमस्थमुः ५।३ २४॥** थालोपवादः । (एतदोऽपि वाच्यः) । अनेन एतेन वा प्रकारेण इत्थम् ॥ **किमश्च ५।३।२५॥** केन प्रकारेण कथम् ॥

इति प्राग्दिशीयाः ॥ १३ ॥

* * *

अथ प्रागिवीयाः ।

अतिशायने तमबिष्ठनौ ५।३।५५॥ अतिशयविशिष्टार्थवृत्तेः सुबन्तात् स्वार्थ एतौ स्तः । अयमेषामतिशयेनाढ्यः—आढ्यतमः । लघुतमः । लघिष्ठः ॥ **तिङश्च ५।३।५६॥** तिङन्तादतिशये द्योत्ये तमप् स्यात् । **तरप्तमपौ घः १।१।२२॥** एतौ घसंज्ञौ स्तः ॥ **किमेत्तिङव्ययघा-**

कुमारितरा - कुमारितमा।

एतर्हि । इदम् शब्दात् र्हिलि इदमः एत इत्यादेशः । कर्हि । किमो र्हिलि किमः कादेशः ।

यर्हि । यदो र्हिलि त्यदाद्यत्वे पररूपत्वम् । तथा । तद्शब्दात् थालि त्यदाद्यत्वे पररूपादिः । इत्थम् । इदमशब्दाद् एतद्शब्दाद्वा थमुप्रत्ययेऽनुबन्धलोपे इत् इत्यादेशः ।

इति प्राग्दिशीयाः ॥

लघिष्ठः । अतिशयेन लघुरितिविग्रहे लघुशब्दादिष्ठनि 'टेः' इति टिलोपे सुः ।

---

१ किंसर्वनामबहुभ्यः सप्तम्यन्तेभ्योऽनद्यतनकाले वर्तमानेभ्यो र्हिल् प्रत्ययो वा भवति ।

दाम्वद्रव्यप्रकर्षे ५।४।११॥ किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे । किन्तमाम् । प्राह्णतमाम् । पचतितमाम् । उच्चैस्तमाम् । द्रव्यप्रकर्षे तु उच्चैस्तनस्तरुः ॥ **द्विवचनविभज्योपपदे तरबीयसुनौ ५।३।५७॥** द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः । पूर्वयोरपवादः । अयमनयोरातिशयेन लघुः—लघुतरो—लघीयान् । उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसः ॥ **प्रशस्यस्य श्रः ५।३।६०॥** अस्य श्रादेशः स्यादजाद्योः परतः ॥ **प्रकृत्यैकाच् ६।४।१६३॥** इष्टादिष्वेकाच् प्रकृत्या स्यात् । श्रेष्ठः । श्रेयान् ॥ **ज्य च ५।३।६१॥** प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः । ज्येष्ठः ॥ **ज्यादादीयसः ६।४।१६०॥** आदेः परस्य । ज्यायान् ॥ **बहोर्लोपो भू च बहोः ६।४।१५८॥** वहोः परयोरिमेयसोर्लोपः स्याद्बहोश्च भूरादेशः । भूमा । भूयान् ॥ **इष्ठस्य यिट् च ६।४।१५९॥** वहोः परस्य इष्ठस्य लोपः स्याद्यिडागमश्च । भूयिष्ठः । **विन्मतोर्लुक् ५।३।६५॥**

किंतमाम् । किमस्तमपि तत आमुः अनुवन्धलोपेऽव्ययत्वात्सोर्लुक् **लघीयान्** । अयमनयोरतिशयेन लघुरितिविग्रहे लघुशव्दादीयसुन्प्रत्यये 'टेः' इतिटिलोपे लघीयस्शव्दात्सौ 'उगिदचाम्' इति नुमि सान्तमहतः' इति दीर्घे 'हल्ङ्याव्भ्यः' इति सुलोपे संयोगान्तलोपः । **श्रेष्ठः** । अयमनयोरतिशयेन प्रशस्यः इतिविग्रहे प्रशस्यशव्दात् इष्ठनि प्रशस्य इत्यस्य श्रइत्यादेशे प्रकृतिभावान्न टिलोपः ।

ज्यायान् । प्रशस्यशव्दादीयसुनि प्रशस्य इत्यस्य ज्य इत्यादेशे प्रकृतिभावात् टिलोपाभावे ईयसुन ईकारस्य आकारे दीर्घे ज्यायस्शव्दात्सौ नुमि 'सान्त' इति दीर्घे सुलोपे संयोगान्तलोपः ।

भूमा । वहोर्भाव इति विग्रहे वहुशव्दात् 'पृथ्वादिभ्य इमनिज्वा' इति इमनिच्प्रत्यये इकारलोपे वहोर्भूभावे सुः । **भूयिष्ठः** । अयमनयोरतिशयेन वहुरितिविग्रहे वहुशव्दाद् इष्ठनि इलोपे यिट् ।

विनो मतुपश्च लुक् स्यादिष्ठेयसोः । अतिशयेन स्रग्वी स्रजिष्ठः । स्रजीयान् । अतिशयेन त्वग्वान्-त्वचिष्ठः । त्वचीयान् ॥ **ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ५।३।६७॥** ईषदूनो विद्वान्विद्वत्कल्पः । विद्वद्देश्यः । विद्वद्देशीयः । पचतिकल्पम् ॥ **विभाषा सुपो बहुच् पुरस्तात्तु ५।३।६८॥** ईषदसमाप्तिविशिष्टेऽर्थे सुबन्ताद्बहुज्वा स्यात्स च प्रागेव न तु परतः । ईषदूनः पटुर्बहुपटुः । पटुकल्पः । सुपः किम्—जयतिकल्पम् ॥ **प्रागिवात्कः ५।३।७०॥** इवे प्रतिकृतावित्यतः प्राक्काधिकारः ॥ **अव्ययसर्वनाम्नामकच् प्राक् टेः ५।३।७१॥** कापवादः । तिङश्चेत्यनुवर्तते । (ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्, अन्यत्र सुबन्तस्य) ॥ **अज्ञाते ५।३।७३॥** कस्यायमश्वोऽश्वकः । उच्चकैः । नीचकैः । सर्वकैः । युष्मकाभिः । युवकयोः । त्वयका ॥ **कुत्सिते ५।३।७४॥** कुत्सितोऽश्वोऽश्वकः ॥ **किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् ५।३।९२॥** अनयोः कतरो वैष्णवः । यतरः । ततरः ॥ **वा बहूनां जातिपरिप्रश्ने डतमच् ५।३।९३॥** जातिपरिप्रश्न इति प्रत्याख्यातमाकरे । बहूनां मध्ये एकस्य निर्धारणे डतमज्वा स्यात् । कतमो भवतां कठः । यतमः । ततमः । वाग्रहणमकजर्थम् । यकः । सकः ॥

इति प्रागिवीयाः ॥ १४ ॥

* * *

अथ स्वार्थिकाः ।

इवे प्रतिकृतौ ५।३।९६॥ कन्स्यात् । अश्व इव प्रतिकृतिरश्वकः । (सर्वप्रातिपदिकेभ्यः स्वार्थे कन्) । अश्वकः ॥ **तत्प्रकृतवचने मयट्**

स्रजिष्ठः । स्रज्शब्दात् ‘अस्मायामेधस्रजोविनिः’ इति विनिप्रत्यये तत अतिशायने इष्ठनि विनोलुक् । **अश्वकः** । अश्वशब्दादकच् । **कतरः** । किम्शब्दाद् डतरचि डित्त्वाट्टिलोपः ।

इति प्रागिवीयाः ।

५।४।२१॥ प्राचुर्येण प्रस्तुतं प्रकृतम् । तस्य वचनं प्रतिपादनम् । भावे अधिकरणे वा ल्युट् । आद्ये प्रकृतमन्नमन्नमयम् । अपूपमयम् । द्वितीये तु अन्नमयो यज्ञः । अपूपमयं पर्व ॥ **प्रज्ञादिभ्यश्च** ५।४।३८॥ अण् स्यात् । प्रज्ञ एव प्राज्ञः । प्राज्ञी स्त्री । दैवतः । बान्धवः ॥ **बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्** ५।४।४२॥ बहूनि ददाति बहुशः । अल्पशः । (आद्यादिभ्यस्तसेरुपसंख्यानम्) । आदौ आदितः । मध्यतः । अन्ततः । पार्श्वतः । आकृतिगणोयम् । स्वरेण-स्वरतः । वर्णतः ॥ **कृभ्वस्तियोगे संपद्यकर्तरि च्विः** ५।४।५०॥ (अभूततद्भाव इति वक्तव्यम्) । विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद्विकारशब्दात् स्वार्थे च्विर्वा स्यात्करोत्यादिभिर्योगे ॥ **अस्य च्वौ** ७।४।३२॥ अवर्णस्य ईत्स्यात् च्वौ । वेर्लोपे च्व्यन्तत्वादव्ययत्वम् । अकृष्णः कृष्णः संपद्यते तं करोति कृष्णीकरोति । ब्रह्मीभवति । गङ्गीस्यात् । (अव्ययस्य च्वावीत्वं नेति वाच्यम्) । दोषा भूतमहः । दिवाभूता रात्रिः ॥ **विभाषा साति कात्स्न्र्ये** ५।४।५२॥ च्विविषये सातिर्वा स्यात्साकल्ये ॥ **सात्पदाद्योः** ८।३।१११॥ सस्य षत्वं न स्यात् । कृत्स्नं शस्त्रमग्निः संपद्यतेऽग्निसाद्भवति । दधि सिञ्चति ॥ **च्वौ च** ७।४।२६॥ च्वौ परे पूर्वस्य दीर्घः स्यात् । अग्नीभवति ॥ **अव्यक्तानुकरणाद्व्यजवरार्धादनितौ डाच्** ५।४।५७॥ द्व्यजेवाऽवरं न्यूनं, न तु ततो न्यूनम् । अनेकाजिति यावत् । तादृशमर्धं यस्य तस्माड्डाच् स्यात् कृभ्वस्तिभिर्योगे । (डाचि विवक्षिते द्वे बहुलम्) इति डाचि विवक्षिते द्वित्वम् । (नित्यमाम्रेडिते डाचीति वक्तव्यम्) । डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पररूपं

स्वार्थे

दैवतः । देवता एवेतिविग्रहे देवताशब्दादणि आदिवृद्धौ आलोपे सुः । **ब्रह्मीभवति** । न ब्रह्म अब्रह्म अब्रह्म ब्रह्म सम्पद्यमानं भवतीति विग्रहे ब्रह्मन्शब्दात् च्वौ इचावितौ 'वेरपृक्तस्य' इति वलोपे नलोपे अस्य ईत्वम् । **अग्निसाद्भवति** । अग्निशब्दात्सातिप्रत्यये षत्वनिषेधः । **पटपटाकरोति** ।

⓪ अदोषा दोषा सम्पद्यत, तद् अभवत् इति
दोषाभूतमहः। अदिवा दिवा सम्पद्यत, सा
अभवत् इति - दिवाभूता रात्रिः॥ दोषा + भूतम्
दोषा + च्वि + भूतम् । [illegible] अभिप्राय - दोषाभूतम्

१ [illegible] पृ. १२८

CC0. In Public Domain. Digitization by eGangotri

स्यात् । इति तकारपकारयोः पकारः । पटपटा करोति । अव्यक्तानुकरणात्किम्—ईषत्करोति । द्व्यजवरार्धात्किम्—श्रत्करोति । अवेरति किम्—खरटखरटा करोति । अनितौ किम्—पटिति करोति ॥ इति स्वार्थिकाः ॥१९॥

इति तद्धिताः ॥

* * *

अथ स्त्रीप्रत्ययाः ।

स्त्रियाम् ४।१।३॥ अधिकारोऽयम् । समर्थानामिति यावत् ॥ **अजाद्यतष्टाप् ४।१।४॥** अजादीनामकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप्स्यात् । अजा । एडका । अश्वा । चटका । मूषिका ॥ बाला । वत्सा । होढा । मन्दा । विलाता । इत्यादि ॥ गङ्गा । सर्वा । **उगितश्च ४।१।६॥** उगिदन्तात्प्रातिपदिकात्स्त्रियां ङीप्स्यात् भवती । भवन्ती । पचन्ती । दीव्यन्ती ॥ **टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्-**

पटत्शव्दस्य 'डाचि विवक्षिते' इति द्वित्वे ततो डाचि टिलोपे 'नित्यमाम्रेडिते' इति तकारपकारयोः पकारः ।

इति तद्धिताः ॥

अजा । अजत्वजातिविशिष्टा स्त्री इति विग्रहे अजशव्दात् 'जातेरस्त्रीविषयादयोपधात्' इति ङीपि प्राप्ते 'अजाद्यतष्टाप्' इति टापि अनुवन्धलोपे सवर्णदीर्घे सौ 'हल्ङ्याब्भ्यः' इति सुलोपः । मूषिका । 'मुष स्तेये' इति धातोः 'मुषेर्दीर्घश्च' इत्यौणादिकसूत्रेण किकन्प्रत्यये उकारस्य दीर्घे च मूषिकशव्दः । मूषिकत्वजातिविशिष्टा स्त्रीतिविग्रहे मूषिकशव्दात् जातिलक्षणङीपं वाधित्वा टाप् ।

वाला । वालत्ववयोविशिष्टा स्त्री इति विग्रहे वालशव्दात् 'वयसि प्रथमे' इति ङीपि प्राप्ते टापि सवर्णदीर्घः । भवती । भाधातोः डवतुप्रत्यये टिलोपे भवत्शव्दाद् 'उगितश्च' इति ङीप् । भूधातोः शतृप्रत्यये-

---

[1] अजादि शव्देभ्यः 'जातेरस्त्रीविषयादयोपधात्' इति जातिलक्षणो ङीष् प्राप्तः ।

[2] वालादि शव्देभ्यः 'वयसिप्रथमे' इति ङीप् प्राप्तः ॥

तयप्ठक्ठञ्कञ्क्वरपः ४।१।१५॥ अनुपसर्जनं यट्टिदादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप्स्यात् । कुरुचरी । नदट् नदी । देवट् देवी । सौपर्णेयी । ऐन्द्री । औत्सी । ऊरुद्वयसी । ऊरुदघ्नी । ऊरुमात्री । पञ्चतयी । आक्षिकी । प्रास्थिकी । लावणिकी । यादृशी । इत्वरी । (नञ्स्नञीकक्-

---

शपि गुणेऽवादेशे पररूपे भवतृशब्दात् ङीपि 'शप्श्यनोर्नित्यम्' इति नुमि भवन्तीति ।

कुरुचरी । कुरूपपदात् चरधातोः 'चरेष्टः' इति टप्रत्यये कुरुचरशब्दात् 'टिड्ढाणञ्' इत्यादिना ङीपि 'यस्येति च' इत्यकारलोपे सुलोपः । **नदी** । नदट्इत्यस्य पचादिगणे टितः पाठात् स्वतः टित्त्वम् । ततश्च नदशब्दान्ङीपि अलोपः । **देवट्** । पचादिगणे टितोऽस्य पाठात्स्वताष्टित्त्वम् । ततश्च देवशब्दान्ङीपि अलोपे देवीति । **सौपर्णेयी** । सुपर्ण्याः अपत्यं स्त्री इति विग्रहे सुपर्णीशब्दात् 'स्त्रीभ्यो ढक्' इति ढकि 'आयनेयी' इति ढस्य एयि 'यस्येति च' इतीकारलोपे 'किति च' इत्यादिवृद्धौ सौपर्णेयशब्दान्ङीपि अलोपे सुलोपः ।

सौपर्णेयी।

ऐन्द्री । इन्द्रो देवता अस्याः इति विग्रहे इन्द्रशब्दात् 'सास्य देवता' इत्यणि अलोपे आदिवृद्धौ ऐन्द्रशब्दान्ङीप् । **औत्सी** । उत्से भवा इति विग्रहे उत्सशब्दाद् 'उत्सादिभ्योऽञ्'इत्यञि अलोपे आदिवृद्धौ औत्सशब्दान्ङीप् अलोपः। **ऊरुद्वयसी** । ऊरू प्रमाणमस्या इति विग्रहे ऊरुशब्दात् 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' इति द्वयसच्प्रत्यये ऊरुद्वयसशब्दान्ङीप् । **पञ्चतयी** । पञ्च अवयवाः अस्याः इति विग्रहे पञ्चन्शब्दात् 'सङ्ख्याया अवयवे तयप्' इति तयपि नलोपे पञ्चतयशब्दान्ङीपि अलोपः ।

आक्षिकी । अक्षैर्दीव्यतीति विग्रहे अक्षशब्दात् 'तेन दीव्यति खनति जयति जितम्' इति ठकि 'ठस्येकः' इति ठस्य इकादेशे अलोपे 'आदिवृद्धौ' आक्षिकशब्दान्ङीपि अलोपः । **प्रास्थिकी** । प्रस्थः परिमाणमस्या इति विग्रहे प्रस्थशब्दात् 'तदस्य परिमाणम्' इति ठञि इके अलोपे आदिवृद्धौ प्रास्थिकशब्दान्ङीप् । **लावणिकी** । लवणं पण्यमस्या

ख्युंस्तरुणतलुनानामुपसंख्यानम्)। स्त्रैणी। पौंस्नी। शाक्तीकी। याष्टीकी। आढ्यङ्करणी। तरुणी। तलुनी॥ **यञश्च ४।१।१६॥** यञन्तात् प्रातिपदिकात् स्त्रियां ङीप्स्यात्। अकारलोपे कृते–**हलस्तद्धितस्य ६।४।१५०॥** हलः परस्य तद्धितयकारस्योपधाभूतस्य लोपः स्यात् ईति परे। गार्गी॥ **प्राचां ष्फ तद्धितः ४।१।१७॥** यञन्तात् ष्फो वा स्यात् स्त्रियां स च तद्धितः॥ **षिद्गौरादिभ्यश्च ४।१।४१॥** षिद्भ्यो गौरादिभ्यश्च स्त्रियां ङीष् स्यात्। गार्ग्यायणी। नर्तकी। गौरी। अनडुही। अनड्वाही। आकृतिगणोऽयम्॥

इति 'लवणाट्ठञ्' इति ठञि लावणिकान्ङीप्। **यादृशी**। यद्शब्दोपपदात् दृश्धातोः 'त्यदादिषु दृशोऽनालोचने कञ्च' इति कञि 'आ सर्वनाम्नः'- इत्याकारे दीर्घे यादृशशब्दान्ङीपि अलोपः। **इत्वरी**। इण्धातोः 'इण्नश्जिसर्तिभ्यः क्वरप्' इति क्वरपि 'ह्रस्वस्य पिति कृति तुक्' इति तुकि इत्वरान्ङीप्।

स्त्रैणी। स्त्रीशब्दात् 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इति नञि वृद्धौ णत्वे स्त्रैणशब्दान्ङीपि अलोपः। **पौंस्नी**। पुंसः स्नञि सस्य संयोगान्तलोपे वृद्धौ पौंस्नशब्दान्ङीप्। **शाक्तीकी**। शक्तिः प्रहरणमस्या इति विग्रहे शक्तिशब्दात् 'शक्तियष्ट्योरीकक्' इतीकक्प्रत्यये आदिवृद्धौ 'यस्येति च' इतीकारलोपे शाक्तीकशब्दान्ङीपि अलोपः। **आढ्यङ्करणी**। अनाढ्य आढ्यः क्रियते अनया इति विग्रहे आढ्यपूर्वात्कृञः 'आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्' इति ख्युन् प्रत्यये 'युवोरनाकौ' इति योरनादेशे गुणे रपरे णत्वे 'अरुर्द्विषदजन्तस्य मुम्' इति मुमि अनुस्वारे परसवर्णे आढ्यङ्करणशब्दान्ङीपि अलोपः।

गार्गी। गर्गस्यापत्यं स्त्रीति विग्रहे गर्गशब्दाद् 'गर्गादिभ्यो यञ्' इति यञि आदिवृद्धौ अलोपे गार्ग्यशब्दान्ङीपि अलोपे यलोपः। **गार्ग्यायणी**। गर्गस्यापत्यं स्त्रीतिविग्रहे गर्गाद् यञि गार्ग्यशब्दात्ष्फे फस्यायनि अलोपे णत्वे गार्ग्यायणशब्दान्ङीपि अलोपः।

नर्तकी। नर्तनं शिल्पमस्या इति विग्रहे नृत्धातोः 'शिल्पिनि ष्वुन्' इति ष्वुन्प्रत्यये वोरकादेशे लघूपधगुणे रपरे नर्तकशब्दान्ङीपि अलोपः।

वयसि प्रथमे ४।१।२०॥ प्रथमवयोवाचिनोऽदन्तात् स्त्रियां ङीप्स्यात्। कुमारी॥ **द्विगोः ४।१।२१॥** अदन्ताद्द्विगोर्ङीप्स्यात्। त्रिलोकी। अजादित्वात् त्रिफला। त्र्यनीका सेना॥ **वर्णादनुदात्तात्तोपधात्तो नः ४।१।३९॥** वर्णवाची योऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात्प्रातिपदिकाद्वा ङीप् तकारस्य नकारादेशश्च। एता, एनी। रोहिता, रोहिणी॥ **वोतो गुणवचनात् ४।१।४४॥** उदन्तात् गुणवाचिनो वा ङीष्स्यात्। मृद्वी, मृदुः॥ **बह्वादिभ्यश्च १।४।४५॥** एभ्यो वा ङीष् स्यात्। बह्वी, बहुः। (कृदिकारादक्तिनः[1])। रात्री, रात्रिः। (सर्वतोऽक्तिन्नर्थादित्येके[2])। शकटी। शकटिः॥ **पुंयोगादाख्यायाम् ४।१।४८॥** या पुमाख्या पुंयोगात् स्त्रियां वर्तते ततो ङीष्। गोपस्य स्त्री गोपी। (पालकान्तान्न)

अनडुही। अनडुहशब्दात् 'षिद्गौरादिभ्यश्च' इति ङीषि 'आमनडुहः स्त्रियां वा' इत्यामि यणि अनड्वाहीति। आमोऽभावेऽनडुहीति।

कुमारी। कुमारत्ववयोविशिष्टा स्त्रीतिविग्रहे कुमारशब्दान्ङीपि अलोपः। **त्रिलोकी**। त्रयाणां लोकानां समाहारः इति लौकिकविग्रहः। त्रि आम् लोक आम् इत्यलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इति समासे सुब्लुकि त्रिलोकशब्दान्ङीपि अलोपः। **त्रिफला**। त्रयाणां फलानां समाहार इति विग्रहे 'तद्धितार्थ' इति समासे सुब्लुकि 'अकारान्तोत्तरपद' इति स्त्रीत्वात् 'अजाद्यतष्टाप्' इति टापि सवर्णदीर्घः।

एता। एतवर्णविशिष्टा स्त्रीति विग्रहे चित्रवर्णवाचकाद् एतशब्दान्ङीपि तकारस्य नकारे अलोपे एनीति। ङीपोऽभावे टापि एतेति। **मृद्वी**। मृदुगुणविशिष्टा स्त्रीतिविग्रहे मृदुशब्दान्ङीषि यण्। **बह्वी**। बहुशब्दान्ङीषि यण्। **रात्री**। रा दाने' इतिधातोः 'राशदिभ्यां त्रिप्' इत्यौणादिके त्रिप् प्रत्यये रात्रिशब्दात् 'कृदिकारादक्तिनः' इति पाक्षिके ङीषि सवर्णदीर्घः। **गोपी**। गोपशब्दान्ङीषि अलोपः।

---

[1] कृतो य इकारस्तदन्तात्प्रातिपदिकात् ङीष् वा स्यात् न तु क्तिन्तन्नादित्यर्थः।

[2] इकारान्तप्रातिपदिकमात्रात् ङीष् वा स्यात् न तु क्तिन्नर्थकप्रत्ययान्तादित्यर्थः।

प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ७।३।४४॥ प्रत्ययस्थात्कात्पूर्वस्याकारस्येकारः स्यादापि स आप्सुपः परो न चेत् । गोपालिका । अश्वपालिका । सर्विका । कारिका । अतः किम्—नौका । प्रत्ययस्थात्किम्-शक्नोतीति शका । असुपः किम्—बहुपरिव्राजका नगरी (सूर्याद्देवतायां चाब्वाच्यः) । सूर्यस्य स्त्री देवता सूर्या । देवतायां किम्-(सूर्यागस्त्ययोश्छे च ङ्यां च) यलोपः । सूरी-कुन्ती । मानुषीयम् ॥ **इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ४।१।४९॥** एषामानुगागमः स्यात् ङीष् च । इन्द्रस्य स्त्री—इन्द्राणी । वरुणानी ।

सर्विका । सर्वशब्दात् टापि सवर्णदीर्घे 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इत्यकचि 'प्रत्ययस्थात्' इति ककारात्पूर्वस्याकारस्य इत्वम् । कारिका । कृधातोर्ण्वुलि 'युवोरनाकौ' इति वोरकादेशे 'अचो ञ्णिति' इति वृद्धौ रपरत्वे कारकशब्दात् टापि इत्वम् ।

नौका । नौरेवेतिविग्रहे नौशब्दात्स्वार्थे कप्रत्यये टाप् । 'प्रत्ययस्थात्' इति सूत्रे अत इत्यस्याभावे नौकेत्यत्रापीत्वं स्यादतस्तदावश्यकम । शका । शक्लृ शक्तौ 'इत्यस्मात् 'नन्दिग्रहि' इति पचादित्वादच्प्रत्यये टाप् । सूत्रे प्रत्ययस्थाद्ग्रहणाभावेऽत्रापीत्वं स्यादतस्तदावश्यकम् । कृते तु तस्मिन् प्रत्ययककाराभावात् अत्र कात्पूर्वस्याकारस्य नेत्त्वम् ।

वहुपरिव्राजका । वहवः परिव्राजकाः यस्यामितिविग्रहे वहुव्रीहिसमासे सुब्लुकि टाप् सर्णदीर्घः । 'प्रत्यस्थात्' इति सूत्रे असुपः इत्यस्याभावेऽत्रपीत्त्वं स्यात् । कृते तस्मिन् टापः प्रत्ययलक्षणेन सुपः परत्वान्नेत्त्वम । सूरी । सूर्यस्य स्त्रीति विग्रहे सूर्यशब्दात् 'पुंयोगादाख्यायाम' इति ङीषि 'यस्येति च' अलोपे 'सूर्यागस्त्ययोश्छे च ङ्यां च' इति यलोपः । 'सूर्याद्देवतायाम् चाप्' इतिवार्तिके देवतायामित्यस्याभावे अत्रापि चाप्प्रत्ययः स्यात् । कृते तस्मिन् इयं कुन्ती मानुषी न तु देवता केवलं सूर्यसम्बन्धात्सूर्यस्त्री इति न सूर्यशब्दादत्र चाप्प्रत्ययः ।

इन्द्राणी । इन्द्रस्य स्त्रीतिविग्रहे इन्द्रशब्दात् 'इन्द्रवरुण' इतिङीपि

भवानी । शर्वाणी । रुद्राणी । मृडानी । (हिमारण्ययोर्महत्त्वे) । महद्धिमं हिमानी । महदरण्यमरण्यानी । (यवाद्दोषे) । दुष्टो यवो यवानी । (यवनाल्लिप्याम्) । यवनानां लिपिर्यवनानी । (मातुलोपाध्याययोरानुग्वा) । मातुलानी, मातुली । उपाध्यायानी, उपाध्यायी । (आचार्यादणत्वं च) । आचार्यस्य स्त्री–आचार्यानी । (अर्यक्षत्रियाभ्यां वा स्वार्थे) । अर्याणी, अर्या । क्षत्रियाणी, क्षत्रिया ॥ **क्रीतात्करणपूर्वात्** ४।१।५०॥ क्रीतान्ताददन्तात् करणादेः स्त्रियां ङीष् स्यात् । वस्त्रक्रीती । क्वचिन्न । धनक्रीता । **स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्** ४।१।५४॥ असंयोगोपधमुपसर्जनं यत् स्वाङ्गं तदन्ताददन्तात् ङीष् वा स्यात् । केशानतिक्रान्ता- अतिकेशी, अतिकेशा । चन्द्रमुखी, चन्द्रमुखा । असंयोगोपधा-

आनुगागमे च अनुबन्धलोपे सवर्णदीर्घे णत्वे सोर्लोपः ।

वस्त्रक्रीती । वस्त्रेण क्रीता इति विग्रहः । वस्त्र टा क्रीत इत्यलौकिकविग्रहे 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः' इति परिभाषया सुबुत्पत्तेः पूर्वं 'कर्तृकरणे कृता बहुलम्' इति समासे सुब्लुकि ङीषि अल्लोपः । **क्वचिन्नेति** । 'कर्तृकरणे कृता बहुलम्' इत्यत्र बहुलग्रहणात् 'गतिकारकोपपदानाम्' इत्यस्य क्वचिदप्रवृत्त्या सुबन्तेन समासः । तत्र सुपः प्रागेवान्तरङ्गत्वाट्टाप् । तथा च धनक्रीतेत्यत्र धन टा क्रीता सु इति विग्रहे समासे सुब्लुकि अदन्तत्वाभावान्न ङीष् ।

अतिकेशी । केशानतिक्रान्तेति लौकिकविग्रहः । केश शस् अति इति विग्रहे 'अत्यादयः' इति समासे सुब्लुकि अतिकेशशब्दान्ङीषि अल्लोपः । पक्षे टाप् सवर्णदीर्घः । **चन्द्रमुखी** । चन्द्र इव मुखं यस्या

---

१ अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम् ।
अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथायुतम् ॥ इति त्रेधा स्वाङ्गम् । अद्रवम्–द्रवरहितम् मूर्तिमत्–स्पर्शवद् द्रव्यपरिमाणं मूर्त्तिः तद्वत् प्राणिस्थम्–प्राणिनि विद्यमानम् अविकारजं-रोगादिविकारानुत्पन्नं यत् तत्प्रथमं स्वाङ्गम् । अतत्स्थं–प्राणिनि अविद्यमानम् तत्र प्राणिनि दृष्टं यत् तद् द्वितीयं स्वाङ्गलक्षणम् । तेन–प्राणिस्थेन स्तनादिना

त्किम् । सुगुल्फा । उपसर्जनात्किम् । शिखा ॥ **न क्रोडादिबह्वचः ४।१।५६॥** क्रोडादेर्बह्वचश्च स्वाङ्गान्न ङीष् । कल्याणक्रोडा । आकृतिगणोऽयम् । सुजघना ॥ **नखमुखात्संज्ञायाम् ४।१।५८॥** न ङीष् ॥

इति विग्रहे 'अनेकमन्यपदार्थे' इति समासे सुब्लुकि ङीषि अलोपः । पक्षे टाप् दीर्घः ।

सुगुल्फा । शोभनौ गुल्फौ यस्या इति विग्रहे समासे सुब्लुकि टापि दीर्घः । 'स्वाङ्गात्' इति सूत्रेऽसंयोगोपधग्रहणाभावे अत्रापि ङीष् स्यादतस्तदावश्यकम् ।

शिखा । 'शीङ् स्वप्ने' इत्यस्मात् 'शीङो ह्रस्वश्च' इत्युणादिसूत्रेण खे ईकारस्य ह्रस्वे च शिखशब्दाट्टाप् । 'स्वाङ्गात्' इत्यत्रोपसर्जनग्रहणाभावेऽत्रापि ङीष् स्यात । सुशिखा इतिपाठः प्रामादिकः टाबन्तेन समासे अदन्तत्वाभावादेव ङीषोऽप्रवृत्तेः ।

कल्याणक्रोडा । अश्वानामुरः क्रोडा । कण्याणी क्रोडा यस्या इति विग्रहे समासे सुब्लुकि 'स्त्रियाः पुंवद्भाषित' इति कल्याणी शब्दस्य-पुंवद्भावे 'एकविभक्ति' इत्युपसर्जनत्वात् 'गोस्त्रियोरुपसर्जनस्य' इति क्रोडाशब्दस्य ह्रस्वे ङीषो निषेधात् टाप् ।

सुजघना । शोभनं जघनं यस्या इति विग्रहे समासे सुब्लुकि

तत्–प्रतिमादि तथा–प्राणिद्रव्यसदृशं युतं-संबद्धं चेद्-यदि तदा तत्स्तनादिकम् अप्राणिनोऽपि स्वाङ्गम् इति तृतीयम् ।

१ आकृतिग्रहणा जातिः लिङ्गानां च न सर्वभाक् ।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥ इति त्रेधा जातिः । एकाकारप्रतीतिविषया जातिः इति प्रथमलक्षणम् । यथासर्वेषु घटेषु अयं घट इत्येकैव प्रतीतिर्जायते इति घटशब्दो जतिवाचकः । असर्वलिङ्गत्वे सति एकस्यां व्यक्तौ कथनाद्व्यक्त्यन्तरे कथनं विनापि सुज्ञेया जातिः इति द्वितीयं लक्षणम् । यथा वृषलशब्दो न सर्वलिङ्गस्तस्य एकस्यां व्यक्तौ अयं वृषल इति कथनाद् व्यक्त्यन्तरे तत्पुत्रादिषु वृषलोऽयमितिकथनं विनापि वृषलत्वज्ञानाद् वृषलशब्दो जातिवाचकः । अपत्यप्रत्ययान्तः औपगवादिशब्दः, शाखाध्येतृवाची कठादिशब्दश्च जाति कार्यं लभते ।

पूर्वपदात्संज्ञायामगः ८।४।३॥ पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात् संज्ञायां न तु गकारव्यवधाने । शूर्पणखा । गौरमुखा । संज्ञायां किम्—ताम्रमुखी कन्या ॥ **जातेरस्त्रीविषयादयोपधात् ४।१।६३॥** जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात् । तटी । वृषली । कठी । वह्वृची ॥ जातेः किम्—मुण्डा । अस्त्रीविषयात्किम्—वलाका । अयोपधात्किम् क्षत्रिया । (योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः) । हयी । गवयी । मुकयी । हलस्तद्धितस्येति यलोपः ।

सुजघनशव्दात् 'स्वाङ्गाच्चोपसर्जनाद्' इति ङीषि प्राप्ते 'न क्रोडादिवह्वचः' इति तन्निषेधे टाप् । शूर्पणखा । शूर्प इव नखं यस्या इति विग्रहे समासे सुव्लुकि 'स्वाङ्गात्' इति प्राप्तस्य ङीषो 'नखमुखात्संज्ञायाम्, इति तन्निषेधे टापि णत्वम् । तटी । तटत्वजातिविशिष्टा स्त्रीति विग्रहे तटशव्दान्ङीषि अलोपः ।

वृषली । वृषलत्वजातिविशिष्टा स्त्रीति विग्रहे वृषलशव्दान्ङीषि अलोपः । कठी । कठेन प्रोक्तमधीयाना इति विग्रहे कठशव्दात् 'कलापिवैशम्पायनान्तेवासिभ्यश्च' इति णिनिः तस्य 'कठचरकाल्लुक्' इति लुक् । ततः 'तदधीते तद्वेद' इत्यण् तस्य 'प्रोक्ताल्लुक्' इति लुक् ततो ङीष् अलोपः ।

वह्वृची । वह्वयः ऋचोऽध्येतव्या यया इति विग्रहे समासे सुव्लुकि यणि 'ऋक्पूरव्धूः पथामानक्षे, इत्यचि ङीषि अलोपः ।

मुण्डा । मुण्डशव्दात् टापि सवर्णे दीर्घः । सूत्रे जातिग्रहणाभावेऽत्रापि ङीप् स्यात् । सति तु तस्मिन् मुण्डशव्दस्य जातिवाचकत्वाभावान्न ङीप् ततः टाप् । वलाका । वलाकशव्दात् टाप् दीर्घः । 'जातेरस्त्री' इति सूत्रे अस्त्रीविषयादित्यस्याभावेऽत्रापि ङीष् स्यात् । सति तु तस्मिन् वलाकाशव्दस्य नियतस्त्रीविषयत्वान्न ङीष् ततः टाप् ।

हयी । हयत्वजातिविशिष्टा स्त्रीति विग्रहे हयशव्दात् योपधत्वात्

मनुषी (मत्स्यस्य ङ्याम्) यलोपः । मत्सी ॥ **इतो मनुष्यजातेः ४।१।६५॥** ङीष् । दाक्षी ॥ **ऊङुतः ४।१।६६॥** उदन्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात् । कुरूः । अयोपधात्किम्—अध्वर्युः ब्राह्मणी ॥ **पङ्गोश्च ४।१।६८॥** पङ्गूः ॥ (श्वशुरस्योकाराकरलोपश्च) । श्वश्रूः ॥ **ऊरूत्तरपदादौपम्ये ४।१।६९॥** उपमानवाचिपूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् स्यात् । करभोरूः ॥ **संहितशफलक्षणवामादेश्च ४।१।७०॥** अनौपम्यार्थं सूत्रम् । संहितोरूः । शफोरूः । लक्षणोरूः । वामोरूः ॥ **शार्ङ्गरवाद्यञो ङीन् ४।१।७३॥** शार्ङ्गरवा-

---

'जातेरस्त्री' इति ङीषः अप्राप्तौ 'हयगवय' इतिवार्तिकवलान्ङीषि अलोपः ।

मनुषी । मनुष्यत्वजातिविशिष्टा स्त्रीति विग्रहः । मनुशब्दात् 'मनोर्जातावञ्यतौ षुक् च' इति यत्प्रत्यये षुगागमे च मनुष्यशब्दात् 'हयगवय' इति वार्तिकबलात् 'जातेरस्त्री' इति ङीषि 'यस्येति च' इत्यलोपे 'हलस्तद्धितस्य' इति यलोपः ।

मत्सी । मत्स्यत्वजातिविशिष्टा स्त्रीतिविग्रहे मत्स्यशब्दात् 'हयगवय' इति वार्तिकबलात् 'जातेरस्त्री' इति ङीषि अलोपे 'मत्स्यस्यङ्याम्' इति यलोपः ।

दाक्षी । दक्षस्यापत्यं स्त्रीतिविग्रहे दत्तशब्दाद् 'अत इञ्' इति इञि अलोपे 'तद्धितेष्वचामादेः' इत्यादिवृद्धौ दाक्षिशब्दाङीषि 'यस्येति च' इतीकारलोपः । **कुरूः** । कुरोरपत्यं स्त्रीतिविग्रहे कुरुशब्दात् 'कुरुनादिभ्यो ण्यः' इतिण्यप्रत्यये तस्य 'स्त्रियामवन्तिकुन्तिकुरुभ्यश्च' इति लुकि अपत्यप्रत्ययान्तत्वेन जातिवाचकात् कुरुशब्दादूङि सुः ।

श्वश्रूः । श्वशुरस्य स्त्रीति विग्रहे श्वशुरशब्दात् 'पुंयोगादाख्यायाम्' इति ङीषि प्राप्ते 'श्वशुरस्योकाराकारलोपश्च' इति ङीष् उकाराकारयोर्लोपः

करभोरूः । करभाविव ऊरू यस्या इति विग्रहे समासे सुब्लुकि गुणे करभोरुशब्ददूङ् ।

शार्ङ्गरवी । शृङ्गरोरपत्यं स्त्रीति विग्रहे शृङ्गरुशब्दादपत्येऽणि

देरञो योऽकारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात्। शार्ङ्गरवी। बैदी। ब्राह्मणी। (नृनरयोर्वृद्धिश्च)। नारी॥ **यूनस्तिः ४।१।७७॥** युवञ्छब्दात् स्त्रियां तिः प्रत्ययः स्यात्। युवतिः॥

इति स्त्रीप्रत्ययाः।

शास्त्रान्तरे प्रविष्टानां बालानां चोपकारिका॥
कृता वरदराजेन लघुसिद्धान्तकौमुदी॥ १॥

इति श्रीवरदराजकृता लघुसिद्धान्तकौमुदी समाप्ता॥

* * *

आदिवृद्धौ रपरे 'ओर्गुणः' इति गुणेऽवादेशे शारङ्गरवशब्दात् 'टिड्ढाणञ्' इति ङीपं बाधित्वा 'जातेरस्त्री' इति ङीषि प्राप्ते ङीनि अलोपः। बैदी। बिदस्यापत्यं स्त्रीति विग्रहे बिदशब्दात् 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' इति अञि आदिवृद्धौ अलोपे बैदशब्दात 'टिड्ढाणञ्' इतिङीपं बाधित्वा 'जातेरस्त्री' इति ङीषि प्राप्ते ङीनि अलोपः।

नारी। नृशब्दात् 'ऋन्नेभ्यो ङीप्' इति ङीपं बाधित्वा ङीनि वृद्धौ रपरत्वम्। नरशब्दात्तु 'जातेरस्त्री' इतिङीषं बाधित्वा ङीनि वृद्धौ रपरे अलोपः।

युवतिः। युवन्शब्दात् तिप्रत्यये 'स्वादिषु' इति पदत्वान्नलोपः।

इति स्त्रीप्रत्ययाः॥

कृता मया सम्प्रति काशिकायां विद्यार्थिवृन्दाखिलसौख्यदात्री।
प्रीत्यै च भूयात्परमेश्वरस्य सटिप्पणा बालमनोरमेयम्॥ १॥
गुणाङ्कनवभूवर्षे वैक्रमे गुरुवासरे।
माघासितद्वितीयायां टीकेयं पूर्णतामगात्॥ २॥

इति श्रीसूर्यनारायणशुक्लकृता बालमनोरमा समाप्ता॥

* * *

अथ शुद्धिपत्रम्

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
२	२१	स्वौजमौट्	स्वौजसमौट्
२	२७	जे	जो
९	७	सञ्ज्ञं	संज्ञं
९	९	ऽन्तरा	ऽनन्तरा
९	१८	वर्णानां	वर्णानां
१४	२५	वाधको	वोधको
१५	९	चीत्यत	चीत्यतः
१५	११	वर्त्तिन	वर्त्तिनः
१५	२०	रोत्तरवर्त्तिन	रोत्तरवर्त्तिनः
१६	२१	सूत्रार्थ	सूत्रार्थः
१८	१०	कण्ठौष्ठ	कण्ठोष्ठ
२३	११	ऋकारात्	ऋकारात्
२३	११	होत्तृकारं	होतृकार
२४	५	चैडन्तस्य	चैडन्तस्य
३५	७	टकारा	डकारा
३५	९	टकारस्य	डकारस्य
३५	२३	ष्टना	ष्टुना
३९	२	महाप्राणस्य तादृशः	महाप्राणस्य हस्य तादृशः
३९	१५	श्चत्वें	श्चत्वेंन
४५	४	शंसयप्राप्तौ	संशये
४५	५	भायाष	भाषया
४५	९	टीकतौ	टकितौ
४५	११	वयवाचिनौ	वयववाचिनौ
४७	१२	योरकारेण	योरीकारेण
४७	२६	पर्वस्य	पूर्वस्य
४८	११	सिध्द्यति	सिध्यति
४८	१३	पूर्वस्यत्य	पूर्वस्येत्य

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
४९	२१	छ्राव	छवि
५०	१९	नॄँᳶपाहि	नॄंᳶपाहि
५३	७	एडः	एङः
५३	१०	ति	इति
५४	१९	अघोपूर्वस्य	अघो अ पूर्वस्य
५४	२३	अहन्-अहन्	अहन्-अह
५५	९	ढूलोप	ढलोप
५६	६	प्रयागेयो	प्रयोगयो
५६	९	हशिचत्यु	हशिचेत्यु
५६	१७	वधित्वा	वाधित्वा
६२	११	च परत्वात्	च प्राप्ते परत्वात् ।
६४	२६	न माभू	न भाभू
७३	८	हे सर्वाः	हे सर्वे
७३	१७	विश्वाः	विश्वे
७५	१७	त्वभ्याम्	त्वाभ्याम्
७८	१३	पूर्वसर्वणः,पूर्वसवर्ण	पूर्वसवर्णः,इति पूर्वसवर्णं
८१	१०	नेमे इत्यस्य	नेम इत्यस्य
८७	२०	हाह	हाहै
९८	२१	अधिक्लतं	अधिकृतं
१०६	९	सुलोपे ह्रस्वे विसर्गे	सुलोपे विसर्गे ।
१०८	११	अकारैकादेशे गाम्	अकारैकादेशे पूर्वरूपे गाम्
१०८	१३	देशे ह्रस्वे	देशे दीर्घे ह्रस्वे ।
११२	२६	उत्तरपूर्वायै	द्वितीयायै
१२५	११	नुटं पूर्वविप्रतिषेधात्तृज्वद्भावं च वाधित्वा	नुटं वाधित्वा
१३१	१२	दुध इति	दुघ इति
१३१	१८	घत्वें	घत्वे
१३२	४	धुक् । दुह	ध्रुक् । द्रुह्
,,	१४	चत्व	चत्वें
,,	२२	द्रहः	द्रुहः

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
१३४	२१	अनड्हशब्दाद्	अनडुहशब्दाद्
१३६	१०	हे सदिवः	हे सुदिवः
,,	१२	दन्त्यादचः	दन्त्यादचः
१३९	१६	विकांरे	विकारे
१४२	२४	यज्वम्यः	यज्वभ्यः
१४३	६	ति	इति
१४४	७	घिण्यतो:	घिष्ण्यतोः
१४४	१३	वृत्रहणौः	वृत्रहणौ
१४४	१७	इत्यनु	इत्यनु
१५३	२४	तयाः	तयोः
१५७	१३	युष्महस्म	युष्मदस्म
१५८	१७	दस्मदोरित्य	दस्मद्भ्यामित्य
१६०	२४	वस्त्रसौ	वस्नसौ
१६१	८	यस्य	यस्मिन्
१६४	८	लोपे 'अचः	लोपे नलोपे 'अचः
१६७	२	उमे	उभे
१७०	१४	कुत्वने	कुत्वेन
१७१	१०	घुडागमे	धुडागमे
१७१	२१	वांरुप	वोंरुप
१७२	१३	इत्पा	इत्या
१८०	२६	स्याः	स्या
१८१	१२	अपोभिः	अपोभि
१९१	२२	वजने	वर्जने
१९६	२३	धम्	ध्वम्
१९९	२२	प्रथम	प्रत्यय
२०६	१७	लुप्तषष्ठ्यन्तम	लुप्तप्रथमान्तम्
२०७	१४	स्तवानी	स्तवावे
२०८	११	षत्वे	णत्वे
२०८	२४	म	मैं
२१०	१	लापः	लोपः

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
२१५	१९	धातौ:	धातो:
२१९	१७	पोऽभाव	पोऽभावे
२२३	७	चरादिः	चुरादिः
२२३	८	न	नृ
२२४	११	च्ला	च्लौ
२२६	१३	आंधधा	आर्धधा
२२८	१७	क	के
२३८	१२	वतेत	वर्तते
२४२	१०	अतो	आतो
२४२	१८	एधा	एधो
२४३	२५	एलो	एधो
२४४	११	लोपे इति	लोप इति
२४५	१९	एधोर्लङ	एधोलङ
२४६	१९	आदि	आटि
२४८	१८	इत्यतोप	इत्यतो
२५२	२५	श्रिश्रिये, श्रियिवहे	शिश्रिये, शिश्रियिवहे
२५५	१४	प्यड:	प्यङः
२५६	१४	इकारलोये	इकारलोपे
२५६	पृष्टस्था टिप्पणी	२५३ पृष्ठे वोध्या ।	
२६७	१९	अटि	आटि
२७२	२३	दित्वे	द्वित्वे
२७७	२३	जहा	जहौ
२७८	१४	मिर्माते	मिमीते
२८२	११	काय	कार्ये
२८५	४	षोष्टा	पोष्टा
२८६	१५	लङ्स्ति	लुङ्स्ति
२८७	२२	पिप्य	पिप्ये
२८९	८	लङ्स्ति	लुङ्स्ति
२८९	१९	अनद्ध्यम्	अनद्ध्वम्
२९२	२६	अताात्ताम्	अतौत्ताम्

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
३०४	२१	युनज	युनजै
३१२	२३	तस्तभे	तस्तम्भे
३१३	१५	व्यष्टभीदिति,	व्यष्टभदिति
३१३	१६	अस्तम्भ	अस्तम्भी
३२३	२३	एशि	एत्वे
३३१	६	स्वात्	स्यात्
३३६	१०	कतृर्तृत्वेन	कर्तृत्वेन
३३८	११	६८	११३
३३९	१०	लघूपध गुणे,	सार्वधातुक गुणे
३३९	१२	लघूपध गुणे	सार्वधातुक गुणे
३४०	११	मजधातोः	मृजधातोः
३५३	११	ष्त्वे	ष्टुत्वे
३५७	१३	गुणानषेधे	गुणानिषेधे
३७१	१	१७	५७
३८७	४	पत्थवत्	पत्यवत्
४०३	६	पदवृद्धा	पदवृद्धौ
४०३	१२	शनिच	शतिच
४१६	१९	दीघ	दीर्घे ।

इति शम् ।

आम्नाय–ग्रन्थालय,
भरतनिधि, करौंदी
वाराणसी-5

* * *

१- वत्-प्रत्ययः (५।१।११५) पृ. ४०८
२ त्व-तल् - पृ. ४०४
३- अण् (भावे) ५।१।१२९।। पृ. ४०५ | स्वार्थे अण् ६९५
४- ष्यञ्-४०५
५. य - ४०५
६- ठक् - ४०५
७- यक् ४०५
८- उ (३।२।१६८) पृ. ३४६,
९. क्यप्-पृ. ३२५

१०. अण्- समूह अर्थ में -३६०
११. मात्र-प्रत्यय-४०६,
१२- इमनिच् - ४०४
१३

१. छिन्नमस्ता व्यनुबन्धकत्व सामर्थ्यात्॥
(६।४।१४६) भाष्यवार्तिकम्। पृ. १२२

२. "अजपि सर्वधातुभ्यः" (भा. वा. (३।१।१३४)

३- तद्राजस्य बहुषु तेनैवास्त्रियाम्॥२।४।६२॥ ३५८

४- वोढा - वक्ष्यति - अवाक्षीत् - २५६

५- चोक्ष्यति - अचुक्षत् - २६८ - २६९

६- हे धान्ति हे धाते: - पृ. १२८

७ हे धाते: - पृ. १०६

८- जागन्ताह् - ३४९

९ - प्राचुर्येऽर्थे मयट् - ५।४।२१॥ - पृ. ४१४
गुणस्य निमाने मयट्॥ ५।२।४७॥
✓ तत आगतेऽर्थे मयट् ॥४।३।८२॥ पृ. ३५०
✓ विकारावयवयोः अर्थयोः - मयट् ॥४।३।१४०
पृ. ३९९

१० - तुल्येऽर्थे वत् ॥५।१।११४।५।१।११५॥
इवार्थे वत् ॥५।१।११५॥

११- अस्य इति अस्मिन्निति अर्थे मतुप्॥५।२।
९४॥

१२ - सैनापत्यम् - पौरोहित्यम् - ४०५

१३ - पाश्चात्य-त्यः पृ. ३६४

१४ "श" प्रत्ययः - ५।२।१००॥ पृ. ४०२
शस् प्रत्ययः - ५।४।४३॥ पृ. ४१५

१५ - गतिकारकोपपदानां कृद्भिः सह समास
वचनं प्राक्सुबुत्पत्तेः॥ परिभाषा - ७५॥ पृ. ३७२

१६ - उत्तरपदलोपः - पृ. ३७६

१६ - [illegible] - ३२४ - ४६ - [illegible] पर्वयः।३।२।३६॥

१७ - अमार्ग - ३३१
१८ - अद्यापि ३२४
१९ - अभाजि - अभाजि
३३५
२० - भाविता भाविता -
[३२१
२१ - भाविता भावयिता -
३३३
२२ - चक्राणः - ३४८
२३ - [illegible] /३००
२४ - [illegible] /३८८
२५ - [illegible] /३५६
२६ सा [illegible] /३३०
२७ - [illegible] - [illegible]
२८ - मधुप - ४०८
२९ - [illegible] - ४०८
३० - अजागे, अजादि -
[३२८
३१ - अभीक्ष्णम [illegible]
३३ [illegible] - ३४०
३४ - [illegible] - ३५०
३५ - [illegible] - ३५५
३६ - [illegible]
३७ - त्वा॥ - ३।४।
५६॥३।४।६०॥३।४।६१
३।४।६२॥६३।६४।
७।१।७६॥
३८ - [illegible] - ३५५
३९ - धातुं [illegible]
[illegible] - ३३६
४० - [illegible] - ४१६
४१ - सौ[illegible] - ४१८
४२ - त्रिलोकी - [illegible]
४३ - गोपय मास
४४ - प्रियात् - ३५४ (किमन्ते)
४५ - [illegible]

४७ - [illegible]कीताः - ३६५ [४०६
४८ - मासकीनः - ३६५
४९ - [illegible] - ३६८
५० - [illegible] - पृ. ३३२
५१ - [illegible] - ३८९
५२ - [illegible] - २२२
५३ - विभाषा स्वौति कारन्यें॥
३।४।५२॥ = स्वादु - ४१५
५४ - [illegible] - ४०९
५५ - अङ्गा - ४०९
५६ - [illegible] - ४०९
५७ - [illegible] - २८५ - ३८१
५८ - [illegible] - ४१५
५९ - [illegible] - ३।१।४।३५
६० - [illegible] - ३५८
६१ - [illegible] - ४१५
६२ - लोमशः - ४०८
६३ - भूतपूर्वः - २६२
६४ - पायमायम् - ३५८
६५ - अन्यथाकारम् - ३५८
६६ - [illegible] - ४१२
६७ - [illegible] - ३६४
६८ अंबरिमवत् - ३१
६९ - शीर्षः - ३४६
७० - प्रकरण - ३४८
७१ - [illegible] - ४१२
७२ - [illegible]
७३ - [illegible] - ४१२
७४ - [illegible] - ३८२
७५ - [illegible] - ४१०
[illegible] - ४०२

समास — पृ — ३६२।

1- आत्मगामी क्रियाफल जहाँ ~~क~~
हो वहाँ आत्मनेपद। और-
जहाँ परगामी क्रियाफल हो
वहाँ परस्मैपदी प्रत्यय। यह
प्रति उभयपदों में उठता है

२. अवतिष्ठते - पृ. २१८

२- कार्ष्णायसम्
कार्षिकमाणम् } पृ. २४६

३- गार्गी - ४१८ गर्दभम् - १४, ३८३

४- कार्यम् । ३४०

५ — दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः ॥२०८॥ दुर्भणति।

६- अन्तश्शब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम् ॥ अन्तर्भणति ॥ पृ. २०८

७ - अट् का आगम - वह उदात्त ॥६।४।७१॥ पृ. २०९

८ - आजिह्मपत् - ३२०

९ - उष्ण भोजी - णिनि प्रत्यय ॥ ३।२।७८ ॥ पृ. ३४५

१० च्वि - "कृभ्वस्तियोगे" ॥ ५।४।५०॥ पृ. ७४५॥

१)- आजिह्मपात् ॥ पृ. ३२०

२- सेपील् ॥ २९८

तन्, पृ. ३४६
मिनक् - विनकः

१३ — [illegible] (चङ्) — पृ. २३६

१४ - नाहक - १६८ ॥ नाकरसः ॥ असमाहारः

१५ - स्थापयति [illegible] - पृ. ३२०

गला प्र०
नाओं प्र
बड़ नाप्र.
बड़ बुन्द प्र
५- गाअध्या
६- कपूवास
७- आत्मजो
८ पटरनैप
९ श्री भाव
१०- कर्मभू
११- प्रेकाय
१२- कुदना
१३- पूर्वक्रिद
१४- उगाद
१५- उत्तर
१६- विमल
१७ समाप
गार्य
१- अदम
२- चन्दुर
३- खहु
४- दून
५. सुम
१८ तांड़ित
१- साध
२- अप
३- बाल
४- श्रीम
५- विकार
६- छंगा
७- मदी
८- धना
९- ६
१०- ६
-मन.
२- म

ठी

JAG

• A C •

© [

CC0. In Public Domain. Digitization by eGangotri